वेदनिधि ग्रन्थमाला ...310DV

# सामवेदीय

# अष्ट ब्राह्मणानि

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

अवधूत दत्तपीठम्

श्रीगणपति सच्चिदानन्द आश्रमः, दत्त नगरम्

मैसूरु 570025

वेदनिधि ग्रन्थमाला – 310DV

# सामवेदीय ताण्ड्यादि अष्टब्राह्मणानि

Editorial Committe
Lead Scholar - 1) Vidwan **S Sundara Ram Srouti**,
**Datta Peetha Aasthaana Vidwan - Vijayawada**
**2) Sri HN Rajesha Shastry, Mysore (SVAMI)**
**3) Sri Chaitanya Kumar Koheer, Mysore (SVAMI)**
**4) Sri Vijaya Kumar Sharma, Varanasi**

**Chief Editor**
**Dr.Vamshi Krishna Ghanapathi, Director - SVAMI**
© May 2017

Printed by
**Ma Prints,** Bengaluru

**Published - SVAMI**
**SGS VedaNidhi Academy & Masters' Institute**
**Avadhoota Datta Peetham**
**Sri Ganapathy Sachchidananda Ashrama**
Datta Nagara, Ooty Road, Mysore 570025 India
**Email - veda@dattapeetham.com**
Website - www.vedanidhi.in/books



अवधूत दत्तपीठाधीश्वराणां जगद्गुरूणां परमपूज्यानां

## श्री श्री श्री गणपति सच्चिदानन्द स्वामिश्रीचरणानां

# आविष्कार वचांसि

**।। नमो ब्रह्मणे धारणं मे अस्त्वनिराकरणम् ।।**

महतां सज्जनानां सम्पत्तिः - ऋचः, यजूंषि, सामानि, तद्विनियोजकानि प्रख्यापकानि ब्राह्मणवाक्यानि - इति श्रुतिः ब्रवीति। तथाविध सम्पत्तिमन्तः नैके महान्तः श्रोत्रियाः ब्रह्मनिष्ठागरिष्ठाः शब्दब्रह्मोपासनधुरीणाः वर्षेऽस्मिन् भारते राराजन्ते स्म। ऋषिकल्पानां तादृशां महतां परम्परा अद्यापि प्रकर्षेण वर्तते, यस्याः परिपोषणाय छात्राणामधीतिः निदानमास्ते। तदधीत्यै उपकुर्वन्ति महान्ति उपकरणानि बहूनि वर्तन्ते, यदन्यतमं पुस्तकजातम् - इति सम्प्रति वैदिकलोकः गाढं विश्वसिति।।

आचार्योपदिष्टानि वेदवाक्यानि समामनन्तः छात्राः, स्वेषामध्ययनाय मुद्रितग्रन्थानेव सर्वधा आद्रियन्ते। अतः गुरुणा उपदिष्टान्, उपदेष्टव्यान्, विकार- लोप- आगम- आदेशात्मकान विषयान् सङ्कलय्य मुद्रापितो वेदग्रन्थः, नितरां छात्रोपकाराय कल्पते। तथा च मन्त्रसम्बन्धि ऋषि-च्छन्दो- दैवत-विनियोग-प्रकरणादिकं तत्तद्देशेषु निविष्टं सत्, पाठकेषु सुकृतं सम्पादयेत्।

एवंविधग्रन्थसहायेन अध्ययनसम्पत्त्या समासादितयशसः संसाधितपरमेश्वरानुग्रहाः भूयासुरिति सङ्कल्पः दत्तगुरोरनुग्रहेण पूर्वं समजनि। तदीयमहितकृपावशेन, सद्यः अस्माकं दत्तपीठस्य वेदनिधिबृन्दः पूर्वोदित-बह्वंश-कलितं वेदग्रन्थसमुदायं प्रकाशयतीति महान्तमानन्दमनुबोभूयामहे।

तदस्य ग्रन्थजातस्य पठनेन, अधीयाना अपि भूयिष्ठानन्दभाजस्सन्तः, शब्दब्रह्मोपासनधुरं ससुखं वहन्तः श्रेयसे पारयेयुरिति श्रीदत्त सद्गुरुं प्रार्थयामहे।

प्रायेण संवत्सराष्टकात् सञ्चलतः वेदग्रन्थप्रकाशनस्य आविष्कृतिरूपा समुद्गतिः महत्यस्मिन् वज्रोत्सवे विधीयत इति विषयं, दत्तगुरोः समधिकवरिवस्याफलत्वेन सम्भावयामः। महतोऽस्मात् वज्रोत्सवादारभ्य वैदिकलोकः निरायासं निश्शुल्कं ग्रन्थजातमिदं (अन्तर्जालात्) वेदनिधि निवेशनात् (वॆब्सैट् द्वारा) प्राप्नुवन्तु - इति श्रीदत्तस्मरणपूर्वकं समाशास्महे।

शेवधिर्यः पुमर्थानां षडध्वातीत विग्रहः।
राद्धान्तो निगमार्थानां प्रसद्यात् दत्तसद्गुरुः।।

# विज्ञापनम्

**विद्वान् वंशीकृष्ण घनपाठी**

**निर्देशकः - वेदनिधि प्रकाशनम्**

सर्वेषु मन्त्रेषु साम्नां वैलक्षण्यं वर्तत इति विदिततममेव। यथा साम्नां वैलक्षण्यं वर्तते, तथैव तद्विधायकानां तदुपबृंहकानां तद्विनियोजकानाञ्च ग्रन्थानामपि तदितरवेदग्रन्थवैलक्षण्यमुपपन्नमेव। सङ्ख्याबाहुल्येन वा विषयप्रतिपादकत्वेन वा विस्तरत्वाद्वा पूर्वोक्तं वैलक्षण्यमिति विरलेषु वैदिकेषु प्रसिद्धम्। परन्तु बह्वृच याजुष आथर्वणिक ब्राह्मणेष्विवि बहुत्र मन्त्राणां संहितायनाम्नातानां पाठो विदुषां दृष्टिमवश्यमाकृषति। तैत्तिरीयब्राह्मणवत् मन्त्रेणैव ग्रन्थस्यास्य प्रारम्भो भवतीति, तच्च ब्रह्मप्रतिपादकतया प्रशस्यत इति पश्यामः।

**अष्टौ हि ब्राह्मणा ग्रन्थाः प्रौढं ब्राह्मण.मादिमम्।**

**षड्विंशाऽऽख्यं द्वितीयं स्यात्- तत.स्सामविधि.र्भवेत्।।**

**आर्षेय.न्देवताऽध्यायो- भवे.दुपनिषत् ततः।**

**संहितोपनिष.द्वंशो - ग्रन्था अष्टावुदीरिताः।।**

सन्ध्याया उपास्तिः, काम्य कर्मणा-माभिचारिकाणां - प्रायश्चित्तानां - शान्तिकर्मणाञ्च प्रसङ्गः, संस्कारकर्मणां प्रयोगो विस्तरेण वर्तते यत्साहाय्येन देशाधिपप्रभृति सर्ववर्णिको सामान्योऽपि जनः, यथेष्टं फलं प्राप्नुयादिति सामवेदपुरुषोऽनुजग्राह। तथा च विद्याप्राप्ति परम्परा वंशब्राह्मणेन, साम दर्शकानाञ्च मुनीनाञ्च प्रसङ्गः आर्षेयब्राह्मणेन, मन्त्रदेवता सम्बन्धः देवताऽध्यायेन, सर्ववेदान्तसाररूपेण प्रस्तावः छान्दोग्योपनिषदा पाठकैरुपलभ्यते।

अवधूत दत्तपीठस्य वेदग्रन्थ प्रकाशन कार्ये, स्वकीयां विदधानाः दत्तपीठ आस्थान विद्वान् श्री **सुन्दरराम श्रौति** वर्यः, **राजेश शास्त्रि वर्यश्च** विद्वल्लोक कार्तज्ञ्यमर्हन्तीति ब्रुवाणः, तदेतस्मिन् कार्ये श्रीमान् **कोहिर चैतन्य कुमारश्च** अध्ययन समवलोकनरूपेण सिषेव इति, वाराणसेयः विजयकुमार शास्त्रिवर्यश्च ग्रन्थावलकोनरूपेण बहुजनोपकारे प्रवृत्त इति च निवेदयन्, सर्वेष्वेषु विद्वत्सु भगवतो **दत्तात्रेयस्य** सद्गुरुवर्यस्य च सानुकम्पा दृगनिशं प्रसरतुतरामिति प्रार्थयामि।

श्रीमतां सुन्दरराम श्रौति वर्याणां प्रवासं प्रकल्पितवन्तो विजयवाटिका- विराजमान- श्रीदुर्गामल्लेश्वर देवस्थान कार्यनिर्वाहकाः विद्वद्वर्गकार्तज्ञ्यं वेदपुरुषानुग्रहञ्च सम्पादयन्तीति च सानन्दं ब्रूमः।

अवधूत दत्तपीठाधीश्वराणां **श्री गणपति सच्चिदानन्द स्वामि** श्रीचरणानां, तदन्तेवासिनां **श्रीदत्त विजयानन्द तीर्थ** स्वामिपादानाञ्च निरन्तर प्रोत्साहनेन वेदनिधि बृन्दः महत्यस्मिन् कार्ये प्रववृत इति, सद्गुर्वाशीर्वृष्टिः पाठकेषु सदा भवत्विति च विज्ञापयन्तः, **श्रीगणपति सच्चिदानन्द आश्रमस्य स्वर्णोत्सव** महावसरे प्राकाश्यं गतोऽयं ग्रन्थ इति च मदीयमानन्दस्तोमं प्रकटयामि। मङ्गलं महत्। जयतु गुरु दत्तः।

# सामवेदीय ब्राह्मण ग्रन्थ सूचिका


ताण्ड्य ब्राह्मणम् ....7

ताण्ड्य ब्राह्मणे प्रथमाध्यायः ....7

ताण्ड्य ब्राह्मणे द्वितीयोऽध्यायः ....14

ताण्ड्य ब्राह्मणे तृतीयोऽध्यायः ....20

ताण्ड्यब्राह्मणे चतुर्थोऽध्यायः ....24

ताण्ड्यब्राह्मणे पञ्चमोऽध्यायः ....35

ताण्ड्यब्राह्मणे षष्ठोऽध्यायः ....43

ताण्ड्य ब्राह्मणे सप्तमोऽध्यायः ....56

ताण्ड्यब्राह्मणे अष्टमोऽध्यायः ....66

ताण्ड्यब्राह्मणे नवमोऽध्यायः ....76

ताण्ड्य ब्राह्मणे दशमोऽध्यायः.... 87

ताण्ड्यब्राह्मणे एकादशोऽध्यायः ....94

ताण्ड्यब्राह्मणे द्वादशोऽध्यायः ....102

ताण्ड्यब्राह्मणे त्रयोदशोऽध्यायः ....116

ताण्ड्यब्राह्मणे चतुर्दशोऽध्यायः ....129

ताण्ड्य ब्राह्मणे पञ्चदशोऽध्यायः ....141

ताण्ड्यब्राह्मणे षोडशोऽध्यायः ....153

ताण्ड्यब्राह्मणे सप्तदशोऽध्यायः ....164

ताण्ड्यब्राह्मणे अष्टादशोऽध्यायः .... 171

ताण्ड्यब्राह्मणे नवदशोऽध्यायः ....182

ताण्ड्यब्राह्मणे विंशोऽध्यायः ....191

ताण्ड्यब्राह्मणे एकविंशोऽध्यायः ....199

ताण्ड्य ब्राह्मणे द्वाविंशोध्यायः ....210

ताण्ड्यब्राह्मणे त्रयोविंशोऽध्यायः ....216

ताण्ड्य ब्राह्मणे चतुर्विंशोऽध्यायः ....224

ताण्ड्यब्राह्मणे पञ्चविंशोऽध्यायः ....232

षड्विंशब्राह्मणम् ....242


Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

षड्विंश ब्राह्मणे प्रथमाध्यायः ........ 242
षड्विंश ब्राह्मणे द्वितीयोऽध्यायः ........ 250
षड्विंशब्राह्मणे तृतीयोऽध्यायः।। ........ 256
षड्विंश ब्राह्मणे चतुर्थोऽध्यायः।। ........ 262
षड्विंशब्राह्मणे पञ्चमोऽध्यायः ........ 266
षड्विंशतिब्राह्मणे षष्ठोऽध्यायः ........ 271
अथ सामविधानब्राह्मणम् ........ 277
प्रथमाध्यायः ........ 277
सामविधान ब्राह्मणे द्वितीयाध्यायः ........ 284
सामविधान ब्राह्मणे तृतीयाध्यायः ........ 291
अथ आर्षेय ब्राह्मणम्।। ........ 298
आर्षेय ब्राह्मणे प्रथमाध्यायः - आग्नेयपर्व ........ 298
अथ द्वितीयाध्यायः - ऐन्द्रपर्वणि एकसाम.बहुसामविभागः ........ 304
तृतीयाध्यायः - ऐन्द्रपर्वणि बृहती.त्रिष्टु.बनुष्टुभः ........ 309
चतुर्थाध्यायः - ऐन्द्रपर्वणि अनुष्टुबादीनि ........ 315
पञ्चमाध्यायः- पवामान पर्व ........ 320
षष्ठाध्यायः(आरण्यक.गान.विषयकम्) ........ 325
अर्कपर्व ........ 325
द्वितीयपर्व - द्वन्द्वपर्व ........ 327
तृतीयपर्व - व्रतपर्व ........ 329
चतुर्थपर्व - शुक्रियम् ........ 331
महानाम्नी पर्व ........ 332
अथ देवताऽध्यायब्राह्मणम् ........ 333
छान्दोग्यमन्त्र प्रकरणम् (ब्राह्मणम्)।। ........ 336
छान्दोग्यमन्त्रेषु प्रथम प्रपाठकः।। ........ 336
छान्दोग्य मन्त्रेषु द्वितीयः प्रपाठकः।। ........ 345
छान्दोग्य उपनिषत्। ........ 354
छान्दोग्योपनिषदि प्रथमोऽध्यायः ........ 354
छान्दोग्योपनिषदि द्वितीयोऽध्यायः।। ........ 364


Sri Ganapathy Sachchidananda Avadhoota Datta Peetham • Mysore •

छान्दोग्योपनिषदि तृतीयोऽध्यायः।। ........ 372
छान्दोग्योपनिषदि चतुर्थोऽध्यायः।। ........ 381
छान्दोग्योपनिषदि पञ्चमोऽध्यायः।। ........ 389
छान्दोग्योपनिषदि षष्ठोऽध्यायः।। ........ 399
छान्दोग्योपनिषदि सप्तमोऽध्यायः।। ........ 406
छान्दोग्योपनिषदि अष्टमोऽध्यायः।। ........ 414
अथ संहितोपनिषद्ब्राह्मणम् ........ 424
अथ वंशब्राह्मणम् ........ 429
तर्पणविधानम् ........ 432

## अस्मिन् प्रकाशने प्रयुक्तानि चिह्नानि

❀ सूक्त/ अनुवाक प्रारम्भः (स्तरः 6) ❀ वर्गः/ पञ्चाशत/ दशतिः (स्तरः 7)

卐 मन्त्र/ ब्राह्मण वाक्य समूहः (स्तरः 8) परिशिष्टम्

। वाक्यावसानः,।। (ऋक्/ यजुः/ साम मन्त्र) वाक्यसमूहावसानः

‡ मन्द्रस्थायिना वक्तव्यम् अथवा इतः प्राक् पाठं नावसादयेत्।

ऽऽ आकार प्रश्लेषः, ऽअकार प्रश्लेषः

ᳲ उपध्मानीय/जिह्वामूलीये

ᳩ अनुस्वार आगमः

ँ सानुनासिक यकार/वकार/ लकार विशिष्टः (अर्धानुस्वारः) (यँ वयम्, त्यम्बकँ यजामह

ं अनुस्वारः

• द्विमात्रादि कालोच्चारण संकेतः '2', '3', '4'

• अधो निर्दिष्ट स्थले (फुट् नोट्) द्राविड सम्प्रदाय भेदः, पाठान्तरँ वा, प्रतीकत्वेन दर्शितस्य मन्त्रस्य कृत्स्नः पाठो वा प्रदर्श्यते।

अष्टौ हि ब्राह्मणा ग्रन्थाः प्रौढं ब्राह्मण.मादिमम्। षड्विंशाऽऽख्यं द्वितीयं स्या-
त्तत.स्सामविधि.र्भवेत्।।

आर्षेय.न्देवताऽध्यायो- भवे.दुपनिषत् ततः। संहितोपनिष.द्वंशो - ग्रन्था अष्टावुदीरिताः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

# ताण्ड्य ब्राह्मणम्

## ताण्ड्य ब्राह्मणे प्रथमाध्यायः

<1.1.1> ❃1.1 ओं महन्मे वोचो- भर्गो मे वोचो- यशो मे वोच- स्स्तोमं मे वोचो- भुक्तिं मे वोच-स्सर्वं मे वोच-स्तन्माऽवतु- तन्माऽविशतु- तेन भुक्षिषीय।

- <1.1.2> देवो देव.मेतु सोम स्सोम.मेत्वृतस्य पथा।
- <1.1.3> विहाय दौष्कृत्यम्।
- <1.1.4> बद्धा नामासि सृति स्सोमसरणी सोम.ङ्गमेयम्।
- <1.1.5> पितरो भूᳶ पितरो भूᳶ पितरो भूः।
- <1.1.6> नृमण ऊर्ध्वभरस न्त्वोर्ध्वभरा दृशेयम्।
- <1.1.7> मृदा शिथिरा देवाना न्तीर्थँ वेदिरसि, मा मा हिंसीः।
- <1.1.8> विष्णो श्शिरोऽसि, यशोधा यशो मयि धेहि।
- <1.1.9> इष ऊर्ज आयुषे वर्चसे च।
- <1.2.1> ❃1.2 युनज्मि ते पृथिवी.मग्निना सह युनज्मि वाचं सह सूर्येण युक्तो वातोऽन्तरिक्षेण ते सह युक्ता.स्तिस्रो विमृज स्सूर्यस्य।
- <1.2.2> ऋतस्य सदने सीदामि।
- <1.2.3> ऋतपात्र.मसि।
- <1.2.4> वानस्पत्योऽसि बार्हस्पत्योऽसि प्राजापत्योऽसि प्रजापते.र्मूर्धाऽस्यत्यायुपात्र.मसीद.महं मां प्राञ्चं प्रोहामि- तेजसे ब्रह्मवर्चसाय।
- <1.2.5> मरुतो नपातोऽपाङ्क्षयाᳶ पर्वताना.ङ्ककुभ श्श्येना अजिरा- एन्द्रँ वग्नुना वहत- घोषेणामीवा.ञ्चातयध्वँ- युक्तास्थ वहत।
- <1.2.6> इद.मह.ममुँ यजमानं पशु.ष्वध्यूहामि, पशुषु च मां ब्रह्मवर्चसे च।
- <1.2.7> वसवस्त्वा गायत्रेण छन्दसा सं मृजन्तु- रुद्रास्त्वा त्रैष्टुभेन छन्दसा सं मृजन्त्वादित्यास्त्वा जागतेन छन्दसा सं मृजन्तु।
- <1.2.8> पवित्रन्ते विततं ब्रह्मणस्पते प्रभु.र्गात्राणि पर्येषि विश्वतो-ऽतप्ततनूर्न तदामो अश्नुते- शृतास इद्वहन्त स्स.न्तदाशत।

- <1.2.9> प्रशुक्रैतु देवी.मनीषा-ऽस्मद्रथ स्सुतष्टो न वा-ज्यायुषे मे पवस्व, वर्चसे मे पवस्व, विदुः पृथिव्या दिवो जनित्रा.च्छृण्व.न्त्वापोऽधः~ क्षरन्ती स्सोमेहोद्गाय, ममाऽऽयुषे मम ब्रह्मवर्चसाय यजमानस्यर्द्ध्यो अमुष्य राज्याय।
- <1.3.1>❃1.3 वेकुरा.नामाऽसि जुष्टा देवेभ्यो- नमो वाचे- नमो वाचस्पतये- देवि वा.ग्यत्ते वाचो मधुम-त्तस्मिन्मा धा.स्सरस्वत्यै स्वाहा।
- <1.3.2> सूर्यो मा दिव्याभ्यो नाष्ट्राभ्यः पातु- वायु.रन्तरिक्षाभ्यो-ऽग्निः पार्थिवाभ्य.स्स्वाहा।
- <1.3.3> योऽद्य सौम्यो वधोऽघायूना.मुदीरते- विषूकुहस्य धन्वना-ऽप तान् वरुणोऽपधमत्।
- <1.3.4> यो म आत्मा- या मे प्रजा- ये मे पशव-स्तैरहं मनो वाचं प्र सीदामि।
- <1.3.5> अग्ने.स्तेजसेन्द्रस्येन्द्रियेण सूर्यस्य वर्चसा बृहस्पतिस्त्वा युनक्तु- देवेभ्यः प्राणायाग्नि.र्युनक्तु- तपसा सोमं यज्ञाय वोढवे- दधात्विन्द्र इन्द्रियं, सत्याः कामा यजमानस्य सन्तु।
- <1.3.6> अन्न.ङ्करिष्या.म्यन्नं प्रविष्या.म्यन्न.ञ्जनयिष्यामि।
- <1.3.7> अन्न.मकर.मन्न.मभू.दन्न.मजीजनम्।
- <1.3.8> श्येनोऽसि गायत्रच्छन्दा अनु त्वा रभे स्वस्ति मा सं पारयाऽऽमा स्तोत्रस्य स्तोत्र ङ्गम्या.दिन्द्रवन्तो वनेमहि भक्षीमहि प्रजा.मिषम्।
- <1.3.9> सँ वर्चसा पयसा सन्तपोभि.रगन्महि मनसा सं शिवेन, सँ विज्ञानेन मनसश्च सत्यै-र्यथा वोऽह.ञ्चारुतमँ वदा,नीन्द्रो वो दृशे भूयासं- सूर्य.श्चक्षुषे- वातः प्राणाय- सोमो गन्धाय- ब्रह्म क्षत्राय।
- <1.3.10> नमो गन्धर्वाय विष्व.ग्वादिने- वर्चोधा असि- वर्चो मयि धेहि।
- <1.4.1>❃1.4 अध्वना.मध्वपते स्वस्ति मेऽद्यास्मि.न्देवयाने पथि भूयात्।
- <1.4.2> सम्राडसि कृशानुः।
- <1.4.3> तुथोऽसि जनधायो नभोऽसि प्रतक्वाऽसंमृष्टोऽसि हव्यसूदनः।
- <1.4.4> विभु.रसि प्रवाहणः।

- <1.4.5> वह्नि.रसि हव्यवाहनः।
- <1.4.6> श्वात्रोऽसि प्रचेताः।
- <1.4.7> तुथोऽसि विश्ववेदा- उशिगसि कवि-रङ्घारि.रसि बम्भारि-रवस्युरसि दुवस्वान्।
- <1.4.8> शुन्ध्यु.रसि मार्जालीयः।
- <1.4.9> ऋतधामाऽसि स्वर्ज्योतिः।
- <1.4.10> समुद्रोऽसि विश्वव्यचाः।
- <1.4.11> अहि.रसि बुध्न्यः।
- <1.4.12> अजोऽस्येकपात्।
- <1.4.13> सगरा असि बुध्न्यः।
- <1.4.14> कव्योऽसि कव्यवाहनः।
- <1.4.15> पात माऽग्नयो रौद्रेणानीकेन पिपृत[1] मा- नमो वोऽस्तु मा मा हिंसिष्ट।
- <1.5.1>❃1.5 ऋतस्य द्वारौ स्थो- मा मा सन्ताप्तम्।
- <1.5.2> नम स्सखिभ्यः॥ पूर्वसद्भ्यो- नमोऽपरसद्भ्यः।
- <1.5.3> श्येनो नृचक्षा- अग्नेष्ट्वा चक्षुषाऽव पश्यामि।
- <1.5.4> इन्द.विन्द्रपीतस्य त इन्द्रियावतो गायत्रच्छन्दस स्सर्वगणस्य सर्वगण उपहूत उपहूतस्य भक्षयामि।
- <1.5.5> ऊर्ध्व स्सप्त ऋषी.नुप तिष्ठस्वेन्द्रपीतो वाचस्पते- सप्तर्त्विजोऽभ्युच्छ्रयस्व- जुषस्व लोकं- माऽर्वा.गव गाः।
- <1.5.6> सोम रारन्धि नो हृदि- पिता नोऽसि [2]भगव-न्मम तन्मा मा हिंसीः।
- <1.5.7> सोम गीर्भिष्ट्वा वयँ- वर्धयामो वाचोविद- स्सुमृडीको न आ विश।
- <1.5.8> आ प्यायस्व समेतु ते- विश्वत स्सोम वृष्ण्यम्। भवा वाजस्य सङ्गथे।
- <1.5.9> अवमै.स्त ऊर्वैस्ते काव्यैस्ते पितृभि.र्भक्षितस्य मधुमतो नाराशंसस्य सर्वगणस्य सर्वगण उपहूत उपहूतस्य भक्षयामि।

[1] पिष्टत मा

[2] भगवन् इति पदं क्वचित् नास्ति

- <1.5.10> दीक्षायै वर्णेन तपसो रूपेण मनसो महिम्ना वाचो विभूत्या प्रजापतिस्त्वा युनक्तु प्रजाभ्योऽपानाय।
- <1.5.11> वायु.र्युनक्तु मनसा स्तोमँ यज्ञाय वोढवे, दधा.त्विन्द्र इन्द्रियं, सत्याः कामा यजमानस्य सन्तु।
- <1.5.12> वृषकोऽसि त्रिष्टुप्छन्दा अनु त्वा रभे स्वस्ति मा सं पारया,ऽऽमा स्तोत्रस्य स्तोत्र.ङ्गम्या,दिन्द्रवन्तो वनेमहि भक्षीमहि प्रजा.मिषम्।
- <1.5.13> इन्द.विन्द्रपीतस्य त इन्द्रियावत स्त्रिष्टुप्छन्दस स्सर्वगणस्य सर्वगण उपहूत उपहूतस्य भक्षयामि।
- <1.5.14> सूर्यो युनक्तु वाचा स्तोमँ यज्ञाय वोढवे, दधात्विन्द्र इन्द्रियं, सत्याः कामा यजमानस्य सन्तु।
- <1.5.15> स्वरोऽसि गयोऽसि जगच्छन्दा अनु त्वा रभे स्वस्ति मा सं पारया,ऽऽमा स्तोत्रस्य स्तोत्र.ङ्गम्या.दिन्द्रवन्तो वनेमहि भक्षीमहि प्रजा.मिषम्।
- <1.5.16> इन्द.विन्द्रपीतस्य त इन्द्रियावतो जगच्छन्दस स्सर्वगणस्य सर्वगण उपहूत उपहूतस्य भक्षयामि।
- <1.5.17> आयुर्मे प्राणो मनोऽसि मे प्राण आयुपत्न्या.मृचि, यन्मे मनो यम.ङ्गतँ, यद्वा मे अपरागतं, राज्ञा सोमेन तद्वयं पुन.रस्मासु दध्मसि।
- <1.5.18> यन्मे यमँ वैवस्वतं मनो जगाम दूरगा,स्तन्म आवर्तया पुन.र्जीवातवे न मर्तवेऽथो अरिष्टतातये।
- <1.5.19> येनाह्याजि.मजय.द्विचक्ष्य- येन श्येनं शकुनं सुपर्णँ, यदाहु.श्चक्षु. रदिता.वनन्तं- सोमो नृचक्षा मयि तद्दधातु।
- <1.6.1>❃1.6 ऐन्द्रं सहोऽसर्जि तस्य त इन्द.विन्द्रपीत.स्येन्द्रियावतोऽनुष्टुप्छन्दसो हरिवत स्सर्वगणस्य सर्वगण उपहूत उपहूतस्य भक्षयामि।
- <1.6.2> इन्द.विन्द्रपीतस्य त इन्द्रियावतोऽनुष्टुप्छन्दस स्सर्वगणस्य सर्वगण उपहूत उपहूतस्य भक्षयामि।

- <1.6.3> स्तुतस्य स्तुत.मस्यूर्जस्व.त्पयस्व,दा मा स्तोत्रस्य स्तोत्र.ङ्गम्या,दिन्द्रवन्तो वनेमहि भक्षीमहि प्रजा.मिषम्।
- <1.6.4> इष्टयजुष.स्ते देव सोम स्तुतस्तोमस्य शस्तोक्थस्य तिरोऽह्न्यस्य योऽश्वसनि.र्गौसनि.र्भक्ष-स्तस्योपहूत उपहूतस्य भक्षयामि।
- <1.6.5> ऋतस्य त्वा देव स्तोमपदे विष्णो.र्धामनि वि मुञ्चा,म्येत.त्त्वन्देव स्तोमा.नवकर.मग,न्नशीमहि वयं प्रतिष्ठाम्।
- <1.6.6> सोमेहानु मेहि सोम सह सदस इन्द्रियेण।
- <1.6.7> सुभू.रसि श्रेष्ठो रश्मि.र्देवानां संस.द्देवानाँ यातु-र्यया तन्वा ब्रह्म जिन्वसि- तया मा जिन्व- तया मा जनय- प्रकाशं मा कुरु।
- <1.6.8> अपां पुष्प.मस्योषधीनां रस, इन्द्रस्य प्रियतमं हवि स्स्वाहा।
- <1.6.9> हारियोजनस्य ते देव सोमेष्टयजुष स्स्तुतस्तोमस्य शस्तोक्थस्य योऽश्वसनि.र्गौसनि.र्भक्ष.स्तस्योपहूत उपहूतस्य भक्षयामि।
- <1.6.10> देवकृतस्यैनसोऽवयजन.मसि- पितृकृतस्यैनसोऽवयजन.मसि- मनुष्यकृतस्यैनसोऽवयजन.म-स्यस्मत्कृतस्यैनसोऽवयजन.मसि- यद्दिवा च नक्तञ्चैन. श्चकृम तस्यावयजन.मसि- यत्स्वपन्तश्च जाग्रतश्चैन.श्चकृम तस्यावयजन.मसि- यद्विद्वांस.श्चाविद्वांसश्चैन.श्चकृम तस्यावयजन.म-स्येनस एनसाऽवयजनमसि।
- <1.6.11> अप्सु धौतस्य ते देव सोम नृभि स्सुतस्य।
- <1.6.12> मधुमन्तं भक्ष.ङ्करोमि।
- <1.6.13> समद्य ओषधीभ्यः।
- <1.6.14> कामकामं म आ वर्तय।
- <1.6.15> ऊर्गस्यूर्जं मयि धेहि।
- <1.6.16> प्राण सोमपीथे मे जागृहि।
- <1.6.17> दधिक्राव्णो अकारिष- ञ्जिष्णो.रश्वस्य वाजिनः। सुरभि नो मुखा कर-त्प्र न आयूंषि तारिषत्।
- <1.7.1>❃1.7 अश्वोऽस्यत्योऽसि मयोऽसि हयोऽसि वाज्यसि सप्ति.रर्वा.गसि वृषाऽसि।

- <1.7.2> आदित्यानां पत्मान्विहि- नमस्तेऽस्तु मा मा हिंसीः।
- <1.7.3> वायोष्ट्वा तेजसा प्रति गृह्णामि- नक्षत्राणान्त्वां रूपेण प्रति गृह्णामि- सूर्यस्य त्वा वर्चसा प्रति गृह्णामि।
- <1.7.4> रथन्तर.मसि वामदेव्य.मसि बृह.दसि।
- <1.7.5> अङ्क्तान्यङ्क्रू अभितो रथं यौ- ध्वान्तँ वाताग्र.मभिसञ्चरतौ- दूरेहेति.रिन्द्रियवा.न्पतत्री- ते नोऽग्नयᳶ पप्रयᳶ पारयन्तु।
- <1.7.6> वैश्वानरᳶ प्रत्नथा नाक.माऽरुह- दिवᳶ पृष्ठे मन्दमान स्सुमन्मभि-स्सपूर्वव.ज्जनय.ज्जन्तवे धना-स्समान.मय्म.न्पर्यैति जागृविः।
- <1.7.7> गिदैष ते रथ एष वा.मश्विना रथोऽरिष्टो विश्वभेषजः।
- <1.7.8> कृशानो सव्या.ना यच्छ।
- <1.7.9> दासानो दक्षिणा.नव गृहाण।
- <1.8.1>❃1.8 देवस्य त्वा सवितुᳶ प्रसवेऽश्विनो.र्बाहुभ्यां पूष्णो हस्ताभ्यां प्रति गृह्णामि।
- <1.8.2> वरुणस्त्वा नयतु देवि दक्षिणे वरुणायाश्व,न्तेनामृतत्व.मशीय, वयो दात्रे भूया.न्मयो मह्यं प्रतिग्रहीत्रे।
- <1.8.3> वरुणस्त्वा नयतु देवि दक्षिणे रुद्राय गा, न्तयाऽमृतत्व.मशीय, वयो दात्रे भूया.न्मयो मह्यं प्रतिग्रहीत्रे।
- <1.8.4> वरुणस्त्वा नयतु देवि दक्षिणेऽग्नयेऽजम्।
- <1.8.5> अग्नये हिरण्यम्।
- <1.8.6> अग्नीषोमाभ्या.मजा.न्मयाऽमृतत्व.मशीय, वयो दात्रे भूया.न्मयो मह्यं प्रतिग्रहीत्रे।
- <1.8.7> अन्नस्यान्नपतिᳶ प्रादा-दनमीवस्य शुष्मिणो- नमो विश्वजनस्य क्षामाय- भुञ्जति मा मा हिंसीः।
- <1.8.8> वरुणस्त्वा नयतु देवि दक्षिणे त्वष्ट्रेऽवि,न्तयाऽमृतत्व.मशीय, वयो दात्रे भूया.न्मयो मह्यं प्रतिग्रहीत्रे।
- <1.8.9> ग्नास्त्वाऽकृन्त.न्नपसोऽतन्वत, वयित्र्योऽवयन्।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

- <1.8.10> वरुणस्त्वा नयतु देवि दक्षिणे बृहस्पतये वास-स्तेनामृतत्व.मशीय- वयो दात्रे भूया-न्मयो मह्यं प्रतिगृहीत्रे।
- <1.8.11> वरुणस्त्वा नयतु देवि दक्षिणे- उत्तानायाङ्गिरसायाप्राण-त्तेनामृतत्व.मशीय- वयो दात्रे भूया-न्मयो मह्यं प्रतिग्रहीत्रे।
- <1.8.12> वरुणस्त्वा नयतु देवि दक्षिणे पूष्ण उष्ट्रम्।
- <1.8.13> वायवे मृग न्तेनामृतत्व.मशीय- वयो दात्रे भूया.न्मयो मह्यं प्रतिग्रहीत्रे।
- <1.8.14> वरुणस्त्वा नयतु देवि दक्षिणे प्रजापतये पुरुषं- प्रजापतये हस्तिनं- प्रजापतये वराहं- प्रजापतये व्रीहियवां,स्तैरमृतत्व.मशीय- वयो दात्रे भूया-न्मयो मह्यं प्रतिग्रहीत्रे।
- <1.8.15> वरुणस्त्वा नयतु देवि दक्षिणे क्षेत्रपतये तिलमाषा-स्तै.रमृतत्व.मशीय- वयो दात्रे भूया-न्मयो मह्यं प्रतिग्रहीत्रे।
- <1.8.16> वरुणस्त्वा नयतु देवि दक्षिणे सवित्रेऽश्वतरं वाऽश्वतरीँ वा- तयाऽमृतत्व.मशीय- वयो दात्रे भूया-न्मयो मह्यं प्रतिग्रहीत्रे।
- <1.8.17> क इद.ङ्कस्मा अदा,त्कामः कामायादा,त्कामो दाता, कामः प्रतिग्रहीता, काम.स्समुद्र.माऽविश,त्कामेन त्वा प्रति गृह्णामि, कामैतत्ते।
- <1.9.1>❋1.9 रश्मि.रसि क्षयाय त्वा क्षय.ञ्जिन्व, सवितृप्रसूता बृहस्पतये स्तुत।
- <1.9.2> प्रेति.रसि धर्मणे त्वा धर्म.ञ्जिन्व, सवितृप्रसूता बृहस्पतये स्तुत।
- <1.9.3> अन्विति.रसि दिवे त्वा दिव.ञ्जिन्व, सवितृप्रसूता बृहस्पतये स्तुत।
- <1.9.4> सन्धि.रस्यन्तरिक्षाय त्वाऽन्तरिक्ष.ञ्जिन्व, सवितृप्रसूता बृहस्पतये स्तुत।
- <1.9.5> प्रतिधि.रसि पृथिव्यै त्वा पृथिवी.ञ्जिन्व, सवितृप्रसूता बृहस्पतये स्तुत।
- <1.9.6> विष्टम्भोऽसि वृष्ट्यै त्वा वृष्टि.ञ्जिन्व, सवितृप्रसूता बृहस्पतये स्तुत।
- <1.9.7> प्राचोऽस्यह्ने त्वाऽह.र्जिन्व, सवितृप्रसूता बृहस्पतये स्तुत।
- <1.9.8> अन्वाऽसि रात्र्यै त्वा रात्रि.ञ्जिन्व, सवितृप्रसूता बृहस्पतये स्तुत।
- <1.9.9> उशि.गसि वसुभ्यस्त्वा वसू.न्जिन्व, सवितृप्रसूता बृहस्पतये स्तुत।
- <1.9.10> प्रकेतोऽसि रुद्रेभ्यस्त्वा रुद्रा.न्जिन्व, सवितृप्रसूता बृहस्पतये स्तुत।
- <1.9.11> सुदीति.रस्यादित्येभ्य.स्त्वाऽऽदित्या.न्जिन्व, सवितृप्रसूता बृहस्पतये स्तुत।

- <1.9.12> ओजोऽसि पितृभ्यस्त्वा पितृ.न्जिन्व, सवितृप्रसूता बृहस्पतये स्तुत।
- <1.10.1>❃1.10 तन्तु.रसि प्रजाभ्यस्त्वा प्रजा जिन्व, सवितृप्रसूता बृहस्पतये स्तुत।
- <1.10.2> रेव.दस्योषधीभ्य.स्त्वौषधी.र्जिन्व, सवितृप्रसूता बृहस्पतये स्तुत।
- <1.10.3> पृतनाषा.डसि पशुभ्यस्त्वा पशू.न्जिन्व, सवितृप्रसूता बृहस्पतये स्तुत।
- <1.10.4> अभिजि.दसि युक्तग्रावेन्द्राय त्वेन्द्र.ञ्जिन्व, सवितृप्रसूता बृहस्पतये स्तुत।
- <1.10.5> अधिपति.रसि प्राणाय त्वा प्राणा.न्जिन्व, सवितृप्रसूता बृहस्पतये स्तुत।
- <1.10.6> धरुणोऽस्यपानाय त्वाऽपाना.न्जिन्व, सवितृप्रसूता बृहस्पतये स्तुत।
- <1.10.7> संसर्पोऽसि चक्षुषे त्वा चक्षु.र्जिन्व, सवितृप्रसूता बृहस्पतये स्तुत।
- <1.10.8> वयोधा असि श्रोत्राय त्वा श्रोत्र.ञ्जिन्व, सवितृप्रसूता बृहस्पतये स्तुत।
- <1.10.9> त्रिवृ.दसि त्रिवृते त्वा- सवृ.दसि सवृते त्वा- प्रवृ.दसि प्रवृते त्वा-ऽनुवृद.स्यनुवृते त्वा, सवितृप्रसूता बृहस्पतये स्तुत।
- <1.10.10> निरोहोऽसि निरोहाय त्वा- संरोहोऽसि संरोहाय त्वा- प्ररोहोऽसि प्ररोहाय त्वा-ऽनुरोहोऽस्यनुरोहाय त्वा, सवितृप्रसूता बृहस्पतये स्तुत।
- <1.10.11> वसुकोऽसि- वस्यष्टि.रसि- वेषश्री.रसि, सवितृप्रसूता बृहस्पतये स्तुत।
- <1.10.12> आक्रमोऽस्याक्रमाय त्वा- सङ्क्रमोऽसि सङ्क्रमाय -त्वोत्क्रमोऽस्युत्क्रमाय-त्वोत्क्रान्ति.रस्युत्क्रान्त्यै त्वा, सवितृप्रसूता बृहस्पतये स्तुत।

## ताण्ड्य ब्राह्मणे द्वितीयोऽध्यायः

- <2.1.1>❃ 2.1 तिसृभ्यो हिङ्करोति स प्रथमया- तिसृभ्यो हिङ्करोति स मध्यमया-तिसृभ्यो हिङ्करोति स उत्तम.योद्यती त्रिवृतो विष्टुतिः।
- <2.1.2> ज्येष्ठो ज्यैष्ठिनेय स्स्तुवीत।
- <2.1.3> अग्रा.दग्रं रोह.त्यभिक्रामन्ती विष्टुति.रभिक्रामन्त्या एवाभिक्रान्तेन हि यज्ञस्यर्ध्नोति, तस्मा.देतया स्तोतव्य.मृद्ध्या एव।
- <2.1.4> पापवसीयसो विधृति.र्विपाप्मना वर्तते- य एतया स्तुते, नावगतोऽप रुध्यते-नापरुद्धोऽव गच्छति। न श्रेयांसं पापीया.नभ्यारोहति- न जनता जनता.मभ्येति- नान्योऽन्यस्य

प्रजा आ ददते- यथाक्षेत्र.ङ्कल्पन्ते। अवर्षुकस्तु पर्जन्यो भवतीमे हि लोका.स्तृच.स्तान् हिङ्कारेण व्येति।

- <2.1.5> एषा वै प्रतिष्ठिता त्रिवृतो विष्टुतिः, प्रति तिष्ठति- य एतया स्तुते।
- <2.2.1>❈ 2.2 तिसृभ्यो हिङ्करोति स पराचीभि.स्तिसृभ्यो हिङ्करोति स पराचीभि.स्तिसृभ्यो हिङ्करोति स पराचीभिः- परिवर्तिनी त्रिविष्टुतिः।
- <2.2.2> प्रपरीवर्त.माप्नोति- य एतया स्तुते, सन्तता विष्टुतिः प्राणोऽपानो व्यान-स्त ऋच.स्तान् हिङ्कारेण सन्तनोति। सर्व.मायु.रेति- न पुराऽऽयुषः प्र मीयते- य एतया स्तुते, वर्षुकः पर्जन्यो भव,तीमे हि लोका.स्तृच-स्तान् हिङ्कारेण सन्दधाति।
- <2.2.3> श्लक्ष्णेव तु वा ईश्वरा पशू.न्निर्मृज- स्सैषा च पराचोत श्रेया.न्भव-त्युत यादृङ्ङेव तादृङ्ङेत्तु पापीयान्।
- <2.2.4> तामेतां भाल्लवय उपाऽऽसते, तस्मात्ते प्रतिगृणन्तः परीवर्तान्न च्यवन्ते।
- <2.3.1>❈ 2.3 तिसृभ्यो हिङ्करोति- स पराचीभि,स्तिसृभ्यो हिङ्करोति- या मध्यमा सा प्रथमा- योत्तमा सा मध्यमा- या प्रथमा सोत्तमा, तिसृभ्यो हिङ्करोति- योत्तमा सा प्रथमा- या प्रथमा सा मध्यमा- या मध्यमा सोत्तमा, कुलायिनी त्रिवृतो विष्टुतिः।
- <2.3.2> प्रजाकामो वा पशुकामो वा स्तुवीत, प्रजा वै कुलायं- पशवः कुलाय.ङ्कुलायमेव भवति।
- <2.3.3> एता.मेवाऽऽनुजावराय कुर्या,देतासा.मेवाग्रं परियतीनां प्रजाना.मग्रं पर्यैति।
- <2.3.4> एतामेव बहुभ्यो यजमानेभ्यः कुर्या-द्यत्सर्वा अग्रिया भवन्ति, सर्वा मध्ये सर्वा उत्तमा स्सर्वा.नेवैना.न्समावद्भाजः करोति, नान्योऽन्य.मप घ्नते- सर्वे समाव.दिन्द्रिया भवन्ति।
- <2.3.5> वर्षुकः पर्जन्यो भव,तीमे हि लोका-स्तृच.स्तान् हिङ्कारेण व्यतिषजति।
- <2.3.6> पापवसीयसन्तु भवति।
- <2.3.7>अधरोत्तर.मपावगतो रुध्यतेऽव गच्छ.त्यपरुद्धः, पापीया.न्श्रेयांस. मभ्यारोहति, जनता जनता.मभ्ये-त्यन्योऽन्यस्य प्रजा आ ददते- न यथाक्षेत्र ङ्कल्पन्ते।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

- <2.4.1>❃ 2.4 पञ्चभ्यो हिङ्करोति- स तिसृभि स्स एकया स एकया, पञ्चभ्यो हिङ्करोति- स एकया स तिसृभि स्स एकया, पञ्चभ्यो हिङ्करोति- स एकया स एकया स तिसृभि४, पञ्चपञ्चिनी पञ्चपञ्चदशस्य विष्टुतिः।
- <2.4.2> पाङ्क्त४ पुरुष४- पाङ्क्ता४ पशव-स्तया पुरुषञ्च पशूंश्चाऽऽप्नोति, वज्रो वै पञ्चदशो- यत्पञ्चपञ्च व्यूहति- वज्रमेव तद्व्यूहति शान्त्या, एषा वै प्रतिष्ठिता पञ्चदशस्य विष्टुति४, प्रति तिष्ठति- य एतया स्तुते।
- <2.5.1>❃ 2.5 पञ्चभ्यो हिङ्करोति- स तिसृभि स्स एकया स एकया, तिसृभ्यो हिङ्करोति- स पराचीभि, स्सप्तभ्यो हिङ्करोति- स एकया स तिसृभि स्स तिसृभिः।
- <2.5.2> त्रीन्स्तोमा.न्प्रतिविहिता ब्रह्मवर्चसकाम स्स्तुवीत।
- <2.5.3> पञ्चभि४ पञ्चदशं- तिसृभि.स्त्रिवृतं- सप्तभि स्ससप्तदशम्।
- <2.5.4> वीर्यँ वै स्तोमा- वीर्यमेव त.देकधा समूहते ब्रह्मवर्चस.स्यावरुध्यै, तेजस्वी ब्रह्मवर्चसी भवति- य एतया स्तुते।
- <2.6.1>❃ 2.6 तिसृभ्यो हिङ्करोति- स पराचीभि४, पञ्चभ्यो हिङ्करोति- स एकया स तिसृभि स्स एकया, सप्तभ्यो हिङ्करोति- स तिसृभि स्स एकया स तिसृभि,रुद्यती पञ्चदशस्य विष्टुतिः।
- <2.6.2> एतया वै देवा स्स्वर्गँ लोक.मायन्,स्वर्गकाम स्स्तुवीत- स्वर्गस्य लोकस्य समष्ट्यै, स्वर्गा.ल्लोका.न्न च्यवते तुष्टुवानः।
- <2.6.3> अभिक्रामन्ती विष्टुति,रभिक्रामन्त्या एवाभिक्रान्तेन हि यज्ञस्यर्ध्नोति, तस्मा.देतया स्तोतव्य.मृद्ध्या एव।
- <2.7.1>❃2.7 पञ्चभ्यो हिङ्करोति- स तिसृभि स्स एकया स एकया, पञ्चभ्यो हिङ्करोति- स एकया स तिसृभि स्स एकया, सप्तभ्यो हिङ्करोति- स एकया स तिसृभि स्स तिसृभि,र्दश.सप्ता सप्तदशस्य विष्टुतिः।
- <2.7.2> एतया वै देवा असुरा.नत्यक्राम,न्नति पाप्मानं भ्रातृव्य ङ्क्रामति- य एतया स्तुते।
- <2.7.3> अभिक्रामन्ती विष्टुति.रभिक्रामन्त्या एवाभिक्रान्तेन हि यज्ञस्यर्ध्नोति, तस्मा.देतया स्तोतव्य.मृद्ध्या एव।

- <2.7.4> गर्भिणी विष्टुतिः, प्र प्रजया प्र पशुभि.र्जायते- य एतया स्तुते।
- <2.7.5> विड्वै सप्तदश,स्तस्या राजा गर्भो- विश एव तद्राजान ङ्गर्भ.ङ्करोति।
- <2.7.6> नावगतोऽप रुध्यते, नापरुद्धोऽव गच्छति।
- <2.7.7> अन्नँ वै सप्तदशो, यत्सप्त मध्ये भवन्ति- पञ्चपञ्चाभितो.ऽन्नमेव तन्मध्यतो धीयते-ऽनशनायुको यजमानो भव-त्यनशनायुकाः प्रजाः।
- <2.7.8> वैराजो वै पुरुष, स्सप्त ग्राम्याः पशवो, यद्दशपूर्वा भवन्ति सप्तोत्तमा- यजमानमेव तत्पशुषु प्रतिष्ठापयति।
- <2.7.9> एषा वै प्रतिष्ठिता सप्तदशस्य विष्टुतिः, प्रति तिष्ठति- य एतया स्तुते।
- <2.8.1>❃2.8 एष एव व्यूह- स्सप्तैकमध्या।
- <2.8.2> ब्रह्मणो वा आयतनं प्रथमा- क्षत्रस्य मध्यमा- विश उत्तमा, यत्प्रथमा भूयिष्ठा भाजयति- ब्रह्मण्येव तदोजो वीर्य न्दधाति, ब्रह्मण एव तत्क्षत्रञ्च विश.ञ्चानुगे करोति- क्षत्रस्यास्य प्रकाशो भवति, य एतया स्तुते।
- <2.8.3> तामेता.न्त्रिखर्वा उपाऽऽसते, तस्मात्ते स्पर्धमाना न व्लीयन्ते।
- <2.9.1>❃2.9 सप्तभ्यो हिङ्करोति- स तिसृभि स्स तिसृभि स्स एकया, तिसृभ्यो हिङ्करोति- स पराचीभि, स्सप्तभ्यो हिङ्करोति- स एकया स तिसृभि स्स तिसृभि, स्सप्ताऽऽस्थिता।
- <2.9.2> भ्रातृव्यवा.न्स्तुवीत- यथा सप्ताऽऽस्थितेन मत्येन समी करो-त्येवं पाप्मानं भ्रातृव्यं प्र रुजति।
- <2.9.3> एतामेव बहुभ्यो यजमानेभ्यः कुर्या,द्यः प्रथमो हिङ्कार- स्स प्रथमाया, यत्तां सप्तभ्यो हिङ्करोति- तेन सा सप्त भजते- यत्सप्तैव मध्ये सम्पद्यन्ते- तेन सा सप्त भजते, य उत्तमो हिङ्कार- स्स उत्तमया, यत्तां सप्तभ्यो हिङ्करोति- तेन सा सप्त भजते, सर्वा.नेवैना.न्समाव.द्भाजः करोति, नान्योऽन्य.मप घ्नते- सर्वे समाव.दिन्द्रिया भवन्ति।
- <2.9.4> तामेता.मभिप्रतारिण उपाऽऽसते, तस्मात्त ओजिष्ठा.स्स्वानाम्।
- <2.10.1> ❃2.10 एष एव व्यूह उभय, स्सप्तैकमध्या निर्मध्या।

- <2.10.2> आनुजावर स्स्तुवीता,ऽलोको वा एष यदानुजावरो, यत्सप्तप्रथमा स्सप्तोत्तमा.स्तिस्रो मध्ये- त्र्यक्षरᳶ पुरुषो, लोक.मेवास्मै तन्मध्यतᳵ करोति- तस्मिन्ल्लोके प्रति तिष्ठति।

- <2.10.3> एता.मेव प्रजाकामाय कुर्या,न्मध्यतो वा एष संरूढो- यᳶ प्रजान्न विन्दते, लोक.मेवास्मै तं मध्यतᳵ करोति, तँ लोकं प्रजया च पशुभि.श्चानु प्र जायते।

- <2.10.4> एता.मेवापरुद्ध.राजन्याय कुर्या,द्विड्वै सप्तदश-स्तस्या राजा गर्भो- विश एव तद्राजान.न्निर्ह,न्त्यपावगतोऽप रुध्यतेऽव गच्छ.त्यपरुद्धः।

- <2.10.5> एता.मेवाभिचर्यमाणाय कुर्या,त्प्रजापतिर्वै सप्तदशᳶ- प्रजापति.मेव मध्यतᳶ प्र विश.न्त्यस्तृत्यै।

- <2.11.1>❃2.11 पञ्चभ्यो हिङ्करोति- स तिसृभि स्स एकया स एकया, तिसृभ्यो हिङ्करोति- स पराचीभि,र्नवभ्यो हिङ्करोति- स तिसृभि स्स तिसृभि स्स तिसृभिः।

- <2.11.2> चतुर.स्स्तोमा.न्प्रतिविहिता ब्रह्मवर्चसकाम स्स्तुवीत, पञ्चभिᳶ पञ्चदशं - तिसृभि.स्त्रिवृत- न्नवभि.स्त्रिणवं, स्वयं सप्तदश स्सम्पन्नो, वीर्यँ वै स्तोमा- वीर्यमेव तदेकधा समूहते ब्रह्मवर्चस.स्यावरुध्यै, तेजस्वी ब्रह्मवर्चसी भवति- य एतया स्तुते।

- <2.12.1>❃2.12 तिसृभ्यो हिङ्करोति- स पराचीभिᳶ, पञ्चभ्यो हिङ्करोति- स एकया स तिसृभि स्स एकया, नवभ्यो हिङ्करोति- स तिसृभि स्स तिसृभि स्स तिसृभि,रुद्यती सप्तदशस्य विष्टुतिः।

- <2.12.2> एतया वै देवा स्स्वर्गँ लोक.माय,न्त्स्वर्गकाम स्स्तुवीत स्वर्गस्य लोकस्य समष्ट्यै- स्वर्गा.ल्लोकान्न च्यवते तुष्टुवानो,ऽभिक्रामन्ती विष्टुति.रभिक्रान्त्या, एवाभिक्रान्तेन हि यज्ञस्यर्ध्नोति, तस्मादेतया स्तोतव्य.मृद्ध्या एव।

- <2.13.1>❃2.13 सप्तभ्यो हिङ्करोति- स तिसृभि स्स तिसृभि स्स एकया, पञ्चभ्यो हिङ्करोति- स एकया स तिसृभि स्स एकया, पञ्चभ्यो हिङ्करोति- स एकया स एकया स तिसृभि,र्भस्त्राऽवाचीनबिला।

- <2.13.2> यन्द्विष्या.त्तस्य कुर्या,द्यथाऽवाचीनबिलया भस्त्रया प्रधूनुया-देवं यजमानस्य पशू.न्प्रधूनो,त्यपक्रामन्ती विष्टुति,स्तया यजमानस्य पशवोऽपक्रामन्ति, पापीया.न्भवति- य एतया स्तुते।

- <2.14.1>❃2.14 सप्तभ्यो हिङ्करोति- स तिसृभि स्स तिसृभि स्स एकया, सप्तभ्यो हिङ्करोति- स एकया स तिसृभि स्स तिसृभि, स्सप्तभ्यो हिङ्करोति- स तिसृभि स्स एकया स तिसृभि, स्सप्तसप्ति.न्येकविंशस्य विष्टुतिः।

- <2.14.2> सप्त ग्राम्याः पशव-स्तानेतया स्पृणोति, सप्त शिरसि प्राणाः- प्राणा इन्द्रिया.णीन्द्रिया.ण्येवैतयाऽऽप्नोति।

- <2.14.3> एषा वै प्रतिष्ठि.तैकविंशस्य विष्टुतिः, प्रति तिष्ठति- य एतया स्तुते।

- <2.15.1>❃2.15 पञ्चभ्यो हिङ्करोति- स तिसृभि स्स एकया स एकया, सप्तभ्यो हिङ्करोति- स एकया स तिसृभि स्स तिसृभि,र्नवभ्यो हिङ्करोति- स तिसृभि स्स तिसृभि स्स तिसृभि,रुद्य.त्येकविंशस्य विष्टुतिः।

- <2.15.2> एतया वै देवा स्स्वर्गँ लोक.माय,न्त्स्वर्गकाम स्स्तुवीत स्वर्गस्य लोकस्य समष्ट्यै, स्वर्गा.ल्लोकान्न च्यवते तुष्टुवानो,ऽभिक्रामन्ती विष्टुति.रभिक्रान्त्या एवाभिक्रान्तेन हि यज्ञस्यर्ध्नोति, तस्मा.देतया स्तोतव्य.मृद्ध्या एव।

- <2.15.3> सैषा त्रिवृ.त्प्रायणा त्रिवृ.दुदयना, यत्त्रिवृ.द्बहिष्पवमानं भवति- नवैता एकविंशस्योत्तमा भवन्ति, प्राणा वै त्रिवृ-त्प्राणानेव तदुभयतो दधाति, तस्मादय.मर्धभा.गवाक्प्राण- उत्तरेषां प्राणानां, सर्वमायु.रेति- न पुराऽऽयुषः प्रमीयते- य एतया स्तुते।

- <2.15.4> तामेता.ङ्करद्विष उपाऽऽसते, तस्मात्ते सर्व.मायु.र्यन्ति।

- <2.16.1>❃2.16 नवभ्यो हिङ्करोति- स तिसृभि स्स तिसृभि स्स तिसृभिः, पञ्चभ्यो हिङ्करोति- स एकया स तिसृभि स्स एकया, सप्तभ्यो हिङ्करोति स तिसृभि स्स एकया स तिसृभिः- प्रतिष्टुतिः।

- <2.16.2> नवभि.स्त्रिवृतं प्रतिष्टौति- पञ्चभिः पञ्चदशं- सप्तभि स्सप्तदशं, स्वय.मेकविंश स्सम्पन्नः।

- <2.16.3> स एव स्तोमा यज्ञँ वहन्ति, तानुत्तमे स्तोत्रे सन्तर्पयति, यथाऽनड्हो वाऽश्वा.न्वाऽश्वतरा.न्वोहुष स्सन्तर्पये-देव.मेत.दुत्तमे स्तोत्रे स्तोमा.न्त्सन्तर्पयति, तृप्यति प्रजया पशुभि-र्य एतया स्तुते।

- <2.16.4> एता.मेव पुरोधाकामाय कुर्या,द्ब्रह्म वै त्रिवृ.त्क्षत्र मेकविंशो, यत्त्रिवृतैकविंशं प्रतिपद्यते- ब्रह्म तत्क्षत्रस्य पुरस्ता.न्निदधाति, गच्छति पुरोधा-न्न पुरोधाया.श्च्यवते- य एतया स्तुते।

- <2.16.5> तामेतां प्रावाहण्य उपाऽऽसते, तस्मात्ते पुरोधाया न च्यवन्ते।

- <2.17.1>❃2.17 नवभ्यो हिङ्करोति- स तिसृभि स्स तिसृभि स्स तिसृभि,स्तिसृभ्यो हिङ्करोति- स पराचीभि,र्नवभ्यो हिङ्करोति- स तिसृभि स्स तिसृभि स्स तिसृभि, स्सूर्म्युभयत आदीप्ता।

- <2.17.2> ब्रह्मवर्चसकाम स्स्तुवीत, तेजो वै त्रिवृ.त्त्र्यक्षरꣳ पुरुषो, यत्त्रिवृता.वभितो भवत-स्तिस्रो मध्ये, यथा हि हिरण्यं निष्टपे-देव.मेन न्त्रिवृतौ निष्टपत,स्तेजसे ब्रह्मवर्चसाय।

- <2.17.3> अपशव्येव तु वा ईश्वरा पशू.न्निर्दहꣳ, किलासत्त्वा.न्नूभय.मति हि निष्टपतः।

- <2.17.4> एता.मेवाभिशस्यमानाय कुर्या,च्छमलँ वा एत.मृच्छति- य.मश्लीला वा.गृच्छति, यैवैन.मसा.वश्लीलँ वा.ग्वदति, तामस्य त्रिवृतौ निष्टपत,स्तेजस्वी भवति- य एतया स्तुते।

## ताण्ड्य ब्राह्मणे तृतीयोऽध्यायः

- <3.1.1>❃3.1 नवभ्यो हिङ्करोति- स तिसृभि स्स पञ्चभि स्स एकया, नवभ्यो हिङ्करोति- स एकया स तिसृभि स्स पञ्चभि,र्नवभ्यो हिङ्करोति- स पञ्चभि स्स एकया स तिसृभिः।

- <3.1.2> वज्रो वै त्रिणवो, वज्र.मेव तद्व्यूहति शान्त्यै।

- <3.1.3> पञ्चभि.र्विहितैका परिचरा, पाङ्क्ताꣳ पशवो- यजमानꣳ परिचरा, यत्पञ्चभि र्विदधा.त्येका परिचरा भवति, यजमानमेव तत्पशुषु प्रतिष्ठापय,त्येषा वै प्रतिष्ठिता त्रिणवस्य विष्टुतिꣳ, प्रति तिष्ठति य- एतया स्तुते।

- <3.2.1>❃ 3.2 सप्तभ्यो हिङ्करोति- स तिसृभि स्स एकया स तिसृभि,र्नवभ्यो हिङ्करोति- स एकया स तिसृभि स्स पञ्चभि,रेकादशभ्यो हिङ्करोति- स पञ्चभि स्स तिसृभि स्स तिसृभि,रुद्यती त्रिणवस्य विष्टुतिः।

- <3.2.2> एतया वै देवा स्स्वर्गँ लोक.माय,न्त्स्वर्गकाम स्स्तुवीत- स्वर्गस्य लोकस्य समष्ट्यै, स्वर्गा.ल्लोका.न्न च्यवते तुष्टुवानो,ऽभिक्रामन्ती विष्टुति.रभिक्रान्त्या एवाभिक्रान्तेन हि यज्ञस्यर्ध्नोति, तस्मा.देतया स्तोतव्य.मृद्ध्या एव।

- <3.3.1> एकादशभ्यो हिङ्करोति- स तिसृभि स्स सप्तभि स्स एक,यैकादशभ्यो हिङ्करोति- स एकया स तिसृभि स्स सप्तभि,रेकादशभ्यो हिङ्करोति- स सप्तभि स्स एकया स तिसृभिः।

- <3.3.2> अन्तो वै त्रयस्त्रिंशः- परमो वै त्रयस्त्रिंश- स्स्तोमानां सप्तभि.र्विहितैका परिचरा, सप्त ग्राम्याः पशवो यजमानः परिचरा, यत्सप्तभि.र्विदधा.त्येका परिचरा भवति, यजमान.मेव तदन्ततः पशुषु प्रतिष्ठापय,त्येषा वै प्रतिष्ठिता त्रयस्त्रिंशस्य विष्टुतिः, प्रति तिष्ठति- य एतया स्तुते।

- <3.4.1>❃ 3.4 एकादशभ्यो हिङ्करोति- स तिसृभि स्स पञ्चभि स्स तिसृभि,रेकादशभ्यो हिङ्करोति- स तिसृभि स्स तिसृभि स्स पञ्चभि,रेकादशभ्यो हिङ्करोति- स पञ्चभि स्स तिसृभि स्स तिसृभि,र्नेदीय.स्सङ्क्रमा।

- <3.4.2> अन्तो वै त्रयस्त्रिंशो, यथा महावृक्षस्याग्रं सृत्वा नेदीय.स्सङ्क्रमा.त्सङ्क्राम,-त्येव.मेत,न्नेदीय.स्सङ्क्रमया- नेदीय.स्सङ्क्रमा.त्सङ्क्रामति।

- <3.4.3> पञ्चभि.र्विहिता.स्तिस्रः परिचराः- पाङ्क्ताः पशव- एतावा.न्पुरुषो- यदात्मा, प्रजा जाया, यत्पञ्चभि.र्विदधाति- तिस्रः परिचरा भवन्ति, यजमान.मेव तत्पशुषु प्रतिष्ठापयति, पशुमा.न्भवति- य एतया स्तुते।

- <3.5.1>❃ 3.5 नवभ्यो हिङ्करोति- स तिसृभि स्स पञ्चभि स्स एक,यैकादशभ्यो हिङ्करोति- स एकया स तिसृभि स्स सप्तभि,स्त्रयोदशभ्यो हिङ्करोति- स सप्तभि स्स तिसृभि स्स तिसृभि,रुद्यती त्रयस्त्रिंशस्य विष्टुतिः।

- <3.5.2> एतया वै देवा स्स्वर्गँ लोक.माय,न्त्स्वर्गकाम.स्स्तुवीत स्वर्गस्य लोकस्य समष्ट्यै, स्वर्गा.ल्लोका.न्न च्यवते तुष्टुवानो,ऽग्रा.दग्रं रोह,त्यभिक्रामन्ती विष्टुति रभिक्रान्त्या एवाभिक्रान्तेन हि यज्ञस्यर्ध्नोति, तस्मा.देतया स्तोतव्य.मृद्ध्या एव।

- <3.6.1>❃ 3.6 त्रयोदशभ्यो हिङ्करोति- स तिसृभि स्स पञ्चभि स्स पञ्चभि,रेकादशभ्यो हिङ्करोति- स पञ्चभि स्स तिसृभि स्स तिसृभि,र्नवभ्यो हिङ्करोति- स तिसृभि स्स तिसृभि स्स तिसृभिꣳ, प्रत्यवरोहिणी त्रयस्त्रिंशस्य विष्टुतिः।
- <3.6.2> यथा महावृक्षस्याग्रं सृत्वा शाखाया श्शाखा मालम्भ मुपावरोहे,देव.मेतयेमँ लोक मुपावरोहति प्रतिष्ठित्यै।
- <3.6.3> त्रिवृता प्रैति- त्रिवृतोदेति, प्राणा वै त्रिवृ-त्प्राणेनैव प्रैति- प्राण.मभ्युदेति, सर्व.मायु.रेति- न पुराऽऽयुषꣳ प्रमीयते- य एतया स्तुते।
- <3.6.4> तामेता.ङ्करद्विष उपाऽऽसते, तस्मात्ते सर्व.मायु.र्यन्ति।
- <3.7.1>❃ 3.7 पञ्चदशभ्यो हिङ्करोति- स तिसृभि स्स सप्तभि स्स पञ्चभि,रेकादशभ्यो हिङ्करोति- स पञ्चभि स्स तिसृभि स्स तिसृभि, स्सप्तभ्यो हिङ्करोति- स तिसृभि स्स एकया स तिसृभिः।
- <3.7.2> यो वै त्रयस्त्रिंश.मेकविंशे प्रतिष्ठितँ वेद- प्रति तिष्ठति, प्रतिष्ठा वा एकविंश स्स्तोमानाँ, यदेता स्सप्त त्रयस्त्रिंशस्योत्तमा भवन्ति- सप्तविधैकविंशस्य विष्टुति,रेकविंश एव तत्त्रयस्त्रिंशं प्रतिष्ठापयति, प्रति तिष्ठति- य एतया स्तुते।
- <3.8.1>❃ 3.8 अष्टाभ्यो हिङ्करोति- स तिसृभि स्स चतसृभि स्स एकया,ऽष्टाभ्यो हिङ्करोति- स एकया स तिसृभि स्स चतसृभि,रष्टाभ्यो हिङ्करोति- स चतसृभि स्स एकया स तिसृभिः।
- <3.8.2> पशवो वै छन्दोमा[3], यदष्टाभ्योऽष्टाभ्यो हिङ्करो-त्यष्टाशफाꣳ पशवꣳ-शफश.स्तत्पशू.नाप्नोति।
- <3.8.3> चतसृभि.र्विहितैका परिचरा, चतुष्पादाꣳ पशवो- यजमानꣳ परिचरा, यच्चतसृभि र्विदधा- त्येका परिचरा भवति, यजमान.मेव तत्पशुषु प्रतिष्ठापय,त्येषा वै प्रतिष्ठिता चतुर्विंशस्य विष्टुतिꣳ, प्रति तिष्ठति- य एतया स्तुते।

[3] छन्दोगा



Sri Ganapati Sachchidananda Avadhoota Datta Peetham

- <3.9.1>❃ 3.9 पञ्चदशभ्यो हिङ्करोति- स तिसृभि स्स एकादशभि स्स एकया, पञ्चदशभ्यो हिङ्करोति- स एकादशभि स्स एकया स तिसृभि,श्चतुर्दशभ्यो हिङ्करोति- स एकया स तिसृभि स्स दशभिः।
- <3.9.2> ब्रह्मणो वा आयतनं प्रथमा- क्षत्रस्य मध्यमा- विश उत्तमा, यत्पञ्चदशिन्यौ पूर्वे भवत-श्चतुर्दशोत्तमा- ब्रह्मणि चैव तत्क्षत्रे चौजो वीर्य न्दधाति, ब्रह्मणे चैव तत्क्षत्राय च विश मनुगा ङ्करोति, क्षत्रस्येवास्य प्रकाशो भवति- य एतया स्तुते।
- <3.9.3> अस्तोमा वा एते यच्छन्दोगा[4], अयुजो हि स्तोमा युग्मन्ति छन्दांसि, यदेषा युजिनी चतुश्चत्वारिंशस्य विष्टुति,स्स्तेनास्तोमाः।
- <3.9.4> एषा वै प्रतिष्ठिता चतुश्चत्वारिंशस्य विष्टुतिः, प्रति तिष्ठत्येतया स्तुते।
- <3.10.1>❃ 3.10 पञ्चदशभ्यो हिङ्करोति- स एकया स तिसृभि स्स एकादशभि, श्चतुर्दशभ्यो हिङ्करोति- स एकया स तिसृभि स्स दशभिः, पञ्चदशभ्यो हिङ्करोति- स एकादशभि स्स एकया स तिसृभि,र्निर्मध्या।
- <3.10.2> अस्तीव वा अयँ लोको,ऽस्तीवासौ छिद्र.मिवेद.मन्तरिक्षँ, यदेषा निर्मध्या भव.तीमा.नेव लोका.ननु प्र जायते, प्र प्रजया प्र पशुभि.र्जायते- य एतया स्तुते।
- <3.11.1>❃3.11 पञ्चदशभ्यो हिङ्करोति- स तिसृभि स्स एकादशभि स्स एकया, पञ्चदशभ्यो हिङ्करोति- स एकया स तिसृभि स्स एकादशभि,श्चतुर्दशभ्यो हिङ्करोति- स दशभि स्स एकया स तिसृभिः।
- <3.11.2> आज्यानां प्रथमा- पृष्ठाना.न्द्वितीयोक्थाना न्तृतीया।
- <3.11.3> याऽज्यानां सा होतु-र्या पृष्ठानां सा मैत्रावरुणस्य- योक्थानां सा ब्राह्मणाच्छंसिनो, यैव होतु स्साऽच्छावाकस्य- या पृष्ठानां सा होतु-र्योक्थानां सा मैत्रावरुणस्य- याऽऽज्यानां सा ब्राह्मणाच्छंसिनो, यैव होतु स्साऽच्छावाकस्य, योक्थानां सा होतु-र्याऽज्यानां सा मैत्रावरुणस्य- या पृष्ठानां सा ब्राह्मणाच्छंसिनो, यैव होतु स्साऽच्छावाकस्य, सर्वा आज्येषु सर्वाः पृष्ठेषु सर्वा उक्थेषु।

[4] छन्दोगाः

- <3.11.4> पशवो वै समीषन्ती, यदेषा सर्वाणि सवना.न्यनुसञ्चर-त्यनुसवन.मेवैनं पशुभि स्समर्धयति, पशुमा.न्भवति- य एतया स्तुते।

- <3.12.1>❃3.12 षोडशभ्यो हिङ्करोति- स तिसृभि स्स द्वादशभि स्स एकया, षोडशभ्यो हिङ्करोति- स एकया स तिसृभि स्स द्वादशभि,ष्षोडशभ्यो हिङ्करोति- स द्वादशभि स्स एकया स तिसृभिः।

- <3.12.2> अन्तो वा अष्टाचत्वारिंश४, पशव श्छन्दोमा[5]- यत्षोडशभ्य.ष्षोडशभ्यो हिङ्करोति- षोडशकला४ पशव४- कलाश.स्तत्पशू.नाप्नोति।

- <3.12.3> द्वादशभि.र्विहि.तैका परिचरा, द्वादश मासा.स्सँवत्सरो यजमान४ परिचरा, यद्द्वादशभि.र्विदधा.त्येका परिचरा भवति- यजमान.मेव तदन्तत.स्सँवत्सरे पशुषु प्रतिष्ठापय,त्येषा वै प्रतिष्ठिताऽष्टाचत्वारिंशस्य विष्टुति४, प्रति.तिष्ठति- य एतया स्तुते।

- <3.13.1>❃3.13 षोडशभ्यो हिङ्करोति- स तिसृभि स्स दशभि स्स तिसृभि,ष्षोडशभ्यो हिङ्करोति- स तिसृभि स्स तिसृभि स्स दशभि,ष्षोडशभ्यो हिङ्करोति- स दशभि स्स तिसृभि स्स तिसृभि,र्नेदीय.स्सङ्क्रमा।

- <3.13.2> अन्तो वा अष्टाचत्वारिंशो, यथा महावृक्षस्याग्रं सृत्वा नेदीय.स्सङ्क्रमा.त्सङ्क्राम- त्येव.मेत.न्नेदीय.स्सङ्क्रमया नेदीय.स्सङ्क्रमा.त्सङ्क्रामति।

- <3.13.3> दशभि.र्विहिता तिस्र४ परिचरा, दशाक्षरा विरा.डेतावा.न्पुरुषो यदात्मा- प्रजा जाया, यद्दशभि.र्विदधाति- तिस्र४ परिचरा भवन्ति, यजमान.मेव तद्विरा.ज्यन्नाद्येऽन्तत४ प्रतिष्ठापय,त्यन्नादो भवति- य एतया स्तुते।

## ताण्ड्यब्राह्मणे चतुर्थोऽध्यायः

- <4.1.1> गावो वा एतत्सत्त्र.मासत, तासा न्दशसु मास्सु शृङ्गा.ण्यजायन्त, ता अब्रुव.न्नरा[6] स्स्मोत्तिष्ठा.मोपशा नोऽज्ञतेति- ता उदतिष्ठन्।

[5] छन्दोगाः

[6] अब्रुवन्, अराः (अमृद्धाः) स्मः

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

- <4.1.2> तासा न्त्वेवाब्रुव-न्नासामहा एवेमौ द्वादशौ मासौ- सं सँवत्सर.मापयामेति, तासा न्द्वादशसु मास्सु शृङ्गाणि प्रावर्तन्त, ता स्सर्वं मन्नाद्य माप्नुवं,स्ता एता.स्तूपरा,स्तस्मा.त्ता स्सर्वा.न्द्वादश मासᳶ प्रेरते, सर्वं हि ता अन्नाद्य.माप्नुवन्।
- <4.1.3> सर्व.मन्नाद्य.माप्नोति य एवँ वेद।
- <4.1.4> प्रजापतिर्वा इद.मेक आसी,त्सोऽकामयत बहु स्यां प्रजायेयेति, स एत.मतिरात्र.मपश्य,त्तमाऽहर,त्तेनाहोरात्रे प्राजनयत्।
- <4.1.5> यदेषोऽतिरात्रो भव-त्यहोरात्रे एव प्रजनय-न्त्यहोरात्रयोᳶ प्रति तिष्ठ,न्त्येतावान् वाव सँवत्सरो- यदहश्च रात्रि,श्चाहोरात्राभ्या.मेव तत्सँवत्सर.माप्नुवन्ति।
- <4.1.6> यज्ज्योतिष्टोमो भवति यज्ञमुख- न्तद्दध्नुवन्ति, यदुक्थो- यज्ञक्रतो.रनन्तरयाय, यद्रात्रि- स्सर्वस्याऽऽप्त्यै।
- <4.1.7> स एता.न्त्स्तोमा.नपश्य.ज्ज्योति.र्गौरायुरि-तीमे वै लोका- एते स्तोमा- अय.मेव ज्योति-रयं मध्यमो गौ-रसा.वुत्तम आयुः।
- <4.1.8> यदेते स्तोमा भव-न्तीमा.नेव लोका.न्प्रजनय,न्त्येषु लोकेषु प्रति तिष्ठन्ति।
- <4.1.9> स एत.न्त्र्यहं पुनᳶ प्रायुङ्क्त, तेन षडहेन षड्कतू.न्प्राजनयत्।
- <4.1.10> यदेष षडहो भव-त्यृतूनेव प्रजनय-न्त्यृतुषु प्रति तिष्ठन्ति।
- <4.1.11> स एतं षडहं पुनᳶ प्रायुङ्क्त, ताभ्या न्द्वाभ्यां षडहाभ्या न्द्वादश मासᳶ प्राजनयत्।
- <4.1.12> यदेतौ षडहौ भवतो- मासा.नेव प्रजनयन्ति- मासेषु प्रति तिष्ठन्ति।
- <4.1.13> स एतौ द्वौ षडहौ पुनᳶ प्रायुङ्क्त, तैश्चतुर्भि ष्षडहै.श्चतुर्विंशति मर्धमासा.न्प्राजनयत्।
- <4.1.14> यदेते चत्वार ष्षडहा भव-न्त्यर्धमासा.नेव प्रजनय-न्त्यर्धमासेषु प्रति तिष्ठन्ति।
- <4.1.15> स इदं भुवनं प्रजनयित्वा- पृष्ठ्येन षडहेन वीर्य.मात्म.न्यधत्त।
- <4.1.16> यदेष पृष्ठ्य ष्षडहो भवति- वीर्य एवान्ततᳶ प्रति तिष्ठन्ति।

- <4.1.17> तेन मासा.न्त्सँवत्सरं प्राजनय,द्यदेष मासो भवति- सँवत्सरमेव प्रजनयन्ति- सँवत्सरे प्रति तिष्ठन्ति।
- <4.2.1>❈4.2 प्रायणीय.मेत.दह.र्भवति।
- <4.2.2> प्रायणीयेन वा अह्ना देवा स्स्वर्गँ लोकं प्रायन्,यत्प्रायं.स्तत्प्रायणीयस्य प्रायणीयत्वम्।
- <4.2.3> तस्मा.त्प्रायणीयस्याह्न ऋत्विजा भवितव्य,मेतद्धि स्वर्गस्य लोकस्य नेदिष्ठँ, य एतस्यर्त्विङ्ग भवति- हीयते स्वर्गा.ल्लोकात्।
- <4.2.4> चतुर्विंशं भवति।
- <4.2.5> चतुर्विंश.त्यक्षरा गायत्री- तेजो ब्रह्मवर्चस- ङ्गायत्री, तेज एव ब्रह्मवर्चस.मारभ्य प्रयन्ति।
- <4.2.6> चतुर्विंशं भवति- चतुर्विंशो वै सँवत्सर- स्साक्षादेव सँवत्सर.मारभन्ते।
- <4.2.7> यावत्य.श्चतुर्विंशस्योक्थस्य स्तोत्रीया-स्तावत्य स्सँवत्सरस्य रात्रय- स्स्तोत्रीयाभि.रेव तत्सँवत्सर.माप्नुवन्ति।
- <4.2.8> पञ्चदश स्तोत्राणि भवन्ति, पञ्चदशार्धमासस्य रात्रयो-ऽर्धमासश एव तत्सँवत्सर.माप्नुवन्ति।
- <4.2.9> पञ्चदश स्तोत्राणि- पञ्चदश शस्त्राणि समासो, मासश एव तत्सँवत्सर.माप्नुवन्ति।
- <4.2.10> तदाहु.रीर्म इव वा एषा होत्रा- यदच्छावाक्या, यदच्छावाक.मनुसन्तिष्ठत- ईश्वरेर्मा भवितो.रिति, यद्युक्थं स्मा त्रैककुभ.श्चोद्वंशीय.ञ्चान्तत॰ प्रतिष्ठाप्ये, वीर्यँ वा एते सामनी- वीर्य एवान्तत॰ प्रति तिष्ठन्ति।
- <4.2.11> अथो खल्वाहु.रग्निष्टोम.मेव कार्य,मेष वै यज्ञ स्स्वर्ग्यो यदग्निष्टोम, ऊर्ध्वो हि होतार.मनुसन्तिष्ठते।
- <4.2.12> द्वादश स्तोत्राण्यग्निष्टोमो- द्वादश मासा स्सँवत्सर-स्तेन सँवत्सरसंमितो, द्वादश स्तोत्राणि- द्वादश शस्त्राणि- तच्चतुर्विंशति,श्चतुर्विंशति.रर्धमासा स्सँवत्सर-स्तेन सँवत्सरसंमितः।

- <4.2.13> अथो खल्वाहु-रुक्थ.मेव कार्य.मह्न स्समृद्ध्यै।
- <4.2.14> सर्वाणि रूपाणि क्रियन्ते- सर्वं ह्येतेनाह्नाऽऽप्यते।
- <4.2.15> पवन्ते वाजसातये- सोमा स्सहस्रपाजस इति- सहस्रवती प्रतिपत्कार्या।
- <4.2.16> सँवत्सरस्य रूपं, सर्वा.नेवैना.नेतया पुनाति- सर्वा.नभि वदति।
- <4.2.17> अथो खल्वाहुः- पवस्व वाचो अग्रिय इत्येव कार्या, मुखँ वा एत.त्सँवत्सरस्य यद्वाचोऽग्रं- मुखत एव तत्सँवत्सर.मारभन्ते।
- <4.2.18> मिथुन.मिव वा एषा व्याहृतिः, पवस्वेति पुंसो रूपँ- वाच इति स्त्रिया,स्सोमेति पुंसो रूपं- चित्राभि.रिति स्त्रिया, मिथुन.मेवैभ्यो यज्ञमुखे दधाति प्रजननाय।
- <4.2.19> अग्ने युङ्क्षा हि ये तवेति जराबोधीय-मग्निष्टोम साम कार्यँ, युक्तेनैव सँवत्सरेण प्रयन्ति- चतुर्विंशत्यक्षरासु भवति- चतुर्विंशस्य रूपम्।
- <4.2.20> अथो खल्वाहु-र्यज्ञायज्ञीय.मेव कार्यम्।
- <4.2.21> पन्था वै यज्ञायज्ञीयं- पथ एव तन्न यन्ति।
- <4.3.1>❁4.3 अभीवर्तो ब्रह्मसाम भवति।
- <4.3.2> अभीवर्तेन वै देवा स्स्वर्गँ लोक मभ्यवर्तन्त, यदभीवर्तो ब्रह्मसाम भवति- स्वर्गस्य लोकस्याभिवृत्त्यै।
- <4.3.3> एकाक्षर.णिधनो भव,त्येकाक्षरा वै वा-ग्वाचैव तदारभ्य स्वर्गँ लोकँ यन्ति।
- <4.3.4> साम्नेतो य-न्त्यृचा पुन.रायन्ति।
- <4.3.5> साम वा असौ लोक- ऋगयँ, यदित स्साम्ना यन्ति- स्वर्गँ लोक.मारभ्य यन्ति, यदृचा पुन.राय-न्त्यस्मि.न्लोके प्रति तिष्ठन्ति।
- <4.3.6> यत्सामाव.सृजेयु रव स्वर्गा.ल्लोका.त्पद्येरन्, यदृच मनुसृजेयु र्नश्येयु रस्मा.ल्लोकात्।
- <4.3.7> समानं साम भव,त्यन्योऽन्यः प्रगाथो,ऽन्य.दन्यद्धि चित्र,मध्वान मवगच्छ.न्नेति।

- <4.3.8> वृषा वा एष रेतोधा- यदभीवर्त॰, प्रगाथेषु रेतो दध.देति, यदित स्समानं साम भव-त्यन्योऽन्य॰ प्रगाथो- रेत एव तद्दधति, यत्परस्ता.त्समान॰ प्रगाथो भव-त्यन्यदन्य.त्साम-रेत एव तद्धितं प्रजनयन्ति।
- <4.3.9> साम्नेत॰ प्रगाथा न्दुग्धे- प्रगाथेन परस्ता.त्सामानि दुग्धे- सलोमत्वाय।
- <4.3.10> ये वा अध्वानं पुन.र्निवर्तयन्ति- नैन.न्ते गच्छन्ति, येऽपुन.र्निवर्तँ यन्ति ते गच्छन्ति।
- <4.3.11> य आस्तुत ङ्कुर्वते- यथा दुग्धा.मुपसीदे.देव न्तत्।
- <4.3.12> ये नास्तुतँ- यँ काम ङ्कामयन्ते- तमभ्यश्नुवते।
- <4.3.13> ब्रह्मवादिनो वदन्ति- यातयामा स्सँवत्सरा3- अयातयामा3 इति, ते नायातयामेति वक्तव्यं, पुन.रन्यानि स्तोत्राणि निवर्तन्त- ऊर्ध्वमेव ब्रह्मसामैति।
- <4.4.1> ❃ 4.4 पञ्चसु मास्सु बार्हता॰ प्रगाथा आप्यन्ते।
- <4.4.2> तेष्वाप्तेषु छन्दसी सँयुज्यैतव्यम्।
- <4.4.3> तिस्र उष्णिह स्स्यु-रेका गायत्री, ता.स्तिस्रो बृहत्यो भवन्ति।
- <4.4.4> तदाहु स्संशर इव वा एष च्छन्दसां- यद्वे छन्दसी सँयुञ्जन्तीति।
- <4.4.5> चतुरुत्तरै.रेव च्छन्दोभि.रेतव्यम्।
- <4.4.6> पशवो वै चतु.रुत्तराणि च्छन्दांसि, पशुभि.रेव तत्स्वर्गँ लोक.माक्रममाणा नयन्ति।
- <4.4.7> एका ङ्गायत्री मेकाह मुपेयु- रेका मुष्णिह मेकाह- मेका मनुष्टुभ मेकाहं- बृहत्या पञ्च मास इयु॰, पङ्क्ति.मेकाह मुपेयु-स्त्रिष्टुभा षष्ठं मास मीयु- श्श्वो विषुवा.न्भवितेति जगती मुपेयुः।
- <4.4.8> तदाहु.रनवक्लृप्तानि वा एतानि च्छन्दांसि- मध्यन्दिने बृहत्या चैव त्रिष्टुभा चैतव्यम्।
- <4.4.9> एते वै छन्दसी वीर्यवती- एते प्रत्यक्षं मध्यन्दिनस्य रूपम्।

- <4.4.10> राथन्तरेऽहनि बृहती का-र्यैतद्वै रथन्तरस्य स्व.मायतनँ यद्बृहती, स्व एव तदायतने रथन्तरं प्रति तिष्ठति, बार्हतेऽहनि त्रिष्टुप्का-र्यैतद्वै बृहत स्स्व.मायतनं य.त्त्रिष्टु,प्स्व एव तदायतने बृहद्रथन्तरे प्रतितिष्ठन्ती इतः।
- <4.4.11> त्रयस्त्रिंशता प्रगाथै.रेतव्य- न्त्रयस्त्रिंश.द्देवता- देवतास्वेव प्रतितिष्ठन्तो यन्ति, चतुर्विंशत्यैतव्य- श्चतुर्विंशति.रर्धमासा स्सँवत्सर- स्सँवत्सर एव प्रतितिष्ठन्तो यन्ति, द्वादशभि.रेतव्य- न्द्वादश मासा स्सँवत्सर- स्सँवत्सर एव प्रतितिष्ठन्तो यन्ति, षड्भि.रेतव्यं- षड्तव- ऋतुष्वेव प्रतितिष्ठन्तो यन्ति, चतुर्भि.रेतव्य- श्चतुष्पादाः पशवः- पशुष्वेव प्रतितिष्ठन्तो यन्ति, त्रिभि.रेतव्य- न्त्रय इमे लोका- एष्वेव लोकेषु प्रतितिष्ठन्तो यन्ति, द्वाभ्या.मेतव्य- न्द्विपा.द्यजमान स्स्वर्गस्य लोकस्याऽऽक्रान्त्या- अन्येनान्येन हि पदा पुरुषः प्रतितिष्ठ.न्नेति।
- <4.5.1>❁ 4.5 स्वर.सामान एते भवन्ति।
- <4.5.2> स्वर्भानु.र्वा आसुर आदित्य न्तमसाऽविध्य,त्त न्देवा स्स्वरै.रस्पृण्वन्, यत्स्वरसामानो भव.न्त्यादित्यस्य स्पृत्यै।
- <4.5.3> परै.र्वै देवा आदित्यं स्वर्गँ लोक.मपारयन्, यदपारयं.स्तत्पराणां परत्वम्।
- <4.5.4> पारय.न्त्येनं पराणि- य एवँ वेद।
- <4.5.5> सप्तदशा भवन्ति।
- <4.5.6> प्रजापतिर्वै सप्तदशः- प्रजापति.मेवोप.यन्ति।
- <4.5.7> अनुष्टुप्छन्दसो भव-न्त्यानुष्टुभो वै प्रजापति- स्साक्षादेव प्रजापति.मारभन्ते।
- <4.5.8> त्रयः पुरस्ता-त्त्रयः परस्ता.द्भवन्ति।
- <4.5.9> देवा वा आदित्यस्य स्वर्गा.ल्लोका.दवपादा.दबिभयु,स्तमेतै स्स्तोमै स्सप्तदशै.रदृंहन्, यदेते स्तोमा भव.न्त्यादित्यस्य धृत्यै।
- <4.5.10> चतुस्त्रिंशा भवन्ति, वर्ष्म वै चतुस्त्रिंशो- वर्ष्मणैवैनं संमिमते।
- <4.5.11> तस्य पराचीनातिपादा.दबिभयु,स्तं सर्वै स्स्तोमैः पर्यार्षन् विश्वजि.दभिजिद्भ्यां, वीर्यँ वा एतौ स्तोमौ- वीर्येणैव तदादित्यं पर्युषन्ति धृत्यै।
- <4.5.12> अनवपादा.याnतिपादाय।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

- <4.5.13> तदाहुᳲ कर्तप्रस्कन्द इव वा एष- यत्त्रयस्त्रिंशा-त्सप्तदश.मुपयन्तीति, पृष्ठ्योऽन्तरᳲ कार्यः।
- <4.5.14> तस्य यत्सप्तदश.मह,स्तदुत्तम.ङ्कार्यं सलोमत्वाय।
- <4.5.15> तदाहु-रुदरँ वा एष स्तोमानां- यत्सप्तदशो, यत्सप्तदशं मध्यतो निर्हरेयु,रशनायवᳲ प्रजा स्स्यु-रशनायव स्सत्त्रिणः।
- <4.5.16> त्रयस्त्रिंशादेव सप्तदश उपेत्यो, वर्ष्म वै त्रयस्त्रिंशो- वर्ष्म सप्तदशो- वर्ष्मण एव तद्वर्ष्माभि.सङ्क्रामन्ति।
- <4.5.17> तानाहु.रुक्थाᳲ कार्या 3 अग्निष्टोमा 3 इति, यद्युक्था स्स्युः।
- <4.5.18> पशवो वा उक्थानि- शान्तिᳲ पशव- श्शान्तेनैव तद्विषुवन्त.मुप यन्ति।
- <4.5.19> तदाहु-र्विवीवध.मिव वा एत.द्यदग्निष्टोमो विषुवा,नग्निष्टोमौ विश्वजि.दभिजिता,वथेतर उक्था स्स्युरिति।
- <4.5.20> अग्निष्टोमा एव सर्वे कार्याः।
- <4.5.21> वीर्यँ वा अग्निष्टोमो- वीर्य एव मध्यतᳲ प्रति तिष्ठन्ति, नव संस्तुता भवन्ति- नव प्राणाᳲ प्राणेष्वेव प्रति तिष्ठन्ति।
- <4.6.1>❀ 4.6 विषुवा.नेष भवति।
- <4.6.2> देवलोको वा एष यद्विषुवा,न्देवलोक.मेव तदभ्यारोहन्ति।
- <4.6.3> एकविंशो भव,त्येकविंशो वा अस्य भुवनस्याऽऽदित्य- आदित्यलोक.मेव तदभ्यारोहन्ति।
- <4.6.4> द्वादश मासाᳲ पञ्चर्तव-स्त्रय इमे लोका- असा.वादित्य एकविंशः।
- <4.6.5> मध्यत एव यज्ञस्य प्रति तिष्ठन्ति।
- <4.6.6> वायो शुक्रो अयामि त- इति शुक्रवती प्रतिप.द्भव-त्यादित्यस्य रूपम्।
- <4.6.7> वायुर्वा एत न्देवताना.मानशे-ऽनुष्टु.प्छन्दसाँ, यदतोऽन्या प्रतिपत्स्या.त्प्रदहेत्।
- <4.6.8> यन्ति वा एते प्राणा.दित्याहु.र्ये गायत्र्याᳲ प्रतिपदो यन्तीति, यद्वायव्या भवन्ति- तेन प्राणान्न यन्ति, प्राणो हि वायुः।
- <4.6.9> अथो शमय.न्त्येवैन.मेतया, शान्तिर्हि वायुः।

- <4.6.10> आ याहि सोमपीतय- इति सौमी पावमानी।
- <4.6.11> नियुत्वती भवति, पशवो वै नियुत- श्शान्तिः पशव- श्शान्तेनैव तदादित्य-मुप यन्ति।
- <4.6.12> दिवाकीर्त्यसामा भवति।
- <4.6.13> स्वर्भानु.र्वा आसुर आदित्य न्तमसाऽविध्य,त्तस्य देवा दिवाकीर्त्यै.स्तमोऽपाघ्नन्, यद्दिवाकीर्त्यानि भवन्ति- तम एवास्मा.दपघ्नन्ति, रश्मयो वा एत आदित्यस्य- यद्दिवाकीर्त्यानि, रश्मिभि.रेव तदादित्यं साक्षा.दारभन्ते।
- <4.6.14> भ्राजाभ्राजे पवमानमुखे भवतो, मुखत एवास्य ताभ्या न्तमोऽपघ्नन्ति।
- <4.6.15> महादिवाकीर्त्यञ्च विकर्णञ्च मध्यतो भवतो, मध्यत एवास्य ताभ्या न्तमोऽपघ्नन्ति, भास.मन्ततो भवति, पत्त एवास्य तेन तमोऽपघ्नन्ति।
- <4.6.16> दशस्तोभं भवति, दशाक्षरा विरा.ड्विराज्येव प्रति तिष्ठन्ति।
- <4.6.17> यत्त्वित्याहु- ष्षड्भि.रितो मासै.रध्वानं यन्ति- षड्भिः पुन.रायन्ति- क्व तर्हि स्वर्गो लोको- यस्य कामाय सत्त्र.मासत इति।
- <4.6.18> मूर्धान.न्दिव- इति स्वर्गँ लोक.मारभन्ते।
- <4.6.19> अरतिं पृथिव्या- इत्यस्मि.न्लोके प्रति तिष्ठन्ति।
- <4.6.20> वैश्वानर.मृत आजात.मग्नि-मिति विषुवत एव तद्रूप ङ्क्रियते।
- <4.6.21> कविं सम्राज.मतिथि ञ्जनाना-मित्यन्नाद्य मेवोप यन्ति।
- <4.6.22> आसन्ना पात्र ञ्जनयन्त देवा- इति जायन्त एव।
- <4.6.23> तत्त्रिष्टुब्जगतीषु भवति- त्रैष्टुब्जागतो वा आदित्यो, यदतोऽन्यासु स्या.दव स्वर्गा.ल्लोका.त्पद्येरन्।
- <4.6.24> सम्राड्वतीषु भवति, साम्राज्यँ वै स्वर्गो लोक- स्स्वर्ग एव लोके प्रति तिष्ठन्ति।
- <4.7.1>❃ 4.7 आत्मा वा एष सँवत्सरस्य यद्विषुवा,न्पक्षा.वेता.वभितो भवतो, येन चेतोऽभीवर्तेन यन्ति- यश्च परस्मा.त्प्रगाथो भवति- तावुभौ विषुवति कार्यौ, पक्षा.वेव तद्यज्ञस्यात्म.न्प्रति दधति- स्वर्गस्य लोकस्य समष्ट्यै।
- <4.7.2> इन्द्र क्रतुन्न आभरेति प्रगाथो भवति।

- <4.7.3> वसिष्ठो वा एतं पुत्रहतोऽपश्य,त्स प्रजया पशुभिᳲ प्राजायत, यदेष प्रगाथो भवति प्रजात्यै।

- <4.7.4> जीवा ज्योति.रशीमहीति- ये वै स्वस्ति सँवत्सरं सन्तरन्ति- ते जीवा ज्योति.रश्नुवते।

- <4.7.5> मा नो अज्ञाता वृजना दुराध्यो- मा शिवासोऽवक्रमु-रिति, ये वै स्तेना रिपव.स्ते दुराध्य.स्तानेव तदति.क्रामन्ति।

- <4.7.6> त्वया वयं प्रवत श्शश्वती.रपोऽति शूर तरामसीति, सँवत्सरो वै प्रवत श्शश्वती.रप-स्तमेव तत्तरन्ति।

- <4.7.7> अद्याद्याश्व.श्श्व-स्त्वामिदा ह्यो नरो- वय.मेन.मिदा ह्य- इति सन्तनयᳲ प्रगाथा भवन्ति, तेषा.मेकᳲ कार्य स्सलोमत्वाय- श्वस्तन.मेवाभि सन्तन्वन्ति।

- <4.7.8> अथो खल्वाहु-रिन्द्र क्रतुन्न आभरेत्येव कार्यं समृद्ध्यै।

- <4.7.9> प्रत्यवरोहिणो मासा भवन्ति।

- <4.7.10> यथा वा इतो वृक्षं रोह-न्त्येव.मेनं प्रत्यव रोहन्ति, स्वर्गमेव लोकं रूढ्वाऽस्मि.न्लोके प्रति तिष्ठन्ति।

- <4.8.1>❃ 4.8 गौश्चाऽऽयुश्च स्तोमौ भवतः।

- <4.8.2> द्विपा.द्यजमानᳲ प्रतिष्ठित्यै।

- <4.8.3> ऊनातिरिक्तौ भवत, ऊनातिरिक्तँ वा अनु प्रजाᳲ प्रजायन्ते प्रजात्यै।

- <4.8.4> वैराजौ भवतो,ऽन्नं विरा-डन्नाद्य एव प्रति तिष्ठन्ति।

- <4.8.5> द्वादशाहस्य दशाहानि भवन्ति।

- <4.8.6> विराड्वा एषा समृद्धा- यद्दशाहानि, विराज्येव समृद्धायां प्रति तिष्ठन्ति।

- <4.8.7> पृष्ठानि भवन्ति- वीर्यँ वै पृष्ठानि- वीर्य एव प्रति तिष्ठन्ति,च्छन्दोमा भवन्ति- पशवो वै छन्दोमाᳲ- पशुष्वेव प्रतितिष्ठ,न्त्यथैत.द्दशम.मह.राप्त.स्तोम माप्त.च्छन्द-आप्त.विभक्तिक,मनिरुक्तं प्राजापत्यम्।

- <4.8.8> यदध्याहु-रति तद्रेचयन्ति- तस्मान्न व्युच्यम्।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

- <4.8.9> परोऽक्ष.मनुष्टुभ मुप यन्ति, प्रजापतिर्वा अनुष्टु-ब्य.त्प्रत्यक्ष.मुपेयु꞉- प्रजापति.मृच्छेयुः।
- <4.8.10> यो वै सत्त्रस्य सद्वेद- सद्भवति, वामदेव्यँ वै साम्नां स-दग्नि.र्देवतानां विरा.ढ्छन्दसा-त्त्रयस्त्रिंश स्स्तोमाना, न्तान्येव तदेकधा सम्भृत्योत्तिष्ठन्ति।
- <4.8.11> ब्रह्मवादिनो वदन्ति- यत स्सत्त्रा.दुदस्थाता3 स्थिता3 इति।
- <4.8.12> ये रथन्तरेण स्तुत्वोत्तिष्ठन्ति- ते यत उत्तिष्ठन्ति- तान्ब्रूया.दप्रतिष्ठाना भविष्यन्तीति, ये बृहता स्तुत्योत्तिष्ठन्ति- ते स्थिता.दुत्तिष्ठन्ति- ता.न्ब्रूया-त्स्थायुकैषां श्री.र्भविष्यति- न वसीयांसो भविष्यन्तीति।
- <4.8.13> ये वामदेव्येन स्तुत्वोत्तिष्ठन्ति- ते सत स्स.दभ्युत्तिष्ठन्ति, पूर्णा.त्पूर्ण मायतना.दायतन, मन्तरिक्षाऽऽयतना हि प्रजा।
- <4.8.14> त्रयस्त्रिंश.दक्षरासु भवति, त्रयस्त्रिंश.द्देवता, देवतास्वेव प्रतिष्ठायोत्तिष्ठन्ति।
- <4.8.15> प्राजापत्यँ वै वामदेव्यं- प्रजापता.वेव प्रतिष्ठायोत्तिष्ठन्ति, पशवो वै वामदेव्यं- पशुष्वेव प्रतिष्ठायोत्तिष्ठन्ति, शान्तिर्वै वामदेव्यं- शान्ता.वेव प्रतिष्ठायोत्तिष्ठन्ति।
- <4.9.1>❃ 4.9 पत्नी स्सँयाज्य- प्राञ्च उदे.त्यायं सहस्रमानव इत्यतिच्छन्दसा ऽऽहवनीय.मुपतिष्ठन्ते।
- <4.9.2> इमे वै लोका अतिच्छन्दा- एष्वेव लोकेषु प्रति तिष्ठन्ति।
- <4.9.3> गोरिति निधनं भवति- विराजो वा एत.द्रूपँ यद्गौ,र्विराज्येव प्रति तिष्ठन्ति।
- <4.9.4> प्रत्यञ्च꞉ प्रपद्य सार्पराज्ञ्या ऋग्भि स्स्तुवन्ति।
- <4.9.5> अर्बुद स्सर्प एताभि.र्मृता न्त्वच मपाऽऽहत, मृता.मेवैताभि.स्त्वच.मपघ्नते।
- <4.9.6> इयँ वै सार्परा.ज्ञ्यस्या.मेव प्रति तिष्ठन्ति।
- <4.9.7> तिसृभि स्स्तुवन्ति- त्रय इमे लोका- एष्वेव लोकेषु प्रति तिष्ठन्ति।
- <4.9.8> मनसोपाऽऽवर्तयति।
- <4.9.9> मनसा हिङ्करोति- मनसा प्रस्तौति- मनसोद्गायति- मनसा प्रति हरति- मनसा निधन मुपय-न्त्यसमाप्तस्य समाप्त्यै।
- <4.9.10> यद्वै वाचा न समाप्नुवन्ति- मनसा तत्समाप्नुवन्ति।

- <4.9.11> परिश्रिते स्तुवन्ति- ब्रह्मण꣮ परिगृहीत्यै।
- <4.9.12> ब्रह्मोद्यँ वदन्ति- ब्रह्मवर्चस एव प्रति तिष्ठन्ति।
- <4.9.13> चतुर्होतारं होता व्याचष्टे- स्तुत.मेव तदनु शंसति, नहि तत्स्तुतँ यदननुशस्तम्।
- <4.9.14> प्रजापतिं परिवद,न्त्यास्वैवैन न्तद्याचक्षते- तावदापामैन.मिति।
- <4.9.15> गृहपति रौदुम्बरी न्धारयति, गृहपतिर्वा ऊर्जो यन्तौँर्ज.मेवैभ्यो यच्छति। (यन्ता, ऊर्जम्)
- <4.9.16> वाचँ यच्छन्ति।
- <4.9.17> दुग्धानीव वै तर्हि छन्दांसि, यातयामा.न्यन्तर्गतानि- तान्येव तद्रसेनाऽऽप्याययन्ति।
- <4.9.18> अथो श्वस्तन.मेवाभि सन्तन्वन्ति।
- <4.9.19> आत्मदक्षिणँ वा एत-द्यत्सत्त्रम्।
- <4.9.20> यदा वै पुरुष आत्मनोऽवद्यति- यङ्काम ङ्कामयते तमभ्यश्नुते।
- <4.9.21> द्वाभ्याँ लोमावद्यति- द्वाभ्या न्त्वच- न्द्वाभ्यां मांस- न्द्वाभ्या मस्थि- द्वाभ्यां मज्जान- न्द्वाभ्यां पीवश्च लोहितञ्च।
- <4.9.22> शिखा अनु प्रवपन्ते- पाप्मान.मेव तदपघ्नते- लघीयांस स्स्वर्गं लोक.मयामेति।
- <4.9.23> अथो गवा.मेवानुरूपा भवन्ति- सर्वस्यान्नाद्य.स्यावरुद्ध्यै।
- <4.10.1>❀ 4.10 प्रजापति꣮ प्रजा असृजत- सोऽरिच्यत- सोऽपद्यत- तन्देवा अभि समगच्छन्त, तेऽब्रुव-न्मह.दस्मै व्रतं सम्भराम- यदिम न्धिनवदिति, तस्मै यत्सँवत्सर.मन्नं पच्यते- तत्समभरं,स्तदस्मै प्रायच्छं-स्त.दव्रजय-त्तदेन मधिनो,न्महन्मर्या व्रतँ- यदिम.मधिन्वी.दिति, तन्महाव्रतस्य महाव्रतत्वम्।
- <4.10.2> प्रजापति.र्वाव महां-स्तस्यैतद्व्रत.मन्नमेव।
- <4.10.3> तदाहु.र्मध्य स्सँवत्सरस्योपेत्यं- मध्यतो वा अन्न.ञ्जग्ध.न्धिनोति।

- <4.10.4> तद्वाहु.र्यन्मध्यत उपय-न्त्यर्ध.मन्नाद्यस्याऽऽप्तुव-न्त्यर्धं सम्बद्धुर्वन्ती-त्युपरिष्टा.देव सँवत्सरस्योपेत्यं- सँवत्सरे वा अन्नं सर्वं पच्यते।
- <4.10.5> चतुर्विंशं भवति, चतुर्विंशो वै सँवत्सरोऽन्नं पञ्चविंशम्।
- <4.10.6> यद्वा अद.श्चतुर्विंशं प्रायणीय- न्तदेत.दुदयनीयम्।
- <4.10.7> यत्सँवत्सर.मन्नं सम्भरन्ति- सैषा पञ्चविंश्युपजायते।

## ताण्ड्यब्राह्मणे पञ्चमोऽध्यायः

- <5.1.1> ❃5.1 वामदेव्यं महाव्रत.ङ्कार्यम्।
- <5.1.2> त्रिवृ.च्छिरो भवति।
- <5.1.3> त्रिवृ.द्ध्येव शिरो लोम त्वगस्थि।
- <5.1.4> पाङ्क्त इतर आत्मा, लोम त्वङ्मांस.मस्थि मज्जा।
- <5.1.5> सकृ.द्धिङ्कृतेन शिरसा पाराचा स्तुवते।
- <5.1.6> तस्मा.च्छिरोऽङ्गानि मेद्यन्ति नानुमेद्यति, न कृश्य.न्त्यनुकृश्यति।
- <5.1.7> पुन.रभ्यावर्त.मितरेणाऽऽत्मना स्तुवते, तस्मा.दितर आत्मा मेद्यति च कृश्यति च।
- <5.1.8> अर्कवतीषु गायत्रीषु शिरो भवति।
- <5.1.9> अन्नँ वा अर्को- ब्रह्मवर्चस.ङ्गाय,त्र्यन्नाद्य.ञ्चैवैभ्यो ब्रह्मवर्चसञ्च मुखतो दधाति।
- <5.1.10> पञ्चदश.सप्तदशौ पक्षौ भवतः, पक्षाभ्याँ वै यजमानो वयो भूत्वा स्वर्गँ लोक.मेति।
- <5.1.11> तावाहु- स्समौ कार्यौ पञ्चदशौ वा सप्तदशौ वा सवीवधत्वाय।
- <5.1.12> तद्वाहु-र्यत्समौ भवत- एकवीर्यौ तर्हि भवत इति, पञ्चदश.सप्तदशा.वेव कार्यौ, साचीव वै वयः पक्षौ कृत्वा पतीयः पतति।
- <5.1.13> दक्षिणतो बृहत्कार्य- न्दक्षिणो वा अर्ध आत्मनो वीर्यवत्तरः।
- <5.1.14> अथो खल्वाहु-रुत्तरत एव कार्यं ब्राह्मणाच्छंसिनोऽर्धा,त्त्रैष्टुभँ वै बृह-त्त्रैष्टुभो वै ब्राह्मणाच्छंसी- त्रैष्टुभः पञ्चदश.स्स्तोमः।

- <5.1.15> दक्षिणतो रथन्तर.ङ्कार्यं मैत्रावरुणस्यार्धा,द्गायत्रँ वै रथन्तर- ङ्गायत्रो मैत्रावरुणो- गायत्र स्सप्तदश.स्स्तोमः।
- <5.1.16> एकविंशं पुच्छं भवति।
- <5.1.17> एकविंशो वै स्तोमानां प्रतिष्ठा, तस्मा.द्वय꣡ पुच्छेन प्रतिष्ठायोत्पतति- पुच्छेन प्रतिष्ठाय निषीदति।
- <5.1.18> यज्ञायज्ञीयं पुच्छं कार्यँ, यज्ञायज्ञीयं ह्येव महाव्रतस्य पुच्छम्।
- <5.1.19> अथो खल्वाहु-रतिशयँ वै द्विपदाँ यज्ञायज्ञीयं, भद्रमेव कार्यं समृद्ध्यै।
- <5.2.1> ❀5.2 वामदेव्यं महाव्रत.ङ्कार्य,न्तस्य गायत्रं शिरो- बृहद्रथन्तरे पक्षौ- यज्ञायज्ञीयं पुच्छम्।
- <5.2.2> यो वै महाव्रते सहस्रं प्रोतं वेद- प्र सहस्रं पशू.नाप्नोति।
- <5.2.3> तस्य प्राची दिक्शिर-स्तच्छन्दोभि स्साहस्र,मसा.वन्यतर꣡ पक्ष स्स नक्षत्त्रै स्साहस्रो,ऽय.मन्यतर꣡ पक्ष- स्स ओषधिभिश्च वनस्पतिभिश्च साहस्रो,ऽन्तरिक्ष.मात्मा, तद्वयोभि स्साहस्रं- प्रतीची दिक्पुच्छ- न्तदग्निभिश्च रश्मिभिश्च साहस्रं, प्र सहस्रं पशू.नाप्नोति- य एवँ वेद।
- <5.2.4> तदाहु-रपृष्ठँ वै वामदेव्य.मनिधनं हीति।
- <5.2.5> अनायतनँ वा एत.त्साम- य.दनिधनम्।
- <5.2.6> राजनं महाव्रत.ङ्कार्यम्।
- <5.2.7> एतद्वै साक्षाद.न्नँ- यद्राजनं, पञ्चविधं भवति पाङ्क्तं ह्यन्नम्।
- <5.2.8> हिङ्कारव.द्भवति, तेन वामदेव्यस्य रूपम्।
- <5.2.9> निधनव.द्भवति, तेन पृष्ठस्य रूपम्।
- <5.2.10> अतिच्छन्दस्सु पञ्चनिधनं वामदेव्यं ब्रह्मसाम कार्यम्।
- <5.2.11> अति वा एषाऽन्यानि च्छन्दांसि यदतिच्छन्दा, अत्येत.दन्या.न्यहा.न्यह.र्यन्महाव्रतम्।
- <5.2.12> ब्रह्मसाम्नैव तदन्या.न्यहा.न्यतिमेदयति।
- <5.2.13> पञ्चनिधनं भवति, पाङ्क्तं ह्यन्नम्।
- <5.3.1>❀5.3 इलान्द.मग्निष्टोमसाम कार्यम्।

Sri Ganapathy Sachchidananda Avadhoota Datta Peetham • Mysore

- <5.3.2> एतद्वै साक्षा.दन्नँ- यदिलान्द,मिराऽन्नँ वा एत,दिराया मेवान्नाद्येऽन्ततः प्रति तिष्ठन्ति।
- <5.3.3> समुद्रो वा एतच्छन्द स्सलिलं लोमशं, समुद्र इव खलु वै स भवति सलिल इव लोमश इव यो भवति।
- <5.3.4> तस्मा.देतासु कार्यं समृद्ध्यै।
- <5.3.5> व्रत.मिति निधनं भवति- महाव्रतस्यैव तद्रूप.क्क्रियते, स्वरिति भवति- स्वर्गस्य लोकस्य समष्ट्यै, शकुन इति भवति- शकुन इव वै यजमानो वयो भूत्वा- स्वर्गँ लोक.मेति।
- <5.3.6> यज्ञायज्ञीय मग्निष्टोमसाम कार्यम्।
- <5.3.7> यद्वा अन्या वा.ङ्गातिवदे-त्तदग्निष्टोमसाम कार्य,न्न वै वा.ग्वाच मतिवदति, वा.ग्यज्ञायज्ञीयँ, वाच्येवान्ततः प्रति तिष्ठन्ति।
- <5.3.8> वारवन्तीय मग्निष्टोमसाम कार्यम्।
- <5.3.9> अग्निर्वा इदँ वैश्वानरो दह न्नै,त्तस्मा.द्देवा अबिभयु,स्तँ वरणशाखयाऽवारयन्त, यदवारयन्त- तस्मा.द्वारवन्तीयम्।
- <5.3.10> तस्मा.द्वरणो भिषज्य, एतेन हि देवा आत्मान.मत्रायन्त।
- <5.3.11> तस्मा.द्ब्राह्मणो वारणेन न पिबे,द्वैश्वानर न्ने.च्छमया इति।
- <5.3.12> पशवो वै वारवन्तीयं- शान्तिः पशव, श्शान्ता.देव तत्सँवत्सरा.दुत्तिष्ठन्ति।
- <5.4.1>❃5.4 प्राणेन पुरस्ता.दाहवनीय.मुप तिष्ठन्ते, प्राण.मेव तज्जयन्ति।
- <5.4.2> अपानेन पश्चा.त्पुच्छ मुप तिष्ठन्ते,ऽपान.मेव तज्जयन्ति।
- <5.4.3> व्रतपक्षाभ्यां पक्षा.वुप तिष्ठन्ते, दिश एव तज्जयन्ति।
- <5.4.4> प्रजापतेर्हृदये.नापिकक्ष मुप तिष्ठन्ते, ज्यैष्ठ्यमेव तज्जयन्ति।
- <5.4.5> वसिष्ठस्य निहवेन चात्वाल मुप तिष्ठन्ते, स्वर्ग.मेव तल्लोक माप्त्वा श्रियँ वदन्ते।
- <5.4.6> वैश्वदेव्या.मृचि भवति, विश्वरूपँ वै पशूनां रूपं- पशू.नेव तज्जयन्ति।
- <5.4.7> सत्त्रस्यर्द्ध्याऽऽग्नीध्र मुपतिष्ठन्त, ऋद्धा.वेव प्रति तिष्ठन्ति।
- <5.4.8> चतुरक्षर.णिधनं भवति, चतुष्पादाः पशवः- पशुष्वेव प्रति तिष्ठन्ति।
- <5.4.9> आतमितो.र्निधन मुप य,न्त्यायु.रेव सर्व माप्नुवन्ति।

Sri Ganapathy Sachchidananda Avadhoota Datta Peetham

- <5.4.10> श्लोकानुश्लोकाभ्यां हविर्धाने उप तिष्ठन्ते, कीर्ति.मेव तज्जयन्ति।
- <5.4.11> यामेन मार्जालीय मुप तिष्ठन्ते, पितृलोक.मेव तज्जयन्ति।
- <5.4.12> आयुर्णव.स्तोभाभ्यां सद उपतिष्ठन्ते, ब्रह्म चैव तत्क्षत्रञ्च जयन्ति।
- <5.4.13> ऋश्यस्य साम्ना गार्हपत्य मुप तिष्ठन्ते।
- <5.4.14> इन्द्रं सर्वाणि भूता.न्यस्तुवं,स्तस्यश्यै एक मङ्ग मस्तुत मचाय,त्तदस्यैतेनास्तौ,त्तेनास्य प्रिय न्धामोपागच्छ,त्प्रिय.मेवास्यैतेन धामोप गच्छन्ति।
- <5.4.15> य.त्परोऽक्ष.न्निधन.मुपेयु- र्ह्रीतमुखं प्रति मुञ्चेर,न्प्रत्यक्ष मुपयन्ति- ह्रीतमुख. मेवाप जयन्ति।
- <5.5.1>❃5.5 आसन्दी मारुह्यो.द्गायति, देवसाक्ष्य एव तदुपरिषद्य.ञ्जयति।
- <5.5.2> औदुम्बरी भव,त्यूर्गुदुम्बर ऊर्ज.मेवाव रुन्द्धे।
- <5.5.3> प्रादेशमात्री भव,त्यस्य लोकस्यानुद्धानाय।
- <5.5.4> छन्दोभि रारोहति, स्वर्गमेव तल्लोक मारोहति।
- <5.5.5> छन्दोभि रुपावरोह,त्यस्मि.न्लोके प्रति तिष्ठति।
- <5.5.6> सर्वेणाऽऽत्मना समुद्धृत्योद्गीय,मेषु लोकेषु नेद्व्याहितोऽसानीति।
- <5.5.7> एकस्यां स्तोत्रीयाया मस्तुतायां पादा.वुपाऽऽहरति।
- <5.5.8> सह निधनेन प्रतिष्ठा मुपय,न्त्येष्वेव लोकेषु प्रति तिष्ठन्ति।
- <5.5.9> प्रेङ्खा.मारुह्य होता शंसति, महस एव तद्रूप.क्रियते।
- <5.5.10> यदा वै प्रजा मह आविशति- प्रेङ्खा.स्तर्ह्या रोहन्ति।
- <5.5.11> फलक.मारुह्याध्वर्युः प्रति गृणाति।
- <5.5.12> कूर्चा.नितरेऽध्यासत,- ऊर्ध्वा एव तदुत्क्रामन्तो यन्ति।
- <5.5.13> अभिगरापगरौ भवतो, निन्दत्येना-नन्यः प्रान्य श्शंसति, य एना.न्निन्दति पाप्मान.मेषां सोऽप हन्ति, यः प्रशंसति- यदेवैषां सुष्टुतं सुशस्त- न्तत्सोऽभि गृणाति।
- <5.5.14> शूद्राऽऽर्यौ चर्मणि व्यायच्छेते, तयो.रार्यँ वर्ण.मुज्जापयन्ति।
- <5.5.15> देवाश्च वा असुराश्चाऽऽदित्ये व्यायच्छन्त-स्त न्देवा अभ्यजयं,स्ततो देवा अभव-न्पराऽसुरा अभव,न्नात्मना पराऽस्य भ्रातृव्यो भवति- य एवँ वेद।

- <5.5.16> यदार्यँ वर्ण.मुज्ज्ञापय,न्त्यात्मान.मेव तदुज्ज्ञापयन्ति।
- <5.5.17> परिमण्डल ञ्चर्म भव,त्यादित्यस्यैव तद्रूप.ङ्क्रियते।
- <5.5.18> सर्वासु स्रक्तिषु दुन्दुभयो वदन्ति, या वनस्पतिषु वा.क्तामेव तज्जयन्ति।
- <5.5.19> भूमिदुन्दुभि.र्भवति, या पृथिव्यां वा-क्तामेव तज्जयन्ति।
- <5.5.20> सर्वा वाचो वदन्ति, येषु लोकेषु वा-क्तामेव तज्जयन्ति।
- <5.5.21> सन्नद्धा॰ कवचिन॰ परिय,न्तीन्द्रियस्यैव तद्रूप.ङ्क्रियते,ऽथो महाव्रत.मेव महयन्ति।
- <5.6.1>❃5.6 सर्वे सहर्त्विजो महाव्रतेन स्तुवीरन्।
- <5.6.2> अध्वर्यु श्शिरसोद्गाये-न्मैत्रावरुणो दक्षिणेन पक्षेण- ब्राह्मणाच्छंस्युत्तरेण-गृहपति॰ पुच्छे-नोद्गाताऽऽत्मना।
- <5.6.3> तद्य.द्येव.ङ्कुर्यु-रेकैकया स्तोत्रीययाऽस्तुतयोद्गातार मभिसमेयुः।
- <5.6.4> तिसृभि रुद्गाताऽऽत्मन उद्गी-याथ या शिरस स्स्तोत्रीया- ता.न्दध्या,दपराभि स्तिसृभि रुद्गी-याथ या दक्षिणस्य पक्षस्य स्तोत्रीया- ता.न्दध्या,दपराभि स्तिसृभि रुद्गी-याथ योत्तरस्य पक्षस्य स्तोत्रीया- ता.न्दध्या,त्तिसृभि.र्वैकया वा स्तुतं स्या,दथ या पुच्छस्य स्तोत्रीया- ता.न्दध्यात्।
- <5.6.5> आत्म.न्येव तदङ्गानि प्रति दधाति- स्वर्गस्य लोकस्य समष्ट्यै।
- <5.6.6> अथो खल्वाहु॰- कथ.मध्वर्यु.र्बह्वृच स्साम गायेदि,त्युद्गातैव सर्वेणोद्गाये,त्तदेव समृद्धं- समृद्धा.वेव प्रति तिष्ठन्ति।
- <5.6.7> हविर्धाने शिरसा स्तुत्वा संरब्धा॰ प्रत्यञ्च एयु,स्ते दक्षिणेन धिष्ण्या.न्परीत्य- पश्चा.न्मैत्रावरुणस्य धिष्ण्यस्योपविश्य- रथन्तरेण पञ्चदशेन स्तुवीरं,स्त उदञ्च स्संसर्पेयु-र्जघनेन होतु.र्धिष्ण्यं- पश्चा.द्ब्राह्मणाच्छंसिनो धिष्ण्यस्योपविश्य- बृहता सप्तदशेन स्तुवीरं,स्ते येनैव प्रसर्पेयु-स्तेन पुन.र्निस्सृप्योत्तरेणाऽऽग्नीध्रं परीत्य- पश्चा.द्गार्हपत्यस्योपविश्य- पुच्छेनैकविंशेन स्तुवीरं,स्ते येनैव निस्सर्पेयु-स्तेन पुन॰ प्रसृप्य- यथाऽऽयतन मुपविश्याऽऽसन्दी मारुह्योद्गाताऽऽत्मनोद्गायति।

- <5.6.8> तं पत्न्योऽपघाटिलाभि.रुपगाय,न्त्यार्त्विज्य.मेव तत्पत्न्य॰ कुर्वन्ति- सह स्वर्गँ लोक मयामेति।

- <5.6.9> कुलेकुलेऽन्न.ङ्क्रियते, तद्य.त्पृच्छेयु॰- किमिद.ङ्कुर्वन्ती-तीमे यजमाना अन्न.मत्स्यन्तीति ब्रूयुः।

- <5.6.10> यो वै दीक्षितानां पाप.ङ्कीर्तयति, तृतीय.मेवांशं पाप्मनो हर-त्यन्नाद.स्तृतीयं पिपीलिका.स्तृतीयम्।

- <5.6.11> परिमाद्भि.श्चरन्ति, त्वक्क वा एत.ल्लोम च महाव्रतस्य- यत्परिमाद,स्त्वच.ञ्चैव तल्लोम च महाव्रतस्याऽऽस्वाऽव रुन्धते।

- <5.6.12> वाणँ वितन्व,न्त्यन्तो वै वाणो-ऽन्तो महाव्रत-मन्तेनैव तदन्त.मभि वादयन्ति।

- <5.6.13> शत.तन्त्रीको भवति, शतायुऽऽर्वै पुरुष श्शतवीर्यः।

- <5.6.14> तमुल्लिखे-त्प्राणाय त्वाऽपानाय त्वा व्यानाय त्वेति- प्राणापान.व्याना.नेव तदाप्त्वाऽव रुन्धते।

- <5.6.15> परि कुम्भिन्यो मार्जालीयं य-न्तीदं मध्विदं मध्विति- सघोषा एव तद्वयो भूत्वा- सह स्वर्गँ ल्लोकँ यन्ति।

- <5.7.1>❃5.7 देवा वै वाचँ व्यभजन्त, तस्या यो रसोऽत्यरिच्यत- तद्गौरीवित मभव,दनुष्टुभ.मनु परिप्लवते, वागनुष्टु-ब्वाचो रसो गौरीवितम्।

- <5.7.2> यद्गौरीवितेनान्वहं स्तुवते, वाच्येव तद्वाचा रस न्दधाति।

- <5.7.3> रसव.द्वाचा वदति, य एवँ वेदेति।

- <5.7.4> द्व्युदासं भवति, स्वर्गस्य वा एतौ लोकस्यावसानदेशौ, पूर्वेणैव पूर्व.मह-स्संस्थापय,न्त्युत्तरेणोत्तर मह.रभ्यति वदन्ति।

- <5.7.5> एतद्वै यज्ञस्य श्वस्तनं- यद्गौरीवितँ, यद्गौरीवित मनुसृजेयु-रश्वस्तना अप्रजस स्स्युः।

- <5.7.6> सँ वा अन्यो यज्ञ.स्तिष्ठत इत्याहु-र्वागेव न सन्तिष्ठत इति, यद्गौरीवित मन्वहं भवति- वाच.मेव तत्पुन॰ प्रयुञ्जते।

- <5.7.7> स्व.र्णिधन.मन्वहं भवति।
- <5.7.8> देवक्षेत्रँ वा एतेऽभ्यारोहन्ति- ये स्व.र्णिधन.मुपयन्ति, स उ वै सत्त्रिण स्सत्त्र मुपनये.दित्याहु-र्य एना.न्देवक्षेत्र मभ्यारो.हेदिति, न वै देवक्षेत्र आसीन आर्ति मार्च्छति, यत्स्व.र्णिधन मन्वहं भवति- नैव काञ्चनाऽऽर्ति मार्च्छन्ति।
- <5.7.9> च्यवन्ते वा एतेऽस्मा.ल्लोका.दित्याहु-र्ये स्व.र्णिधन.मुपयन्तीति, यदृचा स्वरूपँ य-न्त्यस्मि.न्लोके प्रति तिष्ठन्ति, यदौँकारोऽन्तरिक्षे- यत्साम्नाऽमुष्मि.न्त्सर्वेषु लोकेषु प्रति तिष्ठन्ति- स्व.र्णिधनेन तुष्टुवानाः।
- <5.7.10> सुज्ञानं भवति।
- <5.7.11> देवा वै स्वर्गँ ल्लोकँ यन्तोऽज्ञाना.दबिभयु,स्त एत.त्संज्ञान मपश्यं-स्तेन ज्ञात्र.मगच्छन्, यत्सुज्ञान मन्वहं भवति- ज्ञात्र.मेव गच्छन्ति।
- <5.8.1>❃5.8 ये वै वाच.मन्न.मादय-न्त्यन्नादा भवन्ति, ये वितर्षयन्ति- रूक्षा भवन्ति।
- <5.8.2> गौरीवितं श्यावाश्वं निहव- एतानि वै सामानि वाचोऽन्न,मेतेषाँ वागन्नँ- यदेतानि न च्यवन्ते, वाच.मेव तदन्न.मादयन्ति- तेन सर्वेऽन्नादा भवन्ति।
- <5.8.3> अभिक्रान्तापक्रान्तानि भव,न्त्यभिक्रान्तापक्रान्तँ वै वाचो रूपम्।
- <5.8.4> प्लवोऽन्वहं भवति।
- <5.8.5> समुद्रँ वा एते प्रस्नान्ति- ये सँवत्सर.मुपयन्ति, यो वा अप्लव स्समुद्रं प्रस्नाति- न स तत उदेति, यत्प्लवो भवति- स्वर्गस्य लोकस्य समष्ट्यै।
- <5.8.6> अति विश्वानि दुरिता तरेमेति- यदेवैषा न्दुष्टुत न्दुश्शस्त- न्तदेतेन तरन्ति।
- <5.8.7> ओको.निधनं षडह.मुखे भवति।
- <5.8.8> पराँ वा एते परावत ङ्गच्छन्ति- ये षडहस्यान्त.ङ्गच्छन्ति, यदोकोनिधनं षडह.मुखे भवति- प्रज्ञात्यै।
- <5.8.9> यदा वै पुरुष स्स्वमोक आगच्छति- सर्व न्तर्हि प्रजानाति, सर्व.मस्मै दिवा भवति।
- <5.9.1>❃5.9 एकाष्टकाया न्दीक्षेरन्।

- <5.9.2> एषा वै सँवत्सरस्य पत्नी- यदेकाष्ट,कैतस्याँ वा एतां रात्रिँ वसति- साक्षा.देव तत्सँवत्सर मारभ्य दीक्षन्ते।
- <5.9.3> तस्य सा निर्या- यदपोऽनभि.नन्दन्तोऽभ्यव.यन्ति।
- <5.9.4> विच्छिन्नँ वा एते सँवत्सरस्याभि दीक्षन्ते- य एकाष्टकाया न्दीक्षन्ते.ऽन्त.नामाना.वृतू भवतः।
- <5.9.5> आर्तँ वा एते सँवत्सरस्याभि दीक्षन्ते- येऽन्तनामाना.वृतू अभिदीक्षन्ते।
- <5.9.6> तस्मा.देकाष्टकाया.न्न दीक्ष्यम्।
- <5.9.7> फाल्गुने दीक्षेरन्।
- <5.9.8> मुखँ वा एत.त्सँवत्सरस्य यत्फाल्गुनो, मुखत एव तत्सँवत्सर.मारभ्य दीक्षन्ते।
- <5.9.9> तस्य सा निर्या- य.त्संमेघे विषुवा.न्त्सम्पद्यते।
- <5.9.10> चित्रापूर्णमासे दीक्षेरन्।
- <5.9.11> चक्षुर्वा एत.त्सँवत्सरस्य- यच्चित्रापूर्णमासो, मुखतो वै चक्षु.र्मुखत एव तत्सँवत्सर मारभ्य दीक्षन्ते, तस्य न निर्याऽस्ति।
- <5.9.12> चतुरहे पुरस्ता.त्पौर्णमास्या दीक्षेरन्।
- <5.9.13> तेषा.मेकाष्टकाया.ङ्क्रय स्संपद्यते, तेनैकाष्टका.न्न सम्बद्धुर्वन्ति।
- <5.9.14> तेषां पूर्वपक्षे सुत्या सं पद्यते- पूर्वपक्षे मासा स्सन्तिष्ठमाना यन्ति- पूर्वपक्ष उत्तिष्ठन्ति- तानुत्तिष्ठतꣳ पशव ओषधयोऽनूत्तिष्ठन्ति- तान्कल्याणी वागभिवद-त्यरात्सु.रिमे सत्त्रिण इति- ते राध्नुवन्ति।
- <5.10.1>❃5.10 आ वा एते सँवत्सरं प्याययन्ति- य उत्सृजन्ति।
- <5.10.2> यथा वै दृति.राध्मात- एवं सँवत्सरोऽनुत्सृष्टो, यन्नोत्सृजेयु.रमेहेन प्रमायुका स्स्युः।
- <5.10.3> प्राणो वै सँवत्सर- उदाना मासा, यदुत्सृजन्ति- प्राण एवोदाना.न्दधति, यो दीक्षितꣳ प्रमीयते- या सँवत्सर.स्यानुत्सृष्टस्य शु-क्सा त.मृच्छति।
- <5.10.4> तदाहु-रुत्सृज्या3 न्नोत्सृज्या3 मिति।
- <5.10.5> यद्युत्सृजेयु रुक्था.न्युत्सृजेयु,स्तदेवोत्सृष्ट न्तदनुत्सृष्टम्।

- <5.10.6> अथो खल्वाहु-रेकत्रिक ङ्कार्य- न्तदेव साक्षा.दुत्सृष्ट.मभ्युत्सृण्वन्ति।
- <5.10.7> छिद्रो वा एतेषां सँवत्सर इत्याहु- र्ये स्तोम.मुत्सृजन्तीति।
- <5.10.8> पशु.मालभन्ते- स्तोम.मेव तदालभन्ते- स्तोमो हि पशुः।
- <5.10.9> श्व उत्सृष्टा.स्स्म इति वत्सा.नपाकुर्वन्ति- प्रातꣳ पशु.मालभन्ते, तस्य वपया प्रचरन्ति- तत.स्सवनीयेनाष्टाकपालेन- तत आग्नेयेनाष्टाकपालेन- ततो दध्नैन्द्रेण- तत.श्चरुणा वैश्वदेवेन- तत्प्रातस्सवनं सन्तिष्ठते।
- <5.10.10> ततꣳ पशुपुरोडाशे.नैकादशकपालेन- तत.स्सवनीयेनैकादशकपालेन- ततो मरुत्वतीयेनैकादशकपालेन- ततश्चरुणैन्द्रेण, तन्माध्यन्दिनं सवनं सन्तिष्ठते।
- <5.10.11> पशुना प्रचरन्ति, तत स्सवनीयेन द्वादशकपालेन- ततो वैश्वदेवेन द्वादशकपालेन- ततश्चरुणाऽग्निमारुतेन, तत्तृतीयं सवनं सन्तिष्ठते।
- <5.10.12> पृषदाज्येन प्रचर्य- पत्नी स्सँयाजयन्ति।

## ताण्ड्यब्राह्मणे षष्ठोऽध्यायः

- <6.1.1>❃6.1 प्रजापति.रकामयत- बहु स्यां- प्रजायेयेति, स एत.मग्निष्टोम.मपश्य, त्तमाऽहर,त्तेनेमाꣳ प्रजा असृजत।
- <6.1.2> एकादशेन च वै सता स्तोत्रेणाग्निष्टोम.स्यासृज,तैकादशेन च मासा सँवत्सरस्य, ता द्वादशेन च स्तोत्रे.णाग्निष्टोमस्य पर्यगृह्णा-द्वादशेन च मासा सँवत्सरस्य।
- <6.1.3> तस्मा.त्प्रजा दश मासो गर्भं भृत्वैकादश.मनु प्रजायन्ते, तस्मा.द्वादशं नाभ्यति.हरन्ति- द्वादशेन हि परिगृहीता-स्तद्य एवँ वेद- परि जाताꣳ प्रजा गृह्णाति- प्रजाता जनयति।
- <6.1.4> तासां परिगृहीताना.मश्वत.र्यत्यक्राम,त्तस्या अनुहाय रेत आऽदत्त, तद्वडवाया.न्न्यमा-ड्यस्मा.द्वडवा द्विरेता-स्तस्मा.दश्वत.र्यप्रजा आत्तरेता हि।
- <6.1.5> तस्मा.[7]द्वदक्षिणीयाऽति हि सा यज्ञ.मरिच्य-तातिरिक्तस्य दक्षिणा स्या.त्सलोमत्वाय, षोडशिन स्स्तोत्रे देया,ऽतिरिक्तो वै षोड.श्यतिरिक्त एवातिरिक्ता न्ददाति।

[7] तस्मादु, अदक्षिणीया

- <6.1.6> सोऽकामयत यज्ञं सृजेयेति- स मुखत एव त्रिवृत मसृजत, तङ्गायत्री छन्दोऽन्वसृज्यताग्नि.र्देवता- ब्राह्मणो मनुष्यो- वसन्त ऋतु,स्तस्मा.त्त्रिवृ.त्स्तोमानां मुख-ङ्गायत्री छन्दसा-मग्नि.र्देवतानां- ब्राह्मणो मनुष्याणां- वसन्त ऋतूना- न्तस्मा.द्ब्राह्मणो मुखेन वीर्यं ङ्करोति- मुखतो हि सृष्टः।
- <6.1.7> करोति मुखेन वीर्यँ- य एवँ वेद।
- <6.1.8> स उरस्त एव बाहुभ्यां पञ्चदश.मसृजत- तन्त्रिष्टु.प्छन्दोऽन्वसृज्य-तेन्द्रो देवता- राजन्यो मनुष्यो- ग्रीष्म ऋतु,स्तस्मा.द्राजन्यस्य पञ्चदश स्स्तोम-स्त्रिष्टु.प्छन्द- इन्द्रो देवता- ग्रीष्म ऋतु-स्तस्मादु बाहुवीर्यो- बाहुभ्यां हि सृष्टः।
- <6.1.9> करोति बाहुभ्याँ वीर्यँ- य एवँ वेद।
- <6.1.10> स मध्यत एव प्रजनना.त्सप्तदश.मसृजत- तञ्जगती छन्दोऽन्वसृज्यत- विश्वे देवा देवता- वैश्यो मनुष्यो- वर्षा ऋतु,स्तस्मा.द्वैश्योऽद्यमानो न क्षीयते- प्रजननाद्धि सृष्ट,स्तस्मादु बहुपशु,र्वैश्वदेवो हि जागतो- वर्षा ह्यस्यर्तु,स्तस्मा.द्ब्राह्मणस्य च राजन्यस्य चाऽद्योऽधरो हि सृष्टः।
- <6.1.11> स पत्त एव प्रतिष्ठाया एकविंश.मसृजत- तमनुष्टु.प्छन्दोऽन्वसृज्यत- न काचन देवता- शूद्रो मनुष्य,स्तस्माच्छूद्र उत बहुपशु-रयज्ञियो विदेवो हि, न हि त.ङ्काचन देवताऽन्वसृज्यत- तस्मा.त्पादावनेज्य.न्नाति वर्धते- पत्तो हि सृष्ट,स्तस्मा.देकविंश स्स्तोमानां प्रतिष्ठा- प्रतिष्ठाया हि सृष्ट-स्तस्मा.दनुष्टुभ.ञ्छन्दांसि नानु व्यूहन्ति।
- <6.1.12> पाप.वसीयसो विधृत्यै।
- <6.1.13> विधृतिः पाप.वसीयसो भवति- य एवँ वेद।
- <6.2.1>❃6.2 यो वै स्तोमा.नुपदेशनवतो वेदोपदेशनवा.न्भवति।
- <6.2.2> प्राणो वै त्रिवृ-दर्धमासः पञ्चदश- स्सँवत्सर स्सप्तदश- आदित्य एकविंश, एते वै स्तोमा उपदेशनवन्त, उपदेशनवा.न्भवति- य एवँ वेद।
- <6.2.3> इमे वै लोका.स्त्रिणव,स्त्रिणवस्य वै ब्राह्मणेनेमे लोका-स्त्रिष्पुन.र्नवा भवन्ति।
- <6.2.4> एषु लोकेषु प्रति तिष्ठति- य एवँ वेद।

- <6.2.5> देवता वाव त्रयस्त्रिंशो,ऽष्टौ वसव- एकादश रुद्रा- द्वादशाऽऽदित्याᳶ- प्रजापतिश्च वषट्कारश्च- त्रयस्त्रिंशौ।
- <6.2.6> स देवेन यज्ञेन यजते- य एवँ वेद।
- <6.2.7> यो वा अधिपतिँ वे,दाधिपति.र्भवति, त्रयस्त्रिंशो वै स्तोमाना.मधिपतिᳶ पुरुषᳶ पशूनाम्।
- <6.2.8> तस्मा.न्न्यञ्चोऽन्ये पशवोऽद,न्त्यूर्ध्वᳶ पुरुषोऽधिपतिर्हि सः।
- <6.2.9> अधिपति स्समानानां भवति- य एवँ वेद।
- <6.3.1>❃ 6.3 एष वाव यज्ञो- यदग्निष्टोमः।
- <6.3.2> एकस्मा अन्यो यज्ञᳵ कामायाऽऽह्रियते- सर्वेभ्योऽग्निष्टोमः।
- <6.3.3> द्वादश स्तोत्रा.ण्यग्निष्टोमो- द्वादश मासा स्सँवत्सर- स्सँवत्सरं पशवोऽनु प्रजायन्ते- तेन पशव्य स्समृद्धः।
- <6.3.4> द्वादश स्तोत्राणि- द्वादश शस्त्राणि- तच्चतुर्विंशति,श्चतुर्विंशति.रर्धमासा स्सँवत्सर- स्सँवत्सरं पशवोऽनु प्रजायन्ते, तेन पशव्य स्समृद्धः।
- <6.3.5> अग्नौ स्तोत्र.मग्नौ शस्त्रं प्रति तिष्ठति, तेन ब्रह्मवर्चस्यः।
- <6.3.6> कि.ञ्ज्योतिष्टोमस्य ज्योतिष्टोमत्व.मित्याहु,र्विराजं संस्तुत स्सं पद्यते- विराड्वै छन्दसा.ञ्ज्योतिः।
- <6.3.7> ज्योति स्समानानां भवति- य एवँ वेद।
- <6.3.8> ज्येष्ठयज्ञो वा एष- य.दग्निष्टोमः।
- <6.3.9> प्रजापतिᳶ प्रजा असृजत- ता अस्मै श्रैष्ठ्याय नातिष्ठन्त- स एत मग्निष्टोम मपश्य-त्तमाऽहर-त्ततोऽस्मै प्रजा श्श्रैष्ठ्या.यातिष्ठन्त।
- <6.3.10> तिष्ठन्तेऽस्मै समाना श्श्रैष्ठ्याय- य एवँ वेद।
- <6.3.11> यत्त्वित्याहु-र्गायत्रं प्रातस्सवन-न्त्रैष्टुभं माध्यन्दिनं सवन- ञ्जागत न्तृतीयसवन-ङ्क तर्हि तुरीय.ञ्छन्दोऽनुष्टुबिति।
- <6.3.12> छन्दसाँ वा अन्ववलुप्तिँ- यजमानोऽन्वव.लुप्यते।

- <6.3.13> अष्टाऽक्षरा गायत्री- हिङ्कारो नवम- एकादशाक्षरा त्रिष्टु-ब्द्वादशाक्षरा जगती, छन्दोभि.रेवानुष्टुभ.माप्नोति- यजमान.स्यानवलोपाय।
- <6.3.14> यो वा अनुष्टुभं सर्वत्राऽपिं सवना.न्यन्वायत्ताँ वेद- सर्वत्रास्याऽपि.र्भव,त्येषा वा अनुष्टु.प्सर्वत्राऽपि स्सवना.न्यन्वायत्ता, तद्य एवँ वेद- सर्वत्राऽपि.र्भवति।
- <6.3.15> यद्वै राजानोऽध्वान न्धावयन्ति- येऽश्वानाँ वीर्यवत्तमा-स्तान् युञ्जते, त्रिवृ.त्पञ्चदश-स्सप्तदश- एकविंश- एते वै स्तोमानाँ वीर्यवत्तमा-स्तानेव युङ्क्ते- स्वर्गस्य लोकस्य समष्ट्यै।
- <6.3.16> चतुष्टोमो भवति, प्रतिष्ठा वै चतुष्टोमः प्रतिष्ठित्यै।
- <6.4.1>❃ 6.4 प्रजापति.र्देवेभ्य ऊर्जँ व्यभज,त्तत उदुम्बर स्समभव,त्प्राजापत्यो वा उदुम्बरः- प्राजापत्य उद्गाता, यदुद्गातौदुम्बरीं प्रथमेन कर्मणाऽन्वारभते- स्वयैव तद्देवतयाऽत्मान मार्त्विज्याय वृणीते।
- <6.4.2> तामुच्छ्रयति- द्युतानस्त्वा मारुत उच्छ्रय.तूद्दिवं स्तभानाऽन्तरिक्षं पृण- दृंह पृथिवीम्।
- <6.4.3> तामन्वारभत- आयो.ष्ट्वा सदने सादया-म्यवत.श्छायायां- समुद्रस्य हृदय इति।
- <6.4.4> यज्ञो वा आयु.स्तस्य त.त्सदन.ङ्क्रियते।
- <6.4.5> यज्ञो वा अवति- तस्य सा छाया क्रियते।
- <6.4.6> मध्यतो वा आत्मनो हृदय, न्तस्मा.न्मध्ये सदस औदुम्बरी मीयते।
- <6.4.7> नम स्समुद्राय- नम स्समुद्रस्य चक्षुष इत्याह, वाग्वै समुद्रो- मन स्समुद्रस्य चक्षु-स्ताभ्यामेव तन्नम.स्करोति।
- <6.4.8> मामा यूनर्वाऽहासी-दित्याह, साम वै यूनर्वा- साम्न एव तन्नमस्करो-त्यार्त्विज्य.ङ्करिष्यन्।
- <6.4.9> यो वा एवं साम्ने नमस्कृत्य साम्नाऽर्त्विज्य ङ्करोति- न साम्नो हीयते- नैनं सामापहते।
- <6.4.10> य एन.मनुव्याहरति- स आर्ति.मार्च्छति।

- <6.4.11> ऊर्ग.स्यूर्जोदा- ऊर्जं मे दे-ह्यूर्जं मे धे-ह्यन्नं मे दे-ह्यन्नं मे धेहि, प्रजापतेर्वा एत.दुदरँ य.त्सद- ऊर्गुदुम्बरो, यदौदुम्बरी मध्येसदसो मीयते- मध्यत एव तत्प्रजाभ्योऽन्न मूर्ज.न्दधाति।
- <6.4.12> तस्मा.द्यत्रैषा यातयामा क्रियते- तत्प्रजा अशनायवो भवन्ति।
- <6.4.13> साम देवाना.मन्नं- सामन्येव तद्देवेभ्योऽन्न ऊर्ज न्दधाति, स एव तदूर्जि श्रितः- प्रजाभ्य ऊर्जँ विभजति।
- <6.4.14> उदङ्ङासीन उद्गाय-त्युदीची न्तादृश.मूर्जा भाजयति, प्रत्यङ्ङासीनः प्रस्तौति- प्रतीची न्तादृश.मूर्जा भाजयति, दक्षिणाऽऽसीनः प्रति हरति- दक्षिणा न्तादृश.मूर्जा भाजयति, प्राञ्चोऽन्य ऋत्विज आर्त्विज्य.ङ्कुर्वन्ति- तस्मा.देषा दिशाँ वीर्यवत्त.मैतां हि भूयिष्ठाः प्रीणन्ति।
- <6.4.15> ब्रह्मवादिनो वदन्ति- कस्मा.त्सत्या.त्प्राञ्चोऽन्य ऋत्विज आर्त्विज्य ङ्कुर्वन्तीति, विपरिक्रम्योद्गातार इति- दिशा.मभीष्ट्यै- दिशा.मभिप्रीत्या इति ब्रूया,-त्तस्मा.त्सर्वासु दिक्ष्वन्नँ विद्यते- सर्वा ह्यभीष्टाः प्रीताः।
- <6.5.1>❃ 6.5 प्रजापति रकामयत- बहु स्यां- प्रजायेयेति, सोऽशोच-त्तस्य शोचत आदित्यो मूर्ध्नोऽसृज्यत, सोऽस्य मूर्धान.मुदह-न्त्स द्रोणकलशोऽभव,त्तस्मि.न्देवा श्शुक्र.मगृह्णत- ताँ वै स आयुषाऽऽर्ति मत्यजीवत्।
- <6.5.2> आयुषाऽऽर्ति.मति जीवति- य एवँ वेद।
- <6.5.3> तं प्रोहे,द्वानस्पत्योऽसि- बार्हस्पत्योऽसि- प्राजापत्योऽसि- प्रजापते र्मूर्धाऽ-स्यत्यायुपात्र म.सीद.महं मां प्राञ्चं प्रोहामि- तेजसे ब्रह्मवर्चसायेति।
- <6.5.4> यदाह वानस्पत्य इति- सत्येनैवैन.न्तत्प्रोहति।
- <6.5.5> यदाह बार्हस्पत्य इति- बृहस्पतिर्वै देवाना.मुद्गाता- तमेव तद्युनक्ति।
- <6.5.6> यदाह प्राजापत्य इति- प्राजापत्यो ह्येष देवताया- यद्द्रोणकलशो, यदाह प्रजापते.र्मूर्धेति- प्रजापते.र्ह्येष मूर्ध्न उदहन्यत।
- <6.5.7> यदाहात्यायु.पात्रमि-त्यति ह्येत.दन्यानि पात्राणि यद्द्रोणकलशो, देवपात्र.न्द्रोणकलशः।
- <6.5.8> देवपात्री भवति- य एवँ वेद।

- <6.5.9> ब्राह्मणं पात्रे न मीमांसेत, यं ब्राह्मणमिव मन्यते- प्र देवपात्र.माप्नोति, न मनुष्यपात्रा.च्छिद्यते।

- <6.5.10> वाग्वै देवेभ्योऽपक्राम-त्साऽऽपः प्राविश,त्ता न्देवाः पुन.रयाचं-स्ता अब्रुवन्, यत्पुन.र्दद्याम- किन्न.स्तत स्स्यादिति, यत्कामयध्व इत्यब्रुवं-स्ता अब्रुवन्- यदेवास्मासु मनुष्या अपूतं प्रवेशयां-स्तेनासंसृष्टा असामेति।

- <6.5.11> शुद्धा अस्मा आपः पूता भवन्ति- य एवँ वेद।

- <6.5.12> सा पुनर्ताऽत्यक्राम,त्सा वनस्पती.न्प्राविश-त्ता.न्देवाः पुन.रयाचं-स्तान्न पुन.रददु-स्ता.नशप-न्त्स्वेन वः किष्कुणा वज्रेण वृश्चानिति- तस्मा.द्वनस्पती.न्त्स्वेन किष्कुणा वज्रेण वृश्चन्ति, देवशप्ता हि।

- <6.5.13> ताँ वनस्पतय.श्चतुर्धा वाचँ विन्यदधु,र्दुन्दुभौ- वीणाया- मक्षे- तूणवे, तस्मा.देषा वदि.ष्ठैषा वल्गुतमा, वाग्वा वनस्पतीना न्देवानां ह्येषा वा.गासीत्।

- <6.5.14> अधोऽधोऽक्ष न्द्रोणकलशं प्रोहन्ति, तस्या वाचोऽवरुद्ध्या- उपर्युपर्यक्षं पवित्रं प्रयच्छ-न्त्युभयत एव वाचं परि गृह्णन्ति।

- <6.5.15> यस्य कामयेतासुर्य.मस्य यज्ञ ङ्कुर्याँ- वाचँ वृञ्जीयेति, द्रोणकलशं प्रोह.न्बाहुभ्या मक्ष.मुपस्पृशे-दसुर्य.मस्य यज्ञ ङ्करोति- वाचँ वृङ्क्ते, योऽस्य प्रिय स्स्या.दनुपस्पृश.न्नक्षं प्रोहे-त्प्राणा वै द्रोणकलशः- प्राणा.नेवास्य कल्पयति।

- <6.5.16> यन्नित्याहु-र्वाचाऽन्या.नृत्विजो वृणते- कस्मा.दुद्गातारोऽवृता आर्त्विज्य ङ्कुर्वन्तीति।

- <6.5.17> यद्द्रोणकलश.मुपसीदन्ति- तेनोद्गातारो वृताः।

- <6.5.18> प्राजापत्या वा उद्गातारः- प्राजापत्यो द्रोणकलशो- द्रोणकलश एवैना. नार्त्विज्याय वृणीते।

- <6.5.19> प्राञ्च उप सीदन्ति- प्राञ्चो यज्ञस्याग्रे करवामेति।

- <6.5.20> अनभिजिता वा एषोद्गातृणां दि-ग्यत्प्राची, यद्द्रोणकलशं प्राञ्चं प्रोहन्ति- दिशोऽभिजित्यै।

- <6.5.21> यन्वित्याहु-रन्तराऽश्व॰ प्रासेवौ युज्यते-ऽन्तरा शम्य अनड्वा-न्क उद्गातृणाँ योग इति, यद्द्रोणकलश.मुपसीदन्ति- स एषाँ योग,स्तस्मा.द्युक्तै.रेवोपसद्य.न्न ह्ययुक्तो वहति।

- <6.6.1>❃ 6.6 ग्राव्ण स्संसाद्य द्रोणकलश.मध्यूहन्ति, विड्वै ग्रावाणो-ऽन्नं सोमो- राष्ट्र न्द्रोणकलशो, यद्ग्रावसु द्रोणकलश.मध्यूहन्ति- विश्येव तद्राष्ट्र.मध्यूहन्ति।

- <6.6.2> यन्द्विष्या.द्विमुखा.न्ग्राव्ण॰ कृत्वेद.मह.ममु.ममुष्यायण.ममुष्या॰ पुत्र.ममुष्या विशोऽमुष्मा.दन्नाद्या.न्निरूहामीति निरूहे,द्विश एवैन.मन्नाद्या.न्निरूहति।

- <6.6.3> योऽस्य प्रिय स्स्या-त्संमुखा.न्ग्राव्ण॰ कृत्वेद.मह.ममुष्यायण.ममुष्या॰ पुत्र.ममुष्याँ विश्यमुष्मि.न्नन्नाद्येऽध्यूहा.मीत्यध्यूहे-द्विश्येवैन मन्नाद्येऽध्यूहति।

- <6.6.4> अथो तदुभय.मनादृ-त्येद.महं मा.न्तेजसि ब्रह्मवर्चसेऽध्यूहामी.त्यध्यूहे,-त्तेजस्येव ब्रह्मवर्चस आत्मान.मध्यूहति।

- <6.6.5> य॰ कामयेत विशा राष्ट्रं हन्या.मिति- व्यूह्य ग्राव्णोऽधो द्रोणकलशं सादयि.त्वोपांशुसवन मुपरिष्टा.दभिनिदध्या-दिद.मह.ममुया विशाऽदो राष्ट्रं हन्मीति- विशैव तद्राष्ट्रं हन्ति।

- <6.6.6> यो वै दैवानि पवित्राणि वेद- पूतो यज्ञियो भवति, च्छन्दांसि वै दैवानि पवित्राणि- तै.र्द्रोणकलशं पावयन्ति।

- <6.6.7> वसवस्त्वा गायत्रेण च्छन्दसा पुनन्तु- रुद्रास्त्वा त्रैष्टुभेन च्छन्दसा पुन-न्त्वादित्यास्त्वा जागतेन च्छन्दसा पुन,न्त्वेतानि वै दैवानि पवित्राणि, पूतो यज्ञियो भवति- य एवँ वेद।

- <6.6.8> स्वर्भानुर्वा आसुर आदित्यं तमसाऽविध्य,त्त.न्देवा न व्यजानं-स्तेऽत्रि मुपाधावं-स्तस्यात्रि.र्भासेन तमोऽपाहन्, यत्प्रथम.मपाह-न्त्सा कृष्णाऽवि.रभव,द्यद्वितीयं- सा रजता, यत्तृतीयं- सा लोहिनी, यया वर्ण.मभ्यतृण-त्सा शुक्लाऽऽसीत्।

- <6.6.9> तस्मा.च्छुक्लं पवित्रं- शुक्र स्सोम- स्सशुक्रत्वाय।

- <6.6.10> यन्द्विष्या-त्तस्यैतेषाँ वर्णाना.मपि पवित्रे कुर्या,त्पाप्मनैवैन न्तमसा विध्यति, कृष्ण.मिव हि तमो, योऽस्य प्रिय स्स्या-दासक्तिशुक्ल ङ्कुर्या-ज्ज्योतिर्वै हिरण्यं-ज्योति.रेवास्मि.न्दधाति।

- <6.6.11> तस्मा.दात्रेय.श्चन्द्रेणेच्छ,न्त्यत्रिर्हि तस्य ज्योतिः।
- <6.6.12> अभ्यतृण.त्पवित्रँ विगृह्णन्ति, हस्तकार्य.मेव तद्यज्ञस्य क्रियत,- एतद्वा उद्गातृणां हस्तकार्यँ- यत्पवित्रस्य विग्रहणम्।
- <6.6.13> न हस्तवेष्या.न्निर्ऋच्छति- य एवँ वेद।
- <6.6.14> योऽपि न विगृह्णाति- प्राणा.देन.मन्त.र्यन्ति।
- <6.6.15> तं ब्रूया-द्वेपमानः प्रमेष्यस इति, वेपमान एव प्र मीयते।
- <6.6.16> प्र शुक्रैतु देवी मनीषा-ऽस्मद्रथ स्सुतष्टो न वाजी-त्युद्गाता धारा.मनुमन्त्रयते।
- <6.6.17> आयुषे मे पवस्व- वर्चसे मे पवस्व- विदुः पृथिव्या दिवो जनित्रा-च्छृण्व.न्त्वापोऽधः~ क्षरन्ती- स्सोमेहोद्गाये-त्याह मह्य न्तेजसे ब्रह्मवर्चसायेति।
- <6.6.18> एष वै सोमस्योद्गीथो- यत्पवते, सोमोद्गीथ.मेव साम गायति।
- <6.6.19> अच्छिन्नं पावयन्ति- यज्ञ.ञ्चैव प्राणांश्च सन्तन्वन्ति, सन्ततं पावयन्ति- यज्ञस्य सन्तत्यै।
- <6.7.1>❃ 6.7 बृहस्पतिर्वै देवाना.मुद्गाय,त्तं रक्षां.स्यजिघांस,न्त्स य एषां लोकाना मधिपतय- स्ता.न्भागधेयेनोपाधावत्।
- <6.7.2> सूर्यो मा दिव्याभ्यो नाष्ट्राभ्यः पातु- वायु.रन्तरिक्षाभ्यो-ऽग्निः पार्थिवाभ्य स्स्वाहेति जुहोति।
- <6.7.3> एते वा एषाँ लोकाना.मधिपतय-स्ता.न्भागधेयेनोपासरत्।
- <6.7.4> करोति वाचा वीर्य,न्न सदस्या.मार्ति.मार्च्छति- य एवँ वेद।
- <6.7.5> वाग्वै देवेभ्योऽपाक्राम,त्ता.न्देवा अन्वमन्त्रयन्त, साऽब्रवी-दभागाऽस्मि-भागधेयं मेऽस्त्विति, कस्ते भागधेय ङ्कुर्या-दित्युद्गातार इत्यब्रवी,दुद्गातारो वै वाचे भागधेय.ङ्कुर्वन्ति।
- <6.7.6> तस्यै जुहुया,द्वेकुरा.नामाऽसि- जुष्टा देवेभ्यो- नमो वाचे- नमो वाचस्पतये देवि वा-ग्यत्ते वाचो मधुम.त्तस्मि.न्मा धा स्सरस्वत्यै स्वाहेति।
- <6.7.7> वाग्वै सरस्वती- तामेव तद्भागधेयेनाऽऽरभते।
- <6.7.8> यन्द्विष्या-त्तस्यैता.माहुति ञ्जुहुया-द्वाचं मनसा ध्याये-द्वाच.मेवास्य वृङ्क्ते।

- <6.7.9> बहिष्पवमानं सर्पन्ति, स्वर्गमेव तल्लोकं सर्पन्ति।
- <6.7.10> प्रक्काणा इव सर्पन्ति- प्रतिकूल.मिव हीत स्स्वर्गो लोकः, त्सरन्त इव सर्पन्ति- मृगधर्मो वै यज्ञो- यज्ञस्य शान्त्या अप्रत्रासाय।
- <6.7.11> वाचँ यच्छन्ति- यज्ञ.मेव तद्यच्छन्ति, यद्यव.वदेयु,र्यज्ञ न्निर्ब्रूयु-स्तस्मान्न व्यव.वद्यम्।
- <6.7.12> पञ्चर्त्विज स्संरब्धा स्सर्पन्ति, पाङ्क्तो यज्ञो- यावान् यज्ञ-स्तमेव सन्तन्वन्ति।
- <6.7.13> यदि प्रस्तोताऽवच्छिद्यते- यज्ञस्य शिर.श्छिद्यते, ब्रह्मणे वर.न्दत्त्वा- स एव पुन.र्वर्तव्य,श्छिन्न.मेव तत्प्रति दधाति।
- <6.7.14> यद्युद्गाताऽवच्छिद्यते- यज्ञेन यजमानो व्यृध्यते,ऽदक्षिण स्स यज्ञक्रतु स्संस्थाप्यो,ऽथान्य आहृत्य.स्तस्मि.न्देयं- याव.द्दास्य.न्त्स्यात्।
- <6.7.15> यदि प्रतिहर्ताऽवच्छिद्यते- पशुभि.र्यजमानो व्यृध्यते, पशवो वै प्रतिहर्ता- सर्ववेदस न्देयँ, यदि सर्ववेदस.न्न ददाति- सर्वज्यानि.ञ्जीयते।
- <6.7.16> अध्वर्युः प्रस्तरं हरति।
- <6.7.17> यजमानो वै प्रस्तरो- यजमान.मेव तत्स्वर्गँ लोकं हरति।
- <6.7.18> यज्ञो वै देवेभ्योऽश्वो भूत्वाऽपाक्राम,त्तन्देवाः प्रस्तरेणासमयं,स्तस्मा.दश्वः प्रस्तरेण संमृज्यमान उपावरमते, यदध्वर्युः प्रस्तरं हरति- यज्ञस्य शान्त्या अप्रत्रासाय।
- <6.7.19> प्रजापतिः पशू.नसृजत, तेऽस्मा.त्सृष्टा अशनायन्तोऽपाक्रामं,स्तेभ्यः प्रस्तर मन्नं प्रायच्छ,त्त एन मुपाऽऽवर्तन्त, तस्मा.दध्वर्युणा प्रस्तर ईष.दिव विधूयो, विधूति.मिव हि तृणं पशव उपाऽऽवर्तन्ते।
- <6.7.20> उपैनं पशव आवर्तन्ते- य एवँ वेद।
- <6.7.21> प्रस्तर.मास.द्योद्गाये-द्धविषोऽस्कन्दाय।
- <6.7.22> यजमानन्तु स्वर्गा.ल्लोका.दव गृह्णाति।
- <6.7.23> अष्ठीवतोप.स्पृशतोद्गेय,न्तेनास्य हवि.रस्कन्नं भवति- न यजमानं स्वर्गा ल्लोका.दव गृह्णाति।

- <6.7.24> चात्वाल.मवेक्ष्य बहिष्पवमानं स्तुव,न्त्यत्र वा असा.वादित्य आसी,त्तन्देवा बहिष्पवमानेन स्वर्गं लोक.महरन्, यच्चात्वाल.मवेक्ष्य बहिष्पवमानं स्तुवन्ति- यजमान.मेव तत्स्वर्गँ लोकं हरन्ति।
- <6.8.1>❃ 6.8 स तु वै यज्ञेन यजेतेत्याहु-र्यस्य विराजँ यज्ञमुखे दध्युरिति।
- <6.8.2> नवभि स्स्तुवन्ति- हिङ्कारो दशमो, दशाक्षरा विरा.ड्विराज.मेवास्य यज्ञमुखे दधाति।
- <6.8.3> नवभि स्स्तुवन्ति, नव प्राणाः- प्राणै.रेवैनं समर्द्धयन्ति, हिङ्कारो दशम-स्तस्मा.न्नाभि.रनवतृण्णा- दशमी प्राणानाम्।
- <6.8.4> नवभि स्स्तुवन्ति, नवाध्वर्युः प्रातस्सवने ग्रहा.न्गृह्णाति, तानेव तत्पावयन्ति- तेषां प्राणा.नुत्सृजन्ति।
- <6.8.5> प्रजापतिर्वै हिङ्कार-स्त्रियो बहिष्पवमान्यो, यद्धिङ्कृत्य प्रस्तौति- मिथुन.मेवास्या यज्ञमुखे दधाति- प्रजननाय।
- <6.8.6> एष वै स्तोमस्य योगो- यद्धिङ्कारो, यद्धिङ्कृत्य प्रस्तौति- युक्तेनैव स्तोमेन प्रस्तौति।
- <6.8.7> एष वै साम्नां रसो- यद्धिङ्कारो, यद्धिङ्कृत्य प्रस्तौति- रसेनैवैता अभ्युद्य प्रस्तौति।
- <6.8.8> आरण्येभ्यो वा एत.त्पशुभ्य स्स्तुवन्ति- यद्बहिष्पवमान,मेकारूपाभि स्स्तुवन्ति- तस्मा.देकरूपा आरण्याः पशवः।
- <6.8.9> पराचीभि स्स्तुवन्ति, तस्मा.त्पराञ्चः प्रजायन्ते- पराञ्चो वितिष्ठन्ते।
- <6.8.10> अपरिश्रिते स्तुवन्ति, तस्मा.दपरिगृहीता आरण्याः पशवः।
- <6.8.11> बहि.स्स्तुव.न्त्यन्तरनु.शंसन्ति, तस्मा.द्ग्राम.माहृतै.र्भुञ्जते।
- <6.8.12> ग्राम्येभ्यो वा एत.त्पशुभ्य स्स्तुवन्ति- यदाज्यै.र्नानारूपै स्स्तुवन्ति, तस्मा.न्नानारूपा ग्राम्याः पशवः।
- <6.8.13> पुन.रभ्यावर्तं स्तुवन्ति, तस्मा.त्प्रेत्वर्यः प्रेत्य पुन.रायन्ति।
- <6.8.14> परिश्रिते स्तुवन्ति, तस्मा.त्परिगृहीता ग्राम्याः पशवः।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

- <6.8.15> अमुष्मै वा एत.ल्लोकाय स्तुवन्ति- यद्बहिष्पवमानं सकृ.द्धिङ्कृताभिᳶ पराचीभि स्स्तुवन्ति, सकृद्धीतोऽसौ पराङ्ल्लोकः।
- <6.8.16> अस्मै वा एत.ल्लोकाय स्तुवन्ति- यदाज्यैᳶ पुन.रभ्यावर्तं स्तुवन्ति, तस्मा.दयँ लोकᳶ पुनᳶपुनᳶ प्रजायते।
- <6.8.17> पराञ्चो वा एतेषां प्राणा भवन्तीत्याहु,र्ये पराचीभि.र्बहिष्पवमानीभि स्स्तुवत इ,त्यावती.मुत्तमा ङ्गाये-त्प्राणाना न्धृत्यै।
- <6.8.18> च्यवन्ते वा एतेऽस्मा.ल्लोका.दित्याहु,र्ये पराचीभि.र्बहिष्पवमानीभि स्स्तुवत इति, रथन्तरवर्णा.मुत्तमा.ङ्गाये,दियँ वै रथन्तर.मस्या.मेव प्रति तिष्ठति।
- <6.9.1>❃ 6.9 उपास्मै गायता नर- इति ग्रामकामाय प्रतिपद.ङ्कुर्यात्।
- <6.9.2> नरो वै देवाना.ङ्ग्रामो- ग्राम.मेवास्मा उपाकः।
- <6.9.3> उप वा अन्न-मन्न.मेवास्मा उपाकः।
- <6.9.4> उपोषु जात.मप्तुर-मिति प्रजाकामाय प्रतिपद ङ्कुर्यात्।
- <6.9.5> उप वै प्रजा, ताञ्जात.मित्येवाजीजनत्।
- <6.9.6> स नᳶ पस्वस्व शङ्गव- इति प्रतिपद.ङ्कुर्यात्।
- <6.9.7> यां समां महादेवᳶ पशून् हन्या,त्स नᳶ पवस्व शङ्गव- इति चतुष्पदे भेषज.ङ्करोति।
- <6.9.8> शञ्जनायेति द्विपदे- शमर्वत इत्येकशफाय।
- <6.9.9> विषेण वै तां समा.मोषधयोऽक्ता भवन्ति- यां समां महादेवᳶ पशून् हन्ति, यच्छं राज.न्नोषधीभ्य इत्या-हौषधी.रेवास्मै स्वदय,त्युभय्योऽस्मै स्वदिताᳶ पच्यन्तेऽकृष्टपच्याश्च कृष्टपच्याश्च।
- <6.9.10> पवस्व वाचो अग्रिय- इति प्रतिपद.ङ्कुर्या,द्यङ्कामयेत समानानां श्रेष्ठ स्स्यादिति।
- <6.9.11> पवस्व वाचो अग्रिय- इत्यग्र.मेवैनं परिणयति।
- <6.9.12> श्रीर्वै वाचोऽग्रं श्रिय.मेवास्मि.न्दधाति।
- <6.9.13> एते असृग्र.मिन्दव- इति बहुभ्यᳶ प्रतिपद.ङ्कुर्यात्।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

- <6.9.14> एत इति सर्वा.नेवैना.नृध्यै भूत्या अभि वदति।
- <6.9.15> एत इति वै प्रजापति.र्देवा.नसृज-तासृग्रमिति मनुष्या-निन्दव इति पितृं-स्तिरᳲ पवित्र इति ग्रहा-नाशव इति स्तोत्रँ-विश्वानीति शस्त्र-मभि सौभगे.त्यन्याᳲ प्रजाः।
- <6.9.16> यदेत इति- तस्मा.द्यावन्त एवाग्रे देवा-स्तावन्त इदानीम्।
- <6.9.17> सर्वाँ.वृद्धि.मार्ध्नुव,न्तित्स्थतेव ह्येषा व्याहृतिः।
- <6.9.18> य.दसृग्र-मिति तस्मा.न्मनुष्या श्श्वश्श्व स्सृज्यन्ते।
- <6.9.19> य.दिन्दव इतीन्दव इव हि पितरः।
- <6.9.20> मन इव।
- <6.9.21> या.न्ताᳲ प्रजा स्सृष्टा ऋद्धि.मार्ध्नुवं-स्ता.मृध्नुवन्ति, येषा.मेवँ.विद्वा.नेतां प्रतिपद.ङ्करोति।
- <6.9.22> छन्दांसि वै सोम.माऽहरं-स्तङ्गन्धर्वो विश्वावसुᳲ पर्यमुष्णा,त्तेनापᳲ प्राविश,त्त.न्देवता अन्वैच्छं,स्तँ विष्णु.रप्सु पर्यपश्य,त्स व्यकाङ्क्ष-दय.न्नू3 ना3 इति, तं पदा प्रास्फुर-त्तस्मा.त्पृथ.गिन्दवोऽसृज्यन्त, स देवताभ्योऽभित.स्तिष्ठन्तीभ्य एते असृग्र.मिन्दव इति प्राब्रवी,द्बहिष्पवमानेन वै यज्ञ स्सृज्यते, यदेते असृग्र.मिन्दव इति प्रस्तौति- यज्ञ.मेव तत्सृष्ट न्देवताभ्यᳲ प्राह।
- <6.9.23> व्यृद्धँ वा एत.दपशव्यं- यत्प्रातस्सवन,मनिडं हि यदिडा.मस्मभ्यं सँयत.मित्याह- प्रातस्सवन.मेव तदिडाव.त्पशुम.त्करोति।
- <6.9.24> दविद्युतत्या रुचेति व्राताय प्रतिपद.ङ्कुर्यात्।
- <6.9.25> दविद्युतत्या रुचेति वै गायत्र्या रूपं, परिष्टोभन्त्येति त्रिष्टुभᳲ, कृपे.त्यनुष्टुभ,स्सोमा श्शुक्रा गवाशिर इति जगत्या,स्सर्वेषाँ वा एषा छन्दसां रूप,ञ्छन्दांसीव खलु वै व्रातो- यदेषा प्रतिप.द्भवति- स्वेनैवैनां.स्तद्रूपेण समर्धयति।
- <6.9.26> व्यृद्धा वा एत इन्द्रियेण वीर्येण- यद्व्रात, इन्द्रियँ वीर्य.ञ्छन्दां-सीन्द्रियेणैवैनान् वीर्येण समर्धयति।
- <6.10.1>❁ 6.10 अग्न आयूंषि पवस- इति प्रतिपद.ङ्कुर्या,द्येषा न्दीक्षितानां प्रमीयते।

* <6.10.2> अपूता इव वा एते- येषा.न्दीक्षितानां प्रमीयते, यद्येषाऽग्निपावमानी प्रतिपद्भव- त्यग्नि.रेवैना.न्निष्टपति- पवमानꣳ पुनाति।

* <6.10.3> य.दायूंषीत्याह- य एव जीवन्ति- तेष्वायु.र्दधाति।

* <6.10.4> आ नो मित्रावरुणेति- ज्योगामयाविने प्रतिपद.ङ्कुर्यात्।

* <6.10.5> अपक्रान्तौ वा एतस्य प्राणापानौ- यस्य ज्योगामयति, प्राणापानौ मित्रावरुणौ- प्राणापाना.वेवास्मि.न्दधाति।

* <6.10.6> अपघ्न.न्पवते मृधोऽप सोमो अराव्ण- इत्यनृत.मभिशस्यमानाय प्रतिपद.ङ्कुर्यात्।

* <6.10.7> अरावाणो वा एते- येऽनृत.मभि.शंसन्ति, तानेवास्मा.दप हन्ति।

* <6.10.8> गच्छ.न्निन्द्रस्य निष्कृतमिति- पूत.मेवैनँ यज्ञिय.मिन्द्रस्य निष्कृत.ङ्गमयति।

* <6.10.9> वृषा पवस्व धारयेति- राजन्याय प्रतिपद.ङ्कुर्या,द्वृषा वै राजन्यो वृषाण.मेवैन.ङ्करोति।

* <6.10.10> मरुत्वते च मत्सर- इति मरुतो वै देवानाँ विशो- विश.मेवास्मा अनु नियुन,क्त्यनपक्रामुकाऽस्मा,द्वि.ड्भवति।

* <6.10.11> विश्वा दधान ओजसे-त्योजसैवास्मै वीर्येण विशं पुरस्ता.त्परिगृह्य- त्यनपक्रामुकाऽस्मा.द्वि.ड्भवति।

* <6.10.12> पवस्वेन्दो वृषा सुत इति- प्रतिपद.ङ्कुर्या,द्यꣳ कामयेत जने म ऋध्येतेति।

* <6.10.13> कृधी नो यशसो जन इति- जनताया.मेवास्मा ऋध्यते।

* <6.10.14> युवं हि स्थ स्स्वꣳ पती- इति द्वाभ्यां प्रतिपद.ङ्कुर्या,त्समावद्धाजा.वेवैनौ यज्ञस्य करो-त्युभौ यज्ञयशसे.नार्पयति।

* <6.10.15> प्रास्य धारा अक्षर.न्निति वृष्टिकामाय प्रतिपद.ङ्कुर्यात्।

* <6.10.16> प्रास्य धारा अक्षर.न्निति दिवो वृष्टि.श्च्यावयति, वृष्ण स्सुतस्यौजस- इत्यन्तरिक्षात्।

* <6.10.17> देवाꣴ अनु प्रभूषत- इत्यस्मि.न्लोके प्रतिष्ठापयति।

Sri Sachchidananda Avadhoota Datta Peetham • Mysore •

* <6.10.18> ओजसा वा एत.द्वीर्येण प्रदीयते- यदप्रत्तं भवति, यद्वृष्ण स्सुतस्यौजस इत्या-हौजसैवास्मै वीर्येण दिवो वृष्टिं प्र यच्छति।

* <6.10.19> तया पवस्व धारया- यया गाव इहागम-न्जन्यास उप नो गृहमिति- प्रतिपद.ङ्कुर्या,द्यः कामयेतोप मा जन्या गावो नमेयु-र्विन्देत मे जन्या गा राष्ट्र.मिति, यदेषा प्रतिप.द्भव-त्युपैन.ञ्जन्या गावो नमन्ति- विन्दतेऽस्य जन्या गा राष्ट्रम्।

## ताण्ड्य ब्राह्मणे सप्तमोऽध्यायः

* <7.1.1> ❃7.1 इमे वै लोका गायत्र न्त्र्यावृ.द्गेय-न्त्रयो हीमे लोका, यत्त्र्या.वृद्गाय-त्येभि.रेवैनँ लोकै स्संमिमीते।
* <7.1.2> द्वि.रव.नर्दे-द्धिङ्कुर्या.त्तृतीयम्।
* <7.1.3> यत्त्रि.रवनर्द-त्यति तद्गायत्रं रेचयति।
* <7.1.4> यो वै गायत्रेणाप्रतिहृतेनो.द्गाय-त्यप्रतिष्ठानो भवति, हिङ्कारो वै गायत्रस्य प्रतिहारः।
* <7.1.5> स मनसा ध्येयः प्रतिहृतेन गायत्रेणोद्गायति- प्रति तिष्ठति।
* <7.1.6> यो वा एभ्यो लोकेभ्यो गायत्र.ङ्गायति- नैभ्यो लोकेभ्य आवृश्च्यत, -इम एनँ लोका ऊर्ज्जाऽभिसँवसते।
* <7.1.7> मन्द्र.मिवाग्र आददी.ताथ तारतर.मथ तारतम,न्तदेभ्यो लोकेभ्योऽगासीत्।
* <7.1.8> अनिरुक्त ङ्गेय,मेतद्वै गायत्रस्य क्रूरँ- यन्निरुक्तँ, य.दनिरुक्त ङ्गायति- क्रूर.मेवास्य परि वृणक्ति।
* <7.1.9> प्राणो गायत्र,न्न व्यवान्या-त्प्राण.स्याविच्छेदाय, यदि व्यवानिति प्रमायुको भवति, यदि न व्यवानिति सर्व.मायु.रेति।
* <7.1.10> यदि व्यवान्या-न्मध्य ऋचो व्यवान्या,त्प्राणो वै गायत्रं- प्राण स्स्वरः- प्राण.मेव तन्मध्यत आत्म.न्दधाति- स सर्व.मायु.रेति।
* <7.1.11> इडां पशुकामाय निधन.ङ्कुर्या-त्स्व.स्स्वर्गकामाय- यशो ब्रह्मवर्चसकामा-याऽऽयु.रामयाविने- हंसी.त्यभिचरते।
* <7.1.12> एते वै गायत्रस्य दोहाः।

- <7.1.13> ब्रह्मवर्चसी पशुमा.न्भवति- य एवँ वेद।
- <7.2.1>❃7.2 प्रजापति.र्देवेभ्य आत्मानँ यज्ञ.ङ्कृत्वा प्रायच्छ,त्तेऽन्योऽन्यस्मा अग्राय नातिष्ठन्त, ता.नब्रवी-दाजि.मस्मि.न्नितेति, त आजि.मायन्, यदाजि मायं-स्तदाज्याना माज्यत्वम्।
- <7.2.2> स इन्द्रोऽवे-दग्निर्वा इद.मग्र उज्ज्येष्यतीति, सोऽब्रवी-द्यतरो ना.विद.मग्र उज्जय-त्तन्नौ सहेति- सोऽग्नि.रग्र उदजय,दथ मित्रावरुणा-वथेन्द्रो,ऽथैषैका होत्राऽनुज्जिताऽऽसी,त्स इन्द्रोऽग्नि.मब्रवी-द्यत्सहावोचावहौ- यन्नौ तदिति, सैषैन्द्रा.ग्न्यध्यर्ध-मग्ने स्स्तोत्र-मध्यर्ध.मिन्द्रस्य।
- <7.2.3> चत्वारि सन्ति- षड्देवत्यानि।
- <7.2.4> षड्वा विहितो यज्ञो- यावान् यज्ञ.स्तमेवाऽऽरभते।
- <7.2.5> सर्वाणि स्वारा.ण्याज्यानि- तज्जामि, नानादेवत्यै.स्स्तुव.न्त्यजामितायै।
- <7.2.6> ग्राम्येभ्यो वा एत.त्पशुभ्य स्स्तुवन्ति- यदाज्यैः पुन.रभ्यावर्तं स्तुवन्ति, तस्मा.त्पराञ्चः प्राज्यन्ते- प्रत्यञ्चः प्रजायन्ते, तस्मादु प्रेत्य पुन.रायन्ति।
- <7.3.1>❃7.3 एतावता वाव माध्यन्दिनं सवनं पुपुवे।
- <7.3.2> त्रिभिश्च च्छन्दोभिः पञ्चभिश्च सामभिः।
- <7.3.3> यन्माध्यन्दिनेन पवमानेन स्तुवन्ति- माध्यन्दिन.मेव तत्सवनं पावयन्ति।
- <7.3.4> एतावन्ति वाव सर्वाणि सामानि- यावन्ति माध्यन्दिने पवमाने।
- <7.3.5> गायत्र.न्निधनव-दनिधन.मैडम्।
- <7.3.6> यन्माध्यन्दिनेन पवमानेन स्तुवन्ति- सर्वै.रेव तत्सामभि स्स्तुवन्ति।
- <7.3.7> आत्मा वै यज्ञस्य पवमानो- मुख.ङ्गायत्री- प्राणो गायत्रँ, यद्गायत्र्या.ङ्गायत्रेण स्तुवन्ति- मुखत एव त.त्प्राणा.न्दधति।
- <7.3.8> प्राणापाना वा एतानि च्छन्दांसि- प्राणो गायत्री- व्यानो बृह-त्यपान.स्त्रिष्टु,-ब्यदेतै.श्छन्दोभि स्स्तुवन्ति- प्राणापानाना.मविच्छेदाय।

- <7.3.9> इमे वै लोका एतानि च्छन्दां-स्यय.मेव[8] प्रथमो गाय-त्र्ययं मध्यमो बृह-त्यसा.वुत्तम.स्त्रिष्टु,ब्यदेतै.श्छन्दोभि स्संहितै स्स्तुव-न्त्येषाँ लोकाना.मविच्छेदाय।
- <7.3.10> यदन्य.च्छन्दोऽन्तरा व्यवेया-दिमा.न्लोका.न्विच्छिन्द्यात्।
- <7.3.11> गायत्रेण स्तुत्वा निधनवता स्तुव,न्तीयँ वै गाय-त्र्यस्या.मेव तदायतन.ङ्क्रियते।
- <7.3.12> य.दनिधनेनाग्रे स्तुयु-रनायतनो यजमान.स्स्यात्।
- <7.3.13> निधनवता स्तुवन्ति, वीर्यँ वै गायत्री- वीर्य.न्निधनँ- वीर्येणैव तद्वीर्यं समर्धयति।
- <7.3.14> ऐडेन बृहती.मारभन्ते।
- <7.3.15> पशवो वा इडा- पशवो बृहती- पशुष्वेव तत्पशू.न्दधाति।
- <7.3.16> बृहत्यां भूयिष्ठानि सामानि भवन्ति।
- <7.3.17> तत्रापि त्रिणिधनम्।
- <7.3.18> अबलिष्ठ इव वा अयं मध्यतो लोक-स्तस्यैव तदायतन.ङ्क्रियते।
- <7.3.19> त्रिणिधनं भवति, त्रीणि सवनाना.ञ्छिद्राणि- तानि तेनापि.धीयन्ते।
- <7.3.20> त्रिणिधनं भवति, त्रय इमे लोका- एष्वेव लोकेषु प्रति तिष्ठति।
- <7.3.21> त्रिणिधनं भव,त्येतेन वै माध्यन्दिनं सवनं प्रतिष्ठितँ- यत्त्रिणिधनँ, य.त्त्रिणिधन.न्न स्या-दप्रतिष्ठितं माध्यन्दिनं सवनं स्यात्।
- <7.3.22> द्व्यक्षराणि निधनानि भवन्ति, द्विपा.द्यजमानो- यजमान.मेव यज्ञे पशुषु प्रतिष्ठापयति।
- <7.3.23> अनिधन.मन्ततो भवति- स्वर्गस्य लोकस्यानतिपादाय।
- <7.3.24> यन्निधनव.त्स्या-द्यजमानं स्वर्गा.ल्लोका.न्निर्हन्यात्।
- <7.3.25> स्वारं भवति।
- <7.3.26> स्वरेण वै देवेभ्योऽन्ततोऽन्नाद्यं प्रदीयते- स्वरेणैव तद्देवेभ्योऽन्ततोऽन्नाद्यं प्र यच्छति।

[8] अयमेव प्रथमो

- <7.3.27> गायत्रं पुरस्ता.द्भवति- स्वार.मन्ततः।
- <7.3.28> प्राणो वै गायत्रं- प्राण स्स्वरᳶ- प्राणा.नेव तदुभयतो दधाति, तस्मा.दुभयतᳶ प्राणाᳶ पशवः।
- <7.3.29> यद्गायत्रं पुरस्ता.द्भवति- स्वार.मन्ततᳶ, प्राणै.रेव प्रै.त्यपाने प्रति तिष्ठति।
- <7.4.1>❃7.4 एतद्वै यज्ञस्य स्वर्ग्यँ- यन्माध्यन्दिनं सवनं- माध्यन्दिनस्य पवमानᳶ- पवमानस्य बृहती, यद्बृहत्या.स्स्तोत्रे दक्षिणा दीयन्ते- स्वर्गस्यैव तल्लोकस्याऽऽयतने दीयन्ते।
- <7.4.2> देवा वै छन्दांस्यब्रुवन्- युष्माभि स्स्वर्गँ लोक.मयामेति, ते गायत्रीं प्रायुञ्जत- तया न व्याप्नुवं,स्त्रिष्टुभं प्रायुञ्जत- तया न व्याप्नुव,न्जगतीं प्रायुञ्जत- तया न व्याप्नुव,न्ननुष्टुभं प्रायुञ्जत- तयाऽल्पकादि न व्याप्नुवं,स्त आसा.न्दिशां रसा.न्प्रबृह्य चत्वार्यक्षरा.ण्युपादधु- स्सा बृह.त्यभव-त्तयेमा न्लोका.न्व्याप्नुवन्।
- <7.4.3> बृहती मर्या- ययेमा.न्लोका.न्व्यापामेति, तद्बृहत्या बृहत्त्वम्।
- <7.4.4> पशू.न्वा अस्यान्ता.नुपादधुᳶ, पशवो वै बृहती- यद्बृहत्या.स्स्तोत्रे दक्षिणा दीयन्ते- स्व एव त.दायतने दीयन्ते।
- <7.4.5> यन्वित्याहु-रन्यानि च्छन्दांसि वर्षीयांसि- कस्मा.द्बृह.त्युच्यत, एषा हीमा.न्लोका.न्व्याप्नो-न्नान्य.च्छन्दᳵ, किञ्चन यानि सप्त चतु.रुत्तराणि च्छन्दांसि- तानि बृहती.मभि संपद्यन्ते, तस्मा.द्बृह.त्युच्यते।
- <7.4.6> यन्वित्याहु-र्गायत्रं प्रातस्सवनं- त्रैष्टुभं माध्यन्दिनं सवन- ञ्जागत न्तृतीयसवन,ङ्कस्मा.द्बृहत्या मध्यन्दिने स्तुवन्तीति।
- <7.4.7> बहिष्पवमानेन वै देवा आदित्यं स्वर्गँ लोक.महर-न्त्स नाध्रियत, तं बृहत्या मध्यन्दिनेऽस्तभ्नुवं-स्तस्मा.द्बृहत्या मध्यन्दिनं स्तुव,न्त्यादित्यं ह्येषा मध्यन्दिने दाधार।
- <7.4.8> यैरु कैश्च च्छन्दोभि.र्मध्यन्दिने स्तुवन्ति- तानि त्रिष्टुभ.मभि सं पद्यन्ते, तस्मा.त्त्रिष्टुभो नयन्ति- माध्यन्दिना.त्सवनात्।
- <7.5.1>❃7.5 प्रजापति.रकामयत- बहु स्यां- प्रजायेयेति, स शोच.न्नमहीयमानोऽतिष्ठ-त्स एत.दामहीयव.मपश्य-त्तेनेमाᳶ प्रजा असृजत, ता.स्सृष्टा अमहीयन्त, य.दमहीयन्त तस्मा.दामहीयवम्।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

- <7.5.2> ता अस्मा.त्सृष्टा अपाक्रामं-स्तासा.न्दिवि स.द्धूम्याद्द इति प्राणा.नाऽदत्त, ता एनं प्राणे.ष्वात्तेषु पुन.रुपाऽऽवर्तन्त, ताभ्य उग्रं शर्म महि श्रव इति पुनः प्राणा.न्प्रायच्छ,त्ता अस्मा.दुदेवायोधं-स्तासां स्तौष इति मन्यू.नवाश्नणा-त्ततो वै तस्मै ता श्श्रैष्ठ्या.यातिष्ठन्त।
- <7.5.3> तिष्ठन्तेऽस्मै समाना श्श्रैष्ठ्याय- य एवँ वेद।
- <7.5.4> प्रजानाञ्च वा एषा सृष्टिः- पाप.वसीयश्च विधृति,र्य.दामहीयवम्।
- <7.5.5> विधृतिः पाप.वसीयसो भवति- य एवँ वेद।
- <7.5.6> देवा वै यशस्कामा स्सत्त्र.मास-ताग्नि.रिन्द्रो वायु.र्मख,स्तेऽब्रुवन्- यन्नो यश ऋच्छा-त्तन्न स्सहासदिति, तेषा मखं यश आर्च्छ-त्तदादा.यापाक्राम-त्तदस्य प्रासहाऽदित्सन्त, तं पर्ययतन्त, स्वधनुः प्रतिष्टभ्यातिष्ठ-त्तस्य धनु.रार्त्नि.रूर्ध्वा पतित्वा शिरोऽच्छिन-त्स प्रवर्ग्योऽभव,द्यज्ञो वै मखो- यत्प्रवर्ग्यं प्रवृञ्जन्ति- यज्ञस्यैव तच्छिरः प्रति दधति।
- <7.5.7> तद्देवा यशो व्यभजन्त- तस्याग्नी रौरवं प्राबृहत।
- <7.5.8> तद्वै स पशुवीर्यं प्राबृहत- पशवो वै रौरवम्।
- <7.5.9> पशुमा.न्भवति- य एवँ वेद।
- <7.5.10> अग्निर्वै रूर-स्तस्यैत.द्रौरवम्।
- <7.5.11> असुरा वै देवा.न्पर्ययतन्त, तत एता.वग्नी रूरौ विष्वञ्चौ स्तोभा.वपश्य,त्ताभ्या.मेना.न्प्रत्यौष-त्ते प्रत्युष्यमाणा अरवन्त, यदरवन्त- तस्मा.द्रौरवम्।
- <7.5.12> अथेन्द्रो यौधाजयं प्राबृहत- तद्वै स वज्रं प्राबृहत- वज्रो वै यौधाजयम्।
- <7.5.13> वज्रं भ्रातृव्याय प्रहरति- य एवँ वेद।
- <7.5.14> इन्द्रो वै युधाजि-त्तस्यैत.द्यौधाजयम्।
- <7.5.15> युधा मर्या अजैष्मेति- तस्मा.द्यौधाजयम्।
- <7.5.16> अथ वायु.रौशनं प्राबृहत।
- <7.5.17> तद्वै स प्राणवीर्यं प्राबृहत- प्राणा वा औशनम्।
- <7.5.18> सर्व.मायु.रेति- य एवँ वेद।
- <7.5.19> वायुर्वा उशं-स्तस्यैत.दौशनम्।

- <7.5.20> उशना वै काव्योऽसुराणां पुरोहित आसी-त्त.न्देवा॰ कामदुघाभि.रपामन्त्रयन्त- तस्मा एता.न्यौशनानि प्रायच्छ,न्कामदुघा वा औशनानि।
- <7.5.21> कामदुघा एन.मुप तिष्ठन्ते- य एवँ वेद।
- <7.6.1>❃7.6 प्रजापति.रकामयत- बहु स्यां- प्रजायेयेति, स तूष्णीं मनसा ऽध्याय,त्तस्य यन्मन.स्यासी-त्तद्बृह.त्समभवत्।
- <7.6.2> स आ दधीत- गर्भो वै मेऽय.मन्तर्हित,स्तँ वाचा प्रजनया इति।
- <7.6.3> स वाचँ व्यसृजत- सा वा.ग्रथन्तर.मन्वपद्यत।
- <7.6.4> रथं मर्याः~ क्षेप्लाऽतारी.दिति, तद्रथन्तरस्य रथन्तरत्वम्।
- <7.6.5> ततो बृह.दनु प्राजायत, बृह.न्मर्या- इदं स ज्यो.गन्त.रभूदिति- तद्बृहतो बृहत्त्वम्।
- <7.6.6> यथा वै पुत्रो ज्येष्ठ- एवं बृह.त्प्रजापतेः।
- <7.6.7> ज्येष्ठब्राह्मणँ वा एतत्।
- <7.6.8> प्र ज्यैष्ठ्य.माप्नोति- य एवँ वेद।
- <7.6.9> यन्नित्याहु-र्बृह.त्पूर्वं प्रजापतौ समभव-त्कस्मा.द्रथन्तरं पूर्वँ योग.मानश इति।
- <7.6.10> बृह.देव पूर्वं समभव-द्रथन्तरन्तु पूर्वं सृष्ट्याऽसृजत, तस्मा.त्पूर्वँ योग.मानशे।
- <7.6.11> तयो स्समान.न्निधन.मासी,त्तस्मि.न्नातिष्ठेता- न्तँ आजि.मैता- न्तयो.र्हसिति बृह.त्प्राण.मुदजय-दसिति रथन्तर.मपान.मभि समवेष्टत। (द्विवचनस्यापि प्रगृह्याभावः)
- <7.6.12> प्राणापानौ वै बृह.द्रथन्तरे, ज्यो.गामयाविन उभे कुर्या,दपक्रान्तौ वा एतस्य प्राणापानौ- यस्य ज्योगामयति, प्राणापाना.वेवास्मि.न्दधाति।
- <7.6.13> यन्नित्याहु-रुभे बृहद्रथन्तरे बहि.र्णिधने- कस्मा.द्बृह.द्बहि.र्णिधनानि भजते.ऽन्तर्णिधनानि रथन्तर.मिति।
- <7.6.14> प्राणो बृह-त्तस्मा.द्बहि.र्णिधनानि भजते- बहिर्हि प्राणो,ऽपानो रथन्तर न्तस्मा.दन्त.र्णिधनानि भजते-ऽन्त.र्ह्यपानः।
- <7.6.15> महावृक्षौ वै बृह.द्रथन्तरे- निधनेन समर्प्ये।
- <7.6.16> यद्वै महावृक्षौ समृच्छेते- बहु तत्र विभग्नं प्रभग्नं शेते।

- <7.6.17> ऐरँ वै बृह-दैडं रथन्तरं, मनो वै बृह-द्वा.ग्रथन्तरं, साम वै बृह-दृ.ग्रथन्तरं, प्राणो वै बृह-दपानो रथन्तर,मसौ वै लोको बृह-दयं रथन्तर,मेतानि मनसा ऽन्वीक्ष्योद्गाये.त्क्लृप्ताभ्या.मेवाभ्या मुद्गायति।

- <7.7.1>❃7.7 पशवो वै बृह.द्रथन्तरे,अष्टाऽक्षरेण प्रथमाया ऋचः प्रस्तौ-त्यष्टाशफां.स्त.त्पशू.नव रुन्धे।

- <7.7.2> द्व्यक्षरेणोत्तरयो.र्ऋचोः प्रस्तौति, द्विपा.द्यजमानो- यजमान.मेव यज्ञे पशुषु प्रतिष्ठापयति।

- <7.7.3> पञ्चाक्षरेण रथन्तरस्य प्रति हरति- पाङ्क्तां.स्तत्पशू.नव रुन्धे।

- <7.7.4> चतु.रक्षरेण बृहतः प्रति हरति- चतुष्पद.स्तत्पशू.नव रुन्धे।

- <7.7.5> न वै बृह.न्न रथन्तर.मेकं छन्दोऽयच्छ,त्ततः ककुभा.वुत्तरे उपादधु,-स्तस्मा.द्बृहती प्रथमा- ककुभा.वुत्तरे, तस्मा.द्बृह.द्रथन्तरे एकर्चेन कुर्वन्ति- न हि ते एक.ञ्छन्दोऽयच्छत्।

- <7.7.6> नव बृहतो रोहा.न्रोहति, नव प्राणाः- प्राणा.नेवाव रुन्धे।

- <7.7.7> त्री.न्प्रथमायां रोहति- भूतं भव.द्भविष्य-त्तानेवाव रुन्धे, त्री.न्मध्यमायां रोह-त्यात्मानं प्रजां पशूं-स्तानेवाव रुन्धे, त्री.नुत्तमायां रोहति- त्रय इमे लोका- एष्वेव लोकेषु प्रति तिष्ठति।

- <7.7.8> सर्वा.न्कामा.नव रुन्धे- य एवँ विद्वा.न्बृहतो रोहा.न्रोहति।

- <7.7.9> वज्रेण वा एत.त्प्रस्तोतोद्गातार.मभि प्रवर्तयति- यद्रथन्तरं प्रस्तौति, समुद्र मन्तर्धायोद्गाये-द्वागि.त्यादेयँ, वाग्वै समुद्र- स्समुद्र.मेवान्त.र्दधा.त्यहिंसायै।

- <7.7.10> बलव.द्गेयँ- वज्र.मेवं प्रवृत्तं- प्रत्युद्गृह्णाति।

- <7.7.11> बल्वला कुर्वता गेय.मभिलोभयतेव- वज्र.मेवाभि लोभयति।

- <7.7.12> क्षिप्र.ङ्गेयं- स्वर्गस्य लोकस्य समष्ट्यै।

- <7.7.13> देवरथो वै रथन्तर- मक्षरेणाक्षरेण प्रतिष्ठापयतोद्गेय,मरेणारेण हि रथः प्रति तिष्ठति।

- <7.7.14> यो वै देवरथ.मनन्वालभ्याऽऽतिष्ठ-त्यवास्मा.त्पद्यत, -इयँ वै देवरथ- इमा मालभ्योद्गाये- न्नास्मा.दव पद्यते।

- <7.7.15> ईश्वरँ वै रथन्तर.मुद्गातु.श्चक्षुः प्रमथितोः, प्रस्तूयमाने संमीले.त्स्वर्दृशं प्रति वीक्षेत- नैन.श्चक्षु.र्जहाति।

- <7.7.16> प्रजननँ वै रथन्तरँ- यत्तस्थुष इत्याहास्थायुकोद्गातु.र्वाग्भव-त्यपि प्रजननं ह,न्त्यस्थुष इति वक्तव्यं- सुस्थुष इति वा, स्थायुकोद्गातु.र्वाग्भवति- न प्रजनन.मपि हन्ति।

- <7.7.17> पृष्ठानि वा असृज्यन्त, तै.र्देवा स्स्वर्गँ लोक.मायं,स्तेषां रथन्तरं महिम्ना नाशक्नो-दुत्पतत्।

- <7.7.18> तस्य वशिष्ठो महिम्नो विनिधाय- तेन स्तुत्वा स्वर्गँ लोक.मै,-त्तान्त्सम्भृत्यो.द्गायेत्।

- <7.7.19> यस्ते गोषु महिमा- यस्ते अप्सु- रथे वा ते स्तनयित्नौ- य उ ते, यस्ते अग्नौ महिमा- तेन सं भव- रथन्तर द्रविणव.न्न एधि।

- <7.8.1>❃7.8 अपो वा ऋत्व्य.मार्च्छं,त्तासाँ वायुः पृष्ठे व्यवर्तत, ततो वसु वामं समभव,त्तस्मि.न्मित्रावरुणौ पर्यपश्यता- न्तावब्रूताँ- वामं मर्या- इद.न्देवे.ष्वाऽजनीति, तस्मा.द्वामदेव्यम्।

- <7.8.2> तत्परिगृह्णन्ता.वब्रूता-मिद.मविदावेद.न्नौ माऽभ्यर्तिद्वमिति, तत्प्रजापति रब्रवी-न्मद्वा एत.द्यजनि- मम वा एत.दिति, तदग्नि.रब्रवी-न्माँ वा एत.दन्न.मजनि- मम वा एत.दिति, तदिन्द्रोऽब्रवी-च्छ्रेष्ठस्था वा एत-दहँ व श्श्रेष्ठोऽस्मि- मम वा एत.दिति, तद्विश्वे देवा अब्रुव-न्नस्मद्देवत्यँ वा एत-द्यदस्म्योऽधि समभू-दस्माकँ वा एत.दिति, तत्प्रजापति-रब्रवी-त्सर्वेषा.न्न इद.मस्तु- सर्व इद.मुप.जीवामेति- त.त्पृष्ठेषु न्यदधु, स्सर्वदेवत्यँ वै वामदेव्यम्।

- <7.8.3> य.त्कवतीषु- तेन प्राजापत्य-ङ्को हि प्रजापति,र्य.दनिरुक्तासु- तेन प्राजापत्य-मनिरुक्तो हि प्रजापतिः।

- <7.8.4> यद्गायत्रीषु- तेनाऽऽग्नेय,ङ्गायत्रच्छन्दा ह्यग्निः।

- <7.8.5> य.त्पृष्ठेषु न्यदधु-स्तेनैन्द्रं, सर्वाणि हि पृष्ठा.नीन्द्रस्य निष्केवल्यानि।

- <7.8.6> यन्मैत्रावरुणोऽनुशंसति- तेन मैत्रावरुणम्।

- <7.8.7> यद्बहुदेवत्य.मुत्तमं पद- न्तेन वैश्वदेवं, सर्वेष्वेव रूपेषु प्रति तिष्ठति।
- <7.8.8> प्रजापतिर्वा एता.ङ्गायत्रीँ योनि.मपश्य-त्स आदीधी.तास्मा.द्योनेꣳ पृष्ठानि सृजा इति।
- <7.8.9> स रथन्तर.मसृजत- तद्रथस्य घोषोऽन्वसृज्यत।
- <7.8.10> स बृह.दसृजत- तत्स्तनयित्नो.र्घोषोऽन्वसृज्यत, स वैरूप.मसृजत- तद्वा तस्य घोषोऽन्वसृज्यत।
- <7.8.11> स वैराज.मसृजत- तदग्ने.र्घोषोऽन्वसृज्यत।
- <7.8.12> स शक्करी.रसृजत- तदपा.ङ्घोषोऽन्वसृज्यत।
- <7.8.13> स रेवती.रसृजत- तद्गवा.ङ्घोषोऽन्वसृज्यत।
- <7.8.14> एतैर्वा एतानि सह घोषै.रसृज्यन्त।
- <7.8.15> सर्वेऽस्मि.न्घोषा- स्सर्वाꣳ पुण्या वाचो वदन्ति- य एवँ वेद।
- <7.9.1>❃7.9 पिता वै वामदेव्यं- पुत्राꣳ पृष्ठानि।
- <7.9.2> एतस्मा.द्वा एतानि योने.रसृज्यन्त।
- <7.9.3> तस्मा.त्पृष्ठानां स्तोत्रँ वामदेव्येनानु.ष्टुवन्ति शान्त्यै।
- <7.9.4> यद्धि पुत्रोऽशान्त.श्चरति- पिता तच्छमयति।
- <7.9.5> अयँ वै लोको मध्यमो वामदेव्य-मेतस्माद्वा इमौ लोकौ विष्वञ्चा.वसृज्येतां- बृहच्च रथन्तरञ्च।
- <7.9.6> यद्रथन्तरेण स्तुवन्ति- ये रथन्तराꣳ पशवोऽन्तरिक्ष-न्त उपश्रयन्ति, यद्बृहता स्तुवन्ति- ये बार्हताꣳ पशवोऽन्तरिक्ष-न्त उपश्रयन्ति, ते वामदेव्यस्य स्तोत्रेणावरुद्धाः।
- <7.9.7> ध्रुव आसीनो वामदेव्येनोद्गाये-त्पशूना.मुपाꣽवृत्त्यै।
- <7.9.8> उपैनं पशव आवर्तन्ते- य एवँ वेद।
- <7.9.9> अन्तरिक्षँ वै वामदेव्य.मधून्वतेवोद्गेय-मधूत.मिवान्तरिक्षं, पशवो वै वामदेव्य.महिंसतेवोद्गेयं- पशूना.महिंसायै।
- <7.9.10> कथमिव वामदेव्य.ङ्गेय.मित्याहुः।
- <7.9.11> यथाऽङ्कुली पुत्रा.न्त्सन्दश्याऽसंभिन्दन्ती हरति- यथा वातोऽप्सु शनै.र्वाति।

- <7.9.12> स्वधू.र्वामदेव्य.ङ्गेयम्।
- <7.9.13> यो वै स्वधू.र्वामदेव्य.ङ्गायति- स्वधू.र्भवति।
- <7.9.14> या.त्यस्यान्यो नियानेन- नान्यस्य नियानेन याति।
- <7.9.15> न बृहतो न रथन्तरस्यानुरूप.ङ्गेयं- स्वेनैवाऽऽयतनेन गेय-मायतनवा.न्भवति।
- <7.9.16> देवा वै पशू.न्व्यभजन्त- ते रुद्र.मन्तरायं,स्तान् वामदेव्यस्य स्तोत्र उपेक्षते।
- <7.9.17> अनिरुक्त.ङ्गेयम्।
- <7.9.18> यन्निराह- रुद्राय पशू.नपिदधाति- रुद्र.स्तां समां पशू.न्घातुको भवति।
- <7.9.19> रेवतीषु वामदेव्येन पशुकाम.स्स्तुवीत।
- <7.9.20> आपो वै रेवत्यः- पशवो वामदेव्य-मद्भ्य एवास्मै पशू.न्प्र जनयति।
- <7.9.21> अनवर्तिः पशुतो भवति- प्रजा त्वस्य मीलितेव भवति।
- <7.9.22> कवतीभ्यो ह्येति प्रजापतेः।
- <7.10.1>❀7.10 इमौ वै लोकौ सहाऽऽस्ता,न्तौ वियन्ता.वब्रूताँ- विवाहँ विवहावहै- सह ना.वस्त्विति।
- <7.10.2> तयो.रय.ममुष्मै श्यैतं प्रायच्छ-न्नौधस.मसा.वस्मै।
- <7.10.3> तत एनयो.र्निधने विपर्यक्रामता- न्देवविवाहो वै श्यैत.नौधसे।
- <7.10.4> प्र वसीयांसँ विवाह.माप्नोति- य एवँ वेद।
- <7.10.5> इतो वा इमे लोका ऊर्ध्वाः कल्पमाना य-न्त्यमुतोऽर्वाञ्चः कल्पमाना आ यन्ति।
- <7.10.6> यद्रथन्तरेण स्तुव.न्तीमँ लोक न्तेन युन-क्त्यन्तरिक्षँ वामदेव्येन- नौधसेनामुँ, यद्बृहता स्तुव.न्त्यमुँ लोक न्तेन युन-क्त्यन्तरिक्षँ वामदेव्येन- श्यैते.नेमम्।
- <7.10.7> क्लृप्ता.निमा.न्लोका-नुपाऽऽस्ते य एवँ वेद।
- <7.10.8> बृहद्रथन्तरे वै श्यैतनौधसे, यद्रथन्तराय नौधसं प्रति प्रयुञ्जन्ति- बृह.देवास्मै तत्प्रति प्रयुञ्जन्ति, बृहद्ध्येत.त्परोऽक्षँ- यन्नौधसँ, यद्बृहते श्यैतं प्रति प्रयुञ्जन्ति- रथन्तर.मेवास्मै तत्प्रति प्रयुञ्जन्ति, रथन्तरं ह्येत.त्परोऽक्षं- यच्छ्यैतम्।
- <7.10.9> उभाभ्यां बृह.द्रथन्तराभ्यां स्तुते- य एवँ वेद।

- <7.10.10> देवा वै ब्रह्म व्यभजन्त, ता.न्नोधा॰ काक्षीवत आऽगच्छ,त्तेऽब्रुव-न्नृषिर्न आगं-स्तस्मै ब्रह्म ददामेति- तस्मा एत.त्साम प्रायच्छ,द्यन्नौधसे प्रायच्छ-त्तस्मा.न्नौधसं, ब्रह्म वै नौधसम्।
- <7.10.11> ब्रह्मवर्चसकाम एतेन स्तुवीत- ब्रह्मवर्चसी भवति।
- <7.10.12> अथैत.च्छ्यैतम्।
- <7.10.13> प्रजापति॰ पशू.नसृजत, तेऽस्मा.त्सृष्टा अपाक्रामं-स्तानेतेन साम्नाऽभि.व्याहर,त्तेऽस्मा अतिष्ठन्त, ते श्येत्या अभवन्- यच्छेत्या अभवं-स्तस्मा.च्छ्यैतं, पशवो वै श्यैतम्।
- <7.10.14> पशुकाम एतेन स्तुवीत- पशुमा.न्भवति।
- <7.10.15> प्रजापति॰ प्रजा असृजत, तास्सृष्टा अशोचं-स्ता.श्श्यैतेन हुंमा इत्यभ्यजिघ्र-त्ततो वै ता स्समैधन्त, समेधन्ते तां समां प्रजा- यत्रैवँ विद्वा.ञ्छ्यैतेनो.द्गायति।
- <7.10.16> एष वै यजमानस्य प्रजापति-र्य.दुद्गाता, यच्छ्यैतेन हिङ्करोति- प्रजापति.रेव भूत्वा प्रजा अभि जिघ्रति।
- <7.10.17> वसु.निधनं भवति- पशवो वै वसु- पशुष्वेव प्रति तिष्ठति।

## ताण्ड्यब्राह्मणे अष्टमोऽध्यायः

- <8.1.1>❃ 8.1 आष्कार.णिधन.ङ्काण्वँ- वषट्कार.णिधन.मभिचरणीयस्य ब्रह्मसाम कुर्या,दभिनिधनं माध्यन्दिने पवमाने।
- <8.1.2> देवेषुर्वा एषा यद्वषट्कारो,ऽभीति वा इन्द्रो वृत्राय वज्रं प्राहर-दभीत्येवास्मै वज्रं प्रहृत्य- देवेष्वा वषट्कारेण विध्यति।
- <8.1.3> त्रैककुभं पशुकामाय ब्रह्मसाम कुर्या,त्त्वमङ्ग प्रशंसिष- इत्येतासु।
- <8.1.4> इन्द्रो यती.न्त्सालावृकेभ्य॰ प्रायच्छ,त्तेषा.न्त्रय उदशिष्यन्त- रायोवाजो- बृहद्गिरि॰- पृथुरश्मि,स्तेऽब्रुव.न्को न॰ पुत्रा.न्भरिष्यन्ती,त्यह-मिन्तीन्द्रोऽब्रवी-त्तां.स्त्रिककु.बधिनिधायाचर-त्स एत.त्सामापश्य,द्य.त्त्रिककु.बपश्य-त्तस्मा.त्त्रैककुभम्।

- <8.1.5> स आत्मान.मेव पुन.रुपाधाव,त्त्वमङ्ग प्रशंसिषो- देव.श्शविष्ठ मर्त्य-न्न त्वदन्यो मघव.न्नस्ति मर्डि-तेन्द्र ब्रवीमि ते वच इति, स एतेन च प्रगाथेनैतेन साम्ना सहस्रं पशू.नसृजत, तानेभ्यः प्रायच्छ-त्ते प्रत्यतिष्ठन्।
- <8.1.6> यः पशुकाम.स्स्या-द्यः प्रतिष्ठाकाम- एतस्मि.न्प्रगाथ- एतेन साम्ना स्तुवीत, प्र सहस्रं पशू.नाप्नोति- प्रति तिष्ठति।
- <8.1.7> त्रिवीर्यँ वा एत.त्साम, त्रीन्द्रिय-मैन्द्य ऋच- ऐन्द्रं सा.मैन्द्रेति निधन-मिन्द्रिय एव वीर्ये प्रति तिष्ठति।
- <8.1.8> त्रैशोक.ञ्ज्योगामयाविने ब्रह्मसाम कुर्यात्।
- <8.1.9> इमे वै लोका स्सहाऽसं,स्तेऽशोचं-स्तेषा.मिन्द्र एतेन साम्ना शुच.मपाहन्, य.त्त्रयाणां शोचता.मपाहं-स्तस्मा.त्त्रैशोकम्।
- <8.1.10> या.मस्मा.दपाह-न्त्सा पुंश्चलीं प्राविश,द्या.मन्तरिक्षा-त्सा क्लीबँ, या.ममुष्मा-त्सैनस्विनम्। (सा, एनस्विनम्)
- <8.1.11> तस्मा.त्तेषान्नाऽशैतव्या, य एषा.माशा.मेति- तस्मा एव शुचोऽप भजते। (न, आशा, एतव्या)
- <8.1.12> शुचा वा एष विद्धो- यस्य ज्योगामयति, य.त्त्रैशोकं ब्रह्मसाम भवति- शुच.मेवास्मा.दप हन्ति।
- <8.1.13> दिवेति निधन.मुप यन्ति, व्युष्टिर्वै दिवा- व्येवास्मै वासयति।
- <8.2.1>❃ 8.2 आष्कार.णिधन.ङ्काण्वं- प्रतिष्ठाकामाय ब्रह्मसाम कुर्यात्।
- <8.2.2> कण्वो वा एत.त्सामर्ते निधन.मपश्य,त्स न प्रत्यतिष्ठ-त्स वृषदंशस्या-ऽषिति क्षुवत उपाश्रृणो,त्स तदेव निधन.मपश्य,त्ततो वै स प्रत्यतिष्ठ,द्यदेत.त्साम भवति- प्रतिष्ठित्यै। (वृषदंशस्य आष् इति)
- <8.2.3> वसिष्ठस्य जनित्रं, प्रजाकामाय ब्रह्मसाम कुर्यात्।
- <8.2.4> वसिष्ठो वा एत.त्पुत्रहत स्सामापश्य,त्स प्रजया पशुभिः प्राजायत, यदेत.त्साम भवति प्रजात्यै।
- <8.2.5> आथर्वणँ लोककामाय ब्रह्मसाम कुर्यात्।

- <8.2.6> अथर्वाणो वा एत.ल्लोककामा स्सामापश्यं,स्तेनामर्त्यँ लोक.मपश्यन्, यदेत.त्साम भवति- स्वर्गस्य लोकस्य प्रजात्यै।
- <8.2.7> अभीवर्तं भ्रातृव्यवते ब्रह्मसाम कुर्यात्।
- <8.2.8> अभीवर्तेन वै देवा असुरा.नभ्यवर्तन्त, यदभीवर्तो ब्रह्मसाम भवति- भ्रातृव्य.स्याभिवृत्यै।
- <8.2.9> श्रायन्तीयँ यज्ञविभ्रष्टाय ब्रह्मसाम कुर्यात्।
- <8.2.10> प्रजापति.रुषस.मध्यै.त्स्वा.न्दुहितर,न्तस्य रेतः परा्ऽपत-त्तदस्या. न्न्यषिच्यत, तदश्रीणा-दिदं मे मा दुषदिति, त.त्स.दकरो.त्पशू.नेव।
- <8.2.11> यच्छ्रायन्तीयं ब्रह्मसाम भवति- श्रीणाति चैवेनं- सच्च करोति।
- <8.3.1> ❄ 8.3 देवाश्च वा असुरा.श्चैषु लोके.ष्वस्पर्धन्त, ते देवाः प्रजापति मुपाधावं-स्तेभ्य एत.त्साम प्रायच्छ-देतेनैना.न्कालयिष्यध्व.मिति, तेनैना.नेभ्यो लोकेभ्यो ऽकालयन्त, यदकालयन्त- तस्मा.त्कालेयम्।
- <8.3.2> एभ्यो वै लोकेभ्यो भ्रातृव्य.ङ्कालयते- य एवँ वेद।
- <8.3.3> स्तोमो वै देवेषु तरो नामाऽऽसी-द्यज्ञोऽसुरेषु विदद्वसु,स्ते देवा-स्तरोभि.र्वो विदद्वसु.मिति- स्तोमेन यज्ञ.मसुराणा.मवृञ्जत।
- <8.3.4> स्तोमेन यज्ञं भ्रातृव्यस्य वृङ्क्ते- य एवँ वेद।
- <8.3.5> साध्या वै नाम देवा आसं,स्तेऽवच्छिद्य तृतीयसवनं- माध्यन्दिनेन सवनेन सह स्वर्गँ लोक मायं,स्तद्देवाः कालेयेन समतन्वन्, य.त्कालेयं भवति- तृतीयसवनस्य सन्तत्यै।
- <8.3.6> विदद्वसुर्वै तृतीयसवनं, य.त्तरोभिर्वो विदद्वसुमिति प्रस्तौति- तृतीयसवन.मेव तदभ्यति.वदति।
- <8.3.7> सर्वाणि वै रूपाणि कालेयं, यत्पदप्रस्ताव-न्तेन राथन्तरँ, यद्बृहतो रोहा.न्रोहति-तेन बार्हतँ, यत्स्तोभवा.न्प्रतिहार-स्तेन बार्हतँ, यद्द्रव.दिड- न्तेन राथन्तरं, सर्वे.ष्वेव रूपेषु प्रति तिष्ठति।
- <8.4.1> ❄ 8.4 साध्या वै नाम देवा आसं,स्ते सर्वेण यज्ञेन सह स्वर्गँ लोक.मायं,स्ते देवा.श्छन्दांस्यब्रुव-न्त्सोम माहरतेति, ते जगतीं प्राहिण्व-न्त्सा त्रीण्यक्षराणि हित्वैकाक्षरा

भूत्वाऽगच्छ,त्त्रिष्टुभं प्राहिण्व-न्त्सैक.मक्षरं हित्वा- त्र्यक्षरा भूत्वाऽगच्छ,द्गायत्रीं प्राहिण्वं-श्चतु.रक्षराणि वै तर्हि च्छन्दांस्यास,न्त्सा तानि चाक्षराणि हर.न्त्यागच्छ.दष्टाऽक्षरा भूत्वा, त्रीणि च सवनानि- हस्ताभ्या.न्द्वे सवने- दन्तै.र्दंष्ट्रा तृतीयसवन,न्तस्मा.द्वे अंशुमती सवने-धीत.न्तृतीयसवन,न्दन्तैर्हि तद्दंष्ट्वा धय.न्त्यहर,त्तस्य ये ह्रियमाणस्यांशवꣳ परापतं-स्ते पूतीका अभवन्, यानि पुष्पा.ण्यवाशीयन्त- तान्यर्ज्जुनानि, यत्प्राप्रोथ-त्ते प्रप्रोथा,-स्तस्मा.त्तृतीयसवन आशिर.मव नयन्ति, यमेव तद्गाव स्सोम.मदन्ति- तस्य तं रस मव नयन्ति- ससोमत्वाय।

- <8.4.2> ते त्रिष्टुब्जगत्यौ गायत्री.मब्रूता-मुप त्वाऽऽयावेति, साऽब्रवी-त्किं मे तत स्स्यादिति, यत्कामयस- इत्यब्रूतां, साऽब्रवी-न्मम सर्वं प्रातस्सवन-मह.मुत्तरे सवने प्रणयानीति, तस्मा.द्गायत्रं प्रातस्सवन- ङ्गायत्र्युत्तरे सवने प्रणयति।

- <8.4.3> ता.न्त्रिष्टु.प्त्रिभि.रक्षरै.रुपै-त्सैकादशाक्षरा भूत्वा प्राजायत, ताञ्जग.त्येकेनाक्षरे,णोपै-त्सा द्वादशाक्षरा भूत्वा प्राजायत।

- <8.4.4> तस्मा.दाहु.र्गायत्री वाव सर्वाणि च्छन्दांसि, गायत्री ह्येता.न्पोषा.न्पुष्य.न्त्यैदिति।

- <8.4.5> इन्द्र.स्तृतीयसवना.द्बीभत्समान उदक्राम,त्तद्देवा स्स्वादिष्ठये.त्यस्वदय-न्मदिष्ठयेति मद्य.दकुर्व-न्पवस्व सोम धारये.त्यपावय-न्निन्द्राय पातवे सुत इति, ततो वै तदिन्द्र उपाऽऽवर्तत, य.त्स्वादिष्ठया मदिष्ठयेति प्रस्तौति- तृतीयसवनस्य सेन्द्रत्वाय।

- <8.4.6> स्वादिष्ठा वै देवेषु पशव आस-न्मदिष्ठा असुरेषु, ते देवा स्स्वादिष्ठया मदिष्ठयेति पशू.नसुराणा मवृञ्जत।

- <8.4.7> पशू.न्भ्रातृव्यस्य वृङ्क्ते- य एवँ वेद।

- <8.4.8> तासु संहितम्।

- <8.4.9> साध्या वै नाम देवा आसं,स्तेऽवच्छिद्य तृतीयसवनं- माध्यन्दिनेन सवनेन सह स्वर्गँ लोक.मायं,स्तद्देवा स्संहितेन समदधु,र्य.त्समदधु- स्तस्मा.त्संहितम्।

- <8.4.10> कालेयं पुरस्ता.द्भवति- संहित.मुपरिष्टा,देताभ्यां हि तृतीयसवनं सन्तायते।

- <8.4.11> सर्वाणि वै रूपाणि संहितँ, यत्पदप्रस्ताव- न्तेन राथन्तरँ, यद्बृहतो रोहा.त्रोहति- तेन बार्हतँ, यत्पद.निधन- न्तेन राथन्तरं, सर्वेष्वेव रूपेषु प्रति तिष्ठति।

- <8.5.1> ❃ 8.5 उष्णि.क्ककुभा.वेते भवतः।

- <8.5.2> उष्णि.क्ककुब्भ्याँ वा इन्द्रो वृत्राय वज्रं प्राहर,त्ककुभि पराऽक्रमतोष्णिहा प्राहर,त्तस्मा.त्ककुभो मध्यमं पदं भूयिष्ठाक्षरं, पराक्रमणं हि त.दभि समौह,त्तस्मा.दुष्णिह उत्तमं पदं भूयिष्ठाक्षरं, पुरो गुरु.रिव हि वज्रः।

- <8.5.3> वज्रं भ्रातृव्याय प्र हरति- य एवँ वेद।

- <8.5.4> नासिके वा एते यज्ञस्य- यदुष्णि.क्ककुभौ, तस्मा.त्समान.ञ्छन्द.स्सती नाना यज्ञँ वहत,स्तस्मा.त्समानाया नासिकाया स्सत्या- नाना प्राणा.वुच्चरतः।

- <8.5.5> प्राणा वा उष्णि.क्ककुभौ, तस्मा.त्ताभ्या.न्न वषङ्कुर्वन्ति, यद्वषङ्कुर्युः- प्राणा.नग्नौ प्रदध्युः।

- <8.5.6> तासु सफँ- विफ.मिव वै तृतीयसवनं- न्तृतीयसवनस्य सफत्वा,याथैतस्यैत.त्पौष्कल-मेतेन वै प्रजापतिः पुष्कला.न्पशू.नसृजत, तेषु रूप मदधा,द्यदेत.त्साम भवति - पशु.ष्वेव रूप.न्दधाति।

- <8.5.7> पुरोजिती वो अन्धस इति- पद्या चाक्षर्या च विराजौ भवतः, पद्यया वै देवा स्स्वर्गँ लोक.माय-न्नक्षर्यया ऋषयोऽनु प्राजानन्, यदेते पद्या चाक्षर्या च विराजौ भवत- स्स्वर्गस्य लोकस्य प्रज्ञात्यै।

- <8.5.8> तासु श्यावाश्वम्।

- <8.5.9> श्यावाश्व.[9]मार्वनानसं सत्त्र.मासीन.न्धन्वोदवह,न्त्स एत.त्सामापश्य,त्तेन वृष्टि.मसृजत- ततो वै स प्रत्यतिष्ठ-त्ततो गातु.मविन्दत, गातुविद्वा एत.त्साम।

- <8.5.10> विन्दते गातुं प्रति तिष्ठ-त्येतेन तुष्टुवानः।

- <8.5.11> इन्द्र.स्तृतीयसवना.द्बीभत्समान उदक्राम,त्त न्देवा श्श्यावाश्वे.नैहायि एहिये.त्यन्वाह्वय-न्त्स उपाऽऽवर्तत, यदेत.त्साम भवति- तृतीयसवनस्य सेन्द्रत्वाय।

- <8.5.12> अथैत.दान्धीगव,मन्धीगुर्वा एत.त्पशुकाम स्सामापश्य-त्तेन सहस्रं पशू.नसृजत, यदेत.त्साम भवति- पशूनां पुष्ट्यै, मध्येनिधन.मैडं भव-त्येतेन वै तृतीयसवनं प्रतिष्ठितँ, यन्मध्येनिधन.मैड.न्न स्या-दप्रतिष्ठित न्तृतीयसवनं स्यात्।

[9] आर्चनानसम् इति पाठः साधुरिति भाति।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

- <8.5.13> दशाक्षरं मध्यतो निधन.मुप यन्ति- दशाक्षरा विरा.ड्विराज्येव प्रति तिष्ठति।
- <8.5.14> अभि प्रियाणि पवत इति- कावं प्राजापत्यं साम।
- <8.5.15> प्रजा वै प्रियाणि- पशवः प्रियाणि- प्रजाया.मेव पशुषु प्रति तिष्ठति।
- <8.5.16> रश्मी वा एतौ यज्ञस्य- यदौशन.कावे, देवकोशो वा एष यज्ञ.मभि.समुब्जितो, यदेते अन्ततो भवतो- यज्ञस्यारिष्ट्यै।
- <8.6.1> ❃8.6 देवा वै ब्रह्म व्यभजन्त, तस्य यो रसोऽत्यरिच्यत- तद्यज्ञायज्ञीय मभवत्।
- <8.6.2> ब्रह्मणो वा एष रसो- य.द्यज्ञायज्ञीयँ, य.द्यज्ञायज्ञीयेन स्तुवन्ति- ब्रह्मण एव रसे यज्ञं प्रतिष्ठापयति।
- <8.6.3> योनि.र्वै यज्ञायज्ञीय,मेतस्माद्वै योनेः प्रजापति.र्यज्ञ.मसृजत, तस्मा.द्यज्ञायज्ञीयम्।
- <8.6.4> तस्माद्वा एतेन पुरा ब्राह्मणा बहिष्पवमान.मस्तोषत- योने.र्यज्ञं प्रतनवामहा इति, यज्ञ.न्तत.स्स्तुवन्ति- योनौ यज्ञं प्रतिष्ठापयन्ति।
- <8.6.5> असुरेषु वै सर्वो यज्ञ आसी,त्ते देवा यज्ञायज्ञीय.मपश्यं-स्तेषाँ यज्ञायज्ञा वो अग्नय इत्यग्निहोत्र.मवृञ्जत- गिरागिरा च दक्षस इति दर्शपूर्णमासौ- प्रप्र वय.ममृत ञ्जातवेदस.मिति चातुर्मास्यानि- प्रियं मित्र.न्नशंसिष.मिति सौम्य.मध्वरम्।
- <8.6.6> यज्ञा वो अग्नये गिरा च दक्षसे- प्र वय.ममृतं जातवेदसं प्रियं मित्र.न्नशंसिष मिति वै तर्हि च्छन्दां.स्यासं,स्ते देवा अभ्यारम्भ.मभिनिवर्त्य.ञ्छन्दोभि.र्यज्ञ मसुराणा.मवृञ्जत।
- <8.6.7> छन्दोभि.र्यज्ञं भ्रातृव्यस्य वृङ्क्ते- य एवँ वेद।
- <8.6.8> एतद्ध स्म वा आह कूशाम्ब स्स्वायवो ब्रह्मा लातव्यः, कं स्वि.दद्य शिशुमारी यज्ञपथेऽप्यस्ता गरिष्यति।
- <8.6.9> एषा वै शिशुमारी यज्ञपथेऽप्यस्ता तद्यज्ञायज्ञीयँ- यद्गिरागिरेत्याहा-ऽऽत्मान न्तदुद्गाता गिरति।
- <8.6.10> ऐर.ङ्कृत्वोद्गेय,मिरायाँ यज्ञं प्रतिष्ठापय-त्यप्रमायुक उद्गाता भवति।

Sri Ganapati Sacchidananda Avadhoota Datta Peetham

- <8.6.11> वैश्वानरे वा एत.दुद्गाताऽऽत्मानं प्र दधाति, य.त्प्रप्र वय.मित्याह- प्रप्रीँ वय.मिति वक्तव्यँ, वैश्वानर.मेव परि क्रामति।

- <8.6.12> यो वै निह्नुवान.ञ्छन्द उपैति- पापीया.नुज्जगिवा.न्भव,त्येतद्वै निह्नुवान.ञ्छन्दो- य.न्नशंसिष.मिति, नु शंसिष.मिति वक्तव्यं- सुशंसिष.मिति वा, न निह्नुवान.ञ्छन्द उपैति- वसीया.नुज्जगिवा.न्भवति।

- <8.6.13> यस्य वै यज्ञा वा.गन्ता भवन्ति- वाच.श्छिद्रेण स्रव,न्त्येते वै यज्ञा वागन्ता- ये यज्ञायज्ञीयान्ता, एत.द्वाच.श्छिद्रँ- यदनृतँ, यदग्निष्टोमया.ज्यनृत.माह- तदन्वस्य यज्ञ स्स्रव,त्यक्षरेणान्ततः प्रतिष्ठाप्य-मक्षरेणैव यज्ञस्य च्छिद्र.मपि दधाति।

- <8.6.14> विराजो वा एतद्रूपँ- यदक्षरँ, विराज्येवान्ततः प्रति तिष्ठति।

- <8.7.1> ❃ 8.7 इतो वै प्रात.रूर्ध्वाणि च्छन्दांसि युज्यन्ते-ऽमुतोऽवाञ्चि, यज्ञायज्ञीयस्य स्तोत्रे युज्यन्ते, यज्ञा वो अग्नये गिरा च दक्षस इति द्वादशाक्षरं- प्र वय.ममृत.ञ्जातवेदस मित्येकादशाक्षरं- प्रियं मित्र.न्नशंसिष.मित्यष्टाऽक्षरम्।

- <8.7.2> अनुष्टुभ.मुत्तमां संपादय-तीयँ वा अनुष्टु-बस्यामेव प्रति तिष्ठति।

- <8.7.3> वाग्वा अनुष्टु-ब्वाच्येव प्रति तिष्ठति, ज्यैष्ठ्यँ वा अनुष्टु-ब्जैष्ठ्य एव प्रति तिष्ठति।

- <8.7.4> कथ.मिव यज्ञायज्ञीय.ङ्गेय.मित्याहु,र्यथाऽनड्वा.न्प्रस्त्रावयमाण- इत्थ.मिव चेत्थ.मिव चेति।

- <8.7.5> वैश्वानरँ वा एत.दुद्गाताऽनु प्रसीद.न्नेतीत्याहु-र्य.द्यज्ञायज्ञीयस्यर्चं सम्प्रत्याहेति, परिक्रामतेवोद्गेयँ- वैश्वानर.मेव परि क्रामति।

- <8.7.6> वैश्वानरे वा एत.दध्वर्यु स्सदस्या.नभि सृजति- य.द्यज्ञायज्ञीयस्य स्तोत्र मुपाऽऽवर्तयति, प्रावृतेनोद्गेयँ- वैश्वानरेणानभिदाहाय।

- <8.7.7> न ह तु वै पितरः प्रावृत.ञ्जानन्ति, यज्ञायज्ञीयस्य वै स्तोत्रे पितरो यथायथ.ञ्जिज्ञासन्त, -आ कर्णाभ्यां प्रावृत्य-न्तदेव प्रावृत,न्तदप्रावृत.ञ्जानन्ति पितरो, न वैश्वानरो हिनस्ति।

- <8.7.8> अपः पश्चा.त्पत्न्य उप सृजन्ति, वैश्वानर.मेव तच्छमय-न्त्यापो हि शान्तिः।

- <8.7.9> अथो रेत एव तत्सिञ्च-न्त्यापो हि रेतः।

- <8.7.10> दक्षिणा.नूरू.नभिषिञ्चन्ति- दक्षिणतो हि रेत.स्सिच्यते।
- <8.7.11> मह.दिव प्रत्यूह्यं- मन एवास्य त.ज्जनयन्ति।
- <8.7.12> उद्गात्रा पत्नी स्सङ्ख्यापयन्ति- रेतोधेयाय।
- <8.7.13> हिङ्कारं प्रति सङ्ख्यापयन्ति- हिङ्कृता.द्धि रेतोऽधीयत।
- <8.7.14> आतृतीयाया स्सङ्ख्यापयन्ति- त्रिवृद्धि रेतः।
- <8.8.1> ❃ 8.8 देवा वा अग्निष्टोम मभिजित्योक्थानि नाशक्नुव.न्नभिजेतु,न्तेऽग्नि मब्रुवं.स्त्वया मुखेनेद.ञ्जयामेति, सोऽब्रवी-त्किं मे तत स्स्यादिति, यत्कामयस- इत्यब्रुव,न्त्सोऽब्रवी-न्मद्देवत्यासूक्थानि प्रणया.निति।
- <8.8.2> तस्मा.दाग्नेयी.षूक्थानि प्रणयन्ति।
- <8.8.3> तस्मादु गायत्रीषु, गायत्रच्छन्दा ह्यग्निः।
- <8.8.4> तेऽग्निं मुख.ङ्कृत्वा साकमश्वे.नाभ्यक्रामन्, य.त्साकमश्वे.नाभ्यक्रामं- स्तस्मा.त्साकमश्वम्।
- <8.8.5> तस्मा.त्साकमश्वे.नोक्थानि प्रणय-न्त्येतेन हि तान्यग्रेऽभ्यजयन्।
- <8.8.6> स इन्द्रोऽब्रवी-त्कश्चाह.श्चेद.मन्ववैष्याव इ-त्यह.श्चेति वरुण,स्तँ वरुणोऽन्वतिष्ठ-दिन्द्र आऽहर,त्तस्मा.दैन्द्रावरुण.मनु शस्यते।
- <8.8.7> स एवाब्रवी-त्कश्चाह.श्चेद.मन्ववैष्याव इ-त्यहश्चेति बृहस्पति,स्तं बृहस्पति रन्वतिष्ठ-दिन्द्र आऽहर-त्तस्मा.दैन्द्राबार्हस्पत्य.मनु शस्यते, स एवाब्रवी-त्कश्चाह.श्चेद मन्ववैष्याव इ-त्यह.श्चेति विष्णु,स्तँ विष्णु.रन्वतिष्ठ-दिन्द्र आऽहर-त्तस्मा.दैन्द्रावैष्णव.मनु शस्यते।
- <8.8.8> पशून् वा एभ्य.स्ताना‌ऽहर,त्पशवो वा उक्थानि- पशुकाम उक्थेन स्तुवीत- पशुमा.न्भवति।
- <8.8.9> बृहता वा इन्द्रो वृत्राय वज्रं प्राहर,त्तस्य तेजꣳ पराऽपत-त्त.त्सौभर.मभवत्।
- <8.8.10> जामि वा एत.द्यज्ञे क्रियत इत्याहु-र्यद्रथन्तरं पृष्ठं- रथन्तरं सन्धि-र्नान्तरा बृहता स्तुवन्तीति, यत्सौभरेण स्तुवन्ति- बृहतैव त.दन्तरा स्तुवन्ति, बृहतो ह्येत.त्तेजो- यत्सौभरम्।

- <8.8.11> यदि बृहत्सामातिरात्र स्स्या.त्सौभर.मुक्थानां, ब्रह्म साम कार्यं, बृहदेव तत्तेजसा समर्धयति।
- <8.8.12> यदि रथन्तरसाम्ना सौभर.ङ्कुर्या-दजामितायै।
- <8.8.13> देवानाँ वै स्वर्गँ लोकँ यता.न्दिशोऽव्लीयन्त, तास्सौभरेणो- इ.त्युदस्तम्भुवं-स्ततो वै ता अदृंहन्त- ततः प्रत्यतिष्ठं-स्तत स्स्वर्गँ लोकं प्राजानन्, य.स्स्वर्गकाम स्स्या-द्यः प्रतिष्ठाकाम स्सौभरेण स्तुवीत- प्र स्वर्गँ ल्लोक.ञ्जानाति- प्रति तिष्ठति।
- <8.8.14> प्रजापतिः प्रजा असृजत- तास्सृष्टा आशनायं-स्ताभ्य स्सौभरे.णोर्गि.त्यन्नं प्रायच्छ-त्ततो वै ता स्समैधन्त।
- <8.8.15> समेधन्ते तां समां प्रजा- यत्रैवँ विद्वा.न्त्सौभरेणो.द्गायति।
- <8.8.16> ता अब्रुव.न्त्सुभृत.न्नोऽभार्षी.रिति, तस्मा.त्सौभरम्।
- <8.8.17> वृष्टिँ वा अभ्यस्तां- प्रायच्छ.दन्न.मेव।
- <8.8.18> यो वृष्टिकाम स्स्या-द्योऽन्नाद्यकामो- यस्स्वर्गकाम- स्सौभरेण स्तुवीत।
- <8.8.19> हीषिति वृष्टिकामाय निधन.ङ्कुर्या-दूर्गि.त्यन्नाद्यकामा-यो इति स्वर्गकामाय। (ऊ इति स्वर्गकामाय)
- <8.8.20> सर्वे वै कामा स्सौभरं, सर्वे.ष्वेव कामेषु प्रति तिष्ठति।
- <8.8.21> अथैत.न्नार्मेधम्।
- <8.8.22> नृमेधस.माङ्गिरसं सत्त्र.मासीनं श्वभि.रभ्याह्वय,न्त्सोऽग्नि.मुपाधाव-त्पाहि नो अग्न एकयेति, तँ वैश्वानरः पर्युदतिष्ठ-त्ततो वै स प्रत्यतिष्ठ-त्ततो गातु.मविन्दत।
- <8.8.23> गातुवि.द्वा एत.त्साम, विन्दते गातुं- प्रति तिष्ठ-त्येतेन तुष्टुवानः।
- <8.8.24> विच्छन्दस ऋचो भव,न्त्यहोरात्रयो रूपम्।
- <8.8.24> नैव ह्येत.दह्नो रूप-न्न रात्रे.र्यदुक्थानाम्।
- <8.8.25> ककुप्प्रथमाऽथोष्णि.गथ पुरउष्णि.गनुष्टु-प्तेनानुष्टुभो नय-न्त्यच्छावाकसाम्नः।
- <8.9.1>❃ 8.9 हारिवर्णं भवति।
- <8.9.2> असुरा वा एषु लोके.ष्वासं-स्तान्देवा हरिश्रिय.मित्यस्मा.ल्लोका.त्प्राणुदन्त-विराजसी-त्यन्तरिक्षा-द्दिवोदिव इत्यमुष्मात्।

- <8.9.3> तद्य एवँ वे.दैभ्यो लोकेभ्यो भ्रातृव्यं प्रणु-द्येमा.न्लोका.नभ्यारोहति।
- <8.9.4> हरिवर्णो वा एत.त्पशुकाम स्सामापश्य,त्तेन सहस्रं पशू.नसृजत, यदेत.त्साम भवति- पशूनां पुष्ट्यै।
- <8.9.5> अङ्गिरस स्स्वर्गँ लोकँ यतो रक्षां.स्यन्वसचन्त, तान्येतेन हरिवर्णोऽपाऽहत, यदेत.त्साम भवति- रक्षसा.मपहत्यै।
- <8.9.6> पृष्ठानि वा असृज्यन्त- तेषाँ य.त्तेजो रसोऽत्यरिच्यत- तद्देवा स्समभरं-स्तदुद्वंशीय.मभवत्।
- <8.9.7> सर्वेषाँ वा एत.त्पृष्ठाना.न्तेजो- यदुद्वंशीय,न्तस्माद्वा एत.त्पुरा सजाताय नाक्र-न्पाप.वसीयसो विधृत्यै।
- <8.9.8> एष ह्येव पृष्ठै.स्तुष्टुवानो- य उद्वंशीयेन स्तुवते।
- <8.9.9> सर्वाणि वै रूपा.ण्युद्वंशीयम्।
- <8.9.10> गायन्ति त्वा गायत्रिण इति रथन्तरस्य रूप-मेति हि रथन्तरम्।
- <8.9.11> आदि.र्बृहत, ऊर्ध्व.मिव हि बृहत्।
- <8.9.12> परिष्टोभो वैरूपस्य, परिष्टुभं हि वैरूपम्।
- <8.9.13> अनुतोदो वैराज,स्यानुतुन्नं हि वैराजम्।
- <8.9.14> अर्धेडा शक्करीणा,मतिस्वारो रेवतीनाम्।
- <8.9.15> अर्धेडया वै देवा असुरा.नवहत्यातिस्वारेण स्वर्गँ लोक.माऽरोहन्।
- <8.9.16> तद्य एवँ वे.दार्धेडयैव भ्रातृव्य.मवहत्यातिस्वारेण स्वर्गँ लोक.मा रोहति।
- <8.9.17> अर्धेडया वै पूर्वँ यज्ञं संस्थापय-न्त्यतिस्वारेणोत्तर.मा रभन्ते।
- <8.9.18> उपैन.मुत्तरो यज्ञो नमति- य एवँ वेद।
- <8.9.19> पाङ्क्तँ वा एत.त्साम- पाङ्क्तो यज्ञ४- पाङ्क्ता४ पशवो- यज्ञ एव पशुषु प्रति तिष्ठति।
- <8.9.20> आष्टादंष्ट्रे ऋद्धिकामाय कुर्यात्।
- <8.9.21> अष्टादंष्ट्रो वैरूपोऽपुत्रोऽप्रजा अजीर्य,त्स इमा.न्लोकान् विचिच्छिदिवा९ अमन्यत, स एते जरसि सामनी अपश्य-त्तयो.रप्रयोगा.दबिभे,त्सोऽब्रवी.द्दभ्रव-द्यो मे सामभ्यां स्तवाता इति।

- <8.9.22> ऋषेर्वा एत.त्प्राशोद्धूतँ, यदाष्टादंष्ट्रे भवत- ऋध्या एव।
- <8.10.1> ❃8.10 गायत्रीषु ब्रह्मवर्चसकामा.योक्थानि प्रणयेयु,र्गायत्र्यां ब्रह्मसा-मानुष्टु.भ्यच्छावाकसाम, सैषा गायत्री संपद्यते।
- <8.10.2> तेजो ब्रह्मवर्चस.ङ्गायत्री- तेज एव ब्रह्मवर्चस.मव रुन्धे।
- <8.10.3> गायत्रीषु पशुकामा.योक्थानि प्रणयेयु,रुष्णिहि ब्रह्मसा.मानुष्टु.-भ्यच्छावाकसाम, सैषोष्णि.क्सं पद्यते।
- <8.10.4> पशवो वा उष्णि.क्पशूनेवाव रुन्धे।
- <8.10.5> गायत्रीषु पुरुषकामा.योक्थानि प्रणयेयुः, ककुभि ब्रह्मसा.मानुष्टु.-भ्यच्छावाकसाम, सैषा ककु.प्संपद्यते।
- <8.10.6> पुरुषो वै ककु-प्पुरुषा.नेवाव रुन्धे।
- <8.10.7> विराड्वन्नाद्यकामा.योक्थानि प्रणयेयु-रुष्णिहि ब्रह्मसा.मानुष्टु.भ्यच्छावाकसाम, सैषा विरा.ड्संपद्यते।
- <8.10.8> अन्नँ विरा-डन्नाद्य.मेवाव रुन्धे।
- <8.10.9> अक्षरपङ्क्तिषु ज्यैष्ठ्यकामा,योक्थानि प्रणयेयु-रुष्णिहि ब्रह्मसा.मानुष्टु.-भ्यच्छावाकसाम, सैषाऽनुष्टु.प्सं पद्यते।
- <8.10.10> ज्यैष्ठ्यँ वा अनुष्टु-ब्ज्यैष्ठ्य.मेवाव रुन्धे।

## ताण्ड्यब्राह्मणे नवमोऽध्यायः

- <9.1.1>❃ 9.1 देवा वा उक्था.न्यभिजित्य रात्रि.न्नाशक्नुव.न्नभिजेतु, न्तेऽसुरा.न्रात्रि न्तमः प्रविष्टा.न्नानु.व्यपश्यं,स्त एत.मनुष्टु.प्शिरसं प्रगाथ मपश्यन्- विराज.ञ्ज्योति,स्तान् विराजा ज्योतिषाऽनुपश्यन्तो-ऽनुष्टुभा वज्रेण रात्रे.र्निरघ्नन्।
- <9.1.2> यदेषोऽनुष्टुप्शिराः प्रगाथो भवति- विरा.डेव ज्योतिषाऽनुपश्य.न्ननुष्टुभा वज्रेण रात्रे.र्भ्रातृव्य न्निर्हन्ति।
- <9.1.3> ता.न्त्समन्तं पर्यायं प्राणुदन्त, य.त्पर्यायं प्राणुदन्त- त.त्पर्यायाणां पर्यायत्वम्।
- <9.1.4> प्रथमानि पदानि पुन.रादीनि भवन्ति, प्रथमस्य पर्यायस्य।
- <9.1.5> प्रथमै.र्हि पदैः पुन.रादाय- प्रथमरात्रा.त्प्राणुदन्त।



Sri Ganapati Sachchidananda Avadhoota Datta Peetham

- <9.1.6> पान्त.मा वो अन्धस इति प्रस्तौति।
- <9.1.7> अह.र्वै पान्त-मन्धो रात्रि,रह्नैव तद्रात्रि.मारभन्ते।
- <9.1.8> तासु वैतहव्यम्।
- <9.1.9> वीतहव्य.श्श्रायसो ज्यो.ग्निरुद्ध- एत.त्सामापश्य,त्सोऽवगच्छ-त्प्रत्यतिष्ठ,द्व गच्छति- प्रति तिष्ठ.त्येतेन तुष्टुवानः।
- <9.1.10> तम इव वा एते प्र विशन्ति- ये रात्रि.मुपयन्ति, यदेको निधनं रात्रे.र्मुखे भवति- प्रज्ञात्यै।
- <9.1.11> यदा वै पुरुष स्स्वमोक आगच्छति- सर्व.न्तर्हि प्र जानाति- सर्व.मस्मै दिवा भवति।
- <9.1.12> ते मध्यमं पर्याय.मश्रयन्त, तेषा.मौर्ध्वसद्मनेन वाच.मवृञ्जत।
- <9.1.13> वाचं भ्रातृव्यस्य वृङ्क्ते- य एवँ वेद।
- <9.1.14> त्रि.णिधनं भवति।
- <9.1.15> यथा वा अह्नो माध्यन्दिनं सवन न्त्रिणिधनाऽऽयतन,मेव.मेष रात्रे.र्मध्यमꣳ पर्याय.स्त्रिणिधनाऽऽयतन स्सलोमत्वाय।
- <9.1.16> मध्यमानि पदानि पुन.रादीनि भवन्ति- मध्यमस्य पर्यायस्य, मध्यमै.र्हि पदैꣳ पुन.रादायं मध्यमरात्रा.त्प्राणुदन्त।
- <9.1.17> त उत्तमं पर्याय.मश्रयन्त, तेषां घृतश्च्यु.न्निधनेन पशू.नवृञ्जत, पशवो वै घृतश्च्युतः।
- <9.1.18> पशू.न्भ्रातृव्यस्य वृङ्क्ते- य एवँ वेद।
- <9.1.19> उत्तमानि पदानि पुन.रादीनि भव.न्त्युत्तमस्य पर्याय,स्योत्तमै.र्हि पदैꣳ पुनरादाय.मुत्तम.रात्रा.त्प्राणुदन्त।
- <9.1.20> ता.न्त्सन्धिनाऽभिपलायन्त।
- <9.1.21> ता.नाश्विनेनासंहाय्य.मगमयन्।
- <9.1.22> असंहाय्यं भ्रातृव्य.ङ्गमयति- य एवँ वेद।
- <9.1.23> एषा वा अग्निष्टोमस्य संमा- यद्रात्रिः।

Sri Ganapathy Sachchidananda Avadhoota Datta Peetham • Mysore •

- <9.1.24> द्वादश स्तोत्रा.ण्यग्निष्टोमो- द्वादश स्तोत्राणि रात्रिः।
- <9.1.25> एषा वा उक्थस्य संमा- यद्रात्रिः।
- <9.1.26> त्री.ण्युक्थानि- त्रिदेवत्य स्सन्धिः।
- <9.1.27> यथा वा अह्न उक्था-न्येव.मेष रात्रे स्सन्धि,र्नानारूपा.ण्यह्न उक्थानि- नानारूपा एते तृचा भवन्ति।
- <9.1.28> रथन्तरं प्रतिष्ठाकामाय सन्धि.ङ्कुर्यात्।
- <9.1.29> इयँ वै रथन्तर-मस्या.मेव प्रति तिष्ठति।
- <9.1.30> बृह.त्स्वर्गकामाय सन्धि.ङ्कुर्यात्।
- <9.1.31> स्वर्गो लोको बृह-त्स्वर्ग एव लोके प्रति तिष्ठति।
- <9.1.32> वारवन्तीयँ वा वामदेव्यँ वा श्रुद्ध्यँ वै- तेषा.मेकं पशुकामाय सन्धि.ङ्कुर्यात्।
- <9.1.33> पशवो वा एतानि सामानि, पशु.ष्वेव प्रति तिष्ठति।
- <9.1.34> आश्विनं होताऽनु शंसति।
- <9.1.35> प्रजापति.र्वा एत.त्सहस्र.मसृजत, तद्देवेभ्यः॒ प्रायच्छ-त्तस्मि.न्न समराधयं,स्ते सूर्य.ङ्काष्ठा.ङ्कृत्वाऽऽजि.मधावन्।
- <9.1.36> तेषा.मश्विनौ प्रथमा.वधावता,न्ता.वन्ववद-न्त्सह नोऽस्त्विति, ता.वब्रूता- ङ्कि.न्तत.स्स्यादिति, यत्कामयेथे- इत्यब्रुवं,स्तावब्रूता-मस्मद्देवत्य मिद.मुक्थ. मुच्याता इति, तस्मा.दाश्विन.मुच्यते।
- <9.1.37> सर्वाः॒ खलु देवता श्शस्यन्ते।
- <9.1.38> क्षिप्रं शस्य,माजि.मिव ह्येते धाव-न्त्या सूर्यस्योदेतो श्शंसे-त्सूर्यं हि काष्ठा.मकुर्वत।
- <9.2.1>❃ 9.2 पान्त.मा वो अन्धस इति वैतहव्य,मन्यक्षेत्रँ वा एते प्रयन्ति- ये रात्रि.मुपयन्ति, यदोकोनिधनं रात्रे.र्मुखे भव-त्योकसोऽप्रच्याावाय।
- <9.2.2> प्र व इन्द्राय मादन.मिति शाक्त्यम्। (गौरीवितम्।)

- <9.2.3> ब्रह्म यद्देवा व्यकुर्वत, ततो य.दत्यरिच्यत- [10]तच्छाक्त्य.मभवत्। (गौरीवित.मभवत्)
- <9.2.4> अतिरिक्तं.शाक्त्य-मतिरिक्त.मेत.त्स्तोत्रँ यद्रात्रि,रतिरिक्त एवातिरिक्त.न्दधाति। (अतिरिक्त.ङ्गौरीवितम्)
- <9.2.5> वय.मु त्वा तदिदर्था- इति काण्वम्।
- <9.2.6> एतेन वै कण्व इन्द्रस्य साँविद्य.मगच्छ,दिन्द्रस्यै.वैतेन साँविद्य.ङ्गच्छति।
- <9.2.7> इन्द्राय मद्वने सुत.मिति श्रौतकक्ष.ङ्क्षत्रसाम, प्र क्षत्र.मेवैतेन भवति।
- <9.2.8> अयन्त इन्द्र सोम इति दैवोदासम्।
- <9.2.9> अग्निष्टोमेन वै देवा इमँ लोक.मभ्यजय-न्नन्तरिक्ष.मुक्थे-नातिरात्रेणामु,न्त इमँ लोकं पुन.रभ्यकामयन्त, त इहेत्यस्मि.न्लोके प्रत्यतिष्ठन्, यदेत.त्साम भवति- प्रतिष्ठित्यै।
- <9.2.10> और्ध्वसद्मन.मपिशर्वरीषु प्रोहन्ति।
- <9.2.11> असुरा वा एषु लोके.ष्वासं,स्ता.न्देवा और्ध्वसद्मने.नैभ्यो लोकेभ्यः प्राणुदन्त।
- <9.2.12> तद्य एवँ वे,दैभ्यो लोकेभ्यो भ्रातृव्यं प्रणुद्य- स्व आयतने सत्त्र.मास्ते।
- <9.2.13> आ तू न इन्द्र क्षुमन्त-मित्याकूपारम्।
- <9.2.14> अकूपाराऽऽङ्गिरसस्याऽऽसी,त्तस्या यथा गोधाया.स्त्व-गेव.न्त्व.गासी,त्तामेतेन त्रि.स्साम्नेन्द्रः पूत्वा सूर्यत्वचस.मकरो,त्तद्वाव सा त.र्ह्यकामयत, यत्कामा एतेन साम्ना स्तुवते- स एभ्यः काम स्समृध्यते।
- <9.2.15> अभि त्वा वृषभा सुत इत्यार्षभ.ङ्क्षत्रसाम, क्षत्र.मेवैतेन भवति।
- <9.2.16> इदँ वसो सुत.मन्ध इति गार,मेतेन वै गर इन्द्र.मप्रीणा,त्प्रीत एवा.स्यैतेनेन्द्रो भवति।
- <9.2.17> इदं ह्यन्वोजसेति माधुच्छन्दसं, प्रजापतेर्वा एषा तनू.रयातयाम्नी प्रयुज्यते।
- <9.2.18> आ त्वेता निषीदतेति दैवातिथम्।
- <9.2.19> देवातिथि स्सपुत्रोऽशनायं.श्चर.न्नरण्य उर्वारू.ण्यविन्द,त्तान्येतेन साम्नोपासीद,त्ता अस्मै गावः पृश्नयो भूत्वोदतिष्ठन्, यदेत.त्साम भवति- पशूनां पुष्ट्यै।

[10] शाक्यम् इत्यस्य स्थाने गौरीवितमिति पुस्तके मुद्रितम्।-तच्चिन्त्यम्।

- <9.2.20> योगे.योगे तवस्तर.मिति सौमेधं रात्रिषाम, रात्रे.रेव समृद्ध्यै।

- <9.2.21> इन्द्र सुतेषु सोमे.ष्विति कौत्सम्।

- <9.2.22> कुत्सश्च लुश.श्चेन्द्रँ व्यह्वयेतां, स इन्द्रः कुत्स.मुपाऽऽवर्तत, तं शतेन वार्ध्रीभि राण्डयो रबध्ना,त्तं लुशोऽभ्यवद-त्प्रमुच्यस्व- परि कुत्सा.दिहाऽऽगहि, किमु त्वावा.नाण्डयो.र्बद्ध आसाता इति, ता.स्सञ्छिद्य प्राद्रव,त्स एत.त्कुत्स स्सामापश्य,त्तेनैन मन्ववद-त्स उपाऽऽवर्तत।

- <9.2.23> यदेत.त्साम भवति- सेन्द्रत्वाय।

- <9.3.1> ❃ 9.3 यदि सत्त्राय दीक्षेर,न्नथ साम्युत्तिष्ठे-त्सोम.मपभज्य विश्वजिताऽतिरात्रेण यजेत, सर्ववेदसेन सर्वस्मा एव दीक्षते- सर्व.माप्नोति।

- <9.3.2> [11]या इ.द्दक्षिणा ददाति- ताभि.रति प्रयुङ्क्ते।

- <9.3.3> यदि पर्यायै.रस्तुत.मभिव्युच्छे-त्पञ्चदशभि.र्हौत्रे स्तुयुः, पञ्चभिः पञ्चभि.रितरेभ्यः।

- <9.3.4> अग्ने विवस्व.दुषस इति सन्धिना स्तुयुः, प्राणा वै त्रिवृ.त्स्तोमानां प्रतिष्ठा- रथन्तरं साम्नां प्राणां.श्चैवोप यन्ति प्रतिष्ठाञ्च।

- <9.3.5> षष्टिञ्च त्रीणि च शतानि होता शंसति।

- <9.3.6> तावत्य स्संवत्सरस्य रात्रय, स्संवत्सर.संमिताभि.रेव तदग्भि राश्विन.माप्नोति।

- <9.3.7> यदर्वा.क्स्तुवन्ति- तदस्तुतँ, यत्सम्प्रति स्तुवन्ति- त.त्स्तुतँ, यदतिष्टुवन्ति त.त्सुष्टुतम्।

- <9.3.8> यद्यर्वा.क्स्तुयु- र्यावतीभि.र्न स्तुयु-स्तावतीभि.र्वाऽतिष्टुयु.र्भूयोऽक्षराभि.र्वा।

- <9.3.9> यद्यतिष्टुयु-र्यावतीभि.रतिष्टुयु-स्तावतीभि.र्वा न स्तुयुः, कनीयोऽक्षराभि.र्वा।

- <9.3.10> यद्यर्वाक्स्तुयु.स्त्रौड.मग्निष्टोमसाम कार्य,न्निधन.मेकेडया, ये द्वे ताभ्या.मेव तत्सम.ङ्क्रियते।

- <9.3.11> यद्यतिष्टुयु- स्स्वार.मग्निष्टोमसाम कार्य,मूनमिव वा एत.त्साम्नो य.त्स्वर,- स्तेनैव तत्सम.ङ्क्रियते।

- <9.4.1>❃ 9.4 यदि सोमौ संसुतौ स्यातां- महति रात्रेः प्रात.रनुवाक.मुपाऽऽकुर्यात्।

---

[11] याभिर्दक्षिणा ददाति

- <9.4.2> पूर्वौ वाचं पूर्व.श्छन्दांसि- पूर्वौ देवता वृङ्क्ते।
- <9.4.3> वृषण्वतीं प्रतिपद.ङ्कुर्या-दिन्द्रो वै वृषा प्रात.स्सवना-देवैषा.मिन्द्रँ वृङ्क्ते।
- <9.4.4> अथो खल्वाहु- स्सवनमुखे.सवनमुखे कार्या- सवनमुखा.त्सवनमुखा.देवैषा मिन्द्रँ वृङ्क्ते।
- <9.4.5> सुसमिद्धे होतव्य,मग्निर्वै सर्वा देवता- स्सर्वा एव देवता॰ पश्य.न्जुहोति।
- <9.4.6> सँवेशायोपवेशाय गायत्र्यै छन्दसेऽभिभूतये स्वाहा- सँवेशायोपवेशाय त्रिष्टुभे छन्दसेऽभिभूतये स्वाहा- सँवेशायोपवेशाय जगत्यै छन्दसेऽभिभूतये स्वाहेति जुहोति।
- <9.4.7> छन्दांसि वा अभिभूतय-स्तै.रेवैना.नभि भव,त्युभे बृहद्रथन्तरे कार्ये।
- <9.4.8> यत्र वा इन्द्रस्य हरी तदिन्द्र- इन्द्रस्य वै हरी बृहद्रथन्तरे, यदुभे बृहद्रथन्तरे भवत॰- पूर्व एवेन्द्रस्य हरी आरभन्ते।
- <9.4.9> तौरश्रवसे कार्ये।
- <9.4.10> तुरश्रवसश्च वै पारावतानाञ्च सोमौ संसुता.वास्ता,न्तत एते तुरश्रवा स्सामनी अपश्य,त्ताभ्या.मस्मा इन्द्र श्शल्मलिनाँ यमुनाया हव्य.न्निराऽवह,द्यत्तौरश्रवसे भवतो- हव्य.मेवैषाँ वृङ्क्ते।
- <9.4.11> पूर्वेऽभिषुणुयुः।
- <9.4.12> या वै पूर्वा॰ प्रस्नान्ति- ता॰ पूर्वा.स्तीर्थ.ञ्जयन्ति, पूर्व एवेन्द्र.मारभन्ते।
- <9.4.13> विहव्यं शस्यम्।
- <9.4.14> जमदग्नेश्च वा ऋषीणाञ्च सोमौ संसुता.वास्ता, न्तत एत.ज्जमदग्नि.र्विहव्य मपश्य,त्तमिन्द्र उपाऽऽवर्तत, यद्विहव्यं होता शंसतीन्द्र.मेवैषाँ वृङ्क्ते।
- <9.4.15> यदीतरोऽग्निष्टोम.स्स्या.दुक्थ॰ कार्यो, यद्युक्थोऽतिरात्रो- यो वै भूयान् यज्ञक्रतु-स्स इन्द्रस्य प्रियो, भूयसैवैषाँ यज्ञक्रतुनेन्द्रँ वृङ्क्ते।
- <9.4.16> अथो खल्वाहु.र्दुष्प्राप इव वै पर॰ पन्था- यमेवाग्रे यज्ञक्रतु.मारभेत, तस्मा.न्नेया.दिति।
- <9.4.17> सजनीयं शस्य-मगस्त्यस्य कयाशुभीयं शस्यम्।
- <9.4.18> अस्या अमुष्या अद्याश्वा.न्मिथुना.दहोरात्राभ्या.मेवैना.न्निर्भजति।

- <9.5.1> ❃ 9.5 यदि सोम.मक्रीत.मपहरेयु-रन्यᳵ क्रेतव्यः।
- <9.5.2> यदि क्रीतँ योऽन्योऽभ्याशं स्या-त्स आहृत्य,स्सोमविक्रयणे तु किञ्चि.द्दद्यात्।
- <9.5.3> यदि सोम.न्न विन्देयुᳶ- पूतीका.नभिषुणुयु,र्यदि न पूतीका-नर्जुनानि।
- <9.5.4> गायत्री सोम.माऽहर,त्तस्या अनु विसृज्य सोमरक्षिᳶ पर्ण.मच्छिन,त्तस्य योंऽशुᳶ पराऽपत-त्स पूतीकोऽभव,त्तस्मि.न्देवा ऊति.मविन्द-न्नूतीको वा एष, यत्पूतीका नभिषुण्व-न्त्यूति.मेवास्मै विन्दन्ति।
- <9.5.5> प्रतिधुक्क प्रातᳶ पूतीकाश्च- श्टतञ्च मध्यन्दिने पूतीकाश्च- दधि चापराह्णे पूतीकाश्च।
- <9.5.6> सोमपीथो वा एतस्मा.दपक्रामतीत्याहु-र्यस्य सोम.मपहरन्तीति, स ओषधीश्च पशूंश्च प्र विशति, तमोषधिभ्यश्च पशुभ्य.श्चाव रुन्धे।
- <9.5.7> इन्द्रो वृत्रमहं,स्तस्य यो नस्त.स्सोम.स्समधाव-त्तानि बभ्रुतूला.न्यर्जुनानि, यो वपाया उत्खिन्नाया-स्तानि लोहित.तूलानि, यानि बभ्रुतूला.न्यर्जुनानि- तान्यभि.षुणुया,देतद्वै ब्रह्मणो रूपं, साक्षादेव सोम.मभिषुणोति।
- <9.5.8> श्रायन्तीयं ब्रह्मसाम कार्यं- सदेवैन.ङ्करोति।
- <9.5.9> यज्ञायज्ञीय.मनुष्टुभि प्रोहे-द्वाचैवैनं समर्धयति, वारवन्तीय.मग्निष्टोमसाम कार्य-मिन्द्रियस्य वीर्यस्य परिगृहीत्यै।
- <9.5.10> पञ्च दक्षिणा देयाः।
- <9.5.11> पाङ्क्तो यज्ञो- यावान् यज्ञ-स्तमेवाऽऽरभते।
- <9.5.12> अवभृथा.दुदेत्य पुन.र्दीक्षेत।
- <9.5.13> तत्र तद्दद्या-द्यद्दास्यं स्यात्।
- <9.6.1>❃ 9.6 यदि कलशो दीर्येत- वषट्कार.णिधनं ब्रह्मसाम कुर्यात्।
- <9.6.2> अवषट्कृतो वा एतस्य सोमᳶ परा सिच्यते- यस्य कलशो दीर्यते, यद्वषट्कार.णिधनं ब्रह्मसाम भवति- वषट्कृत एवास्य सोमो भवति।
- <9.6.3> विधु.न्दद्राणं समने बहूना-मित्येतासु कार्यम्।
- <9.6.4> एष हि बहूनां समने दीर्यते- य.त्कलशः।

- <9.6.5> तदाहु-र्न वा आर्त्या॒ऽर्ति.रनूद्या,ऽत्यां वा एष आर्ति.मनुवदति- य॰ कलशे दीर्णे दद्राणवतीषु करोतीति।

- <9.6.6> श्रायन्तीय.मेव कार्यम्।

- <9.6.7> प्रजापति॰ प्रजा असृजत- स दुग्धो रिरिचानोऽमन्यत, स एत.च्छ्रायन्तीय मपश्य-त्तेना॒ऽत्मानं समश्रीणा-त्प्रजया पशुभि.रिन्द्रियेण।

- <9.6.8> दुग्ध इव एष रिरिचानो- यस्य कलशो दीर्यते, यच्छ्रायन्तीयं ब्रह्मसाम भवति- पुन.रेवा॒ऽत्मानं सं.श्रीणाति- प्रजया पशुभि.रिन्द्रियेण।

- <9.6.9> यदि श्रायन्तीयं ब्रह्मसाम स्या-द्वैष्णवी.ष्वनुष्टुप्सु वषट्कार.णिधन.ङ्कुर्यात्।

- <9.6.10> यद्वै यज्ञस्य स्रवति- वाचं प्रति स्रवति, वागनुष्टु.ब्यज्ञो विष्णु-र्वाचैव यज्ञस्य च्छिद्र.मपि दधाति।

- <9.6.11> यद्वै यज्ञस्य स्रव-त्यन्तत.स्स्रवति, वारवन्तीय.मग्निष्टोमसाम कार्यँ- यज्ञस्यैव च्छिद्रँ वारयते।

- <9.7.1>❉ 9.7 यदि प्रातस्सवना.त्सोमोऽतिरिच्येत- अस्ति सोमो अयं सुत इति मरुत्वतीषु गायत्रेण स्तुयुः।

- <9.7.2> माध्यन्दिनँ वा एष सवन न्निकामयमानोऽभ्यतिरिच्यते- य॰ प्रातस्सवना दतिरिच्यते, तस्मा.न्मरुत्वतीषु स्तुवन्ति- मरुत्वद्धि माध्यन्दिनं सवन,न्तस्मादु गायत्रीषु- गायत्रं हि प्रातस्सवनम्।

- <9.7.3> यस्मा.त्स्तोमा.दतिरिच्यते- स एव स्तोम॰ कार्य स्सलोमत्वाय।

- <9.7.4> ऐन्द्रावैष्णवं होताऽनु शंसति।

- <9.7.5> वीर्यँ वा इन्द्रो- यज्ञो विष्णु,र्वीर्य एव यज्ञे प्रति तिष्ठति।

- <9.7.6> यदि माध्यन्दिना.त्सवना.दतिरिच्येत- बण्महा॰ असि सूर्ये-त्यादित्यवतीषु गौरीवितेन स्तुयुः।

- <9.7.7> तृतीयसवनँ वा एष निकामयमानोऽभ्यतिरिच्यते- यो माध्यन्दिना.त्सवना दतिरिच्यते, तस्मा.दादित्यवतीषु स्तुव-न्त्यादित्यं हि तृतीयसवन,न्तस्मादु बृहतीषु- बार्हतं हि माध्यन्दिनं सवनम्।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

- <9.7.8> यस्मा.त्स्तोमा.दतिरिच्येत- स एव स्तोमः कार्य स्सलोमत्वा,यैन्द्रावैष्णवं होताऽनु शंसति, वीर्यँ वा इन्द्रो- यज्ञो विष्णु,र्वीर्य एव यज्ञे प्रति तिष्ठति।
- <9.7.9> यदि तृतीयसवना.दतिरिच्येत- विष्णो शिशपिविष्टवतीषु- गौरीवितेन स्तुयुः।
- <9.7.10> यज्ञो वै विष्णु.श्शिपिविष्टो- यज्ञ एव विष्णौ प्रति तिष्ठ,त्यतिरिक्त.ङ्गौरीवित-मतिरिक्त एवातिरिक्त.न्दधाति।
- <9.7.11> एत.दन्य.त्कुर्यु,रुक्थानि प्रणयेयु-रुक्थानि वा एष निकामयमानो ऽभ्यतिरिच्यते- योऽग्निष्टोमा.दतिरिच्यते, यद्युक्थ्येभ्योऽतिरिच्ये.तातिरात्रः कार्यो, रात्रिँ वा एष निकामयमानोऽभ्यतिरिच्यते- य उक्थ्येभ्योऽति रिच्यते, यदि रात्रे रतिरिच्येत- विष्णो.श्शिपिविष्टवतीषु बृहता स्तुयु,रेषु तु वा अतिरिच्यत इत्याहु-र्यो रात्रे.रतिरिच्यत इति।
- <9.7.12> अमुँ वा एष लोक.न्निकामयमानोऽभ्यतिरिच्यते- यो रात्रे.रतिरिच्यते, बृहता स्तुवन्ति- बृह.दमुँ लोक.माप्तु.मर्हति, तमेवाऽऽप्नोति।
- <9.8.1>❃ 9.8 यदि दीक्षितानां प्रमीयते- दग्ध्वा-ऽस्थीन्युपनह्य- यो नेदिष्ठी स्या-त्त.न्दीक्षयित्वा- सह यजेरन्।
- <9.8.2> एत.दन्य.त्कुर्यु,रभिषुत्यान्य.त्सोम.मगृहीत्वा ग्रहान्, याऽसौ दक्षिणा स्रक्ति-स्तद्वा स्तुयु-र्मार्जालीये वा।
- <9.8.3> अपि वा एतस्य यज्ञे- यो दीक्षितः प्रमीयते, त.मेतेन निरव.दयन्ते।
- <9.8.4> यामेन स्तुवन्ति- यमलोक.मेवैन ङ्गमयन्ति।
- <9.8.5> तिसृभि स्स्तुवन्ति- तृतीये हि लोके पितरः।
- <9.8.6> पराचीभि.स्स्तुवन्ति- पराङ् हीतोऽसौ लोकः।
- <9.8.7> सार्पराज्ञ्या ऋग्भि स्स्तुवन्ति।
- <9.8.8> अर्बुद स्सर्प एताभि.र्मृता.न्त्वच.मपाऽऽहत, मृता.मेवैताभि.स्त्वच.मप घ्नते।
- <9.8.9> ता ऋचोऽनुब्रुवन्त.स्त्रिर्मार्जालीयं परि यन्ति, सव्या.नूरू.नाघ्नानाः।
- <9.8.10> स्तुत.मनुशंस-त्यमुष्मि.न्नेवैनँ लोके निध्नुवन्ति।
- <9.8.11> यन्ति वा एते पथ इत्याहु-र्ये मृताय कुर्वन्ती,त्यैन्द्रवायवाग्रा.न्ग्रहा.न्गृह्णते-पुनः पन्थान.मपि यन्ति।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

- <9.8.12> अग्न आयूंषि पवस इति प्रतिप.त्कार्या, य एव जीवन्ति- तेष्वायु.र्दधाति।
- <9.8.13> सँवत्सरेऽस्थीनि याजयेयु- स्सँवत्सरो वै सर्वस्य शान्ति,र्यत्पुरा सँवत्सरा.द्याजयेयु- र्वाच.मरुष्कृता.ङ्क्रूरा.मृच्छेयुः।
- <9.8.14> असंमितं स्तोत्रं स्या-दसंमितो ह्यसौ लोक,स्त्रिवृतꣳ पवमाना स्स्यु- स्सप्तदश.मितर.त्सर्वम्।
- <9.8.15> य.त्त्रिवृतꣳ पवमाना भवन्ति- प्राणा वै त्रिवृ.त्प्राणा.नेवोप यन्ति, यत्सप्तदश.मितर.त्सर्वं, प्रजापतिर्वै सप्तदशꣳ- प्रजापति.मेवोप यन्ति।
- <9.8.16> प्राणापानै.र्वा एते व्यृध्यन्त इत्याहु-र्यै मृताय कुर्वन्तीति, मैत्रावरुणाग्रा.न्ग्रहा.न्गृह्णते- प्राणापानौ मित्रावरुणौ- प्राणापानै.रेव समृध्यन्ते।
- <9.9.1>❃ 9.9 यस्य कलश उपदस्यति- कलश.मेवास्योपदस्यन्तं प्राणोऽनूपदस्यति, प्राणो हि सोमः।
- <9.9.2> तदाहुꣳ पयोऽव.नये.दिति।
- <9.9.3> अथो खल्वाहु,रन्तर्हित.मिव वा एत-द्यत्पयो, हिरण्य मेवापोऽभ्यव.नये-द्धिरण्य.मभ्युन्नये.दिति।
- <9.9.4> प्राणा वा आपो-ऽमृतं हिरण्य,ममृत एवास्य प्राणा.न्दधाति- स सर्व.मायु.रेति।
- <9.9.5> यस्य नाराशंस उपवायति- नाराशंस.मेवास्योपवायन्तं प्राणोऽनूप दस्यति, प्राणो हि सोमः।
- <9.9.6> यमध्वर्यु.रन्ततो ग्रह.ङ्गृह्णीया-त्तस्याप्तु.मव नयेत्।
- <9.9.7> प्रायश्चित्त्यै वै ग्रहो गृह्यते, प्रायश्चित्त्यैवास्मै प्रायश्चित्ति.ङ्करोति।
- <9.9.8> यदि पीतापीतौ सोमौ सङ्गच्छेयाता-मन्तꣳ परि.ध्यङ्गारा.न्निर्वर्त्य जुहुया,द्धुतस्य चाहुतस्य- चाहुतस्य हुतस्य च। पीतापीतस्य सोम.स्येन्द्राग्नी पिबतं सुतं स्वाहेति, सैव तस्य प्रायश्चित्तिः।
- <9.9.9> प्रजापतये स्वाहे-त्यभक्षणीयस्य जुहुया,दुत्तरार्ध्य.पूर्वार्ध्ये उपरवः।
- <9.9.10> इन्दु.रिन्दु.मवागा-दित्यव.वृष्टस्य भक्षयेत्।

- <9.9.11> तस्य त इन्द्.विन्द्रपीतस्येन्द्रियावत-स्सर्वगणस्य सर्वगण उपहूत उपहूतस्य भक्षयामि।

- <9.9.12> हिरण्यगर्भ स्समवर्तताग्र इत्याज्येनाभ्युपाऽऽकृतस्य जुहुया,दाग्नीध्रं परेत्य- भूताना.ञ्जात॰ पति.रेक आसी-त्स दाधार पृथिवी.न्द्या.मुतेमा-न्तस्मै त इन्दो हविषा विधेम स्वाहेति- सैव तस्य प्रायश्चित्तिः।

- <9.9.13> यदि ग्रावाऽपि शीर्यते- पशुभि.र्यजमानो व्यृध्यते, पशवो वै ग्रावाणो- द्युतानस्य मारुतस्य साम्ना स्तुयुः।

- <9.9.14> मारुता वै ग्रावाण- स्स्वेनैवैनां.स्तद्रूपेण समर्धयति।

- <9.9.15> यदि सोम.मभिदहे-द्रहा.नध्वर्यु.स्स्पाशयेत, स्तोत्रा.ण्युद्गाता- शस्त्राणि होता.ऽथ यथापूर्वँ यज्ञेन चरेयु॰, पञ्च दक्षिणा देया॰- पाङ्क्तो यज्ञो- यावान् यज्ञ- स्त.मारभते,ऽवभृथा.दुदेत्य पुन.र्दीक्षेत, तत्र तद्द्या-द्यद्वास्यं स्या,त्पुरा द्वादश्या दीक्षेत, यद्वादशी मतिनये-दन्तर्धीयेत।

- <9.10.1>❃ 9.10 यदि महावीरो भिद्येत- तं भिन्न.मभिमृशे,द्य ऋते चिदभिश्रिष॰- पुरा जत्रुभ्य आतृदः। सन्धाता सन्धिं मघवा पुरूवसु-र्निष्कर्ता विहुतं पुनः। मा भेम निष्ट्या इ.वेन्द्र त्वदरणा इव। वनानि न प्रजहिता.न्यद्रिवो- दुरोषासो अमन्महि। अमन्मही.दनाशवो-ऽनुग्राभश्च वृत्रहन्। सकृ.त्सुते महता शूर- राधसाऽनु स्तोमं मदेमहीति- महावीरं भिन्न.मभि मृशे-त्सैव तस्य प्रायश्चित्तिः।

- <9.10.2> असुर्यँ वा एतस्मा.द्वर्ण.ङ्कृत्वा- तेज इन्द्रियँ वीर्य.मन्नाद्यं प्रजा॰ पशवोऽप क्रामन्ति- यस्य यूपो विरोहति, स ईश्वर॰ पापीया.न्भवितोः।

- <9.10.3> त्वाष्ट्रं पशुं बहुरूप.मालभेत, त्वष्टा वै पशूनां रूपाणाँ विकर्ता- तमेव तदुप धावति, स एन.न्तेजसेन्द्रियेण वीर्ये.णान्नाद्येन प्रजया पशुभि॰ पुन.स्समर्धयति, सैव तस्य प्रायश्चित्तिः।

# ताण्ड्य ब्राह्मणे दशमोऽध्यायः

- <10.1.1> ❃10.1 अग्निना पृथिव्यौषधिभि-स्तेनायँ लोक.स्त्रिवृ,द्वायुनाऽन्तरिक्षेण वयोभि-स्तेनैष लोक.स्त्रिवृ,द्योऽय.मन्तराऽऽदित्येन दिवा नक्षत्रै.स्तेनासौ लोक.स्त्रिवृ,-देत.देव त्रिवृत आयतन-मेषाऽस्य बन्धुता।
- <10.1.2> आयतनवा.न्बन्धुमा.न्भवति- य एवँ वेद।
- <10.1.3> तमु प्रतिष्ठेत्याहु,स्त्रिवृ.द्ध्येवैषु लोकेषु प्रतिष्ठितः।
- <10.1.4> अर्धमास एव पञ्चदशस्याऽऽयतन,मेषाऽस्य बन्धुता।
- <10.1.5> आयतनवा.न्बन्धुमा.न्भवति- य एवँ वेद।
- <10.1.6> तञ्चौजो बल.मित्याहु-रर्धमासशो हि प्रजाꣳ पशव ओजो बलं पुष्यन्ति।
- <10.1.7> सँवत्सर एव सप्तदशस्याऽऽयतन, न्द्वादश मासाꣳ- पञ्चर्तव- एत.देव सप्तदशस्याऽऽयतन-मेषाऽस्य बन्धुता।
- <10.1.8> आयतनवा.न्बन्धुमा.न्भवति- य एवँ वेद।
- <10.1.9> तमु प्रजापति.रित्याहु- स्सँवत्सरं हि प्रजाꣳ पशवोऽनु प्रजायन्ते।
- <10.1.10> आदित्य एवैकविंशस्याऽऽयतन,न्द्वादश मासाꣳ- पञ्चर्तव-स्त्रय इमे लोका- असा.वादित्य एकविंश, एत.देवैकविंशस्याऽऽयतन-मेषाऽस्य बन्धुता।
- <10.1.11> आयतनवा.न्बन्धुमा.न्भवति- य एवँ वेद।
- <10.1.12> तमु देवतल्प इत्याहुꣳ, प्र देवतल्प.माप्नोति- य एवँ वेद।
- <10.1.13> त्रिवृ.देव त्रिणवस्याऽऽयतन,मेषाऽस्य बन्धुता।
- <10.1.14> आयतनवा.न्बन्धुमा.न्भवति- य एवँ वेद।
- <10.1.15> तमु पुष्टि.रित्याहु,स्त्रिवृ.द्ध्येवैष पुष्टः।
- <10.1.16> देवता एव त्रयस्त्रिंशस्याऽऽयतन, न्त्रयस्त्रिंश.द्देवताꣳ- प्रजापति.श्चतुस्त्रिंश, एत.देव त्रयस्त्रिंशस्याऽऽयतन.मेषाऽस्य बन्धुता।
- <10.1.17> आयतनवा.न्बन्धुमा.न्भवति- य एवँ वेद।
- <10.1.18> तमु नाक इत्याहु,र्न हि प्रजापतिꣳ कस्मै चनाकम्।
- <10.1.19> छन्दांस्येव च्छन्दोमाना.मायतन,मेषैषां बन्धुता।

- <10.1.20> आयतनवा.न्बन्धुमा.न्भवति- य एवँ वेद।
- <10.1.21> तानु पुष्टि.रित्याहु४, पशवो हि छन्दोमाः।
- <10.2.1> ❃10.2 प्रजापति४ प्रजा असृजत- सोऽताम्य,त्तस्मै वाग्ज्योति.रुदगृह्ण,-त्सोऽब्रवी-त्को मेऽय.ञ्ज्योति.रुदगृह्णा.दिति, स्वैव ते वा.गि.त्यब्रवी,त्तामब्रवी-द्विराज.न्त्वा छन्दसा.ञ्ज्योति.ष्कृत्वा यजान्ता इति।
- <10.2.2> तस्मा.द्यो विराजं स्तोमं सम्पद्यते- त.ञ्ज्योतिष्टोमोऽग्निष्टोम इत्या चक्षते, विराड्ढि च्छन्दसा.ञ्ज्योतिः।
- <10.2.3> ज्योति.स्समानानां भवति, य एवँ वेद।
- <10.2.4> अनुष्टुप्च वै सप्तदशश्च समभवतां, साऽनुष्टु.प्वतु.रुत्तराणि च्छन्दां.स्यसृजत-षडुत्तरा.न्स्तोमा.न्त्सप्तदश,स्तावेता.न्मध्यत४ प्राजनयताम्।
- <10.2.5> त्रिवृच्च त्रिणवश्च राथन्तरौ, तावज.श्चाश्व.श्चान्वसृज्येता, न्तस्मा.त्तौ राथन्तरं प्राचीनं प्र धूनुतः।
- <10.2.6> पञ्चदश.श्चैकविंशश्च बार्हतौ, तौ गौ.श्चावि.श्चान्वसृज्येता, न्तस्मात्तौ बार्हतं प्राचीनं भा.स्कुरुतः।
- <10.2.7> एवँ वै विद्वांस.माहु-रपि ग्राम्याणां पशूनाँ वाच आ जानाति।
- <10.3.1> ❃10.3 प्रजापति.रकामयत- बहु स्यां- प्र जायेयेति, स आत्म.न्नृत्व्य.मपश्य,त्तत ऋत्विजोऽसृजत, यदृत्व्या.दसृजत- तदृत्विजा.मृत्विक्त्व,न्तै.रेत.न्द्वादशाह.मुपासीद-त्सोऽराध्नोत्।
- <10.3.2> पिता नोऽरात्सी.दिति- मासा उपासीदं,स्ते दीक्षयै.वाराध्नुव,न्नुपसत्सु त्रयोदश.मदीक्षय,न्त्सोऽनुव्य.मभव,त्तस्मा.दुपसत्सु दिदीक्षाणोऽनुव्यं भव.त्येव च हि, त्रयोदशं मास.ञ्चक्षते नैव च।
- <10.3.3> एको दीक्षे-तैको हि प्रजापति.रराध्नो,द्वादश दीक्षेर-न्द्वादश हि मासा अराध्नुवं,श्चतुर्विंशति.र्दीक्षेरं-श्चतुर्विंशति.र्ह्यर्धमासा अराध्नुवन्।
- <10.3.4> यदि पञ्चदशो दीक्षे-तेमे पञ्चेमे पञ्चेमे पञ्चेमे पञ्चेमे चत्वारोऽसा.वेक इति निर्दिशेयु,र्यस्मा अराद्धि.कामा स्स्यु-स्तमेवाराद्धि.रन्वेति, सर्व इतरे राध्नुवन्ति।

- <10.3.5> यो वै देवाना ङ्गृहपतिँ वे-दाश्नुते गार्हपतं- प्र गार्हपत.माप्नोति।
- <10.3.6> सँवत्सरो वै देवाना.ङ्गृहपति- स्स एव प्रजापति-स्तस्य मासा एव सह.दीक्षिणः।
- <10.3.7> विन्दते सह दीक्षिणो-ऽश्नुते गार्हपतँ- प्र गार्हपत.माप्नोति- य एवँ वेद।
- <10.3.8> यो वै छन्दसां स्वराजँ वे-दाश्नुते स्वाराज्यं- प्र स्वाराज्य.माप्नोति, बृहती वाव च्छन्दसां स्वरा-डश्नुते स्वाराज्यं- प्र स्वाराज्य.माप्नोति- य एवँ वेद।
- <10.3.9> ता.मेता.मन्नाद्याय व्यावृज्याऽऽसते, यदेत.न्द्वादशाह-न्द्वादश दीक्षा-द्वादशोपसदो- द्वादश प्रसुत- ष्षड्विंश.देता रात्रयो भवन्ति- षड्विंश.दक्षरा बृहती।
- <10.3.10> जायते वाव दीक्षया- पुनीत उपसद्भि-र्देवलोक.मेव सुत्ययाऽप्येति।
- <10.3.11> एताव.द्वाव सँवत्सर इन्द्रियँ वीर्यँ- यदेता रात्रयो, द्वादश पौर्णमास्यो-द्वादशैकाष्टका- द्वादशामावास्या, याव.देव सँवत्सर इन्द्रियँ वीर्य-न्तदेतेनाऽऽस्वाऽव रुन्धे द्वादशाहेन।
- <10.3.12> त्रिंशदक्षरा वा एषा विराट्-षडृतव, ऋतुष्वेव विराजा प्रति तिष्ठ-त्यृतुभि र्विराजि।
- <10.3.13> द्वात्रिंश.दक्षरा वा एषाऽनुष्टु-ब्वा.गनुष्टु-प्चतुष्पाद४ पशवो, वाचा पशू.न्दाधार, तस्मा.द्वाचा सिद्धा वाचाऽऽहूता आयन्ति, तस्मादु नाम जानते।
- <10.4.1> ❋10.4 भूतं पूर्वोऽतिरात्रो- भविष्य.दुत्तर४, पृथिवी पूर्वोऽतिरात्रो-द्यौ.रुत्तरो,ऽग्नि४ पूर्वोऽतिरात्र- आदित्य उत्तर४, प्राण४ पूर्वोऽतिरात्र- उदान उत्तरः।
- <10.4.2> चक्षुषी अतिरात्रौ- कनीनिके अग्निष्टोमौ, यस्मा.दन्तरा अग्निष्टोमा.वतिरात्राभ्या,न्तस्मा.दन्तरे सत्यौ कनीनिके भुङ्क्तः।
- <10.4.3> सँवत्सरस्य वा एतौ दंष्ट्रौ- य.दतिरात्रौ, तयो.र्न स्वप्तव्यँ- सँवत्सरस्य दंष्ट्रयो रात्मान.न्ने.दपि.दधानीति।
- <10.4.4> तदाहु४- कोऽस्वप्तु-मर्हति, यद्वाव प्राणो जागार- तदेव जागरित.मिति।
- <10.4.5> गायत्रीँ वा एता.ञ्ज्योति४पक्षा.मासते- यदेत न्द्वादशाह-मष्टौ मध्य उक्था-अग्निष्टोमा.वभितो मासा, स्वर्गँ लोक.मेत्याऽऽजरसं ब्रह्माद्य.मन्न.मत्ति दीप्यमानः।

- <10.4.6> त्रि.ष्पुरस्ता.द्रथन्तर.मुप यन्ति, त्र्यावृ.द्वै वा-क्सर्वा.मेव वाच.मवरुध्य- सर्व.मन्नाद्य.न्द्वादशाह.न्तन्वते।

- <10.4.7> जामि वा एत.द्यज्ञे क्रियत इत्याहु-र्य.त्त्रिष्पुरस्ता.द्रथन्तर.मुपयन्तीति, सौभर.मुक्थानां ब्रह्मसाम भवति- तेनैव त.दजामि।

- <10.4.8> प्रत्नवत्यꣳ प्रायणीयस्याह्नꣳ प्रतिपदो भवन्ति, तेनो एव त.दजामि।

- <10.4.9> त्रिर्वैवोपरिष्टा.द्रथन्तर.मुप यन्ति, त्र्यावृद्वै वा-क्सर्वा.मेव वाच.मवरुध्य- सर्व.मन्नाद्य.न्द्वादशाहा.दुत्तिष्ठन्ति।

- <10.5.1> ❈10.5 त्रयो वा एते त्रिरात्रा- यदेष द्वादशाहो, गायत्र.मुखꣳ प्रथमो- गायत्र.मध्यो द्वितीयो- गायत्रोत्तम.स्तृतीयः।

- <10.5.2> यस्मा.द्गायत्रमुखꣳ प्रथम-स्तस्मा.दूर्ध्वोऽग्नि.र्दीदाय, यस्मा.द्गायत्रमध्यो द्वितीय-स्तस्मा.त्तिर्यङ्वायुꣳ पवते,यस्मा.द्गायत्रोत्तम.स्तृतीय-स्तस्मा.दवाङादित्य.स्तपति।

- <10.5.3> तेजसा वै गायत्री प्रथम.न्त्रिरात्र.न्दाधार- पदै.र्द्वितीय-मक्षरै.स्तृतीयम्।

- <10.5.4>त्रिवृद्वै गायत्र्या.स्तेज-स्त्रिवृ.त्प्रायणीय.मह-स्तेन प्रथम.स्त्रिरात्रो धृत,स्त्रिपदा गायत्री- त्रिरात्रो मध्ये- तेन द्वितीय.स्त्रिरात्रो धृत,श्चतुर्विंशत्यक्षरा गायत्री- चतुर्विंश उत्तम.मह- स्तेन तृतीय.स्त्रिरात्रो धृतः।

- <10.5.5> तेजसा वा एते प्रयन्ति- तेजो मध्ये दधति- तेजोऽभ्युद्यन्ति, ज्योतिषा वा एते प्रयन्ति- ज्योति.र्मध्ये दधति- ज्योति.रभ्युद्यन्ति, चक्षुषा वा एते प्रयन्ति- चक्षु.र्मध्ये दधति- चक्षु.रभ्युद्यन्ति, प्राणेन वा एते प्रयन्ति- प्राणं मध्ये दधति- प्राण.मभ्युद्यन्ति, ये गायत्र्या प्रयन्ति- गायत्रीं मध्ये दधति- गायत्री.मभ्युद्यन्ति।

- <10.5.6>तन्त्रँ वा एत.द्वितायते- यदेष द्वादशाह,स्तस्यैते मयूखा- यद्गाय.त्र्यसँव्याथाय।

- <10.5.7> गिरिक्षि.दौच्चामन्यवे॒ऽति होवा.चाभिप्रतारी काक्षसेनिꣳ कथ.न्द्वादशाह इति, यथा॒ऽरा.न्नेमिꣳ पर्ये-त्येव.मेन.ङ्गायत्री पर्ये-त्यविस्रंसाय, यथा॒ऽरा नाभौ धृता- एव.मस्या.न्द्वादशाहो धृतः।

- <10.5.8> अनुष्टुभँ वा एता.मन्नाद्याय व्यावृज्या॒ऽऽसते- यदेत.न्द्वादशाहम्।

- <10.5.9> अष्टाभि.र्वा अक्षरै.रनुष्टु.प्प्रथम न्द्वादशाहस्याह.रुद्यच्छ-त्येकादशभि.र्द्वितीय-न्द्वादशभि.स्तृतीयम्।
- <10.5.10> अक्षर.न्त्र्यक्षर.मुच्छिष्यते, तदेवोत्तर.न्त्रिरात्र.मनु वि दधाति।
- <10.5.11> छन्दांस्येवास्या.स्तृतीय.न्त्रिरात्रँ वहन्ति।
- <10.5.12> ताँ वा एतां प्रतीची न्तिरश्चीं पराची.मासतेऽन्नाद्याय, तस्मा.त्प्रत्यञ्च.न्तिर्यञ्चं पराञ्चं प्रजाः पशु.मुप जीवन्ति।
- <10.5.13> छन्दांसि वा अन्योऽन्यस्य लोक.मभ्यध्याय,न्गायत्री त्रिष्टुभ-स्त्रिष्टु.ब्जगत्या-जगती गायत्र्या,स्तानि व्यौहन् यथालोक,न्ततो वै तानि यँ य.ङ्काम.मकामयन्त- त.मसन्वन्।
- <10.5.14> यत्कामो व्यूढ.च्छन्दसा द्वादशाहेन यजते- सोऽस्मै काम स्समृध्यते।
- <10.5.15> ओको वै देवाना.न्द्वादशाहो, यथा वै मनुष्या इमँ लोक.माविष्टा- एव.न्देवता द्वादशाह.माविष्टा, देवता ह वा एतेन यजते- य एवँ विद्वा.न्द्वादशाहेन यजते।
- <10.5.16> गृहा वै देवाना.न्द्वादशाहो, नागृहताया भय्यम्।
- <10.5.17> यो वै द्वादशाह.मग्निष्टोमेन कल्पमानँ वेद- कल्पतेऽस्मै, प्रातस्सवने.नैव प्रथम.स्त्रिरात्रः कल्पते- माध्यन्दिनेन सवनेन द्वितीय-स्तृतीयसवनेन तृतीयो-ऽग्निष्टोम.साम्नैव दशम.महः कल्पते।
- <10.5.18> कल्पतेऽस्मै- य एवँ वेद।
- <10.6.1> ❃ 10.6 एति प्रे-त्याशुम.द्वीतिम.द्रुक्म.त्तेजस्व-द्युञ्जानं प्रथमस्याह्नो रूप-न्त्रिवृत स्स्तोमस्य गायत्रस्य च्छन्दसो रथन्तरस्य साम्नः।
- <10.6.2> वृषव.द्वृत्रहव.द्रयिम.द्विश्वव-दुपस्थित.न्द्वितीयस्याह्नो रूपं- पञ्चदशस्य स्तोमस्य त्रैष्टुभस्य च्छन्दसो बृहत स्साम्नः।
- <10.6.3> उद्व.त्त्रिव.द्गिव.द्वोम.द्वषभव-त्तृतीयस्याह्नो रूपं- सप्तदशस्य स्तोमस्य जागतस्य च्छन्दसो वैरूपस्य साम्नः।
- <10.6.4> राजन्व.ज्जनव.द्वसुव.त्सूर्यव.द्विरा.डनुतोदव-च्चतुर्थस्याह्नो रूप-मेकविंशस्य स्तोमस्याऽऽनुष्टुभस्य च्छन्दसो वैराजस्य वै साम्नः।

- <10.6.5> चित्रव.च्छिशुम-त्पङ्क्ति.श्शक्वरी द्यूनाक्षरा, गोम.दृषभव.द्वज्रभिम-त्पञ्चमस्याह्नो रूप-न्त्रिणवस्य स्तोमस्य पाङ्क्तस्य च्छन्दसो शक्वरीणां साम्नः।
- <10.6.6> परिव.त्प्रतिव-त्सप्तपदा द्विपदा विनाराशंसा, गोम.दृषभव-त्षष्ठस्याह्नो रूप-न्त्रयस्त्रिंशस्य स्तोमस्य सर्वेषा.ञ्छन्दसां रूपं रेवतीनां साम्नः।
- <10.6.7> यस्मा.देषा समाना सती-षडह.विभक्ति.र्नानारूपा- तस्मा.द्विरूप स्सँवत्सरः।
- <10.6.8> विरूप.मेन.मनु.प्र जायते- य एवँ वेद।
- <10.7.1>❁ 10.7 अग्न इति प्रथमस्याह्नो रूप-मग्निविभक्ते-रग्नि.मिति द्वितीय-स्याग्निनेति तृतीय-स्याग्नि.रिति चतुर्थस्य।
- <10.7.2> देवा वै श्रिय.मैच्छं-स्तान्न प्रथमेऽह.न्यविन्द-न्न द्वितीये- न तृतीये, ताञ्चतुर्थेऽह.न्यविन्दन्, विन्दते श्रियँ- य एवँ वे.दाग्ने.रिति पञ्चमस्य- तेनो श्रीᳲ प्रत्युपोदिते.त्याहुः।
- <10.7.3> अप्रतिवा.द्येनं भ्रातृव्यो भवति- य एवँ वेद।
- <10.7.4> अग्न इति षष्ठस्य, येनैव रूपेण प्रयन्ति- तद.भ्युद्यन्ति।
- <10.7.5> यस्मा.देषा समाना स-त्यग्निविभक्ति.र्नानारूपा- तस्मा.द्यथर्त्वाऽदित्य-स्तपति। (तस्मात्, यथर्तु, आदित्यः)
- <10.8.1>❁ 10.8 इन्द्रेति प्रथमस्याह्नो रूप,मिन्द्रविभक्ते.रिन्द्र.मिति द्वितीय-स्येन्द्रेणेति तृतीय-स्येन्द्र इति चतुर्थ-स्येन्द्रादिति पञ्चम-स्येन्द्रेति षष्ठस्य, येनैव रूपेण प्रयन्ति-तदभ्युद्यन्ति, यस्मा.देषा समाना सतीन्द्रविभक्ति.र्नानारूपा- तस्मा.द्यथर्त्वोषधयᳲ पच्यन्ते। (यथर्तु, ओषधयः)
- <10.9.1>❁ 10.9 यदृचा प्रस्तौति- तत्प्रथमस्याह्नो रूपं, स्वरविभक्ते-र्यत्पुरस्ता.त्स्तोभ-न्तद्द्वितीयस्य, यदुभयत.स्स्तोभ- न्तत्तृतीयस्य, यदनुतुन्न- न्तच्चतुर्थस्य, यदभ्यारब्ध- न्तत्पञ्चमस्य, य.दिहकारे.णाभ्यस्त- न्तत्षष्ठस्याह्नो रूपम्।
- <10.9.2> स्वराणाँ यस्मा.देषा समाना सती स्वरविभक्ति.र्न्नानारूपा, तस्मा.द्यथर्तु वायुᳲ पवते।

- <10.10.1>❃ 10.10 पदनिधनं प्रथम.स्याह्नो रूप,न्निधन.विभक्ते-र्बहि.र्णिधन न्द्वितीयस्य, दिङ्निधनं तृतीय,स्येनिधन.ञ्चतुर्थ,स्याथकार.णिधनं पञ्चमस्य- य.दिहकारेणाभ्यस्त- न्तत्षष्ठस्याह्नो रूप,न्निधनानाँ यस्मा.देषा समाना सती निधनविभक्ति.र्न्नानारूपा- तस्मा.दिमे लोका- स्सह सन्तो नानैव। (तृतीयस्य ईनिधनम्)
- <10.11.1>❃ 10.11 द्रव.दिडं प्रथमस्याह्नो रूप,मिडाविभक्त.रूर्ध्वेड.न्द्वितीयस्य, परिष्टुब्धेड.न्तृतीय,स्येडाभि.रैड.ञ्चतुर्थ,स्याध्यर्धेडं पञ्चमस्य, य.दिहकारेणाभ्यस्त- न्तत्षष्ठस्याह्नो रूप,मिडानाँ यस्मा.देषा समाना सतीडाविभक्ति.र्न्नानारूपा- तस्मा.त्समाना स्सन्तः पशवो नानारूपाः।
- <10.12.1>❃ 10.12 भारद्वाजायना वै सत्त्र.मासत, तानपृच्छ-न्किं प्रथमेनाह्ना कुरुतेति- प्रैवैमेति, किन्द्वितीयेने-त्यवस.मेवाकुर्महीति, किन्तृतीयेनेति- पर्येवा ऽऽप्सवामहीति, किञ्चतुर्थेनेति- सतैव सद.प्यदध्मेति, किं पञ्चमेनेति- प्राणा.नेव विच्छिन्दन्त ऐमेति, किं षष्ठेने- तीद.मेवाऽऽगच्छामेति- इति। (आप्लवामहि/ आप्नवामहि)
- <10.12.2> यस्य पदेन प्रस्तौ-त्यथ स्वार-मभि वाव तेन देवाः पशू.नपश्यन्, य.त्पुरस्ता.त्स्तोभ- मथ स्वार-मुदेव तेनासृजत, यदुभयत.स्स्तोभ-मथ स्वार-मेभ्य एव तेन लोकेभ्यो देवाः पशुभ्योऽन्नाद्यं प्रायच्छन्, यदनु.तुन्न-मथ स्वार-मुपैव तेनाशिक्षन्, यस्य मध्ये निधन-मथ स्वार- ङ्गर्भा.स्तेनादधत, ता.नि.ह.वता स्वारेण प्राजनयन्। (तान् इ- इकार, ह-हकार वता स्वारेण)
- <10.12.3> इमँ वाव देवा लोकं पदनिधनेनाभ्यजय-न्नमुं बहि.र्णिधने-नान्तरिक्ष न्दिङ्निधने-नामृतत्व.मीनिधनेनागच्छ-न्ब्रह्मवर्चस.मथनिधनेनावारुन्ध-तास्मिन्नेव लोक इ.ह.निधनेन प्रत्यतिष्ठन्।
- <10.12.4> इमँ वाव देवा लोक न्द्रव.दिडेनाभ्यजय-न्नमु.मूर्ध्वेडेनान्तरिक्षं- परिष्टुब्धेडेन प्रतिष्ठा-मिडाभि.रैडेनावारुन्धत- प्रतिष्ठा.याध्यर्धेडेन व्यजय-न्तास्मिन्नेव लोक इ.हेडेन प्रत्यतिष्ठन्।
- <10.12.5> न वाक्सँवत्सर.मतिवद-तीडैव सँवत्सर.मति वदति, गर्भेण सँवत्सरे पर्यावृत्य प्र जायते- तेनाति वदति।

- <10.12.6> ता वा एता.श्चतस्र.षडहं पराच्य इडा अतिय,न्त्येषा नूँतैषा विषू-च्येषा प्रती.च्येतद्वैडम्। (नूता- नु, ऊता) (एतदु, ऐडम्)
- <10.12.7> सँवत्सरोऽग्नि-र्वाक्सँवत्सरो, यदग्नि.र्विभज्यते- वाच.मेव तद्विभजन्ति।
- <10.12.8> द्वे द्वे अक्षरे विभजन्ति- द्वौ द्वौ हि मासा.वृतु,रथो मासाना.मेव तद्रूप.ङ्क्रियते।
- <10.12.9> षडहानि वि भजन्ति- षड्टतव- ऋतूना.न्धृत्या- ऋतूनां प्रतिष्ठित्या, -अथो ऋतूना.मेव तद्रूप.ङ्क्रियते, षडु पुरुषा- यानग्नि.रनुविह्रियते।
- <10.12.10> यदिदं बहुधाऽग्नि.र्विह्रियते- तदसा.वादित्य स्सर्वा इमाः प्रजाः प्रत्यङ्- तस्मा.देते देवते विभक्ति.मानशाते, नातोऽन्या का चन।

## ताण्ड्यब्राह्मणे एकादशोऽध्यायः

- <11.1.1> ❉ 11.1 स्तोमो युज्यते सत्त्रियेभ्योऽ हर्भ्यः- प्रत्नवतीभि.श्चोपवतीभिश्च।
- <11.1.2> यत्प्रत्नवत्य उपवतीभ्यः पूर्वा युज्यन्ते- ब्रह्म तत्पूर्व.ङ्क्षत्रा.द्युज्यते, ब्रह्म हि पूर्व.ङ्क्षत्रम्।
- <11.1.3> मन.स्तत्पूर्वँ वाचो युज्यते, मनो हि पूर्वँ वाचो- यद्धि मनसाऽभिगच्छति तद्वाचा वदति।
- <11.1.4> बृह.त्तत्पूर्वं रथन्तरा.द्युज्यते, बृहद्धि पूर्वँ रथन्तरा-द्विजित्या तु वै रथन्तरं पूर्वं योग.मानशे।
- <11.1.5> सम्भार्या.स्तृचा भवन्ति, यथाऽऽशिष्ठान्.वहिष्ठा.न्त्सम्भरे-देव.मेवैता- न्त्सम्भरन्ति गत्यै।
- <11.1.6> नव भवन्ति- नवाहस्य युक्त्या, ऋचर्चैवाह.र्युनक्ति, यथा प्रार्थस्य शम्या अवदध्या- देव.मेवैत.न्नवाहस्य शम्या अव दधाति गत्यै।
- <11.1.7> त्रिवृ.देव स्तोमो भवति- तेजसे ब्रह्मवर्चसाय।
- <11.2.1> ❉ 11.2 उभाभ्याँ वै रूपाभ्यां बहिष्पवमान्यो युज्यन्ते, यत्सामा स्तोमो भवति- तदाज्येषु।
- <11.2.2> निराहाव.न्त्याज्यानि भवन्ति - युक्त.मेव तैराह्वयति।

- <11.2.3> अग्न आयाहि वीतय- आ नो मित्रावरुणा-ऽयाहि सुषमा हि त- इन्द्राग्नी आ गतं सुत.मिति- राथन्तर.मेव तद्रूप.न्निर्द्योतयति स्तोम इति।
- <11.3.1>❀ 11.3 प्र सोमासो विपश्चित इति गायत्री भवति प्रेत्या, -अभि द्रोणानि बभ्रव इत्यभिक्रान्त्यै, स्तुता इन्द्राय वायव इति संस्कृत्यै, प्र सोम देववीतय इति प्रेत्यै, प्र तु द्रवेति प्रेत्यै, प्र वा एतेनाह्ना यन्ति।
- <11.3.2> गायत्रं भवति।
- <11.3.3> यदेव गायत्रस्य ब्राह्मणम्।
- <11.3.4> आश्वं भवति।
- <11.3.5> अश्वो वै भूत्वा प्रजापतिः प्रजा असृजत- स प्राजायत- बहु.रभव,त्प्रजायते बहु.र्भव-त्याश्वेन तुष्टुवानः।
- <11.3.6> एकाक्षर.न्निधन.मुप यन्ति- रथन्तरस्यानतिवादाय।
- <11.3.7> अनतिवा.द्येनं भ्रातृव्यो भवति- य एवँ वेद।
- <11.3.8> सोमसाम भवति।
- <11.3.9> यथा वा इमा अन्या ओषधय- एवँ सोम आसी,त्स तपोऽतप्यत, स एत.त्सोमसा.मापश्य,त्तेन राज्य.माधिपत्य.मगच्छ-द्यशोऽभव,द्राज्य.माधिपत्य.ङ्गच्छति यशो भवति- सोमसाम्ना तुष्टुवानः।
- <11.3.10> यौधाजयं भवति- यदेव यौधाजयस्य ब्राह्मणम्।
- <11.3.11> औशनँ- य.दौशनस्य स्तोमः।
- <11.4.1>❀ 11.4 अभि त्वा शूर नोनुम इ,त्यभीति रथन्तरस्य रूपं- राथन्तरं ह्येतदहः।
- <11.4.2> कया नश्चित्र आभुव.दिति कवत्य,स्तेन प्राजापत्याः- को हि प्रजापतिः- प्रजापते.राप्त्यै।
- <11.4.3> तँ वो दस्म.मृतीषहँ- वसो.र्मन्दान.मन्धसो-ऽभिवत्सन्न स्वसरेषु धेनव इ,त्यभीति रथन्तरस्य रूपं- राथन्तरं ह्येतदहः।
- <11.4.4> इन्द्र.ङ्गीर्भि.र्हवामह- इति हवन्त एवैनम्।

Sri Sachchidananda Avadhoota Datta Peetham Mysore

- <11.4.5> तरोभिर्वो विदद्वसुमिति- स्तोमो वै तरो- यज्ञो विदद्वसु- स्स्तोमेन वै यज्ञो युज्यते, य.त्तरोभिर्वो विदद्वसु.मित्याह- यज्ञमेव त.द्युनक्ति।
- <11.4.6> रथन्तरं भवति, ब्रह्म वै रथन्तरं- ब्रह्म प्रायणीय.मह-र्ब्रह्मण एव तद्ब्रह्मा ऽक्रम्य प्रयन्ति।
- <11.4.7> इयँ वै रथन्तर-मस्यामेव प्रतिष्ठाय सत्त्र.मासते।
- <11.4.8> वामदेव्यं भवति, पशवो वै वामदेव्यं- पशूना.मवरुद्ध्यै, प्राजापत्यँ वै वामदेव्यं- प्रजापतावेव प्रतिष्ठाय सत्त्र.मासते।
- <11.4.9> नौधसं भवति, ब्रह्म वै नौधसं- ब्रह्म प्रायणीय.मह-र्ब्रह्मण एव तद्ब्रह्मा ऽक्रमन्ते।
- <11.4.10> कालेयं भवति, समानलोके वै कालेयञ्च रथन्तर,ञ्चेयँ वै रथन्तरं- पशव꠸ कालेय- मस्याञ्चैव पशुषु च प्रतिष्ठाय सत्त्र.मासते।
- <11.4.11> द्रव.दिड.न्तथा ह्येतस्याह्नो रूपं स्तोमः।
- <11.5.1>❈ 11.5 प्र सोमासो मदच्युत इति गायत्री भवति, मदवद्वै रसव.त्तृतीयसवनं- मद.मेव तद्रस.न्दधा,त्यया पस्वस्व देवयु.रित्येति रथन्तरस्य रूपं, राथन्तरं ह्येतदहः।
- पवते हर्यतो हरिरिति बृहतो रूपं- बृह.देव तदेतस्मि.न्नहनि युनक्ति- तद्युक्तं श्व आरभन्ते।
- प्र सुन्वानायान्धस इति प्रवत्यो भवन्ति, प्रणि.नीषेण्यमिव ह्येतदह,रभि प्रियाणि पवते चनोहित इ,त्यभीति रथन्तरस्य रूपं- राथन्तरं ह्येतदहः।
- <11.5.2> यज्ञा यज्ञा वो अग्नय इ-त्यग्नेर्वै यज्ञो, यज्ञ एव तद्यज्ञं प्रतिष्ठापयति।
- <11.5.3> गायत्रं भवति- यदेव गायत्रस्य ब्राह्मणम्।
- <11.5.4> संहितं भवति- द्व्यक्षरणिधनं प्रतिष्ठायै, प्रतिष्ठायैव सत्त्र.मासते।
- <11.5.5> सफं भवति।
- <11.5.6> सफेन वै देवा इमा.न्लोका.न्त्समाप्नुवन्, यत्समाप्नुवं-स्त.त्सफस्य सफत्व,- मिमा.नेवैतेन लोका.न्त्समाप्य सत्त्र.मासते।
- <11.5.7> आक्षारं भवति।

- <11.5.8> अष्टौ वा एता॰ कामदुघा आसं,स्तासा.मेका समशीर्यत, सा कृषि.रभव-द्दध्यतेऽस्मै कृषौ- य एवँ वेद।

- <11.5.9> तासु देवासुरा अस्पर्धन्त, ते देवा असुरा.न्कामदुघाभ्य आक्षारे.णानुदन्त, नुदते भ्रातृव्य.ङ्कामदुघाभ्य- आक्षारेण तुष्टुवानः।

- <11.5.10> एभ्यो वै लोकेभ्यो रसोऽपाक्राम,त्तं प्रजापति.राक्षारे.णाक्षारय,द्यदाक्षारय-त्तदाक्षार.स्याक्षारत्वम्।

- <11.5.11> तस्माद्य॰ पुरा पुण्यो भूत्वा पश्चा.त्पापीया.न्त्स्या-दाक्षारं ब्रह्म साम कुर्वी,ताऽऽत्मन्येवेन्द्रियँ वीर्यं रस.माक्षारयति।

- <11.5.12> जनुषैकर्चौ भवतो-ऽह्नो धृत्यै, यद्वा एतस्याह्नोऽधृत- न्तदेताभ्या.न्दाधार।

- <11.5.13> गौरीवितं भवति।

- <11.5.14> गौरीविति.र्वा एत.च्छाक्त्यो ब्राह्मणोऽतिरिक्त.मपश्य,त्तद्गौरीवित.मभवत्।

- <11.5.15> अतिरिक्तँ वा एत.दतिरिक्तेन स्तुवन्ति- यद्गौरीवितेनाहीना.न्छ्वस्तनवद्भव,-त्यपि प्रजाया उपक्लृप्तम्।

- <11.5.16> वृषा वा एत.द्वाजिसाम, वृषभो रेतोधा- अद्य स्तुवन्ति श्व॰ प्रजायते।

- <11.5.17> अनुष्टुभि च्छन्दसा.ङ्क्रियते-ऽनुष्टुब्भि च्छन्दसाँ योनि- स्स्वाया.मेव तद्योनौ रेतो धत्ते प्रजात्यै।

- <11.5.18> प्र जायते बहु.र्भवति- य एवँ वेद।

- <11.5.19> द्व्युदासं भव,त्येतौ वा उदासौ स्वर्गस्य लोकस्यावसानदर्शौ, पूर्वेण पूर्व.मह स्संस्थापय-न्त्युत्तरेणोत्तर.मह.रभ्यति.वदन्ति।

- <11.5.20> तद्यथाऽद॰ पूर्वेद्यु.स्स्पष्ट न्तृणोदक.मन्ववस्यन्तो य-न्त्येव.मेव ताभ्यां स्वर्गँ लोक.मन्ववस्यन्तो यन्ति।

- <11.5.21> गौतमं भवति।

- <11.5.22> सामाऽऽर्षेयव.त्स्वर्गाय युज्यते, स्वर्गा.ल्लोका.न्न च्यवते तुष्टुवानः।

- <11.5.23> यदु चैवाऽऽनुष्टुभस्य मध्ये निधनस्य ब्राह्मण- न्तदु चैतस्य।

- <11.5.24> कावं भवति।

- <11.5.25> लोकबिन्दु स्साम विन्दते- लोक.ङ्कावेन तुष्टुवानः।
- <11.5.26> स्वारमु, स्वरेण स्वरेण हि देवेभ्योऽन्ततोऽन्नाद्यं प्रदीयते- स्वरेणैव तद्देवेभ्योऽन्ततोऽन्नाद्यं प्र यच्छति।
- <11.5.27> यज्ञायज्ञीयं भवति।
- <11.5.28> वा.ग्यज्ञायज्ञीयँ, वाचि यज्ञꣳ प्रतिष्ठितो- वाच्येव तद्य.ज्ञ.मन्ततꣳ प्रतिष्ठापयन्ति, तँ वाचोऽधि श्व आरभन्ते।
- <11.5.29> त्रिवृ.देव स्तोमो भवति- तेजसे ब्रह्मवर्चसाय।
- <11.6.1>❈ 11.6 पवस्व वाचो अग्रिय इति द्वितीयस्याह्नꣳ प्रतिप.द्भवति।
- <11.6.2> पवस्वेति वै राथन्तरं रूप,मग्रिय इति बार्हत-मुभे रूपे समारभते, द्विरात्रस्याविस्रंसाय।
- <11.6.3> पवस्वेन्दो वृषा सुत इत्यनुरूपो भवति, वृषण्वद्वा एत ऐन्द्र न्त्रैष्टुभ.मह-र्यद्द्वितीय,न्तदेव तदभि वदति।
- <11.6.4> पूर्वमु तद्रूप-मपरेण रूपेणानु वदति, यत्पूर्वं रूप.मपरेण रूपेणानुवदति-तदनुरूपस्यानुरूपत्वम्।
- <11.6.5> अनुरूप एनं पुत्रो जायते- य एवँ वेद।
- <11.6.6> स्तोत्रीयानुरूपौ तृचौ भवतꣳ- प्राणापानाना.मवरुद्ध्यै।
- <11.6.7> वृषण्वन्त.स्तृचा भव-न्तीन्द्रियस्य वीर्यस्यावरुद्ध्यै।
- <11.6.8> तृच उत्तमो भवति।
- <11.6.9> येनैव प्राणेन प्रयन्ति- तमभ्युद्यन्ति।
- <11.6.10> पञ्चदश एव स्तोमो भवति।
- <11.6.11> ओजस्येव तद्वीर्ये प्रति तिष्ठ-त्योजो वीर्यं पञ्चदशः।
- <11.7.1>❈ 11.7 उभाभ्याँ वै रूपाभ्यां बहिष्पवमान्यो युज्यन्ते- यत्सामा स्तोमो भवति- तदाज्येषु।
- <11.7.2> निराहोपस्थिता.न्याज्यानि भवन्ति।

- <11.7.3> अग्नि न्दूतँ वृणीमहे- मित्रँ वयं हवामह- इन्द्र.मिद्गाथिनो बृह-दिन्द्रो अग्ना नमो बृह.दिति- बार्हत.मेव तद्रूप.न्निर्द्योतयति स्तोमः।
- <11.8.1>❃ 11.8 वृषा पवस्व धारयेति गायत्री भव-त्यह्नो धृत्यै।
- <11.8.2> वृषण्वत्य.स्त्रिष्टुभो रूपेण, त्रैष्टुभं ह्येत.दहः।
- <11.8.3> पुनान.स्सोम धारयेति धृत्यै।
- <11.8.4> वृषा शोणो अभि कनिक्रद.द्गा इति।
- <11.8.5> वृषण्वत्य.स्त्रिष्टुभो रूपेण समृद्धा, वृषण्वद्धा एत.दैन्द्र न्त्रैष्टुभ.मह-र्यद्वितीय-न्तदेव तदभि वदति।
- <11.8.6> गायत्रं भवति- यदेव गायत्रस्य ब्राह्मणम्।
- <11.8.7> यौक्ताश्वं भवति।
- <11.8.8> युक्ताश्वो वा आङ्गिरस शिशू जातौ विपर्यहर,त्तस्मा.न्मन्त्रोऽपाक्राम,त्स तपोऽतप्यत, स एत.द्यौक्ताश्व.मपश्य-त्तं मन्त्र उपाऽऽवर्तत, तद्वाव स तर्ह्यकामयत- कामसनि साम यौक्ताश्व- ङ्काम.मेवैतेनाव रुन्धे।
- <11.8.9> आयास्ये भवतः।
- <11.8.10> अयास्यो वा आङ्गिरस आदित्याना.न्दीक्षिताना.मन्न.माश्ना,त्तं शुगाच्छं,त्स तपोऽतप्यत- स एते आयास्ये अपश्य-त्ताभ्यां शुच.मपाऽऽह,ताप शुचं हत- आयास्याभ्या.न्तुष्टुवानः।
- <11.8.11> एभ्यो वै लोकेभ्यो वृष्टि.रपाक्राम,त्ता.मयास्य आयास्याभ्या मच्यावय,च्च्यावयति वृष्टि.मायास्याभ्या.न्तुष्टुवानः।
- <11.8.12> अन्नाद्यँ वाव तदेभ्यो लोकेभ्योऽपाक्राम,त्तदयास्य आयास्याभ्या.मच्यावय,-च्च्यावय.त्यन्नाद्य.मायास्याभ्या न्तुष्टुवानः।
- <11.8.13> वासिष्ठं भवति।
- <11.8.14> वसिष्ठो वा एतेन वैडव स्स्तुत्वाऽञ्जसा स्वर्गँऽ लोक.मपश्य-त्स्वर्गस्य लोकस्यानुख्यात्यै, स्वर्गा.ल्लोका.न्न च्यवते- तुष्टुवान स्स्तोमः।
- <11.9.1> ❃ 11.9 त्वा.मिद्धि हवामह इति, त्वमिति बृहतो रूपं- बार्हतं ह्येत.दहः।

- <11.9.2> अभि प्र व स्सुराधस.मिति, युञ्जते वै पूर्वेणाह्ना- ह्येतेन प्रयन्ति।
- <11.9.3> त्वामिदा ह्यो नर इ,त्यद्य चैव ह्यश्च समारभते- द्विरात्रस्याविस्रंसाय।
- <11.9.4> बृह.द्भवति, वर्ष्म वै बृह-द्वर्ष्म द्वितीय.मह-र्वर्ष्मण एव तद्वर्ष्माऽऽक्रमन्ते।
- <11.9.5> श्यैतं भवति- साम्नो.र्विवाहो यज्ञस्य सन्तत्यै।
- <11.9.6> माधुच्छन्दसं भवति, सामाऽऽर्षेयव.त्स्वर्गाय युज्यते, स्वर्गा.ल्लोका.न्न च्यवते- तुष्टुवानः।
- <11.9.7> ऊर्ध्वेड.न्तथा ह्येतस्याह्नो रूपं स्तोमः।
- <11.10.1> ❃ 11.10 यस्ते मदो वरेण्य इति गायत्री भवति।
- <11.10.2> मदवद्वै रसव.त्तृतीयसवनं- मद.मेव तद्रस.न्दधाति।
- <11.10.3> पवस्व मधुमत्तम इति- पवन्त इव ह्येतेनाह्ना, मधुमत्तम इ.त्यन्नँ वै म,ध्वन्नाद्य.मेव तद्यजमाने दधाति।
- <11.10.4> इन्द्र.मच्छ सुता इम- इतीन्द्रियस्य वीर्यस्यावरुद्ध्यै।
- <11.10.5> अयं पूषा रयि.र्भग इति।
- <11.10.6> अनुष्टुभ स्सत्य.स्त्रिष्टुभो रूपेण, त्रैष्टुभं ह्येतदहः।
- <11.10.7> वृषा मतीनां पवते विचक्षण इति जगत्य स्सत्य.स्त्रिष्टुभो रूपेण, त्रैष्टुभं ह्येतदहः।
- <11.10.8> गायत्रं भवति- यदेव गायत्रस्य ब्राह्मणम्।
- <11.10.9> हाविष्मतं भवति।
- <11.10.10> हविष्मांश्च वै हविष्कृच्चाऽऽङ्गिरसा.वास्ता,न्द्वितीयेऽहनि हविष्मा नराध्नो- न्नवमेऽहनि हविष्कृत्।
- <11.10.11> अयं हविष्मा.नित्येव जात.मह.र्जातं सोमं प्राऽऽह देवेभ्य,स्साम्नैवास्मा आशिष.माशास्ते- साम हि सत्याऽऽशीः।
- <11.10.12> शङ्कु भव-त्यह्नो धृत्यै, यद्वा अधृतं- शङ्कुना त.द्दाधार।
- <11.10.13> तदु सीदन्तीय.मित्याहु,रेतेन वै प्रजापति.रूर्ध्व इमा.न्लोका.नसीद,- द्यदसीद.त्तत्सीदन्तीयस्य सीदन्तीयत्व,मूर्ध्व इमा.न्लोका.न्त्सीदति-सीदन्तीयेन तुष्टुवानः।

Sri Sachidananda Avadhoota Datta Peetham • Mysore •

- <11.10.14> सुज्ञानं भवति।
- <11.10.15> स्वर्व.द्वै राथन्तरं रूपं- स्व.र्णिधनं बार्हतम्।
- <11.10.16> स्वर्णिधनं भवति- तथा ह्येत.स्याह्नो रूपम्।
- <11.10.17> प्लुवौ वा एता.वुपोहन्ते- स्वर्गस्य लोकस्य समष्ट्यै।
- <11.10.18> गौरीवितं भवति- यदेव गौरीवितस्य ब्राह्मणम्।
- <11.10.19> क्रौञ्चं भवति।
- <11.10.20> वाग्वै क्रौञ्चँ- वा.ग्द्वादशाहो- वाच्येव तद्वाचा स्तुवते- यज्ञस्य प्रभूत्यै।
- <11.10.21> यामं भवति।
- <11.10.22> एतेन वै यमोऽनपजय्य.ममुष्य लोकस्याधिपत्य.माश्नु,तानपजय्य ममुष्य लोकस्याधिपत्य मश्नुते- यामेन तुष्टुवानः।
- <11.10.23> एतेन वै यमी यमं स्वर्गँ लोक.मगमय-त्स्वर्गस्य लोकस्यानुख्यात्यै, स्वर्गा.ल्लोका.न्न च्यवते- तुष्टुवान स्स्तोमः।
- <11.11.1>❃ 11.11 एह्यू षु ब्रवाणि त- इत्येहिवत्यो भवन्ति- तृतीयस्याह्न उपहवाय सन्तत्यै।
- <11.11.2> अपच्छि.दिव वा एत.द्यज्ञकाण्डँ- यदुक्थानि, यदेति सलोमत्वाय।
- <11.11.3> एवाह्यसि वीरयु.रिति- समानँ वदन्तीद.मित्थ.मस.दिति।
- <11.11.4> इन्द्रँ विश्वा अवीवृध.न्नित्यवर्धन्त, ह्येतर्हि यजमान.मेवैतया वर्धन्ति।
- <11.11.5> साकमश्वं भव-त्युक्थाना.मभिजित्या अभिक्रान्त्यै।
- <11.11.6> एतेन ह्यग्र उक्था-न्यध्यजय,न्नेतेनाभ्यक्रामन्।
- <11.11.7> आमहीयवं भवति- क्लृप्ति.श्चान्नाद्यञ्च समानँ वदन्तीषु क्रियत- इद.मित्थ.मस.दिति।
- <11.11.8> क्षत्रँ वा एत.दह.रभि निर्वदति- यत्पञ्चदशँ, यद्गायत्रीषु ब्रह्मसाम भवति- ब्रह्म चैव तत्क्षत्रञ्च सयुजीकरोति- ब्रह्मैव क्षत्रस्य पुरस्ता.न्नि दधाति- ब्रह्मणे क्षत्रञ्च विश.ञ्चानुगे करोति।

- <11.11.9> ब्रह्म वै पूर्व.महः,~ क्षत्र.न्द्वितीयँ, यद्गायत्रीषु ब्रह्मसाम भवति- ब्रह्म तद्यशसाऽर्धयति, ब्रह्म हि गायत्री।
- <11.11.10> तदु समानँ वदन्तीषु क्रियते समृध्यै।
- <11.11.11> आष्टादंष्ट्रे भवतः।
- <11.11.12> ऐयाहा इति वा इन्द्रो वृत्र.मह,न्नैया.दोहोवेति न्यगृह्णा,द्वार्त्रघ्ने सामनी वीर्यवती।
- <11.11.13> ओज एवैताभ्याँ वीर्य.मव रुन्धे।
- <11.11.14> पञ्चदश एव स्तोमो भव-त्योजस्येव तद्वीर्ये प्रति तिष्ठ-त्योजो वीर्यं पञ्चदशः।

## ताण्ड्यब्राह्मणे द्वादशोऽध्यायः

- <12.1.1> ❃ 12.1 दविद्युतत्या रुचेति तृतीयस्याह्नः प्रतिप.द्भवति।
- <12.1.2> दविद्युतती वै गायत्री- परिष्टोभन्ती त्रिष्टु-ब्गवाशी.र्जगती- त्रीणि रूपाणि समारभते, त्रिरात्रस्याविस्रंसाय।
- <12.1.3> एते असृग्र.मिन्दव- इत्यनुरूपो भवति।
- <12.1.4> एत इति वै प्रजापति.र्देवा.नसृज-तासृग्र.मिति मनुष्या-निन्दव इति पितॄं-स्तदेव तदभि वदति।
- <12.1.5> पूर्वमु चैव तद्रूप-मपरेण रूपेणानु वदति, यत्पूर्वं रूप.मपरेण रूपेणानुवदति- तदनुरूप.स्यानुरूपत्व,मनुरूप एनं पुत्रो जायते- य एवँ वेद।
- <12.1.6> स्तोत्रीयानुरूपौ तृचौ भवतः- प्राणापानाना.मवरुध्यै।
- <12.1.7> राजा मेधाभि.रीयते- पवमानो मनाव-ध्यन्तरिक्षेण यातव इति।
- <12.1.8> अन्तरिक्षदेवत्य.स्तृचो भव,त्यन्तरिक्षदेवत्य.मेत.दह-र्यत्तृतीय- न्तदेव तदभि वदति।
- <12.1.9> पञ्चर्चो भवति, पञ्चपदा पङ्क्तिः- पाङ्क्त.मन्न-मन्नाद्य.स्यावरुध्यै।
- <12.1.10> तृच उत्तमो भवति, येनैव प्राणेन प्रयन्ति- तमभ्युप यन्ति।
- <12.1.11> सप्तदश एव स्तोमो भवति- प्रतिष्ठायै प्रजात्यै।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

- <12.2.1> ❃ 12.2 अग्निनाऽग्नि स्समिध्यत- इत्याग्नेय.माज्यं भवति।
- <12.2.2> पूर्वे एव तदहनी समिद्धे- तृतीय.मह.रभि समिन्धे।
- <12.2.3> मित्रं हुवे पूत.दक्ष-मिति राथन्तरं मैत्रावरुणम्।
- <12.2.4> हुव इति वै राथन्तरं रूपम्।
- <12.2.5> रथन्तर.मेत.त्परोक्षँ- यद्वैरूपं. राथन्तर.मेव तद्रूप न्निर्द्योतयति।
- <12.2.6> इन्द्रेण सं हि दृक्षस- इत्यैन्द्रम्।
- <12.2.7> समिव वा इमे लोका ददृशिरे,ऽन्तरिक्षदेवत्य.मेत.दह-र्यत्तृतीय- न्तदेव तदभि वदति।
- <12.2.8> ता हुवे ययो.रिद.मिति राथन्तर.मैन्द्राग्नम्।
- <12.2.9> हुव इति वै राथन्तरं रूपं, रथन्तर.मेत.त्परोक्षँ- यद्वैरूपं, राथन्तर.मेव तद्रूप.न्निर्द्योतयति स्तोमः।
- <12.3.1> ❃ 12.3 उच्चा ते जात.मन्धस इति गायत्री भवति।
- <12.3.2> [12]उद्वद्वा एत.दह-र्य.त्तृतीय- न्तदेव तदभि वदति।
- <12.3.3> अन्धस्वती भव,त्यहर्वा अन्धो-ऽह्न आरम्भः।
- <12.3.4> अभि सोमास आयव इति।
- <12.3.5> अभीति रथन्तरस्य रूपं- बृह.दिति बृहत, उभयो स्सह रूप.मुपै,त्युभौ हि वर्णा.वेत.दहः।
- <12.3.6> तिस्रो वाच ईरयति, प्रवह्नि.रिति तृतीयस्याह्नो रूप-न्तेन तृतीय.मह.रारभन्ते।
- <12.3.7> त्रिष्टुभ स्सत्यो जगत्यो रूपेण, जागतं ह्येत.दहः।
- <12.3.8> गायत्रं भवति, यदेव गायत्रस्य ब्राह्मणम्।
- <12.3.9> वैष्टम्भं भवति।
- <12.3.10> अहर्वा एत.दव्लीयत- तद्देवा वैष्टम्भै-र्व्यष्टभ्नुवं,स्तद्वैष्टम्भस्य वैष्टम्भत्वम्।
- <12.3.11> दिश इति निधन.मुपयन्ति- दिशा.न्धृत्यै।
- <12.3.12> पौरूमद्गं भवति।

[12] त्रिवृद्वा एतदहः इति पाठान्तरम्?

- <12.3.13> अहर्वा एत.दह्लीयमान.न्तद्रक्षां.स्यन्वसचन्त, तस्मा.द्देवाः पौरूमद्गेन रक्षां.स्यपाघ्न,न्नप पाप्मानं हते- पौरूमद्गेन तुष्टुवानः।
- <12.3.14> देवाश्च वाऽसुरा.श्चास्पर्धन्त, ते देवा असुराणां पौरूमद्गेन पुरोऽमज्जयन्, यत्पुरोऽमज्जयं-स्तस्मा.त्पौरूमद्गं, पाप्मान.मेवैतेन भ्रातृव्यं मज्जयति।
- <12.3.15> गौतमं भवति।
- <12.3.16> यदेव गौतमस्य ब्राह्मणम्।
- <12.3.17> उभयत.स्स्तोभ-न्तथा ह्येतस्याह्नो रूपम्।
- <12.3.18> अन्तरिक्षं भवति।
- <12.3.19> अन्तरिक्षदेवत्य.मेत.दह-र्यत्तृतीय,मन्तरिक्ष एव तदन्तरिक्षेण स्तुवते प्रतिष्ठायै।
- <12.3.20> आष्कार.णिधन.ङ्काण्वं भवति।
- <12.3.21> असिति वै राथन्तरं रूपं- हसिति बार्हत,न्तृतीय.मेव तद्रूप.मुप यन्ति समृद्ध्यै।
- <12.3.22> अङ्गिरसां सङ्क्रोशो भवति।
- <12.3.23> एतेन वा अङ्गिरस स्सङ्क्रोशमाना स्स्वर्गँ लोक.माय.न्त्स्वर्गस्य लोकस्यानुख्यात्यै, स्वर्गा.ल्लोका.न्न च्यवते- तुष्टुवान स्स्तोमः।
- <12.4.1> ❃ 12.4 यद्याव इन्द्र ते शत.मिति शतवत्यो भवन्ति।
- <12.4.2> शतव.द्वै पशूनां रूपं- सहस्रव,त्पशूना.मेवैताभी रूप.मव रुन्धे।
- <12.4.3> वय.ङ्घ त्वा सुतावन्त इति सतोबृहत्यो, वर्षीय.श्छन्द आक्रमतेऽनपभ्रंशाय।
- <12.4.4> तरणि.रि.त्सिषासति- वाजं पुरन्ध्या युजा। आव इन्द्रं पुरुहूतन्न मे गिरे-त्याव.दक्षर,मुद्धतमिव वै तृतीय.मह,र्यदेव ताव.दक्षरं भव-त्यह.रेवैतेन प्रतिष्ठापयति।
- <12.4.5> पञ्चनिधनँ वैरूपं पृष्ठं भवति- दिशा.न्धृत्यै।
- <12.4.6> पञ्चपदा पङ्क्तिः, पाङ्क्त.मन्न-मन्नाद्य.स्यावरुद्ध्यै।
- <12.4.7> दिशाँ वा एत.त्साम यद्वैरूप,न्दिशो ह्येवैतेनाभि वदति।
- <12.4.8> अथ यत्पञ्चनिधन- न्तेनर्तूनां पञ्च ह्युतवः।

- <12.4.9> ऋतुभिश्च वा इमे लोका दिग्भिश्चाऽऽवृता,स्तेष्वेवोभयेषु यजमानं प्रतिष्ठापयति, यजमानँ वा अनु प्रति.तिष्ठन्त-मुद्गाता प्रति तिष्ठति- य एवँ विद्वान् वैरूपेणोद्गायति।
- <12.4.10> दिग्व.द्भवति- भ्रातृव्य.स्यापनुत्त्यै।
- <12.4.11> दिशँ विशमिति निधन.मुपयन्ति- दिशा.न्धृत्यै।
- <12.4.12> हसि.त्युपरिष्टा.द्दिशा.न्निधन.मुप यन्ति- तेन बार्हतम्।
- <12.4.13> राथन्तरो वा अयँ लोको- बार्हतोऽसा,वुभे एव तद्बृह.द्रथन्तरयो रूपेणाप राध्नोति।
- <12.4.14> अनड्वाहौ वा एतौ देवयानौ यजमानस्य- यद्बृह.द्रथन्तरे, तावेव तद्युनक्ति- स्वर्गस्य लोकस्य समष्ट्यै।
- <12.4.15> अश्वव.द्भवति प्रजात्यै।
- <12.4.16> यथा मण्डूक आ.द्करो-त्येव.न्निधन.मुपय-न्त्ययातयामतायै।
- <12.4.17> द्वादश वैरूपाणि भवन्ति, द्वादश मासा स्सँवत्सर- स्सँवत्सर एव प्रति तिष्ठति।
- <12.4.18> विरूप स्सँवत्सरो- विरूप.मन्न- मन्नाद्यस्यावरुद्ध्यै।
- <12.4.19> महावैष्टम्भं ब्रह्मसाम भव-त्यन्नाद्यस्यावरुद्ध्यै।
- <12.4.20> यदा वै पुरुषोऽन्न.म-त्त्यथान्तरतो विष्टब्धः।
- <12.4.21> दिश इति निधन.मुपयन्ति- दिशा.न्धृत्यै।
- <12.4.22> सतो.बृहतीषु स्तुवन्ति- पूर्वयो.रह्नोꣳ प्रत्युद्यमाय।
- <12.4.23> रौरव.मच्छावाकसाम भवति।
- <12.4.24> अग्निर्वै रूरो- रुद्रोऽग्निः।
- <12.4.25> अग्निर्वा एतस्य पशू.नप क्रमयति- यस्य पशवोऽप क्राम,न्त्यग्नि.रेव तस्य पशू.नभि क्रमयति- यस्य पशवोऽभिक्रामन्ति।
- <12.4.26> अभ्यभ्येवास्य पशवꣳ क्रामन्ति- य एवँ विद्वा.न्रौरवेण स्तुवते।
- <12.4.27> परिष्टुब्धेड,न्तथा ह्येतस्याह्नो रूपं स्तोमः।

- <12.5.1> ❃ 12.5 तिस्रो वाच उदीरत-इति तृतीयस्याह्नो रूप,न्तेन तृतीय.महरा रभन्ते।
- <12.5.2> उद्वद्वा एत.त्त्रिवृ.दह-र्य.त्तृतीय,न्तदेव तदभिवदति।
- <12.5.3> आ सोता परिषिञ्चत-इति परिवत्यो भवन्ति।
- <12.5.4> अन्तो वै तृतीय.मह-स्तस्यैता॰ पर्याप्त्यै।
- <12.5.5> सखाय आ निषीदत- इत्युद्धत.मिव वै तृतीय.मह,र्यदाह निषीदते-त्यह.रेवैतेन प्रतिष्ठापयति।
- <12.5.6> सुतासो मधुमत्तमा- इत्यनुष्टुभ स्सत्यो जगत्यो रूपेण, जागतं ह्येत.दहः।
- <12.5.7> पवित्रन्ते विततं ब्रह्मणस्पत-इति।
- <12.5.8> वितत.मिव वा इद.मन्तरिक्ष.मन्तरेमे, अन्तरिक्षदेवत्य.मेत.दह-र्यत्तृतीय.-न्तदेव तदभि वदति।
- <12.5.9> गायत्रं भवति- यदेव गायत्रस्य ब्राह्मणम्।
- <12.5.10> पाष्ठौहं भवति।
- <12.5.11> पष्ठवा.ङ्वा एतेनाऽऽङ्गिरस.श्चतुर्थस्याह्नो वाचँ वदन्ती.मुपाशृणो,त्स हो वागिति निधन.मुपै,त्तदस्याभ्युदित- न्तदह.रवसत्।
- <12.5.12> वाच.स्साम भवति।
- <12.5.13> वाग्वै द्वादशाहो- वाच्येव तद्वाचा स्तुवते- यज्ञस्य प्रभूत्यै।
- <12.5.14> निष्किरीया स्सत्त्र.मासत- ते तृतीय.महर्न प्राजानं,स्ता.नेत.त्साम गायमानान् वा.गुपाप्लव-त्तेन तृतीय.मह॰ प्राजानं,स्तेऽब्रुव-न्नियँ वाव न.स्तृतीय.मह-रदीदृश.दिति, तृतीयस्यैवैषाऽऽह्नो दृष्टिः।
- <12.5.15> शौक्तं भवति।
- <12.5.16> शुक्ति.र्वा एतेनाऽऽङ्गिरसोऽञ्जसा स्वर्गँ लोक.मपश्य-त्स्वर्गस्य लोकस्यानुख्यात्यै, स्वर्गा.ल्लोका.न्न च्यवते तुष्टुवानः।
- <12.5.17> गौरीवितं भवति- यदेव गौरीवितस्य ब्राह्मणम्।
- <12.5.18> त्वाष्ट्रीसाम भवति।

Sri Satchidananda Avadhoota Datta Peetham • Mysore •

- <12.5.19> इन्द्रँ वा अक्ष्यामयिणं भूतानि नास्वापयं,स्तमेतेन त्वाष्ट्रोऽस्वापयं,स्तद्वाव ता.स्तर्ह्यकामयन्त।
- <12.5.20> कामसनि साम त्वाष्ट्रीसाम, काम.मेवैतेनाव रुन्धे।
- <12.5.21> इन्द्रो वृत्रा.द्बिभ्य.द्गां प्राविश,त्त.न्त्वाष्ट्रोऽब्रुव.न्जनयामेति, तमेतै स्सामभि रजनय,न्जायामहा इति- वै सत्त्र.मासते- जायन्त एव।
- <12.5.22> अरिष्टं भवति।
- <12.5.23> देवाश्च वा असुरा.श्चास्पर्धन्त, यन्देवाना.मन्न-न्न स समभव,द्यमसुराणां सं सोऽभव,त्ते देवा.स्तपोऽतप्यन्त- त एत.दरिष्ट.मपश्यं-स्ततोऽय.न्देवाना.मन्न-त्सं सोऽभव,-द्यमसुराणा-न्न स समभव-दनेनारिषा.मेति, तदरिष्ट.स्यारिष्टत्व,मरिष्टया एवारिष्ट.मन्तत४ क्रियते।
- <12.5.24> त्रीडं भवति- त्रिरात्रस्य धृत्यै।
- <12.5.25> द्रवन्ती.मिडा.मुत्तमा.मुप यन्ति- चतुर्थस्याह्न स्सन्तत्यै स्तोमः।
- <12.6.1> ❃ 12.6 प्रमंहिष्ठाय गायतेति।
- <12.6.2> यद्गायतेति- महस एव तद्रूप.क्रियते।
- <12.6.3> तन्ते मद.ङ्गणीमसीति- मदवद्वै रसव.त्तृतीयसवनं, मदमेव तद्रस.न्दधाति।
- <12.6.4> श्रुधी हवं तिरश्च्या-इति श्रुत्या एव।
- <12.6.5> प्रमंहिष्ठीयँ भवति।
- <12.6.6> प्रमंहिष्ठीयेन वा इन्द्रो वृत्राय वज्रं प्रावर्तय-त्तमस्तृणुत, भ्रातृव्यवा.न्प्रमंहिष्ठीये-नोक्थानि प्रणयेत- स्तृणुते भ्रातृव्यं- वसीया९ आत्मना भवति।
- <12.6.7> हारिवर्णं भवति।
- <12.6.8> इन्द्रश्च वै नमुचि.श्चाऽऽसुर स्समदधाता,न्न नो नक्त.न्न दिवाऽहन-न्नाऽऽर्द्रेण न शुष्केणेति, तस्य व्युष्टाया.मनुदित आदित्येऽपां फेनेन शिरोऽच्छिन,देतद्वै न नक्त.न्न दिवा-यद्युष्टाया.मनुदित आदित्य, -एत.न्नाऽऽर्द्र-न्न शुष्कँ- यदपां फेन,स्तदेनं पापीयाँ वाचँ वद.दन्ववर्तत- वीरह.न्नद्रुहोऽद्रुह इति, तन्नर्चा न साम्नाऽपहन्तु.मशक्नोत्।
- <12.6.9> हारिवर्णस्यैव निधने.नापाऽऽहत।
- <12.6.10> अप शुचं हते- हारिवर्णस्य निधनेन, श्रियञ्च हर.श्चोपैति- तुष्टुवानः।

- <12.6.11> तैरश्च्यं भवति।
- <12.6.12> अङ्गिरस स्स्वर्गँ लोकँ यन्तो रक्षां.स्यन्वसचन्त, तान्येतेन तिरश्चाऽङ्गिरस-स्तिर्य.ङ्वर्यवै,द्य.त्तिर्य.ङ्वर्यवै-त्तस्मा.त्तैरश्च्यं, पाप्मा वाव स ता.नसचत- तन्तैरश्च्ये-नापाघ्न,ताऽप पाप्मानं हते- तैरश्च्येन तुष्टुवानः।
- <12.6.13> सप्तदश एव स्तोमो भवति- प्रतिष्ठायै प्रजात्यै।
- <12.7.1> ❈ 12.7 प्र त आश्विनीः पवमानधेनव-इति चतुर्थस्याह्नः प्रतिप.द्भवति।
- <12.7.2> आप्ते त्रिरात्रे- गायत्र्यो रूपेण द्वितीयं प्र यन्ति, प्रेति वै गायत्र्या रूपम्।
- <12.7.3> जगती प्रतिप.द्भवति, जागत.मेत.दह-र्यत्तृतीय,ञ्जगत्या एव तज्जगती.मभि सङ्क्रामन्ति।
- <12.7.4> यदतोऽन्या प्रतिप.त्स्या-त्प्रतिकूलं वाऽनुकूलँ वा स्यात्।
- <12.7.5> पवमानो अजीजन-दित्यनुरूपो भवति।
- <12.7.6> जनद्वद्वा एत.दह.-र्यच्चतुर्थ,मन्नाद्य.ञ्जनयति- विराज.ञ्जनय-त्येकविंशं स्तोम.ञ्जनयति।
- <12.7.7> पूर्वमु चैव तद्रूप.मपरेण रूपेणानु वदति, तदनुरूप.स्यानुरूपत्वम्।
- <12.7.8> अनुरूप एनं पुत्रो जायते- य एवँ वेद।
- <12.7.9> स्तोत्रीयानुरूपौ तृचौ भवतः- प्राणापानाना.मवरुद्ध्यै।
- <12.7.10> षड्रृचौ भवत- ऋतूना.न्धृत्यै।
- <12.7.11> तृच उत्तमो भवति, येनैव प्राणेन प्रयन्ति- तमभ्यु.द्यन्ति।
- <12.7.12> एकविंश एव स्तोमो भवति- प्रतिष्ठायै, प्रति तिष्ठति।
- <12.8.1> ❈ 12.8 जनस्य गोपा अजनिष्ट जागृवि- रित्याग्नेय.माज्यं भवति।
- <12.8.2> जनद्वद्वा एत.दह-र्यच्चतुर्थ,मन्नाद्य.ञ्जनयति- विराज.ञ्जनय-त्येकविंशं स्तोम.ञ्जनयति।
- <12.8.3> अयँ वां मित्रावरुणेति बार्हतं मैत्रावरुणम्।
- <12.8.4> बृह.देत.त्परोऽक्षँ- यद्वैराजं, बार्हत.मेव तद्रूप न्निर्द्योतयति।
- <12.8.5> इन्द्रो दधीचो अस्थभि.रिति- दाधीच.स्तृचो भवति।

- <12.8.6> दध्यङ्ङा आङ्गिरसो देवानां पुरोधानीय आसी-दन्नं वै ब्रह्मणः पुरोधा-अन्नाद्यस्यावरुध्यै।
- <12.8.7> इयँ वामस्य मन्मन-इत्यैन्द्राग्नम्।
- <12.8.8> इन्द्राग्नी पूर्व्यस्तुति-रभ्रा.द्वृष्टि.रिवाजनी,त्यानुष्टुभी वै वृष्टि-रानुष्टुभ.मेत.दह-र्यच्चतुर्थं, समीच्यौ विराजौ दधा-त्यन्नाद्याय स्तोमः।
- <12.9.1> ❃ 12.9 पयस्व दक्षसाधन-इति गायत्री भवति सिध्यै।
- <12.9.2> यत्पवस्वेति- तद्बृहतो रूपं, बार्हतं ह्येत.दहः।
- <12.9.3> तवाहं सोम रारण- सख्य इन्दो दिवे दिवे। पुरूणि बभ्रो निचरन्ति मामव-परिधीꣳरति ताꣳ इहीति।
- <12.9.4> अति ह्याय.न्छकुना इव, पप्ति.मेत्यति ह्यपतत्।
- <12.9.5> पुनानो अक्रमी-दभीति।
- <12.9.6> गायत्र्य स्सत्य.स्त्रिष्टुभो रूपेण, तस्मा.त्त्रिष्टुभाँ लोके क्रियन्ते।
- <12.9.7> गायत्रं भवति- यदेव गायत्रस्य ब्राह्मणम्।
- <12.9.8> चतु.र्णिधन माथर्वणं भवति- चतूरात्रस्य धृत्यै।
- <12.9.9> चतुष्पदाऽनुष्टुभा,ऽऽनुष्टुभ.मेत.दह-र्यच्चतुर्थम्।
- <12.9.10> भेषजँ वाऽऽथर्वणानि- भेषजमेव त.त्करोति।
- <12.9.11> निधनकामं भवति।
- <12.9.12> एकँ वा अन्येन निरुक्तेन निधनेन कामं सनो,त्यथैत.न्निधनकामं-सर्वेषा.ङ्कामाना.मवरुध्यै।
- <12.9.13> आष्टादंष्ट्रं भवति।
- <12.9.14> यदेवाऽष्टादंष्ट्रस्य ब्राह्मणम्।
- <12.9.15> आभीशवं भव-त्यह्नो धृत्यै।
- <12.9.16> यद्वा अधृत-मभीशुना त.द्दाधार।
- <12.9.17> अनुतुन्न.ङ्गायति- तथा ह्येतस्याह्नो रूपम्।
- <12.9.18> चतु.र्णिधन.माङ्गिरसं भवति- चतूरात्रस्य धृत्यै।

- <12.9.19> स्वः पृष्ठ- न्तथा ह्येतस्याह्नो रूपम्।
- <12.9.20> सत्त्रासाहीयं भवति।
- <12.9.21> यद्वा असुराणा.मसोढ.मासी-त्तद्देवा स्सत्त्रासाहीयेनासहन्त- सत्त्रैना नसक्ष्महीति, तत्सत्त्रासाहीयस्य सत्त्रासाहीयत्वम्। (सत्त्रा एनान्, सत्रा - युगपदा)
- <12.9.22> सत्त्रा भ्रातृव्यं सहते- सत्त्रासाहीयेन तुष्टुवानः।
- <12.9.23> गायत्रीषु स्तुवन्ति प्रतिष्ठायै ब्रह्मवर्चसाय, येनैव प्राणेन प्रयन्ति- तमभ्युद्यन्ति।
- <12.9.24> वृषण्वत्यो गायत्र्यो भवन्ति, तदु त्रैष्टुभा.द्रूपा.न्नयन्ति स्तोमः।
- <12.10.1> ❈ 12.10 पिबा सोम.मिन्द्र मन्दतु त्वा- यन्ते सुषाव हर्यश्वाद्रिः। सोतु.र्बाहुभ्यां सुयतो ना-र्वे.त्ययत.मिव वै चतुर्थ.मह-स्तस्यैव यत्यै।
- <12.10.2> विश्वाः पृतना अभिभूतर.न्नर इत्यतिजगती, वर्षीय.श्छन्द आ क्रमते- ऽनपभ्रंशाय।
- <12.10.3> अपभ्रंश इव वा एष यज्ज्यायस.श्छन्दसः कनीय.श्छन्द उपैति, यदेषा चतुर्थेऽह-न्यतिजगती क्रियतेऽनपभ्रंशाय।
- <12.10.4> यो राजा चर्षणीना.मिति।
- <12.10.5> राज्ये ह्येतर्हि वाचोऽगच्छ,न्राज्य.मेवैतया यजमान.ङ्गमयन्ति।
- <12.10.6> छन्दोभिर्वै देवा आदित्यं स्वर्गँ लोक.महर,न्त्स नाध्रियत, तँ वैराजस्य निधने.नादृंहं,स्तस्मा.त्पराङ्ङार्वाङ्ङाऽऽदित्य.स्तपति, पराङ्ङार्वा-ङ्ङेकारः।
- <12.10.7> प्रस्तावं प्रस्तुत्य विष्टम्भान् विष्टभ्नोति, मुखत एव त.दन्नाद्य.न्धत्ते- मुखं हि साम्नः प्रस्तावः।
- <12.10.8> दशकृत्वो विष्टभ्नोति, दशाक्षरा विरा-ड्वैराज.मन्न-मन्नाद्य.स्यावरुद्ध्यै।
- <12.10.9> त्रिंशत्कृत्वो विष्टभ्नोति, भूयसोऽन्नाद्यस्यावरुद्ध्यै।
- <12.10.10> वैराजं साम भवति- विराड्ढु स्तुवन्ति, वैराजा विष्टम्भा स्समीची-र्विराजो दधा-त्यन्नाद्याय।
- <12.10.11> अनुतुन्न.ङ्गायति रेतोधेया,याऽनुतुन्नाद्धि रेतो धीयते।

Sri Sachchidananda Avadhoota Datta Peetham

- <12.10.12> दक्षिण ऊरा.वुद्गातु.रग्निं मन्थन्ति, दक्षिणतो हि रेत स्सिच्यते।
- <12.10.13> उपाकृतेऽहिङ्कृते मन्थन्ति, जात.मभि हिङ्करोति।
- <12.10.14> तस्मा.ज्जातं पुत्रं- पशवोऽभि हिङ्कुर्वन्ति।
- <12.10.15> तस्मै जाता.यामीमांसन्त, गार्हपत्ये प्रहरामा3 आग्नीध्रा3 आहवनीया3 इति।
- <12.10.16> आहवनीये प्रहर-न्त्येत.दायतनो वै यजमानो, य.दाहवनीये स्वमेव तदायतन- ञ्ज्योतिष्म.त्करोति।
- <12.10.17> ज्योतिष्मा.न्ब्रह्मवर्चसी भवति- य एवँ वेद।
- <12.10.18> अभि जुहोति शान्त्यै।
- <12.10.19> आज्येनाभि जुहोति, तेजो वा आज्य- न्तेज एव तदात्म.न्धत्ते।
- <12.10.20> प्रेद्धो अग्ने दीदिहि पुरो न-इति विराजाऽभि जुहो,त्यन्नँ विरा-डन्नाद्य.स्यावरुध्यै।
- <12.10.21> त्रैशोकं ब्रह्मसाम भवति।
- <12.10.22> अतिजगतीषु स्तुव-न्त्यह्न उत्क्रान्त्या, उद्वा एतेनाह्ना क्रामन्ति।
- <12.10.23> दिवेति निधन.मुप यन्ति- पाप्मनोऽपहत्या, अप पाप्मानं हते- त्रैशोकेन तुष्टुवानः।
- <12.10.24> भारद्वाजस्य पृ.श्न्यच्छावाकसाम भवति।
- <12.10.25> अन्नँ वै देवाꣳ पृश्नीति वद,न्त्यन्नाद्य.स्यावरुध्यै।
- <12.10.26> इडाभि.रैड, न्तथा ह्येतस्याह्नो रूपं स्तोमः।
- <12.11.1> ❃ 12.11 परि प्रिया दिवꣳ कवि-रिंति परिवत्यो भव,न्त्यन्तो वै चतुर्थ.मह-स्तस्यैताꣳ पर्याप्त्यै।
- <12.11.2> त्वं ह्यङ्ग दैव्येति, त्वमिति बृहतो रूपं- बार्हतं ह्येत.दहः।
- <12.11.3> सोमꣳ पुनान ऊर्मिणा-ऽव्यँ वारँ वि धावति। अग्रे वाचꣳ पवमानꣳ कनिक्रद.दिति।
- <12.11.4> अग्रं ह्येतर्हि वाचोऽगच्छ-न्नग्र.मेवैतया यजमान.ङ्गमयन्ति।

- <12.11.5> पुरोजिती वो अन्धस- इति विराजौ, वैराजं ह्येत.दहः।

- <12.11.6> सोमꣳ पवते जनिता मतीना-मिति प्रातस्सवने षोडशिन.ङ्गृहीत-न्त न्तृतीयसवने प्र जनयन्ति।

- <12.11.7> त्रिष्टुभ.स्सत्यो जगत्यो रूपेण, तस्मा.ज्जगतीनाँ लोके क्रियन्ते।

- <12.11.8> गायत्रं भवति- यदेव गायत्रस्य ब्राह्मणम्।

- <12.11.9> और्णायवं भवति।

- <12.11.10> अङ्गिरसो वै सत्त्र.मासत, तेषा.माप्त स्स्पृत स्स्वर्गो लोक आसी,त्पन्थानन्तु देवयान.न्न प्राजानं,स्तेषा.ङ्कल्याण आङ्गिरसो ध्याय.मुदव्रज-त्स ऊर्णायु.ङ्गन्धर्व.मप्सरसां मध्ये प्रेङ्खयमाण.मुपै,त्स इया.मिति याँ या.मभ्यदिश-त्सैन मकामयत, तमभ्यवद-त्कल्याणा3 इत्याप्तो वै व.स्स्पृत स्स्वर्गो लोकꣳ- पन्थान.न्तु देवयान.न्न प्रजानी-थेदं साम स्वर्ग्यँ लोक-न्तेन स्तुत्वा स्वर्गँ लोक.मेष्यथ, मा तु वोचो-ऽह.मदर्श.मिति।

- <12.11.11> स ऐ.त्कल्याण,स्सोऽब्रवी-दाप्तो वै न.स्स्पृत स्स्वर्गो लोकꣳ- पन्थान.न्तु देवयानं प्र जानीम, -इदं साम स्वर्ग्य-न्तेन स्तुत्वा स्वर्गँ लोक.मेष्याम इति, क.स्तेऽवोचदि-त्यह.मेवादर्श.मिति, तेन स्तुत्वा स्वर्गँ लोक.माय,न्नहीयत कल्याणो-ऽनृतं हि सोऽवद,त्स एष श्वित्रः।

- <12.11.12> स्वर्ग्यँ वा एत.त्साम, स्वर्गलोकꣳ पुण्यलोको भव-त्यौर्णायवेन तुष्टुवानः।

- <12.11.13> बृहत्कं भवति।

- <12.11.14> सामाꣳर्षेयेण प्रशस्त,न्त्वं ही-त्यन्नाद्य.स्यावरुद्ध्यै, हीति वा अन्नं प्रदीयते-षोडशिनमु चैवैतेनो.द्यच्छति।

- <12.11.15> आतीषादीयं भवति।

- <12.11.16> आयुर्वा आतीषादीय-मायुषोऽवरुद्ध्यै।

- <12.11.17> आतमितो.र्निधन.मुपय-न्त्यायु.रेव सर्व.माप्नुवन्ति।

- <12.11.18> नानदं भवति।

- <12.11.19> ज्यायोऽभ्यारम्भ.मतिहाय- पञ्चम.मह ष्षष्ठस्याह्न आरम्भ,स्तेन षष्ठ.मह.रा रभन्ते सन्तत्यै।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

- <12.11.20> षोडशाक्षरेण प्रस्तौति, षोडशिनमु चैवैतेनो.द्यच्छति।
- <12.11.21> आन्धीगवं भवति।
- <12.11.22> पद्या वा अन्या विरा.डक्षर्या-ऽन्याऽस्मा.ल्लोका.त्पद्याया, विराजाऽन्नाद्य मवरुन्धेऽमुष्मा-दक्षर्य्य.योभयो.र्लोकयो.रन्नाद्य.मव रुन्ध- आन्धीगवेन तुष्टुवानः।
- <12.11.23> वात्सप्रं भवति।
- <12.11.24> एतस्मिन् वै वैराजं प्रतिष्ठितं, प्रति तिष्ठति- वात्सप्रेण तुष्टुवानः।
- <12.11.25> वत्सप्री.र्भालन्दन श्श्रद्धा न्नाविन्दत, स तपोऽतप्यत- स एत.द्वात्सप्र मपश्य,त्स श्रद्धा.मविन्दत, श्रद्धाँ विन्दामहा इति वै सत्त्र.मासते, विन्दते श्रद्धाम्।
- <12.11.26> ईनिधन.न्तथा ह्येतस्याह्नो रूप,न्निधनान्ता॰ पवमाना भव-न्त्यह्नो धृत्यै स्तोमः।
- <12.12.1>❃ 12.12 अग्निँ वो वृधन्त.मिति।
- <12.12.2> अवर्धन्त ह्येतर्हि- यजमान.मेव तथा वर्धयन्ति।
- <12.12.3> वयमु त्वा.मपूर्व्य- इत्यपूर्वां ह्येतर्हि प्रजापते.स्तनू.मगच्छ-न्नपूर्व.मेवैतया यजमान.ङ्गमयन्ति।
- <12.12.4> इम.मिन्द्र सुतं पिब ज्येष्ठ.ममर्त्यं मद-मिति, ज्यैष्ठ्यं ह्येतर्हि वाचोऽगच्छ-न्ज्यैष्ठ्य.मेवैतया यजमान.ङ्गमयन्ति।
- <12.12.5> सैन्धुक्षितं भवति।
- <12.12.6> सिन्धुक्षि.द्वै राजन्यर्षि-र्ज्यो.गपरुद्ध.श्चर-न्त्स एत.त्सैन्धुक्षित.मपश्य-त्सोऽवागच्छ.त्प्रत्यतिष्ठ,दव गच्छति प्रति तिष्ठति- सैन्धुक्षितेन तुष्टुवानः।
- <12.12.7> सौभरं भवति बृहत.स्तेजः।
- <12.12.8> पन्न.मिव वै चतुर्थ.मह,स्तदेतेन बृहत.स्तेजसोत्तभ्नोति सौभरेण।
- <12.12.9> वसिष्ठस्य प्रियं भवति।
- <12.12.10> एतेन वै वसिष्ठ इन्द्रस्य प्रेमाण.मगच्छ,त्प्रेमाण न्देवताना ङ्गच्छति- वासिष्ठेन तुष्टुवान स्स्तोमः।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

- <12.13.1>❃ 12.13 इन्द्रश्च बृहच्च समभवता,न्तमिन्द्रं बृह.देकया तन्वाऽत्यरिच्यत, तस्या अबिभे-दनया माऽभि.भविष्यतीति, सोऽब्रवी-त्षोडशी तेऽयँ यज्ञक्रतु.रस्त्विति, स षोडश्यभव-त्तदस्य जन्म।
- <12.13.2> अति श्रिया भ्रातृव्यं रिच्यते- यो गायत्रीषु द्विपदासु बृहता षोडशिना स्तुते।
- <12.13.3> उप नो हरिभि स्स्तुत-मित्येता वै गायत्र्यो द्विपदा- एतासु स्तोतव्यम्।
- <12.13.4> इन्द्रꣳ प्रजापति.मुपाधाव-द्वृत्रं हनानीति, तस्मा एता.मनुष्टुभ.मपहरसं प्रायच्छ-त्तया नास्तृणुत, यदस्तृता व्यनद-त्तन्नानदस्य नानदत्वम्।
- <12.13.5> तं पुन.रुपाधाव-त्तस्मै सप्तानां होत्राणां हरो निर्माय प्रायच्छ-त्त.मस्तृणुत।
- <12.13.6> स्तृणुते तँ- यं तुस्तूर्षते- य एवँ वेद।
- <12.13.7> तस्मा.द्धरिवतीषु स्तुवन्ति- हरिवती श्शंसन्ति- हरिवतीषु ग्रहो गृह्यते, हरो ह्यस्मै निर्माय प्रायच्छत्।
- <12.13.8> एकविंशाऽऽयतनो वा एष- यत्षोडशी, सप्त हि प्रातस्सवने होत्रा वषट्कुर्वन्ति- सप्त माध्यन्दिने सवने- सप्त तृतीयसवने।
- <12.13.9> गौरीवितं भवति।
- <12.13.10> गौरीविति.र्वा एत.च्छाक्त्यो ब्रह्मणोऽतिरिक्त मपश्य-त्तद्गौरीवित मभव,दतिरिक्तँ वा एत-दतिरिक्तेन स्तुवन्ति- यद्गौरीवितेन षोडशिनं श्वस्तनवा.न्भव-त्यपि प्रजाया उपक्लृप्तः।
- <12.13.11> विशालँ लिब्जया भूत्याऽभ्यधा.दिति होवा-चोपोदिति र्गोपालेयो-ऽनुष्टुभि नानद.मक-गौरीवितेन षोडशिन.मस्तोष्टा,ऽञ्जसा श्रिय.मुपागा-न्न श्रिया अवपद्यत इति।
- <12.13.12> एष वै विशालँ लिब्जया भूत्याऽभि दधाति- योऽनुष्टुभि नानद.ङ्कृत्वा- गौरीवितेन षोडशिना स्तुते-ऽञ्जसा श्रिय.मुपैति- न श्रिया अवपद्यते।
- <12.13.13> शक्वरीषु षोडशिना स्तुवीत, यꣳ कामयेत वज्री स्या.मिति।
- <12.13.14> वज्रो वै षोडशी- वज्र श्शक्वर्यो- वज्रेणैवास्मै वज्रं स्पृणोति- वज्री भवति।
- <12.13.15> अनुष्टुप्सु षोडशिना स्तुवीत, यꣳ कामयेत न मा वा.गतिवदे.दिति।

- <12.13.16> वज्रो वै षोडशी- वा.गनुष्टु-ब्वज्रेणैवास्मै वाचं स्पृणोति- नैनँ वागति वदति।
- <12.13.17> असावि सोम इन्द्र त-इत्येतासु स्तोतव्यम्।
- <12.13.18> विराङ्वन्नाद्यकाम ष्षोडशिना स्तुवीत- वज्रो वै षोडशी- वैराज.मन्नँ-वज्रेणैवास्मा अन्नं स्पृणो-त्यन्नादो भवति।
- <12.13.19> प्र वो महे वृधे भरध्व-मित्येतासु स्तोतव्यम्।
- <12.13.20> त्रयस्त्रिंश.दक्षरा वा एता विराजो- यदेकविंशतिः प्रतिष्ठा, सा य.द्वादश प्रजाति.स्सा।
- <12.13.21> प्रतिष्ठाय प्रजायते- नो चान्तस्थाया.ञ्जीर्यते- य एवँ वेद।
- <12.13.22> अथ वा एता एकपदा.स्त्र्यक्षरा विष्णो.श्छन्दो भुरिज.श्शक्वर्यः।
- <12.13.23> एताभिर्वा इन्द्रो वृत्र.मह-न्क्षिप्रँ वा एताभिः पाप्मानं हन्ति- क्षिप्रँ वसीया.न्भवति।
- <12.13.24> चतुस्त्रिंश.दक्षरा.स्संस्तुता भवन्ति- त्रयस्त्रिंश.द्देवताः-प्रजापति.श्चतुस्त्रिंशो, देवतानां प्रजापति.मेवोप य-न्त्यरिष्ट्यै।
- <12.13.25> हिरण्यं सम्प्रदायं- षोडशिना स्तुवते, ज्योतिष्मा.नस्य षोडशी भवति।
- <12.13.26> अश्वः कृष्ण उप तिष्ठति- साम्येक्ष्याय, भ्रातृव्यलोक.मेव स विधमं.स्तिष्ठति।
- <12.13.27> एकाक्षरँ वै देवाना.मवम.ञ्छन्द आसी-त्सप्ताक्षरं परम,न्नवाक्षर.मसुराणा मवम.ञ्छन्द आसी-त्पञ्चदशाक्षरं परम,न्देवाश्च वा असुरा.श्चास्पर्धन्त, तान्प्रजापति रानुष्टुभो भूत्वाऽन्तराऽतिष्ठ,त्तन्देवासुरा व्यह्वयन्त- स देवा.नुपाऽऽवर्तत, ततो देवा अभव-न्पराऽसुराः।
- <12.13.28> भव.त्यात्मना- पराऽस्य भ्रातृव्यो भवति, य एवँ वेद।
- <12.13.29> ते देवा असुराणा.मेकाक्षरेणैव पञ्चदशाक्षर.मवृञ्जत- द्व्यक्षरेण चतुर्दशाक्षर-न्त्र्यक्षरेण त्रयोदशाक्षर-ञ्चतु.रक्षरेण द्वादशाक्षरं- पञ्चाक्षरेणैकादशाक्षरं- षडक्षरेण दशाक्षरं-सप्ताक्षरेण नवाक्षर-मष्टाभि.रेवाष्टा.ववृञ्जत।
- <12.13.30> एव.मेव भ्रातृव्या-द्धूर्तिँ वृङ्क्ते, य एवँ वेद।

- <12.13.31> अपरुद्ध.यज्ञ इव वा एष- यत्षोडशी, कनीयस्विन इव वै तर्हि देवा आसन्भूयस्विनोऽसुराः, कनीयस्वी भूयस्विनं भ्रातृव्यँ वृङ्क्ते- य एवँ वेद।
- <12.13.32> यस्मा.दन्यो न परोऽस्ति जातो- य आबभूव भुवनानि विश्वा। प्रजापतिः प्रजया सँविदान-स्त्रीणि ज्योतींषि सचते स षोडशी-त्युद्गाता ग्रह.मवेक्षते।
- <12.13.33> ज्योतिष्मा.नस्य षोडशी भवति- य एवँ वेद।
- <12.13.34> एकविंश एव स्तोमो भवति- प्रतिष्ठायै प्रति तिष्ठति।

## ताण्ड्यब्राह्मणे त्रयोदशोऽध्यायः

- <13.1.1> ❃ 13.1 गोवि.त्पवस्व वसुवि.द्धिरण्यवि.दिति- पञ्चमस्याह्नः प्रतिप.द्भवति।
- <13.1.2> गोविद्वा एत.द्वसुवि-द्धिरण्यवि-द्यच्छक्वर्यः।
- <13.1.3> पशव.श्शक्वर्य- स्सर्वं पशुभि.र्विन्दते।
- <13.1.4> त्वं सुवीरो असि सोम विश्ववि.दि-त्येष वाव सुवीरो- यस्य पशव,स्तदेव तदभि वदति।
- <13.1.5> तास्ते क्षरन्तु मधुम.द्घृतं पय-इति, मधुम.द्वै घृतं पयः- पशवः~ क्षरन्ति, तदेव तदभि वदति।
- <13.1.6> पवमानस्य विश्ववि-दित्यनुरूपो भवति।
- <13.1.7> विश्व.मेव तद्वित्त.मभि वदति, विश्वं हि पशुभि.र्विन्दते।
- <13.1.8> प्र ते सर्गा असृक्षतेति, सृष्टानीव ह्येतर्ह्यहानि।
- <13.1.9> पूर्वमु चैव तद्रूप-मपरेण रूपेणानु वदति, यत्पूर्वं रूपेणानुवदति- तदनुरूपस्यानुरूपत्व,मनुरूप एनं पुत्रो जायते- य एवँ वेद, स्तोत्रीयानुरूपौ तृचौ भवतः- प्राणापानाना मवरुध्यै।
- <13.1.10> सप्तर्चौ भवत श्छन्दसा.न्धृत्यै।
- <13.1.11> चतुर्ऋचो भवति प्रतिष्ठायै।
- <13.1.12> तृच उत्तमो भवति, येनैव प्राणेन प्रयन्ति- तमभ्युद्यन्ति।
- <13.1.13> त्रिणव एव स्तोमो भवति प्रतिष्ठायै पुष्ट्यै, त्रिवृद्वा- एष पुष्टः।
- <13.2.1> ❃ 13.2 तव श्रियो वर्षस्येव विद्युत- इत्याग्नेय.माज्यं भवति।

- <13.2.2> श्रीर्वै पशव- श्श्री श्शाक्वर्य- स्तदेव तदभि वदति।
- <13.2.3> अग्ने.श्चिकित्र उषसा.मिवेतय- इतीतानीव ह्येत.र्ह्यहानीति।
- <13.2.4> आ ते यतन्ते रथ्यो यथा पृथ-गित्येव ह्येत.र्ह्यहानि यतन्ते।
- <13.2.5> पुरूरुणा चिद्ध्य.स्त्यवो नूनँ वाँ वरुणेति- मैत्रावरुणम्।
- <13.2.6> यद्वै यज्ञस्य दुरिष्ट- न्तद्वरुणो गृह्णाति, तदेव तदव यजति।
- <13.2.7> उत्तिष्ठ.न्नोजसा सहे-त्यैन्द्रम्।
- <13.2.8> पञ्च वा ऋतव उत्थानस्य रूप-मोजसा सहे,त्योजसैव वीर्येण सहोत्तिष्ठन्ति।
- <13.2.9> इन्द्राग्नी युवा.मिम-इति राथन्तर.मैन्द्राग्नम्।
- <13.2.10> रथन्तर.मेत.त्परोऽक्षँ- यच्छक्वर्यो, राथन्तर.मेव तद्रूप.न्निर्द्योतयति स्तोमः।
- <13.3.1> ❃ 13.3 अर्षा सोम द्युमत्तम-इति विष्णुमत्यो गायत्र्यो भवन्ति।
- <13.3.2> ब्रह्म वै गायत्री- यज्ञो विष्णु,र्ब्रह्मण्येव तद्यज्ञं प्रतिष्ठापयति।
- <13.3.3> सोम उष्वाण.स्सोतृभिरिति सिमानां रूपं, स्वेनैवैता.स्तद्रूपेण समर्धयति।
- <13.3.4> यत्सोम चित्र.मुक्थ्यमिति- गायत्र्य स्सत्य.स्त्रिष्टुभो रूपेण, तस्मा.त्त्रिष्टुभाँ लोके क्रियन्ते।
- <13.3.5> गायत्रं भवति, यदेव गायत्रस्य ब्राह्मणम्।
- <13.3.6> यण्वं भवति, पशवो वै यण्वं- पशूना.मवरुध्यै।
- <13.3.7> सन्तत.ङ्गायति- यज्ञस्य सन्तत्यै।
- <13.3.8> अध्यर्धेड.न्तथा ह्येतस्याह्नो रूपम्।
- <13.3.9> शाकलं भवति।
- <13.3.10> एतेन वै शकलꣳ पञ्चमेऽहनि प्रत्यतिष्ठ,त्प्रति तिष्ठति- शाकलेन तुष्टुवानः।
- <13.3.11> वार्शं भवति।
- <13.3.12> वृशो वैजान.स्त्र्यरुणस्य त्रैधातव.स्यैक्ष्वाकस्य पुरोहित आसी,त्स ऐक्ष्वाको ऽधावय.द्ब्राह्मणकुमारं- रथेन व्यच्छिन,त्स पुरोहित.मब्रवी-त्तव मा पुरोधाया मिद मीदृ गुपागा-दिति, त.मेतेन साम्ना समैरय-त्तद्वाव स तर्ह्यकामयत, कामसनि साम वार्शं- ङ्काम मेवैतेनाव रुन्धे।

- <13.3.13> अध्यर्धेड.न्तथा ह्येतस्याह्नो रूपम्।
- <13.3.14> मानवं भवति।
- <13.3.15> एतेन वै मनुः प्रजापतिं भूमान.मगच्छ,त्प्रजायते बहु.र्भवति- मानवेन तुष्टुवानः।
- <13.3.16> आनूपं भवति।
- <13.3.17> एतेन वै वध्र्यश्व आनूपः पशूनां भूमान.माश्नुत, पशूनां भूमान.मश्नुत- आनूपेन तुष्टुवानः।
- <13.3.18> वाम्रं भवति।
- <13.3.19> सामाऽऽर्षेयेण प्रशस्तँ- यँ वै गामश्वं पुरुषं प्रशंसन्ति- वाम इति तं प्रशंस,-न्त्यह.रेवैतेन प्र शंसन्ति।
- <13.3.20> अध्यर्धेड.न्तथा ह्येतस्याह्नो रूपम्।
- <13.3.21> त्रिणिधन.माग्नेयं भवति प्रतिष्ठायै।
- <13.3.22> अग्नि स्सृष्टो नो.ददीप्यत- तं प्रजापति.रेतेन साम्नोपाधम-त्स उ.ददीप्यत, दीप्तिश्च वा एत.त्साम, ब्रह्मवर्चसञ्च दीप्ति.श्चैवैतेन ब्रह्मवर्चस.ञ्चाव रुन्धे।
- <13.3.23> शैशवं भवति।
- <13.3.24> शिशुर्वा आङ्गिरसो मन्त्रकृतां मन्त्रकृ.दासी-त्स पितॄ.न्पुत्रका इत्याऽमन्त्रयत, तं पितरोऽब्रुव-न्नधर्म.ङ्करोषि- यो नः पितॄ.न्त्सतः पुत्रका इत्यामन्त्रयस इति, सोऽब्रवी-दहँ वाव वः पिताऽस्मि- यो मन्त्रकृ.दस्मीति, ते देवे.ष्वपृच्छन्त, ते देवा अबुव-न्नेष वाव पिता- यो मन्त्रकृ.दिति, तद्वै स उदजय,दुज्जयति शैशवेन- तुष्टुवानः।
- <13.3.25> गायत्रीषु स्तुवन्ति प्रतिष्ठायै ब्रह्मवर्चसाय, येनैव प्राणेन प्रयन्ति- तमभ्युद्यन्ति।
- <13.3.26> विष्णुमत्यो गायत्र्यो भवन्ति, तदु त्रैष्टुभा.द्रूपा.न्न यन्ति स्तोमः।
- <13.4.1> ❃ 13.4 इन्द्रः प्रजापति.मुपाधाव-द्वृत्रं हनानीति, तस्मा एत.च्छन्दोभ्य इन्द्रियँ वीर्य न्निर्माय प्रायच्छ-देतेन शक्नुहीति, तच्छक्वरीणां शक्वरीत्वं, सीमान.मभिन-त्त.त्सिमा मह्य.मकरो,त्तन्मह्या महा.न्घोष आसी-त्तन्महानाम्न्यः।

- <13.4.2> दिशः पञ्चपदा दाधा-रर्तू.न्त्षद्वदा- छन्दांसि सप्तपदा- पुरुष.न्द्विपदा।
- <13.4.3> द्योपशा स्संस्तुता भवन्ति- तस्मा.द्योपशाः पशवः।
- <13.4.4> इडे अभितोऽथकार- न्तस्मा.च्छृङ्गे तीक्ष्णीयसी स्तूपात्।
- <13.4.5> उपक्षुद्रा गायति, तस्मा.दुपक्षुद्राः पशवः।
- <13.4.6> असंश्लिष्टा गायति- तस्मा.दसंश्लिष्टाः पशवः।
- <13.4.7> नानारूपा गायति- तस्मा.न्नानारूपाः पशवः।
- <13.4.8> आपो वै क्षीर.रसा आसं-स्ते देवाः पाप.वसीयसा.दबिभयु,र्यदप उपनिधाय स्तुवते- पाप.वसीयसो विधृत्यै।
- <13.4.9> विधृतिः पाप.वसीयसो भवति- य एवँ वेद।
- <13.4.10> गायत्र.मयनं भवति ब्रह्मवर्चस.कामस्य, स्व.र्णिधनं मधुनाऽमुष्मि.न्लोक उप तिष्ठते, त्रैष्टुभ.मयनं भव-त्योजस्काम-स्याथकार.णिधन माज्येनामुष्मि.न्लोक उप तिष्ठते, जागत.मयनं भवति पशुकाम-स्येडानिधनं पयसाऽमुष्मि.न्लोक उप तिष्ठते।
- <13.4.11> अञ्जसाऽऽर्यौं माल्य श्शक्करीः प्रारौत्सी.दिति होवाचा-ऽलम्मं पारिजानतं रजनः कौणेयो- यद्येनाः प्रतिष्ठापं शक्ष्यती,त्येतद्वा एतासा.मञ्जयति- प्रतिष्ठिता य आभिः~ क्षिप्रं प्रस्तुत्य क्षिप्र.मुद्गायति।
- <13.4.12> शक्करीभि स्स्तुत्वा पुरीषेण स्तुवते।
- <13.4.13> पशवो वै शक्कर्यो- गोष्ठः पुरीष-ङ्गोष्ठ.मेव तत्पशुभ्यः पर्यस्यन्ति, तमेवैना.न्प्रवर्तय.न्त्यविस्रंसाय।
- <13.4.14> इन्द्रो मदाय वावृध-इत्यवर्धन्त ह्येतर्हि।
- <13.4.15> तासु बार्हद्गिरम्।
- <13.4.16> स्वादो.रित्था विषुवत- इति विषुवान् वै पञ्चम.मह,स्तासु रायोवाजीयम्।
- <13.4.7> इन्द्रो यती.न्त्सालावृकेभ्यः प्रायच्छ,त्तेषा.त्त्रय उदशिष्यन्त पृथुरश्मि-र्बृहद्गिरी- रायोवाज,स्तेऽब्रुव.न्को न इमा.न्पुत्रा.न्भरिष्यती-त्यह.मितीन्द्रोऽब्रवी,-त्तानधि.निधाय परिचार्यं चर.द्वर्धयं-स्तान् वर्धयित्वाऽब्रवी,त्कुमारका वरान् वृणीध्व.मिति, क्षत्रं मह्य.मित्यब्रवी-त्पृथुरश्मि-स्तस्मा एतेन पार्थुरश्मेन क्षत्रं प्रायच्छ,त्क्षत्रकाम एतेन स्तुवीत- क्षत्रस्यैवास्य प्रकाशो

भवति, ब्रह्मवर्चसं मह्य.मित्यब्रवी-त्बृहद्गिरि-स्तस्मा एतेन बार्हद्गिरेण ब्रह्मवर्चसं प्रायच्छ,द्ब्रह्मवर्चसकाम एतेन स्तुवीत- ब्रह्मवर्चसी भवति, पशू.न्मह्य.मित्यब्रवी-द्रायोवाज-स्तस्मा एतेन रायोवाजीयेन पशू.न्प्रायच्छ,त्पशुकाम एतेन स्तुवीत- पशुमा.न्भवति।

- <13.4.18> पार्थुरश्मं राजन्याय ब्रह्मसाम कुर्या-द्बार्हद्गिरं ब्राह्मणाय- रायोवाजीयं वैश्याय, स्वेनैवेनां.स्तद्रूपेण समर्धयति स्तोमः।
- <13.5.1> ❀13.5 असाव्यंशु.र्मदायेति गायत्री भवति, मदवद्वै रसव.त्तृतीयसवनं- मद.मेव तद्रस.न्दधाति।
- <13.5.2> अभि द्युम्नं बृह.द्यश इ,त्यभीति रथन्तरस्य रूपं- बृह.दिति बृहत- उभयो.स्सह रूप.मुपै-त्युभौ हि वर्णा.वेत.दहः।
- <13.5.3> प्राणा शिशु.र्महीना-मिति सिमानां रूपं, मह्यो हि सिमा- स्स्वेनैवैना-स्तद्रूपेण समर्धयति।
- <13.5.4> पवस्व वाजसातय-इति वैष्णव्योऽनुष्टुभो भवन्ति।
- <13.5.5> यज्ञो वै विष्णु,र्यदत्र नापि क्रियते- तद्विष्णुना यज्ञेनापि करोति।
- <13.5.6> इन्दु.र्वाजी पवते गोन्योघा-इति सिमानां रूपं, स्वेनैवैना.स्तद्रूपेण समर्धयति।
- <13.5.7> त्रिष्टुभ स्सत्यो जगत्यो रूपेण, तस्मा.ज्जगतीनाँ लोके क्रियन्ते।
- <13.5.7> गायत्रं भवति- यदेव गायत्रस्य ब्राह्मणम्।
- <13.5.9> सन्तनि भवति- पञ्चमस्याह्न.स्सन्तत्यै।
- <13.5.90> वाग्वा एषा प्रतता यद्द्वादशाह,स्तस्या एष विषुवान्- यत्पञ्चम.मह,- स्ता.मेवैतेन सन्तनोति।
- <13.5.11> च्यावनं भवति।
- <13.5.12> प्रजातिर्वै च्यावनं, प्र जायते बहु.र्भवति- च्यावनेन तुष्टुवानः।
- <13.5.13> एभ्यो वै लोकेभ्यो वृष्टि.रपाक्राम,त्तां प्रजापति श्च्यावनेनाच्यावय,- द्य.दच्यावय-त्तच्च्यावनस्य च्यावनत्व,ञ्च्यावयति वृष्टि- श्च्यावनेन तुष्टुवानः।
- <13.5.14> क्रोशं भवति।

- <13.5.15> एतेन वा इन्द्र- इन्द्रक्रोशे विश्वामित्र.जमदग्नी इमा गाव इत्याऽक्रोश,त्पशूना मवरुद्ध्यै- क्रोश.ङ्क्रियते।
- <13.5.16> गौरीवितं भवति- यदेव गौरीवितस्य ब्राह्मणम्।
- <13.5.17> ऋषभ श्शाक्करो भवति।
- <13.5.18> पशवो वै शक्कर्य॰- पशुष्वेव तन्मिथुन.मप्यर्जति प्रजात्यै, न ह वा अनृषभा॰ पशव॰ प्र जायन्ते।
- <13.5.19> पार्थं भवति।
- <13.5.20> एतेन वै पृथु.वैंन्य उभयेषां पशूना.माधिपत्य.माश्नु,तोभयेषां पशूना माधिपत्य मश्नुते- पार्थेन तुष्टुवानः।
- <13.5.21> अष्टेड॰ पदस्तोभो भवति।
- <13.5.22> इन्द्रो वृत्राय वज्र.मुदयच्छ,त्तं षोडशभि.र्भोगै॰ पर्यभुज,त्स एतं पदस्तोभ.मपश्य-त्तेनापाऽऽवेष्टय,दपाऽऽवेष्टय.न्निव गाये.त्पाप्मनोऽपहत्यै।
- <13.5.23> पाप्मा वाव स त.मगृह्ण,त्तं पदस्तोभेनापाऽऽहता,ऽप पाप्मानं हते- पदस्तोभेन तुष्टुवानः।
- <13.5.24> पदो.रुत्तम.मपश्य-त्तत्पद.स्तोभस्य पदस्तोभत्वम्।
- <13.5.25> द्वादश.निधनो भवति- प्रतिष्ठायै।
- <13.5.26> दाशस्पत्यं भवति।
- <13.5.27> याँ वै गां प्रशंसन्ति, दाशस्पत्येति तां प्रशंस,न्त्यह.रेवैतेन प्र शंसन्ति।
- <13.5.28> निधनान्ता॰ पवमाना भव,न्त्यह्नो धृत्यै स्तोमः।
- <13.6.1> ❃ 13.6 आ ते अग्न इधीम.हीति।
- <13.6.2> अपच्छिदिव वा एत.द्यज्ञकाण्डँ- यदुक्थानि, यदेति सलोमत्वायैव।
- <13.6.3> इन्द्राय साम गायतेति पूर्णा॰ ककुभ,स्तेनानशनायुको भवति।
- <13.6.4> पुरुषो वै ककु-प्पुरुषमेव तन्मध्यत॰ प्रीणाति।
- <13.6.5> असावि सोम इन्द्र त-इति सिमानां रूपं, स्वेनैवैनां.स्तद्रूपेण समर्धयति।
- <13.6.6> सञ्जयं भवति।

- <13.6.7> देवाश्च वा असुराश्च समदधत, यतरे न.स्सञ्जयां-स्तेषान्न꣡ पशवोऽसानिति, ते देवा असुरा.न्त्सञ्जयेन समजयन्, यत्समजयं-स्तस्मा.त्सञ्जयं, पशूना.मवरुद्ध्यै- सञ्जय.ङ्क्रियते।
- <13.6.8> सौमित्रं भवति।
- <13.6.9> दीर्घजिह्वी वा इदं रक्षो यज्ञहा यज्ञिया.नवलिह.त्यचर,त्तामिन्द्र꣡ कयाचन मायया हन्तु.न्नाशंसता,ऽथ ह सुमित्र꣡ कुत्स꣡ कल्याण आस, त.मब्रवी-दिमा.मच्छा ब्रूष्वेति-तामच्छाऽब्रूत, सैन.मब्रवी-न्नाहैत.न्न शुश्रुव- प्रिय.मिव तु मे हृदयस्येति, तामज्ञपय,त्तां संस्कृतेऽहता-न्तद्वाव तौ तर्ह्यकामयेता-ङ्कामसनि साम सौमित्र-ङ्काम मेवैतेनाव रुन्धे।
- <13.6.10> सुमित्र स्स.न्क्रूर.मक-रित्येनँ वा.गभ्यवद,त्तं शु.गार्च्छ,त्स तपोऽतप्यत- स एत.त्सौमित्र.मपश्य-त्तेन शुच.मपाऽऽहता,ऽप शुचं हते- सौमित्रेण तुष्टुवानः।
- <13.6.11> महावैश्वामित्रं भवति।
- <13.6.12> पाप्मानं हत्वा- य.दमहीयन्त, तन्महावैश्वामित्रस्य महावैश्वामित्रत्वम्।
- <13.6.13> हयाइ हया- ओहा ओहेति पशू.नेवैतेन न्यौहन्त।
- <13.6.14> त्रीडं भवति- त्रिरात्रस्य धृत्यै।
- <13.6.15> द्रवन्ती.मिडा-मुत्तमा.मुप यन्ति, षष्ठस्याह्न स्सन्तत्यै।
- <13.6.16> त्रिणव एव स्तोमो भवति- प्रतिष्ठायै पुष्ट्यै, त्रिवृद्वा एष पुष्टः।
- <13.7.1> ❋ 13.7 ज्योति.र्यज्ञस्य पवते मधुप्रिय-मिति षष्ठस्याह्न꣡ प्रतिप.द्भवति।
- <13.7.2> ज्योतिर्वै गायत्री छन्दसा-ञ्ज्योती रेवती साम्ना-ञ्ज्योति स्त्रयस्त्रिंश स्स्तोमाना, -ञ्ज्योति.रेव तत्सम्य.क्सन्दधा,त्यपि ह पुत्रस्य पुत्रो ज्योतिष्मा.न्भवति।
- <13.7.3> मधु प्रियमिति, पशवो वै रेवत्यो मधुप्रिय- न्तदेव तदभि वदति।
- <13.7.4> मदिन्तमो मत्सर इन्द्रियो रस इ,तीन्द्रियँ वै वीर्यं- रस꣡ पशव,स्तदेव तदभि वदति।
- <13.7.5> असृक्षत प्र वाजिन- इत्यनुरूपो भवति।
- <13.7.6> सृष्टानीव ह्येत.र्ह्यहानि।

- <13.7.7> पूर्वमु चैव तद्रूप-मपरेण रूपेणानु वदति, यत्पूर्वं रूप.मपरेण रूपेणानुवदति- तदनुरूप.स्यानुरूपत्व,मनुरूप एनं पुत्रो जायते- य एवँ वेद, स्तोत्रीयानुरूपौ तृचौ भवतः- प्राणापानाना.मवरुध्यै।
- <13.7.8> दशर्चौ भवतो, दशाक्षरा विरा-ड्वैराज.मन्न-मन्नाद्यस्यावरुध्यै।
- <13.7.9> उत्तरो दशर्चो भवति सोदर्क- इन्द्रियस्य वीर्यस्य रस.स्यानतिक्षाराय।
- <13.7.10> यत्र वै देवा इन्द्रियँ वीर्यं रस.मपश्यं-स्तदनु न्यतुदन्।
- <13.7.11> चतुर्ऋचो भवति- प्रतिष्ठायै।
- <13.7.12> ध्वस्त्रे वै पुरुषन्ती तरन्त.पुरुमीढाभ्याँ वैतदश्विभ्यां सहस्रा.ण्यदित्सता,- न्ता.वैक्षेता- ङ्कथ.न्नाविद.मात्त.मप्रतिगृहीतं स्यादिति, तौ प्रत्येता- न्ध्वस्त्रयोः पुरुषन्त्यो.रा सहस्राणि दद्महे- तर.त्स मन्दी धावतीति, ततो वै तत्तयो.रात्त.मप्रतिगृहीत.मभवत्।
- <13.7.13> आत्त.मस्याप्रतिगृहीतं भवति- य एवँ वेद।
- <13.7.14> विनाराशंसो भव-त्युभय.स्यान्नाद्य.स्यावरुध्यै- मानुषस्य च दैवस्य च।
- <13.7.15> तृच उत्तमो भवति, येनैव प्राणेन प्रयन्ति- तमभ्युद्यन्ति।
- <13.7.16> त्रयस्त्रिंश एव स्तोमो भवति प्रतिष्ठायै, देवतासु वा एष प्रतिष्ठितः।
- <13.8.1> ❁ 13.8 इमं स्तोम.मर्हते जातवेदस-इत्याग्नेय.माज्यं भवति सोदर्क-मिन्द्रियस्य वीर्यस्य रस.स्यानतिक्षाराय, यत्र वै देवा इन्द्रियँ वीर्यं रस मपश्यं-स्तदनु न्यतुदन्।
- <13.8.2> प्रति वां सूर उदित- इति सूरव.न्मैत्रावरुणम्।
- <13.8.3> अन्तो वै सूरो-ऽन्त एत.त्षष्ठ.मह.रह्ना,मन्त एव तदन्ते स्तुवते प्रतिष्ठायै।
- <13.8.4> भिन्धि विश्वा अप द्विष-इत्यैन्द्रं सोदर्क-मिन्द्रियस्य वीर्यस्य रस.स्यानतिक्षाराय, यत्र वै देवा इन्द्रियँ वीर्यं रस.मपश्यं-स्तदनु न्यतुदन्।
- <13.8.5> यज्ञस्य हि स्थ ऋत्विज- इत्यैन्द्राग्नं सोदर्क-मिन्द्रियस्य वीर्यस्य रस.स्यानतिक्षाराय, यत्र वै देवा इन्द्रियँ वीर्यं रस.मपश्यं-स्तदनु न्यतुद.न्त्स्तोमः।
- <13.9.1> ❁ 13.9 इन्द्रा.येन्दो मरुत्वत- इति मरुत्वत्यो गायत्र्यो भवन्ति।
- <13.9.2> मरुत्वद्धि माध्यन्दिनं सवनम्।
- <13.9.3> मृज्यमान स्सुहस्त्य- इति सिमानां रूपम्।

- <13.9.4> समानँ वै सिमानां रूपं रेवतीनाञ्च, सिमाभ्यो ह्यधि रेवत्यः प्र जायन्ते।
- <13.9.5> एतमु त्य.न्दश क्षिप-इत्यादित्या, आदित्या वा इमाः प्रजा-स्तासा.मेव मध्यतः प्रति तिष्ठति।
- <13.9.6> गायत्र्य स्सत्य.स्त्रिष्टुभो रूपेण, तस्मा.त्त्रिष्टुभाँ लोके क्रियन्ते।
- <13.9.7> गायत्रं भवति, यदेव गायत्रस्य ब्राह्मणम्।
- <13.9.8> इषोवृधीयं भवति।
- <13.9.9> पशवो वा इषोवृधीयं- पशूना.मवरुद्ध्या, -इषे वै पञ्चम.मह-र्वृधे षष्ठ.मवर्धन्त, ह्येतर्हि यजमान.मेवैतेन वर्धयन्ति।
- <13.9.10> क्रौञ्चं भवति।
- <13.9.11> क्रुङ्ङेष्य.मह.रविन्द,देष्य.मिव वै षष्ठ.मह-रेवैतेन विन्दन्ति।
- <13.9.12> वाज.दावर्यो भवन्ति।
- <13.9.13> अन्नँ वै वाजो-ऽन्नाद्य.स्यावरुद्ध्यै, यदा हि वा अन्न-मथ गौ-रथाश्वोऽथ पुरुषो वाजी।
- <13.9.14> रेवत्यो भवन्ति- प्रतिष्ठायै।
- <13.9.15> षण्णिधना- षड्रात्रस्य धृत्यै।
- <13.9.16> आपो वै रेवत्य,स्ता यत्पृष्ठ.ङ्कुर्यु-रपशु.र्यजमान स्स्या-त्पशू.नस्य निर्दहेयु,-र्यत्र वा आपो विवर्तन्ते- तदोषधयो जायन्ते,ऽथ यत्रावतिष्ठन्ते निर्मृतुका.स्तत्र भवन्ति, तस्मा.त्पवमाने कुर्वन्ति- पराचा हि पवमानेन स्तुवते।
- <13.9.17> मेथी वा इषोवृधीयं- रज्जुः क्रौञ्चं- वत्सो वाजदावर्यो- रेवत्यो मातरो, यदेता.न्येवं सामानि क्रियन्त- एव.मेव प्रत्ता.न्दुग्धे।
- <13.9.18> औक्ष्णोरन्ध्रे भवतः।
- <13.9.19> उक्ष्णोरन्ध्रो वा एताभ्या.ङ्काव्योऽञ्जसा स्वर्गँ लोक मपश्य-त्स्वर्गस्य लोक.स्यानुख्यात्यै, स्वर्गा.ल्लोका.न्न च्यवते- तुष्टुवानः।
- <13.9.20> वाजजि.द्भवति- सर्वस्याऽऽस्यै सर्वस्य जित्यै, सर्वँ वा एते वाज.ञ्जयन्ति- ये षष्ठ मह रागच्छन्ति।

- <13.9.21> अन्नँ वै वाजो-ऽन्नाद्य.स्यावरुद्ध्यै।
- <13.9.22> वरुण.साम भवति।
- <13.9.23> एतेन वै वरुणो राज्य.माधिपत्य.मगच्छ-द्यशोऽभव,द्राज्य-माधिपत्य.ङ्गच्छति- यशो भवति- वरुणसाम्ना तुष्टुवानः।
- <13.9.24> अङ्गिरसा.ङ्गोष्ठो भवति।
- <13.9.25> पशवो वै रेवत्यो, गोष्ठ.मेव तत्पशुभ्य॰ पर्यस्यन्ति-तमेवैना.न्प्रवर्तय.न्त्यविस्रंसाय।
- <13.9.26> इहव.द्वामदेव्यं भवति।
- <13.9.27> एतेन वै वामदेवोऽन्नस्य पुरोधा.मगच्छ,दन्नँ वै ब्रह्मण॰ पुरोधा-अन्नस्यावरुद्ध्यै।
- <13.9.28> गायत्रीषु स्तुवन्ति- प्रतिष्ठायै ब्रह्मवर्चसाय, येनैव प्राणेन प्रयन्ति-तमभ्युद्यन्ति।
- <13.9.29> मरुत्वत्यो गायत्र्यो भवन्ति- तदु त्रैष्टुभा.द्रूपान्न यन्ति स्तोमः।
- <13.10.1>❃ 13.10 यातयामा.न्यन्यानि च्छन्दां-स्ययातयामा गायत्री, तस्मा.द्गायत्रीषु स्तुवन्ति।
- <13.10.2> सुरूप कृत्नु.मूतय-इत्यभ्यारम्भेण षड्दा.ष्षष्ठस्याह्नो रूप,न्तेन षष्ठ.मह.रा रभन्ते सन्तत्यै।
- <13.10.3> उभे यदिन्द्र रोदसी-इति षड्दा- ष्षष्ठस्याह्नो रूप,न्तेन षष्ठ.मह.रा रभन्ते सन्तत्यै।
- <13.10.4> रेवतीषु वारवन्तीयं पृष्ठं भवति।
- <13.10.5> अपाँ वा एष रसो- यद्रेवत्यो, रेवतीनां रसो- यद्वारवन्तीयं, सरसा एव तद्रेवती॰ प्रयुङ्क्ते- यद्वारवन्तीयेन पृष्ठेन स्तुवते।
- <13.10.6> रेवद्वा एत.द्रैवत्यँ- यद्वारवन्तीय,माऽस्य रेवा.न्रेवत्यो जायते।
- <13.10.7> रेवा.न्भवति- य एवँ वेद।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

- <13.10.8> केशिने वा एत.द्दाल्भ्याय सामाऽऽवि.रभव,त्तदेन.मब्रवी-दगातारो मा गायन्ति- मा मयोद्गासिषु.रिति, कथन्त आगा भगव- इत्यब्रवी,दागेय.मेवा-स्म्यागाय.न्निव गाये-त्प्रतिष्ठायै, त.दलम्मं पारिजानतं पश्चादक्षं शयान.मेता.मागा.ज्ञायन्त.मजाना,त्त मब्रवी.त्पुरस्त्वा दधा इति, तमब्रुव-न्को न्वय-ङ्कस्मा अलमि,त्यलन्नु वै मह्य-मिति, तदलम्म.स्यालम्मत्वम्।
- <13.10.9> इहेहेति गाये-त्प्रतिष्ठायै।
- <13.10.11> ऋषभो रैवतो भवति।
- <13.10.11> पशवो वै रैवत्यꣳ- पशुष्वेव तन्मिथुन.मप्यर्जति प्रजात्यै, न ह वा अनृषभाꣳ पशवꣳ प्र जायन्ते।
- <13.10.12> श्येनो भवति।
- <13.10.13> श्येनो ह वै पूर्व.प्रेतानि वयां.स्याप्नोति, पूर्वप्रेतानीव वै पूर्वा.ण्यहानि-तेषा.माप्त्यै- श्येनꣳ क्रियते।
- <13.10.14> श्येनो वा एत.दह स्सम्पारयितु.मर्हति- स हि वयसा माशिष्ठ-स्तस्यानपहननाय सम्पारणा.यैत.त्क्रियते,ऽन्तो हि षष्ठ.श्चाह.स्सप्तमञ्च।
- <13.10.15> ब्रह्मवादिनो वदन्ति- यद्बृह.दायतनानि पृष्ठा-न्यथैते द्वे गायत्र्यौ- द्वे जगत्यौ- क्व तर्हि बृहत्यो भवन्तीति।
- <13.10.16> ये द्वे जगत्योꣳ पदे- ते गायत्र्या उप सं पद्येते, त.त्सर्वा बृहत्यो भव-न्त्यायतने पृष्ठानि यातय,त्यायतनवा.न्भवति।
- <13.10.17> षद्पदासु स्तुवन्ति- षड्रात्रस्य धृत्यै।
- <13.10.18> सप्तपदया यजति- सप्तमस्याह्न स्सन्तत्यै स्तोमः।
- <13.11.1>❃ 13.11 परि स्वानो गिरिष्ठा-इति परिवत्यो गायत्र्यो भवन्ति, सर्वस्य पर्याप्त्यै।
- <13.11.2> ससुन्वेयो वसूना-मिति पशवो वै वसु, पशूना.मवरुध्यै।
- <13.11.3> तँ व.स्सखायो मदायेति वालखिल्याः।
- <13.11.4> वालखिल्या.वेतौ तृचौ- षष्ठे चाहनि सप्तमे च।
- <13.11.5> यदेतौ वालखिल्यौ तृचौ भवतो-ऽह्नोरेव व्यतिषङ्गा.याव्यवस्रंसाय सन्तत्यै।

- <13.11.6> सोमा॰ पवन्त इन्दव-इत्यनुष्टुभो निभसदो भवन्ति- प्रतिष्ठायै।
- <13.11.7> अया पवा पवस्वैना वसूनीति त्रिष्टुभ.स्सत्यो जगत्यो रूपेण, तस्मा.ज्जगतीनाँ लोके क्रियन्ते।
- <13.11.8> गायत्रं भवति, यदेव गायत्रस्य ब्राह्मणम्।
- <13.11.9> वैदन्वतानि भवन्ति।
- <13.11.10> विदन्वान् वै भार्गव इन्द्रस्य प्रत्यहं,स्तं शु.गार्च्छं,त्स तपोऽतप्यत- स एतानि वैदन्वता.न्यपश्य-त्तै श्शुच.मपाऽऽहता,ऽप शुचं हते- वैदन्वतै.स्तुष्टुवानः।
- <13.11.11> भरद्वाजस्य लोम भवति।
- <13.11.12> पशवो वै लोम- पशूना.मवरुद्ध्यै।
- <13.11.13> तदु दीर्घ.मित्याहु,रायुर्वै दीर्घ-मायुषोऽवरुद्ध्यै।
- <13.11.14> कार्णश्रवसं भवति, श्रृण्वन्ति तुष्टुवानम्।
- <13.11.15> कर्णश्रवा वा एत.दाङ्गिरस॰ पशुकाम स्सामापश्य-त्तेन सहस्रं पशू.नसृजत, यदेत.त्साम भवति- पशूनां पुष्ट्यै।
- <13.11.16> गौरीवितं भवति- यदेव गौरिवितस्य ब्राह्मणम्।
- <13.11.17> मधुश्च्यु.न्निधनं भवति।
- <13.11.18> परम.स्यान्नाद्य.स्यावरुद्ध्यै, परमँ वा एत.दन्नाद्यँ- यन्मधु।
- <13.11.19> प्रजापतेर्वा एतौ स्तनौ यद्घृतश्च्युन्निधनञ्च- मधुश्च्युन्निधनञ्च, यज्ञो वै प्रजापति-स्तमेताभ्या न्दुग्धे, यङ्काम.ङ्कामयते- तन्दुग्धे।
- <13.11.20> क्रौञ्चे भवतः।
- <13.11.21> क्रुङ्ङ्ष्य.मह.रविन्द,देष्यमिव वै षष्ठ.मह-रह.रेवैताभ्याँ विन्दन्ति।
- <13.11.22> श्रौष्टं भवति।
- <13.11.23> श्नुष्टिर्वा एतेनाऽऽङ्गिरसोऽञ्जसा स्वर्गँ लोक.मपश्य-त्स्वर्गस्य लोक.स्यानुख्यात्यै, स्वर्गा.ल्लोका.न्न च्यवते तुष्टुवानः।
- <13.11.24> अग्ने.र्वा एत.द्वैश्वानरस्य साम, दीदिहीति निधन.मुप यन्ति- दीदा एव ह्यग्नि.र्वैश्वानरः।

- <13.11.25> निधनान्ता॰ पवमाना भव-न्त्यह्नो धृत्यै स्तोमः।
- <13.12.1>❈ 13.12 ब्रह्मवादिनो वदन्ति- प्रायणतो द्विपदा॰ कार्या 3 उदयनता3 इति।
- <13.12.2> उदयनत एव कार्या॰, पुरुषो वै द्विपदा॰- प्रतिष्ठायै।
- <13.12.3> वाचा वै सर्वँ यज्ञ न्तन्वते, तस्मा.त्सर्वाँ वाचं पुरुषो वदति- सर्वा ह्यस्मि.न्त्संस्तुता प्रति तिष्ठति।
- <13.12.4> गूर्दो भवति।
- <13.12.5> गोपायनानाँ वै सत्त्र.मासीनाना ङ्किरात.कुल्या.वसुरमाये अन्त॰परिध्यसू.न्प्राकिरता,न्ते- अग्ने त्वन्नो अन्तम-इत्यग्नि.मुपासीदं,-स्तेनासू.नस्पृण्वं-स्तद्वाव ते तर्ह्यकामयन्त- कामसनि साम गूर्द॰- काम.मेवैतेनाव रुन्धे।
- <13.12.6> गोतमस्य भद्रं भवति।
- <13.12.7> आशिष.मेवास्मा एतेनाऽऽशास्ते- साम हि सत्याऽऽशीः।
- <13.12.8> एतेन वै गोतमो जेमानं महिमान.मगच्छ,त्तस्मा.द्ये च पराञ्चो गोतमा-द्ये चार्वाञ्च-स्त उभये गोतमा ऋषयो ब्रुवते।
- <13.12.9> उद्वंशपुत्रो भवति।
- <13.12.10> यद्वा उद्वंशीय-न्तदुद्वंश.पुत्रः।
- <13.12.11> अर्धेडा.मति स्वरति।
- <13.12.12> तस्मा.दूधर्धारा अति चर-न्तीडाया.मन्तत॰ पशुषु प्रति तिष्ठति।
- <13.12.13> क्लृप्त उपरिष्टा.दृक्साम च विमुच्येते- अभ्यु स्वरेण सप्तम.मह स्स्वरति सन्तत्यै।
- <13.12.14> ऊहुषीव वा एतर्हि वा-ग्यदा षडह स्सन्तिष्ठते, न बहु वदे-न्नान्यं पृच्छे-न्नान्यस्मै प्र ब्रूयात्।
- <13.12.15> मधु वाऽऽशये-द्धृतँ वा, यथोहुषो वहं प्रत्यनक्ति- तथा तत्।
- <13.12.16> त्रयस्त्रिंश एव स्तोमो भवति प्रतिष्ठायै- देवतासु वा एष प्रतिष्ठितः।

# ताण्ड्यब्राह्मणे चतुर्दशोऽध्यायः

- <14.1.1> ❃ 14.1 आप्यन्ते वा एत.त्स्तोमा.श्छन्दांसि- यत्षडह आप्यते।
- <14.1.2> आप्ते षडहे, छन्दांसि स्तोमा.न्कृत्वा- प्र यन्ति।
- <14.1.3> प्र काव्य.मुशनेव ब्रुवाण- इति गायत्र्या रूपेण प्र यन्ति।
- <14.1.4> इयँ वै गाय-त्र्यस्यामेव प्रतिष्ठाय प्र यन्ति।
- <14.1.5> त्रिष्टुप्प्रतिप.द्भवति।
- <14.1.6> ओजो वीर्यँ त्रिष्टु,बोज.स्येव वीर्ये पराक्रम्य प्र यन्ति।
- <14.1.7> स्तोत्रीय.स्तृचो भवति- प्राणापानाना.मवरुद्ध्यै।
- <14.1.8> हरिवत्यो भवन्ति- च्छन्दोमाना.मयातयामतायै।
- <14.1.9> द्वादशर्चौ भवतः।
- <14.1.10> द्वादश मासा स्सँवत्सर- स्सँवत्सर.मेव तत्पूर्वस्मै षडहाय प्रत्यु.द्यच्छति- सवीवधतायै।
- <14.1.11> चतुर्विंशति.र्भवन्ति, चतुर्विंशति.रर्धमासा स्सँवत्सर- सँवत्सर.मेव तत्पूर्वस्मै षडहाय प्रत्यु.द्यच्छति- सवीवधतायै।
- <14.1.12> दृत ऐन्द्रोत- इति होवा.चाभिप्रतारी काक्षसेनि,र्ये महावृक्षस्याग्र.ङ्गच्छन्ति- क्व ते ततो भवन्ति- प्रराज.न्पक्षिणᳶ पत-न्त्यवापक्षाᳶ पद्यन्ते।
- <14.1.13> ये वै विद्वांस-स्ते पक्षिणो, येऽविद्वांस-स्तेऽपक्षा,स्त्रिवृ.त्पञ्चदशा.वेव स्तोमौ पक्षौ कृत्वा- स्वर्गँ लोकं प्र यन्ति।
- <14.1.14> चतुर्विंश एव स्तोमो भवति- तेजसे ब्रह्मवर्चसाय।
- <14.2.1> ❃ 14.2 मूर्धान न्दिवो अरतिं पृथिव्या- इत्याग्नेय.माज्यं भवति।
- <14.2.2> मूर्धा वा एष दिवो- यस्तृतीय.स्त्रिरात्रः।
- <14.2.3> वैश्वानर.मृत आ जात.मग्नि.मिति, वैश्वानर इति वा अग्नेᳶ प्रिय.न्धाम, प्रियेणैवैन.न्तद्धाम्ना परोऽक्ष.मुप शिक्षति।
- <14.2.4> प्र वो मित्राय गायतेति द्यावापृथिवीयं मैत्रावरुण,न्द्यावापृथिवी वै मित्रावरुणयोᳶ प्रिय.न्धाम- प्रियेणैवैनौ तद्धाम्ना परोऽक्ष.मुप शिक्षति।

- <14.2.5> इन्द्राऽऽयाहि चित्रभान.वित्यार्भव.मैन्द्र,मृभवो वा इन्द्रस्य प्रिय.न्धाम-प्रियेणैवैन.न्तद्धाम्ना परोऽक्ष.मुप शिक्षति।
- <14.2.6> तमीडिष्व यो अर्चिषे.त्यनिरुक्त.मैन्द्राग्न-न्देवताना.मनभिधर्षा,योत्तमार्धे निराह- देवताना.मप्रणाशाय स्तोमः।
- <14.3.1> ❁ 14.3 वृषा पवस्व धारयेति गायत्री भव-त्यह्नो धृत्यै।
- <14.3.2> वृषण्वत्य.स्त्रिष्टुभो रूपेण, त्रैष्टुभं ह्येतदहः।
- <14.3.3> पुनान स्सोम धारयेति धृत्यै।
- <14.3.4> प्रो अयासी.दिन्दु.रिन्द्रस्य निष्कृत-मिति प्रवत्यो भवन्ति, प्रणि.नीषेण्य.मिव ह्येतदहः।
- <14.3.5> जगत्य स्सत्य.स्त्रिष्टुभो रूपेण- तस्मा.त्त्रिष्टुभाँ लोके क्रियन्ते।
- <14.3.6> गायत्रं भवति, यदेव गायत्रस्य ब्राह्मणम्।
- <14.3.7> सन्तनि भवति- सप्तमस्याह्न.स्सन्तत्यै।
- <14.3.8> यथा वै व्योकसौ विप्रद्रवत- एव.मेते षष्ठ.श्चाह.स्सप्तमञ्च विप्रद्रवत,स्तौ यथा समानीय सँयुज्या,देव.मेवैते एतेन साम्ना सँ युनक्ति।
- <14.3.9> सौपर्णं भवति- स्वर्गस्य लोकस्य समष्ट्यै।
- <14.3.10> यज्ञो वै देवेभ्योऽपाक्राम-त्स सुपर्णरूप.ङ्कृत्वाऽचर,त्त.न्देवा एतै स्सामभि राऽरभन्त, यज्ञ इव वा एष- यच्छन्दोमा- यज्ञस्यैवैष आरम्भः।
- <14.3.11> रोहितकूलीयं भव-त्याजि.जित्यायै।
- <14.3.12> एतेन वै विश्वामित्रो रोहिताभ्यां रोहितकूल आजि.मजयत्।
- <14.3.13> विश्वामित्रो भरतानां मनस्मत्याऽऽया,त्सौदन्तिभि.र्नाम जनतयाऽशं प्रास्य,तेमाँ माँ यूयँ वस्तिका.ञ्जया-थेमानि मह्यँ यूयं पूरयाथ, यदीमा.विदं रोहिता.वश्माऽऽचित ङ्कूल.मुद्वहात इति, स एते सामनी अपश्य-त्ताभ्याँ युक्त्वा प्रासेध-त्स उदजयत्।[13]
- <14.3.14> आजिर्वा एष प्रततो- यद्द्वादशाह,-स्तस्यैते उज्जित्यै।
- <14.3.15> कण्व.रथन्तरं भवति, तेजो वा एत.द्रथन्तरस्य- यत्कण्व.रथन्तरम्।

[13] विश्वामित्रो भरतानां मनस्मत्याया,त्सो दन्तिभि.र्नाम जनतयाशं प्रास्यते, माँ माँ यूय.मस्तिका.ञ्जया-थेमानि महयँ यूयं पूरयाथ, यदीमा.विदं रोहिता.वश्माचित ङ्कूल.मुद्वहात इति, स एते सामनी अपश्य-त्ताभ्याँ युक्त्वा प्रासेध-त्स उदजयत्।

- <14.3.16> सरस.मेव तद्रथन्तरं प्र युङ्क्ते, य.त्कण्व.रथन्तरेण सप्तमेऽहनि स्तुवते।
- <14.3.17> जामि द्वादशाहस्यास्तीति ह स्माऽऽहोग्रदेवो राजनि,र्बार्हतं षष्ठ.मह-र्बार्हतं सप्तमँ, यत्कण्व.रथन्तरं भवति- तेनाजामि।
- <14.3.18> गौङ्गवं भवति।
- <14.3.19> अग्नि.रकामयतान्नाद स्स्यामिति, स तपोऽतप्यत- स एत.द्गौङ्गव.मपश्य-त्तेनान्नादो ऽभव,द्यदन्नँ वित्त्वाऽगर्द-द्य.दगङ्गूय-त्तद्गौङ्गवस्य गौङ्गवत्व,मन्नाद्य.स्यावरुद्ध्यै-गौङ्गव.ङ्क्रियते।
- <14.3.20> यत्साम देवता प्रशंसति- तेन यजमाना स्सत्याऽऽशिष, स्सत्याऽऽशिषोऽसामेति वै सत्त्र.मासते- सत्याऽऽशिष एव भवन्ति।
- <14.3.21> आयास्यं भवति- तिरश्चीन.निधनं प्रतिष्ठायै।
- <14.3.22> अयास्यो वा आङ्गिरस आदित्याना.न्दीक्षिताना.मन्न.माश्ना-त्स व्यभ्रंशत, स एता.न्यायास्या.न्यपश्य-त्तैरात्मानं समश्रीणा,द्विभ्रष्ट.मिव वै सप्तम.मह,र्यदेत.त्साम भव-त्यह.रेव तेन सं श्रीणाति।
- <14.3.23> प्रव.द्भार्गवं भवति।
- <14.3.24> प्रवता वै देवा.स्स्वर्गँ लोक.माय-न्नुद्व.तोदायन्न्।
- <14.3.25> निधनान्ताः पवमाना भव-न्त्यह्नो धृत्यै स्तोमः।
- <14.4.1> ❃ 14.4 वय.ङ्घ त्वा सुतावन्त- इति सतोबृहत्यो वर्षीय.श्छन्द आक्रमतेऽनपभ्रंशाय।
- <14.4.2> नकिष्ट ङ्कर्मणा नश-दिति बृहत्य स्सत्यो-ऽभ्यारम्भेण जगत्यः।
- <14.4.3> अपभ्रंश इव वा एष यज्ज्यायस स्स्तोमा.त्कनीयांसं स्तोम.मुपयन्ति, यदेता अभ्यारम्भेण जगत्यो भव-न्त्यह्न एव प्रत्युत्तम्भाय।
- <14.4.4> अभिनिधन.ङ्काण्वं भवति।
- <14.4.5> अभिनिधनेन वा इन्द्रो वृत्राय वज्रं प्राहर-त्त.मस्तृणुत, स्तृणुते भ्रातृव्य मभिनिधनेन तुष्टुवानः।
- <14.4.6> वैखानसं भवति।

- <14.4.7> वैखानसा वा ऋषय इन्द्रस्य प्रिया आसं,स्ता.न्रहस्यु.र्दैवमलिम्लुङ्.मुनिमरणे ऽमारय,त्त.न्देवा अब्रुव-न्क त ऋषयो ऽभूव.न्निति, ता.न्प्रैष.मैच्छ-न्ता.न्नाविन्द,त्स इमा.न्लोका.नेकधारेणापुना-त्ता.न्मुनिमरणेऽविन्द,त्तानेतेन साम्ना समैरय,त्तद्वाव स तर्ह्यकामयत-कामसनि साम वैखानस,ङ्काम मेवैतेनाव रुन्धे स्तोमः।

- <14.5.1> ❃14.5 यस्ते मदो वरेण्य-इति गायत्री भवति, मदवद्धै रसव.त्तृतीयसवनं, मद.मेव तद्रस.न्दधाति।

- <14.5.2> एषस्य धारया सुत-इति ककुभ स्सत्यो,ऽभ्यारम्भेण त्रिष्टुभः।

- <14.5.3> अपभ्रंश इव वा एष- य.ज्ज्यायस स्स्तोमा.त्कनीयांसं स्तोम.मुपयन्ति, यदेता अभ्यारम्भेण त्रिष्टुभो भव-न्त्यह्न एव प्रत्युत्तम्भाय।

- <14.5.4> सखाय आ निषीदतेति वालखिल्या, वालखिल्या.वेतौ तृचौ षष्ठे चाहनि सप्तमे च, यदेतौ वालखिल्यौ तृचौ भवतो-ऽह्नो.रेव व्यतिषङ्गा.याव्यवस्रंसाय सन्तत्यै।

- <14.5.5> पुरोजिती वो अन्धस-इति विरा,डन्नँ विरा-डन्नाद्य.स्यावरुद्ध्यै।

- <14.5.6> प्र वाज्यक्षा-रित्यक्षर.पङ्क्ति, स्स्तोमानां प्रभूतिः।

- <14.5.7> अथो एत.र्ह्येवैतर्हि च्छन्दोऽयातयाम- यदक्षर.पङ्क्ति,स्तेन च्छन्दोमा अयातयामानᳵ क्रियन्ते।

- <14.5.8> ब्रह्मवादिनो वदन्ति- यत्षडहे स्तोमा.श्छन्दां.स्याप्यन्ते, किञ्छन्दस.श्छन्दोमा इ,त्येत.च्छन्दसो- यदेता अक्षर.पङ्क्त्य- इति ब्रूयात्।

- <14.5.9> ये सोमासᳶ परावतीति, परावत.मिव वा एतर्हि यज्ञो गत-स्तमेवैते.नान्विच्छन्ति।

- <14.5.10> गायत्र्य स्सत्यो जगत्यो रूपेण, तस्मा.ज्जगतीनाँ लोके क्रियन्ते।

- <14.5.11> गायत्रं भवति, यदेव गायत्रस्य ब्राह्मणम्।

- <14.5.12> दक्ष.णिधनं भवति।

- <14.5.13> प्रजापतिᳶ प्रजा असृजत, ता अस्मा.त्सृष्टा अबला इवाच्छदयं,स्तास्वेतेन साम्ना दक्षाये.त्योजो वीर्य.मदधा,द्यदेत.त्साम भव-त्योज एव वीर्य.मात्म.न्धत्ते।

- <14.5.14> शार्करं भवति।

- <14.5.15> इन्द्रं सर्वाणि भूता.न्यस्तुव,न्त्स शर्करं शिशुमारर्षि.मुपेत्याब्रवी-त्स्तुहि मेति, सोऽप४ प्रस्कन्द.न्नब्रवी-देतावताऽह.न्त्वां स्तुया.मिति, तस्मा.दपाँ वेग.मवेजय-त्स हीन इवामन्यत, स एत.त्सामापश्य-त्तेनापोऽनु समाश्नुत, तद्वाव स तर्ह्यकामयत- कामसनि साम शार्कर,ङ्काम.मेवैतेनाव रुन्धे।
- <14.5.13> प्लवो भवति।
- <14.5.17> समुद्रँ वा एते प्रस्नान्ती.त्याहु-र्ये द्वादशाह.मुपयन्तीति, यो वा अप्लव स्समुद्रं प्रस्नाति- न स तत उदेति, य.त्प्लवो भवति- स्वर्गस्य लोकस्य समष्ट्यै।
- <14.5.18> अति विश्वानि दुरिता तरेमेति- यदेवैषा.न्दुष्टुत.न्दुश्शस्त-न्तदेतेन तरन्ति।
- <14.5.19> एकादशाक्षर.णिधनो भव,त्येकादशाक्षरा त्रिष्टु-बोजो वीर्य.न्त्रिष्टु-बोजस्येव वीर्ये प्रति तिष्ठति।
- <14.5.20> गौरीवितं भवति- यदेव गौरीवितस्य ब्राह्मणम्।
- <14.5.21> कार्तयशं भवति।
- <14.5.22> हीति निधन.मुप यन्ति- पाप्मनोऽपहत्यै।
- <14.5.23> अप पाप्मानं हते- कार्तयशेन तुष्टुवानः।
- <14.5.24> सौहविषं भवति।
- <14.5.25> सुहवि.र्वा एतेनाऽङ्गिरसोऽञ्जसा स्वर्गँ लोक.मपश्य-त्स्वर्गस्य लोक.स्यानुख्यात्यै, स्वर्गा.ल्लोका.न्न च्यवते तुष्टुवानः।
- <14.5.26> ब्रह्मावादिनो वदन्ति- यत्षडहे स्तोमा.श्छन्दां.स्याप्यन्ते- किञ्छन्दस.श्छन्दोमा इति- पुरुष.श्छन्दस इति ब्रूया-त्पुरुषो वै पाङ्क४- पुरुषो द्विपदा, छन्दोमाना.मयातयामतायै।
- <14.5.27> जराबोधीयं भव-त्यन्नाद्य.स्यावरुद्ध्यै।
- <14.5.28> अन्नँ वै जराबोधीयं- मुख.ङ्गायत्री, मुख एव तदन्न.न्धत्ते-ऽन्न.मत्ति।
- <14.5.29> अन्नादो भवति- य एवँ वेद।
- <14.5.30> गायत्रीषु स्तुवन्ति प्रतिष्ठायै ब्रह्मवर्चसाय, येनैव प्राणेन प्रयन्ति- तम.भ्युद्यन्ति।

- <14.5.31> इडान्ता꠰ पावमाना भवन्ति, पशवो वा इडा꠰- पशव.श्छन्दोमा꠰- पशुष्वेव तत्पशू.न्दधाति स्तोमः।

- <14.6.1> ❃ 14.6 आ ते वत्सो मनो यम-दित्यपच्छिदिव वा एत.द्यज्ञकाण्डँ-यदुक्थानि, यदेति सलोमत्वायैव।

- <14.6.2> त्व.न्न इन्द्राऽऽभरेति पूर्णा꠰ ककुभः।

- <14.6.3> अपभ्रंश इव वा एष- यज्ज्यायस स्स्तोमा.त्कनीयांसं स्तोम.मुपयन्ति, यदेता꠰ पूर्णा꠰ ककुभो भव-न्त्यनपभ्रंशाय।

- <14.6.4> यदिन्द्र चित्रं म इह- नास्ति त्वादात.मद्रिवो- राध.स्तन्नो विदद्वस- उभया हस्त्याभरेति, रयि.मेवैतेनाव रुन्धे। (राद्धि.मेवैतेन)

- <14.6.5> वात्सं भवति।

- <14.6.6> वत्सश्च वै मेधातिथिश्च काण्वा.वास्ता,न्तँ वत्सं मेधातिथि राऽक्रोश-दब्राह्मणोऽसि- शूद्रापुत्र इति, सोऽब्रवी.द्दतेनाग्निँ व्ययाव- यतरो नौ ब्रह्मीया.निति, वात्सेन वत्सो व्यै-न्मैधातिथेन मेधातिथि,स्तस्य न लोम च- नौष,त्तद्वाव स तर्ह्यकामयत- कामसनि साम वात्स-ङ्काम.मेवैतेनाव रुन्धे।

- <14.6.7> सौश्रवसं भवति।

- <14.6.8> उपगु.र्वै सौश्रवस꠰ कुत्सस्यौरवस्य पुरोहित आसी,त्स कुत्स꠰ पर्यशप-द्य इन्द्रँ यजाता इति, स इन्द्र स्सुश्रवस.मुपेत्याब्रवी-द्यजस्व मा-ऽशनायामिवा इति- तमयजत, स इन्द्र꠰ पुरोडाशस्त꠰ कुत्स.मुपेत्याब्रवी-दयक्षत मा- क्व ते परिशप्त.मभूदिति, कस्त्वा यष्टेति-सुश्रवा इति, स कुत्स औरव- उपागा स्सौश्रवस.स्योद्वायत औदुम्बर्या शिरोऽच्छिन,त्स सुश्रवा इन्द्र.मब्रवी-त्त्वत्तना.द्वै- मेद्.मीद्द.गुपागा.दिति, तमेतेन साम्ना समैरय,त्तद्वाव स तर्ह्यकामयत-कामसनि साम सौश्रवस-ङ्काम.मेवैतेनाव रुन्धे।

- <14.6.9> वीङ्कं भवति।

- <14.6.10> च्यवनो वै दाधीचोऽश्विनो꠰ प्रिय आसी-त्सोऽजीर्य-त्तमेतेन साम्नाऽप्सु व्यैङ्कयता-न्तं पुन.र्युवान.मकुरुता,न्तद्वाव तौ तर्ह्यकामयेता-ङ्कामसनि साम वीङ्क- ङ्काम.मेवैतेनाव रुन्धे।

- <14.6.11> चतुर्विंश एव स्तोमो भवति- तेजसे ब्रह्मवर्चसाय।
- <14.7.1> ❃14.7 शिशु.ञ्जज्ञानं हर्यतं मृजन्ती-त्यष्टमस्याह्नः प्रतिप.द्भवति।
- <14.7.2> शिशु.रिव वा एष सप्तमेनाह्ना जायते, तमष्टमेनाह्ना मृजन्ति।
- <14.7.3> स्तोत्रीयस्तृचो भवति- प्राणापानाना.मवरुद्ध्यै।
- <14.7.4> हरिवत्यो भवन्ति- च्छन्दोमाना.मयातयामतायै।
- <14.7.5> नवर्चा भवन्ति।
- <14.7.6> नव वै प्राणाः- पशव.श्छन्दोमाः- पशुष्वेव तत्प्राणा.न्दधाति।
- <14.7.7> पञ्चर्चो भवति- पञ्चपदा पङ्क्तिः- पाङ्क्त.मन्न-मन्नाद्य.स्यावरुद्ध्यै।
- <14.7.8> बाणवा.न्भव,त्यन्तो वै बाणो-ऽन्त एत.दष्टम.मह्ना,मन्त एव तदन्तेन स्तुवते प्रतिष्ठायै।
- <14.7.9> त्रय.स्तृचा भवन्ति- प्राणापानानां सन्तत्यै।
- <14.7.10> चतुश्चत्वारिंश एव स्तोमो भव,त्योजस्येव तद्वीर्यं प्रति तिष्ठ,त्योजो वीर्य.न्त्रिष्टुप्।
- <14.8.1> ❃14.8 अग्निँ वो देव.मग्निभि स्सजोषा-इत्याग्नेय.माज्यं भवति।
- <14.8.2> अग्निभि.रित्येव पूर्वा.ण्यहा.न्यभिसमिद्धा-न्यष्टम.मह.रभि समिन्धे।
- <14.8.3> मित्रँ वयं हवामह- इति बार्हतं मैत्रावरुणम्।
- <14.8.4> उग्रगाध.मिव वा एत-द्यच्छन्दोमा,स्तद्यथाऽत उग्रगाधे व्यातिषज्य गाहन्त-एव.मेवैत.द्रूपे व्यतिषजति- च्छन्दोमाना.मसँव्याथाय।
- <14.8.5> तमिन्द्रँ वाजयामसी-त्यैन्द्रम्।
- <14.8.6> अष्टमेन वै देवा अह्नेन्द्र मवाजय-न्नवमेन पाप्मान.मघ्न,न्नह.रेवैतेन वाजयन्ति।
- <14.8.7> इन्द्रे अग्ना नमो बृहदिति बार्हत.मैन्द्राग्नम्।
- <14.8.8> उग्रगाध.मिव वा एत-द्यच्छन्दोमा,स्तद्यथाऽत उग्रगाधे व्यतिषज्य गाहन्त-एव.मेवैत.द्रूपे व्यतिषजति- च्छन्दोमाना.मसँव्याथाय स्तोमः।
- <14.9.1> ❃ 14.9 अध्वर्यो अद्रिभि स्सुत.मिति गायत्री भव-त्यह्नो धृत्यै।
- <14.9.2> गायत्र्य स्सत्य.स्त्रिष्टुभो रूपेण- त्रैष्टुभं ह्येत.दहः।

- <14.9.3> अभि सोमास आयव इ,त्यभीति रथन्तरस्य रूपं- बृहदिति बृहत, उभयो.स्सह रूप.मुपै-त्युभौ हि वर्णा.वेत.दहः।
- <14.9.4> धर्ता दिव॰ पवते कृत्व्यो रस इ,त्यधृत इव वा एष.स्त्र्यहो- यद्धर्तीति,धृत्या एव।
- <14.9.5> जगत्य.स्सत्य.स्त्रिष्टुभो रूपेण, तस्मा.त्त्रिष्टुभो लोके क्रियन्ते।
- <14.9.6> गायत्रं भवति, यदेव गायत्रस्य ब्राह्मणम्।
- <14.9.7> वैरूपं भवति।
- <14.9.8> पशवो वै वैरूपं- पशूना.मवरुद्ध्यै, विरूप स्सँवत्सरो- विरूप.मन्न-मन्नाद्य.स्यावरुद्ध्यै।
- <14.9.9> आशु भार्गवं भवति।
- <14.9.10> अहर्वा एत.दह्लीयत, तद्देवा आशुनाऽभ्यधिन्वं-स्तदाशो.राशुत्वम्।
- <14.9.11> मार्गीयवं भवति।
- <14.9.12> देवँ वा एतं मृगयु.रिति वद,न्त्येतेन वै स उभयेषां पशूना माधिपत्य.माश्नु-तोभयेषां पशूना.माधिपत्य.मश्नुते- मार्गीयवेण तुष्टुवानः।
- <14.9.13> सौमित्रं भवति।
- <14.9.14> यदेव सौमित्रस्य ब्राह्मणम्।
- <14.9.15> ऐटतं भवति।
- <14.9.16> इटन् वा एतेन काव्योऽञ्जसा स्वर्गँ लोक.मपश्य-त्स्वर्गस्य लोक.स्यानुख्यात्यै, स्वर्गा.ल्लोका.न्न च्यवते- तुष्टुवानः।
- <14.9.17> साकमश्वं भवति, यदेव साकमश्वस्य ब्राह्मणम्।
- <14.9.18> तदु धुरां सामेत्याहु॰, प्राणा वै धुर॰- प्राणाना.मवरुद्ध्यै।
- <14.9.19> विलम्ब.सौपर्णं भवति।
- <14.9.20> आत्मा वा एष सौपर्णानाँ- यदष्टमेऽहनि पक्षा.वेता.वभितो भवतो, ये सप्तम.नवमयो-र्वीव वा अन्त.रात्मा पक्षौ लम्बते, यदन्त.रात्मा पक्षौ विलम्बते-तस्मा.द्विलम्ब.सौपर्णम्।
- <14.9.22> स्वर्गस्य लोकस्य समष्ट्यै- सौपर्ण.क्रियते।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

- <14.9.23> द्विहिङ्कारँ वामदेव्यं भव-त्यन्नाद्य.स्यावरुद्ध्यै।
- <14.9.24>द्वितीयं ह्येत.द्रूपँ- यच्छन्दोमाः।
- <14.9.25> पशवो वै वामदेव्यं- पशव.श्छन्दोमा४- पशुष्वेव तत्पशू.न्त्सन्दधाति।
- <14.9.26> गायत्रपार्श्वं भवति।
- <14.9.27> अहर्वा एत.दव्लीयत, तद्देवा गायत्रपार्श्वेन समतन्वं,स्तस्मा.द्गायत्रपार्श्वम्।
- <14.9.28> त्रिरात्रो यद्व्यशीर्यत- तमेतै स्सामभि.रभिषज्य,न्गायत्रपार्श्वेनोपायच्छ-न्त्सन्तनिना समतन्व-न्त्सङ्कृतिना समस्कुर्व,न्प्रतिष्ठितौ पूर्वौ त्रिरात्रा.वप्रतिष्ठित एष, यदेता.न्येव सामानि क्रियन्त- एतस्यैव प्रतिष्ठित्यै।
- <14.9.29> पौरुहन्मनं भवति।
- <14.9.30> पुरुहन्मा वा एतेन वैखानसोऽञ्जसा स्वर्गँ लोक.मपश्य-त्स्वर्गस्य लोक.स्यानुख्यात्यै, स्वर्गा.ल्लोका.न्न च्यवते तुष्टुवानः।
- <14.9.31> अभ्याघात्यं भव,त्यभ्याघात्य.सामानो हि च्छन्दोमाः।
- <14.9.32> द्वैगतं भवति।
- <14.9.32> द्विग.द्वा एतेन भार्गवो द्वि स्स्वर्गँ लोक.मगच्छ,दागत्य पुन.रगच्छ,द्वयो४ कामयो.रवरुद्ध्यै- द्वैगत.क्रियते।
- <14.9.33> हारायणं भवति।
- <14.9.34> इन्द्र.स्तेजस्कामो हरस्काम.स्तपोऽतप्यत, स एत.द्धारायण.मपश्य-त्तेन तेजो हरोऽवारुन्ध, तेजस्वी हरस्वी भवति- हारायणेन तुष्टुवानः।
- <14.9.35> अच्छिद्रं भवति।
- <14.9.66> यद्वा एतस्याह्न.श्छिद्र.मासी-त्तद्देवा अच्छिद्रेणाप्यौहं,-स्तदच्छिद्र.-स्याच्छिद्रत्वम्।
- <14.9.37> बार्ह.दुक्थं भवति।
- <14.9.38> बृहदुक्थो वा एतेन वाम्नेयोऽन्नस्य पुरोधा.मगच्छ,दन्नँ वै ब्रह्मण४ पुरोधा,अन्नाद्य.स्यावरुद्ध्यै।
- <14.9.39> उद्व.द्धार्गवं भवति।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

- <14.9.40> प्रवता वै देवा स्स्वर्गँ लोकं प्राय-न्नुद्ध.तोदायन्।

- <14.9.41> निधनान्ताꣳ पवमाना भव-न्त्यह्नो धृत्यै स्तोमः।

- <14.10.1> ❃ 14.10 क ईं वेद सुते सचेति सतोबृहत्यः।

- <14.10.2> अपभ्रंश इव वा एष- य.स्सप्तमेऽहनि सतोबृहत्यो भवन्ति- नाष्टमे, तस्मा.दष्टमे कार्या अनपभ्रंशाय।

- <14.10.3> तदाहु श्शिथिल.मिव वा एतच्छन्दो- यत्सतो.बृहती,त्येषा वै प्रतिष्ठिता बृहती- या पुनꣳपदा, यदिन्द्र प्रा.गपा.गुद.गिति- दिशाँ विमर्शꣳ प्रतिष्ठित्यै।

- <14.10.4> तासु नैपातिथं ब्रह्मसाम।

- <14.10.5> सामाꣳꣳर्षैयव-त्स्वर्गाय युज्यते, स्वर्गा.ल्लोका.न्न च्यवते तुष्टुवानः।

- <14.10.6> उभयं श्रृणवच्च न- इति।

- <14.10.7> यच्च पृष्ठानि- यानि चैता.न्यहानि- तेषा.मुभयेषां सन्तत्यै।

- <14.10.8> तासु वैयश्वम्।

- <14.10.9> व्यश्वो वा एतेनाꣳꣳङ्गिरसोऽञ्जसा स्वर्गँ लोक.मपश्य-त्स्वर्गस्य लोक.स्यानुख्यात्या- एत.त्पृष्ठाना.मन्ततꣳ क्रियते स्तोमः।

- <14.11.1> ❃14.11 पवस्व देवꣳꣳयुष-गिन्द्र.ङ्गच्छतु ते मद-इति गायत्री भवति, मदवद्वै रसव.त्तृतीयसवनं- मद.मेव तद्रस.न्दधाति।

- <14.11.2> अभि द्युम्नं बृहद्यश इ,त्यभीति रथन्तरस्य रूपं- बृह.दिति बृहत- उभयो.स्सह रूप.मुपै,त्युभौ हि वर्णा.वेत.दहः।

- <14.11.3> प्राणा शिशु.र्महीना.मिति- प्राणवत्यो भवन्ति, प्राणा.नेव तद्यजमाने दधाति।

- <14.11.4> अभी नो वाजसातममि,त्यभीति रथन्तरस्य रूपं- राथन्तरं ह्येत.दहः।

- <14.11.5> पवस्व सोम महा.न्त्समुद्र-इत्यक्षरपङ्क्ति स्स्तोमानां प्रभूति,रथो एत.च्चैवैतर्हि च्छन्दोऽयातयाम- यदक्षरपङ्क्ति,स्तेन च्छन्दोमा अयातयामानꣳ क्रियन्ते, ब्रह्मवादिनो वदन्ति- यत्षडहे स्तोमा.श्छन्दां.स्याप्यन्ते- किञ्छन्दस.श्छन्दोमा इ,त्येतच्छन्दसो- यदेता अक्षरपङ्क्य इति ब्रूयात्।

- <14.11.6> हिन्वन्ति सूर.मुस्त्रय-इति गायत्र्य स्सत्यो जगत्यो रूपेण, तस्मा.ज्जगतीनाँ लोके क्रियन्ते।
- <14.11.7> गायत्रं भवति, यदेव गायत्रस्य ब्राह्मणम्।
- <14.11.8> स्वाशिरा.मर्को भवति।
- <14.11.9> अन्नँ वा अर्को-ऽन्नाद्य.स्यावरुद्ध्यै, प्राणा वै स्वाशिर४- प्राणाना.मवरुद्ध्यै।
- <14.11.90> सुरूपं भवति।
- <14.11.12> पशवो वै सुरूपं- पशूना.मवरुद्ध्यै।
- <14.11.12> भासं भवति, भाति- तुष्टुवानः।
- <14.11.13> पद.निधनं- राथन्तरं ह्येतदहः।
- <14.11.14> स्वर्भानु.र्वा आसुर आदित्य.न्तमसाऽविध्य,त्स न व्यरोचत, तस्यात्रि.र्भासेन तमोऽपाह-न्त्स व्यरोचत, यद्वै तद्भा अभव-त्तद्भासस्य भासत्वम्।
- <14.11.15> तम इव वा एता.न्यहानि- यच्छन्दोमा,स्तेभ्य एतेन साम्ना विवासयति।
- <14.11.16> काक्षीवतं भवति।
- <14.11.17> काक्षीवान् वा एते.नौशिज४ प्रजातिं भूमान.मगच्छ,त्प्र जायते- बहु.र्भवति- काक्षीवतेन तुष्टुवानः।
- <14.11.18> आसितं भवति।
- <14.11.19> असितो वा एतेन दैवल.स्त्रयाणाँ लोकाना न्दृष्टि.मपश्य,त्त्रयाणा ङ्कामाना मवरुद्ध्या- आसित.ङ्क्रियते।
- <14.11.20> ऐषिरं भवति।
- <14.11.21> प्रजाति.र्वा ऐषिराणि, प्र जायते- बहु.र्भव-त्यैषिरेण तुष्टुवानः।
- <14.11.22> त्रैतं भवति प्रतिष्ठायै।
- <14.11.23> पदनिधनं राथन्तरं, राथन्तरं ह्येतदहः।
- <14.11.24> नाथविन्दु साम, विन्दते नाथ,न्नाथविन्दू-न्येता.न्यहानि- य.च्छन्दोमा, नाथ.मेवैतै.र्विन्दते।
- <14.11.25> गौरीवितं भवति- यदेव गौरीवितस्य ब्राह्मणम्।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

- <14.11.26> कौत्सं भवति।
- <14.11.27> एतेन वै कुत्सोऽन्धसो विपान.मपश्य-त्स ह स्म वै सुराद्दति.नोपवसथ न्धारय,त्युभयस्यान्नाद्य.स्यावरुद्ध्यै- कौत्स.क्रियते।
- <14.11.28> शुद्धाशुद्धीयं भवति।
- <14.11.29> इन्द्रो यती.न्त्सालावृकेभ्यः प्रायच्छ,त्तमश्लीला वा.गभ्यवद-त्सोऽशुद्धोऽमन्यत, स एत.च्छुद्धाशुद्धीय.मपश्य,त्तेनाशुध्य.च्छुध्यति- शुद्धाशुद्धीयेन तुष्टुवानः।
- <14.11.30> क्रौञ्चं भवति, यदेव क्रौञ्चस्य ब्राह्मणँ- यद्द्वितीयेऽहनि।
- <14.11.31> रयिष्ठं भवति।
- <14.11.32> पशवो वै रयिष्ठं- पशूना.मवरुद्ध्यै।
- <14.11.33> औदलं भवति।
- <14.11.34> उदलो वा एतेन वैश्वामित्रः प्रजातिं भूमान.मगच्छ,त्प्र जायते- बहु र्भव-त्यौदलेन तुष्टुवानः।
- <14.11.35> धर्म भवति, धर्मस्य धृत्यै।
- <14.11.36> ब्रह्मवादिनो वदन्ति- यत्षडहे स्तोमा.श्छन्दां.स्याप्यन्ते- किञ्छन्दस.श्छन्दोमा इति, पुरुषछन्दस इति ब्रूया-त्पुरुषो वै पाङ्क्तः- पुरुषो द्विपदा-श्छन्दोमाना.मयातयामतायै।
- <14.11.37> विशोविशीयं भवति।
- <14.11.38> अग्नि.रकामयत विशो विशोऽतिथि.स्स्याँ- विशो विश आतिथ्य मश्नुवीयेति, स तपोऽतप्यत- स एत.द्विशो.विशीय.मपश्य-त्तेन विशो विशोऽतिथि.रभव- द्विशो विश आतिथ्य.माश्नुत, विशो विशोऽतिथि.र्भवति- विशो विश आतिथ्य मश्नुते- विशो.विशीयेन तुष्टुवानः।
- <14.11.39> गायत्रीषु स्तुवन्ति- प्रतिष्ठायै ब्रह्मवर्चसाय, येनैव प्राणेन प्रयन्ति- तमभ्युद्यन्ति।
- <14.11.40> इडान्ताः पवमाना भवन्ति, पशवो वा इडा- पशव.श्छन्दोमाः- पशुष्वेव तत्पशू.न्दधाति स्तोमः।

- <14.12.1> ❃14.12 प्रेष्ठँ वो अतिथि-मित्यातिथ्यस्यैव तद्रूप.ङ्क्रियते।
- <14.12.2> एन्द्र नो गधि प्रिय- इतीन्द्रियस्य वीर्य.स्यावरुद्ध्यै।
- <14.12.3> पुरां भिन्दु.र्युवा कवि.रमितौजा अजायत। इन्द्रो विश्वस्य कर्मणो- धर्ता वज्री पुरुष्टुत- इति धृत्या एव।
- <14.12.4> औशनं भवति।
- <14.12.5> उशना वै काव्योऽकामयत- यावा.नितरेषा.ङ्काव्यानाँ लोक-स्तावन्तं स्पृणुया.मिति, स तपोऽतप्यत- स एत.दौशन.मपश्य-त्तेन तावन्तँ लोक.मस्पृणो-द्यावा.नितरेषा.ङ्काव्याना.मासी,त्तद्वाव स तर्ह्यकामयत- कामसनि सामौशन-ङ्काम मेवैतेनाव रुन्धे।
- <14.12.6> साँवर्तं भवति।
- <14.12.7> देवानाँ वै यज्ञं रक्षां.स्यजिघांसं-स्तान्येतेनेन्द्र स्सँवर्त.मपावप,-द्यत्सँवर्त मपावप-त्तस्मा.त्साँवर्तं, पाप्मा वाव स ता.नसचत- तं साँवर्तेनापाघ्नता,ऽप पाप्मानं हते- साँवर्तेन तुष्टुवानः।
- <14.12.8> मारुतं भवति।
- <14.12.9> मासा वै रश्मयो- मरुतो रश्मयो- मरुतो वै देवानां भूयिष्ठा, भूयिष्ठा असामेति वै सत्त्र.मासते- भूयिष्ठा एव भव,न्त्यृतुमन्ति पूर्वा.ण्यहा-न्यनृतव.श्छन्दोमा-यदेत.त्साम भवति- तेनैता.न्यहा.न्यहा.न्यृतुमन्ति भवन्ति।
- <14.12.10> चतुश्चत्वारिंश एव स्तोमो भव-त्योजस्येव तद्वीर्ये प्रति तिष्ठ,त्योजो.वीर्यं त्रिष्टुप्।

## ताण्ड्य ब्राह्मणे पञ्चदशोऽध्यायः

- <15.1.1> ❃ 15.1 अक्रा.न्त्समुद्र४ प्रथमे विधर्म.न्निति- नवमस्याह्न४ प्रतिप.द्भवति।
- <15.1.2> परमँ वा एत.दह.र्विधर्म- विधर्म वा एत.दन्यै.रहर्भि.रह-र्यन्नवम,ञ्ज्येष्ठं हि वरिष्ठम्।
- <15.1.3> मत्सि वायु.मिष्टये राधसे न- इति वारु.ण्येषा भवति, यद्वै यज्ञस्य दुरिष्ट-न्तद्वरुणो गृह्णाति- तदेव तदव यजति।
- <15.1.4> स्तोत्रीय.स्तृचो भवति- प्राणापानाना.मवरुद्ध्यै।

- <15.1.5> दशर्चो भवति, दशाक्षरा विरा-ड्वैराज.मन्न-मन्नाद्य.स्यावरुद्ध्यै।
- <15.1.6> सप्रभृतयो भव-न्तीन्द्रियस्य वीर्यस्य रस.स्यानतिचाराय, यत्र वै देवा इन्द्रियँ वीर्यं रस.मपश्यं-स्तदनु न्यतुदन्।
- <15.1.7> अष्टर्चो भवति।
- <15.1.8> अष्टाशफाः पशव- श्शफश.स्तत्पशू.नाप्नो-त्यष्टाऽक्षरा गायत्री- तेजो ब्रह्मवर्चस.ङ्गायत्री- तेज एव ब्रह्मवर्चस.मव रुन्धे।
- <15.1.9> षड्टचा भव-न्त्यृतूना.न्धृत्यै।
- <15.1.10> चत्वार.ष्षड्टचा भवन्ति, चतुर्विंशति.रर्धमासा स्सँवत्सर- स्सँवत्सर एव प्रति तिष्ठति।
- <15.1.11> सवा.नुत्तम ष्षड्टचो भव-त्युभयस्य परोऽक्ष.प्रत्यक्ष.स्यावरुद्ध्यै।
- <15.1.12> तृच उत्तमो भवति, येनैव प्राणेन प्रयन्ति- तमभ्युद्यन्ति।
- <15.1.13> अष्टाचत्वारिंश एव स्तोमो भवति- प्रतिष्ठायै प्रजात्यै।
- <15.2.1> ❃ 15.2 अगन्म महा नमसा यविष्ठ-मित्याग्नेय.माज्यं भवति।
- <15.2.2> गच्छन्तीव वा एते- ये नवम.मह.र्गच्छन्ति।
- <15.2.3> यो दीदाय समिद्ध स्वे दुरोण इति, दीदायेव ह्येष- यो नवभि.रहर्भि.स्तुष्टुवान,-स्स्वाहुत-मिति, स्वाहुतो ह्येष- यो नवभि.रहर्भि.राहुतो, विश्वतः प्रत्यञ्चमिति- विश्वतो ह्येष प्रत्यङ्।
- <15.2.4> त्वँ वरुण उत मित्रो अग्न- इति वारु.ण्येषा भवति, यद्वै यज्ञस्य दुरिष्ट-न्तद्वरुणो गृह्णाति- तदेव तदव यजति।
- <15.2.5> मित्रं हुवे पूतदक्षमिति राथन्तरं मैत्रावरुणम्।
- <15.2.6> उग्रगाध.मिव वा एत-द्यच्छन्दोमा,स्तद्यथाऽत उग्रगाधे व्यतिषज्य गाहन्त-एव.मेवैत.द्रूपे व्यतिषजति- च्छन्दोमाना.मसँव्याथाय।
- <15.2.7> महाँ इन्द्रो य ओजसे.त्यैन्द्र,मष्टमेन वै देवा अह्नेन्द्र.मवाजय-न्नवमेन पाप्मान मघ्न,-न्नह.रेवैतेन महयन्ति।
- <15.2.8> ता हुवे ययो.रिद.मिति राथन्तर.मैन्द्राग्नम्।

- <15.2.9> उग्रगाध.मिव वा एत.द्यच्छन्दोमा,स्तद्यथाऽत उग्रगाधे व्यतिषज्य गाहन्त-एव.मेवैत.द्रूपे व्यतिषजति- च्छन्दोमाना.मसँव्याथाय स्तोमः।
- <15.3.1> ❃ 15.3 पवमानस्य जिघ्नतो- हरे.श्चन्द्रा असृक्षतेति- हरिवत्यो गायत्र्यो भवन्ति- च्छन्दोमाना.मयातयामतायै।
- <15.3.2> पवमानस्य जिघ्नत- इति वै बृहतो रूपं, हरे.श्चन्द्रा असृक्षतेति जगत्या, उभयो स्सह रूप.मुपैति- साम्नश्च च्छन्दसश्च।
- <15.3.3> परीतो षिञ्चता सुत.मिति परिवत्यो भव-न्त्यन्तो वै नवम.मह-स्तस्यैताꣳ पर्याप्त्यै।
- <15.3.4> असावि सोमो अरुषो वृषा हरि.रिति- जगत्य.स्सत्य.स्त्रिष्टुभो रूपेण, तस्मा.त्त्रिष्टुभाँ लोके क्रियन्ते।
- <15.3.5> गायत्रं भवति- यदेव गायत्रस्य ब्राह्मणम्।
- <15.3.6> भरद्वाज.स्यादारसृ.द्भवति।
- <15.3.7> दिवोदासँ वै भरद्वाज.पुरोहित.न्नानाजनाꣳ पर्ययन्त, स उपासीद-दृषे गातुं मे विन्देति, तस्मा एतेन साम्ना गातु.मविन्द,द्गातुविद्वा एतत्सा.मानेन दारे नासृन्मेति, त.ददारसृतोऽदारसृत्त्वँ, विन्दते गातु-न्न दारे धाव-त्यदारसृता तुष्टुवानः।
- <15.3.8> सुरूपं भवति- यदेव सुरूपस्य ब्राह्मणम्।
- <15.3.9> हरिश्री.निधनं भवति।
- <15.3.10> पशवो वै हरिश्रियꣳ- पशूना.मवरुद्ध्यै, श्रियञ्च हर.श्चोपैति- तुष्टुवानः।
- <15.3.11> सैन्धुक्षितं भवति, यदेव सैन्धुक्षितस्य ब्राह्मणम्।
- <15.3.12> गतनिधनँ वाभ्रवं भवति- गत्यै।
- <15.3.13> वभ्रुर्वा एतेन कौम्म्योऽञ्जसा स्वर्गँ लोक.मपश्य-त्स्वर्गस्य लोक.स्यानुख्यात्यै, स्वर्गा.ल्लोका.न्न च्यवते तुष्टुवानः।
- <15.3.14> इडानां सङ्कारो भवति।
- <15.3.15> पशवो वा इडा- पशव.श्छन्दोमाꣳ- पशुष्वेव तत्पशू.न्दधाति।
- <15.3.16> ऋषभꣳ पावमानो भवति।

* <15.3.17> पशवो वै छन्दोमाः- पशु.ष्वेव तन्मिथुन.मप्यर्जति प्रजात्यै, न ह वा अनृषभाः पशवः प्र जायन्ते।
* <15.3.18> पृष्ठं भवति।
* <15.3.19> पृष्ठँ वा एत.दह्नाँ- यन्नवमं, पृष्ठ एव तत्पृष्ठेन स्तुवते- प्रतिष्ठायै।
* <15.3.20> कौल्मल.बर्हिषं भवति।
* <15.3.21> कुल्मलबर्हिर्वा एतेन स्वर्गँ लोक.मपश्य-त्प्रजातिं भूमान.मगच्छ,त्प्रजायते- बहु.र्भवति- कौल्मलबर्हिषेण तुष्टुवानः।
* <15.3.22> अर्कपुष्पं भवति।
* <15.3.23> अन्नँ वै देवा अर्क इति वदन्ति- रस.मस्य पुष्प.मिति, सरस.मेवान्नाद्य.मव रुन्धे-ऽर्कपुष्पेण तुष्टुवानः।
* <15.3.24> दैर्घश्रवसं भवति।
* <15.3.25> दीर्घश्रवा वै राजन्य ऋषि.र्ज्योगपरुद्धोऽशनायं.श्चर-न्त्स एत.द्दैर्घश्रवस मपश्य-त्तेन सर्वाभ्यो दिग्भ्योऽन्नाद्य.मवारुन्ध, सर्वाभ्यो दिग्भ्योऽन्नाद्य मव रुन्धे- दैर्घश्रवसेन तुष्टुवानः।
* <15.3.26> वैयश्वं भवति, यदेव वैयश्वस्य ब्राह्मणम्।
* <15.3.27> आभीशवँ, यदाभीशवस्य।
* <15.3.28> देवस्थानं भवति प्रतिष्ठायै, संस्कृति भवति संस्कृत्यै।
* <15.3.29> अहर्वा एत.दव्लीयत, तद्देवा देवस्थाने तिष्ठन्त.स्सङ्कृतिना समस्कुर्वं- स्तत्सङ्कृते स्सङ्कृतित्व,न्देवस्थानेन वै देवा स्स्वर्गे लोके प्रत्यतिष्ठ-न्त्स्वर्गे लोके प्रति तिष्ठामे- त्येतत्।
* <15.3.30> वरुणाय देवता राज्याय नातिष्ठन्त, स एत.द्देवस्थान.मपश्य-त्ततो वै ता.स्तस्मै राज्यायातिष्ठन्त, तिष्ठन्तेऽस्मै समाना श्श्रैष्ठ्याय।
* <15.3.31> क्षत्रस्येवास्य प्रकाशो भवति, प्रति तिष्ठति- य एवँ वेद।
* <15.3.32> भर्गो भर्गेण तुष्टुवानो- भवति यशो यशसा।
* <15.3.33> वासिष्ठं भवति, यदेव वासिष्ठस्य ब्राह्मणम्।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham • Mysore

- <15.3.34> दीर्घतमसोऽर्को भव,त्यन्नँ वा अर्को-ऽन्नाद्य.स्यावरुद्ध्यै।
- <15.3.35> सामराजं भवति, साम्राज्य.माधिपत्य.ङ्गच्छति- सामराज्ञा तुष्टुवानः।
- <15.3.36> तदु सँव.दित्याहु, स्सँवता वै देवा स्स्वर्गँ लोकं प्राय-न्नुद्व.तोदायन्।
- <15.3.37> निधनान्ताꣳ पवमाना भव-न्त्यह्नो धृत्यै स्तोमः।
- <15.4.1> ❃ 15.4 श्रायन्त इव सूर्यमिति- सूर्यवत्यो भवन्ति।
- <15.4.2> आदित्यदेवत्यं ह्येत.दह,रन्तो वै सूरो-ऽन्त एत.न्नवम.मह्ना,मन्त एव तदन्तेन स्तुवते प्रतिष्ठायै।
- <15.4.3> यत इन्द्र भयामहे- ततो नो अभय.ङ्कृधि। मघव.ञ्छग्धि तव तन्न ऊतये- वि द्विषो विमृधो जहीति, द्विष.श्चैव मृधश्च नवमेनाह्ना विहत्य- दशमेना.ह्नोत्तिष्ठन्ति।
- <15.4.4> श्रायन्तीयं भवति।
- <15.4.5> श्रीर्वै श्रायन्तीयं- श्री.र्नवम.मह- श्श्रिय.मेव तच्छ्रियां प्रतिष्ठापयति।
- <15.4.6> समन्तं भवति।
- <15.4.7> समन्तेन पशुकाम स्स्तुवीत, पुरोधाकाम स्समन्तेन स्तुवीत।
- <15.4.8> आग्नेयी पृथि-व्याग्नेयो ब्राह्मण, ऐन्द्री द्यौ-रैन्द्रो राजन्यो,ऽन्तरिक्षेण द्यावापृथिवी समन्ते- अन्तरिक्षेणैवैनं समन्त.ङ्करोति, विन्दते पशू.न्प्र पुरोधा.माप्नोति- य एवँ विद्वा.न्त्समन्तेन स्तुवते स्तोमः।
- <15.5.1> ❃ 15.5 त्वं सोमासि धारयु.रिति गायत्री भव-त्यह्नो धृत्यै, त्वमिति बृहतो रूपं- बार्हतं ह्येत.दहः।
- <15.5.2> त्वं ह्यङ्ग दैव्या इति, त्वमिति बृहतो रूपं- बार्हतं ह्येत.दहः।
- <15.5.3> पवस्व देव वीतय इति बृहतो रूपं, बार्हतं ह्येत.दहः।
- <15.5.4> परि त्यं हर्यतं हरि.मिति परिवत्यो भव,न्त्यन्तो वै नवम.मह-स्तस्यैताꣳ पर्याप्त्यै।
- <15.5.5> पवस्व सोम महे दक्षाये-त्यक्षरपङ्क्ति स्स्तोमानां प्रभूति,रथो एत.च्चैवैतर्हि च्छन्दोऽयातयाम- यदक्षरपङ्क्ति,स्तेन च्छन्दोमा अयातयामानꣳ क्रियन्ते, ब्रह्मवादिनो वदन्ति-

Sri Sachchidananda Avadhoota Datta Peetham • Mysore •

यत्षडहे स्तोमा.श्छन्दां.स्याप्यन्ते- किञ्छन्दस.श्छन्दोमा इ,त्येतच्छन्दसो- यदेता अक्षरपङ्क्तय इति ब्रूयात्।

- <15.5.6> उपोषु जात.मप्तुर.मिति गायत्र्य.स्सत्यो जगत्यो रूपेण, तस्मा.ज्जगतीनाँ लोके क्रियन्ते।
- <15.5.7> गायत्रं भवति- यदेव गायत्रस्य ब्राह्मणम्।
- <15.5.8> आश्वसूक्तं भवति।
- <15.5.9> अग्निँ वै पूर्वै.रहर्भि.राजुहो,त्यथैत.दादित्यदैवत्य.मह- श्शुक्र आहुत- इत्यसौ वा आदित्य श्शुक्र-स्तमेवैतेनाऽऽजुहोति।
- <15.5.10> शाम्मदं भवति।
- <15.5.11> शम्मद्वा एतेनाऽऽङ्गिरसोऽञ्जसा स्वर्गँ लोक.मपश्य-त्स्वर्गस्य लोक.स्यानुख्यात्यै, स्वर्गा.ल्लोका.न्न च्यवते- तुष्टुवानः।
- <15.5.12> दावसु निधनं भवति।
- <15.5.13> आशिष.मेवास्मा एतेनाऽऽशास्ते, साम हि सत्याऽऽशीः।
- <15.5.14> दावसु.र्वा एत.दाङ्गिरसꣳ पशुकाम स्सामापश्य-त्तेन सहस्रं पशू.नसृजत, यदेत.त्साम भवति- पशूनां पुष्ट्यै।
- <15.5.15> प्रतीचीनेड.ङ्काशीतं भवति।
- <15.5.16> पराचीभिर्वा अन्याभि.रिडाभी रेतो दध,दथैत.त्प्रतीचीनेड.ङ्काशीतं प्रजात्यै, तस्मा.त्पराञ्चो गर्भा स्सम्भवन्ति- प्रत्यञ्चꣳ प्र जायन्ते, तस्मादु तेऽवाचीनबिलेभ्यो नावपद्यन्त- एतेन ह्येव ते धृताः।
- <15.5.17> हाविष्कृतं भवति- प्रतिष्ठायै, कृतानुवाद एव सः।
- <15.5.18> सौपर्णं भवति, यदेव सौपर्णस्य ब्राह्मणम्।
- <15.5.19> वैश्वमनसं भवति।
- <15.5.20> विश्वमनसँ वा ऋषि.मध्याय.मुद्वजितं रक्षोऽगृह्णा,त्तमिन्द्रोऽचाय-द्दृषिँ वै रक्षोऽग्रहीदिति, तमभ्यवद-द्दृषे कस्त्वैष इति, स्थाणु.रिति ब्रूहीति- रक्षोऽब्रवी,त्स स्थाणु.रित्यब्रवी-त्तस्मै वा एतेन प्रहरे-त्यस्मा इषीकाँ वज्रं प्रयच्छ-न्नब्रवी,त्तेनास्य सीमान मभिन-

Sri Ganapati Sacchidananda Avadhoota Datta Peetham • Mysore

त्सैषेन्द्रेणतेषीका, पाप्मा वाव स त.मगृह्ण-त्तँ वैश्वमनसेनापाऽऽहता-ऽप पाप्मानं हते- वैश्वमनसेन तुष्टुवानः। (सा, एषा, इन्द्रेणता, इषीका)

- <15.5.21> गौरीवितं भवति, यदेव गौरीवितस्य ब्राह्मणम्।
- <15.5.22> निहवो भव-त्यन्नाद्य.स्यावरुद्ध्यै।
- <15.5.23> हीति वा अन्नं प्रदीयत- ईत्यग्नि.रन्न.मत्ति।
- <15.5.24> ऋषयो वा इन्द्रं प्रत्यक्ष नापश्य,न्त्स वसिष्ठोऽकामयत- कथ.मिन्द्रं प्रत्यक्षं पश्येय.मिति, स एत.न्निहव.मपश्य-त्ततो वै स इन्द्रं प्रत्यक्ष.मपश्य,त्स एन.मब्रवी.द्ब्राह्मण-न्ते वक्ष्यामि- यथा त्वत्पुरोहिता भरता᳭ प्रजनिष्यन्ते,ऽथ माऽन्येभ्य ऋषिभ्यो मा प्र वोच इति, तस्मा एता.न्त्स्तोमभागा.नब्रवी-त्ततो वै वसिष्ठ.पुरोहिता भरता᳭ प्राजायन्त, सेन्द्रँ वा एत.त्साम, यदेत.त्साम भवति- सेन्द्रत्वाय।
- <15.5.25> यद्वाहिष्ठीयं भवति।
- <15.5.26> ब्रह्मयशसँ वा एतानि सामा.न्यृचा श्रोत्रीयाणि, ब्रह्मयशसी भवति- यद्वाहिष्ठीयेन तुष्टुवानः।
- <15.5.27> आसितं भवति, यदेवाऽऽसितस्य ब्राह्मणम्।
- <15.5.28> साध्रं भवति- सिद्ध्यै।
- <15.5.29> आकूपारं भवति।
- <15.5.30> अकूपारो वा एतेन कश्यपो जेमानं महिमान.मगच्छ,ज्जेमानं महिमान.ङ्गच्छ-त्याकूपारेण तुष्टुवानः।
- <15.5.31> विधर्म भवति- धर्मस्य विधृत्यै।
- <15.5.32> ब्रह्मवादिनो वदन्ति- य.त्षडहे स्तोमा.श्छन्दां.स्याप्यन्ते- किञ्छन्दस.श्छन्दोमा इति, पुरुषच्छन्दस इति ब्रूया,त्पुरुषो वै पाङ्क᳭- पुरुषो द्विपदा- छन्दोमाना.मयातयामतायै।
- <15.5.33> श्रुध्यं भवति।
- <15.5.34> पशवो वै श्रुध्यं- पशूना.मवरुद्ध्यै।

- <15.5.35> प्रजापतिः पशू.नसृजत, तेऽस्मा.त्सृष्टा अपाक्रामं-स्ता.नेतेन साम्ना श्रूधिया एहियेे-त्यन्वह्वय,त्त एन.मुपाऽऽवर्तन्त, यदेत.त्साम भवति- पशूना.मुपाऽऽवृत्त्यै।
- <15.5.36> उपैनं पशव आ वर्तन्ते- य एवँ वेद।
- <15.5.37> गायत्रीषु स्तुवन्ति प्रतिष्ठायै ब्रह्मवर्चसाय, येनैव प्राणेन प्रयन्ति-तमभ्युद्य,न्तीडान्ताः पवमाना भवन्ति, पशवो वा इडा- पशव.श्छन्दोमाः- पशुष्वेव तत्पशू.न्दधाति स्तोमः।
- <15.6.1>❃ 15.6 आग्नेयीषु पूर्वेषा.मह्ना.मुक्थानि प्रणय,न्त्यथैतस्याह्न आग्नेय्यैन्द्यां प्रणय-न्त्युभयोरेव रूपयोः प्रति तिष्ठति।
- <15.6.2> ऐध्मवाहं भवति।
- <15.6.3> आग्नेय्यैन्द्रीषु स्तुवन्ति, ब्रह्म चैव तत्क्षत्रञ्च सयुजीकरोति- ब्रह्मैव क्षत्रस्य पुरस्ता.न्नि दधाति- ब्रह्मणे क्षत्रञ्च विश.ञ्चानुगे करोति।
- <15.6.4> त्रैककुभं भवति।
- <15.6.5> ओजस्येव तद्वीर्ये प्रति तिष्ठ,त्योजो वीर्य.न्त्रैककुभम्।
- <15.6.6> उद्वंशीयं भवति, यदेवोद्वंशीयस्य ब्राह्मणम्।
- <15.6.7> अष्टाचत्वारिंश एव स्तोमो भवति- प्रतिष्ठायै प्रजात्यै।
- <15.7.1> ❃ 15.7 गायत्रँ वै सप्तम.मह-स्त्रैष्टुभ.मष्टम- ञ्जागत.न्नवम-मथैत.दानुष्टुभ.मह-र्यद्दशमम्।
- <15.7.2> तदाहु,र्य.दानुष्टुभं स्तोम्यां प्रत्यक्ष.मुपेयुः- परां परावतँ यजमानो गच्छे-न्न प्रतितिष्ठे.दिति, या वै चतुर्विंशति.र्गायत्र्य-स्ता अष्टादशानुष्टुभो-ऽनुष्टुभ.मेव तत्स्तोम्यां परोऽक्ष मुप यन्ति- प्रतिष्ठायै प्रति तिष्ठति।
- <15.7.3> प्रजापतिँ वा एतेनाह्ना परि.वेविषति, तत्र व्यव.वद्यँ- यद्वै श्रेष्ठे परिविष्यमाणो वद.त्यन्नाद्यस्य- सोऽवग्रह,स्तस्मान्न व्यव.वद्य-मन्नाद्य.स्यानवग्राहाय।
- <15.7.4> तदु व्यववद्यँ- यथा श्रेष्ठाय बलिं ह्रियमाणं पन्थानं पर्यनु.वेदयति गत्यै- तथा तत्।

- <15.7.5> याव.त्यनुष्टु-प्तावतीँ वाचं सम्पाद्य विब्रूयु-स्तद्वनतिरिक्तं- स्वस्यो चैव यज्ञस्यारिष्ट्यै।
- <15.7.6> अभि वा एते देवा.नारोहन्तीत्याहु-र्ये दशभि.रहर्भि स्स्तुवत इति, पञ्चाना.मह्ना.मनुरूपैः प्रत्यव यन्ति, यथाऽभ्यारुह्य प्रत्यवरोहे-त्तथा त,न्नवर्चो भवति- या एवामूः प्रयच्छन्- या अवदधाति- ता एता उदस्यति।
- <15.7.7> वारु.ण्येषा भवति, यद्वै यज्ञस्य दुरिष्ट- न्तद्वरुणो गृह्णाति- तदेव तदव यज,त्यादित्यैषा भव-तीयँ वा अदिति-रस्या.मेव प्रति तिष्ठति।
- <15.7.8> चतुर्विंश एव स्तोमो भवति- तेजसे ब्रह्मर्चसाय।
- <15.8.1> ❋ 15.8 सुषमिद्धो न आवहे-त्याप्रिय आज्यानि भवन्ति।
- <15.8.2> प्रजापतिः प्रजा असृजत- स दुग्धो रिरिचानोऽमन्यत- स एता.न्याप्रिय आज्या.न्यपश्य-त्तै.रात्मान.माऽप्रीणा,द्दुग्ध इव वा एष रिरिचानो- यो दशभि.रहर्भि. स्तुष्टुवानो, यदेता.न्याप्रिय आज्यानि भव-न्त्यात्मान.मेवैतै.राप्रीणाति।
- <15.8.3> यदद्य सूर उदित-इति सूरव.न्मैत्रावरुणम्।
- <15.8.4> अन्तो वै सूरो-ऽन्त एत.द्दशम.मह्ना,मन्त एव तदन्तेन स्तुवते प्रतिष्ठायै।
- <15.8.5> उत्त्वा मदन्तु सोमा-इत्युद्व.दैन्द्र.मुत्थानस्य रूपम्।
- <15.8.6> इन्द्राग्नी आ गतं सुत-मिति, येनैव रूपेण प्रयन्ति- तदभ्युद्यन्ति स्तोमः।
- <15.9.1>❋ 15.9 उच्चा ते जात.मन्धस- इत्युद्वत्यो गायत्र्यो भव-न्त्युत्थानस्य रूपम्।
- <15.9.2> पुनान.स्सोम धारयेति- पन्थान.मेव तत्पर्यव यन्ति।
- <15.9.3> आ जागृवि.र्विप्र ऋतं मतीना.मिति- यदाप्ते प्रवतीः कुर्यु-रतिपद्येरन्, य.दावत्यो भव-न्त्यनतिपादाय।
- <15.9.4> गायत्रं भवति- यदेव गायत्रस्य ब्राह्मणम्।
- <15.9.5> आमहीयवं भवति- क्लृप्ति.श्चान्नाद्यञ्च, क्लृप्ति.श्चैवैते.नान्नाद्य.ञ्चाभ्युत्तिष्ठन्ति।
- <15.9.6> आजिगं भव-त्याजिजित्यायै।
- <15.9.7> आजिर्वा एष प्रततो- यद्द्वादशाह-स्तस्यैत.दुज्जित्यै।
- <15.9.8> आभीकं भव-त्यभिक्रान्त्यै।

- <15.9.9> आङ्गिरसा.स्तप.स्तेपाना श्शुच.मशोचं,स्त एत.त्सामापश्यं-स्तानभीकेऽभ्यवर्ष-त्तेन शुच.मशमयन्त, यदभीकेऽभ्यवर्ष-त्तस्मा.दाभीकँ, यामेव पूर्वै.रहर्भि श्शुचं शोचन्ति- तामेते.नात्र शमयित्वो.त्तिष्ठन्ति।
- <15.9.10> उत्सेधो भवति।
- <15.9.11> उत्सेधेन वै देवा॰ पशू.नुदसेध-न्निषेधेन पर्यगृह्णन्।
- <15.9.12> अन्तरोत्सेध.निषेधौ यज्ञायज्ञीयम्।
- <15.9.13> पशवोऽन्नाद्यँ यज्ञायज्ञीयं, पशू.नेव तदन्नाद्य.मुत्सेध.निषेधाभ्यां परि गृह्णाति।
- <15.9.14> माध्यन्दिने वै पवमाने देवा यज्ञायज्ञीयेन यज्ञं संस्थाप्य- स्वर्गँ लोक.माऽरोहं,-स्तद्य एवँ वेद- माध्यन्दिन एवैत.त्पवमाने यज्ञायज्ञीयेन यज्ञं संस्थाप्य- स्वर्गँ लोक.मा रोहति।
- <15.9.15> अथो परोऽक्ष.मनुष्टुभं सं पद्यते,ऽह.रेषा वै प्रत्यक्ष.मनुष्टु-ब्यद्यज्ञायज्ञीय,-न्तद्य.त्तृतीयसवने कुर्यु॰- प्रत्यक्ष.मनुष्टुभ.मृच्छेयु-स्तस्मा.न्माध्यन्दिने कुर्वन्ति- तेन परोऽक्ष मनुष्टुभ.मुप यन्ति।
- <15.9.16> गौरीवितं भवति।
- <15.9.17> एतद्वै यज्ञस्य श्वस्तनँ- यद्गौरीवित,मेत.दायतनो वै यजमानो- यन्मध्यन्दिनो, यद्गौरीवितं मध्यन्दिने भवति- श्वस्तन.मेव तद्यजमान आत्म.न्धत्ते स्तोमः।
- <15.10.1> ❈ 15.10 कया न.श्चित्र आ भुवदिति कवत्य-स्तेन प्राजापत्या, को हि प्रजापति॰- प्रजापते.राप्त्यै।
- <15.10.2> मा चिदन्य.द्वि शंसते-त्युत्थान.मेव- तदाशिषो ह्येतर्हि।
- <15.10.3> उदु त्ये मधुमत्तमा-इत्युद्वत्य, उदयनीयेऽह.न्येत.दाशिषो ह्येवैतर्हि।
- <15.10.4> तरोभि.र्वो विदद्वसु.मिति, स्तोमो वै तरो- यज्ञो विदद्वसु- स्स्तोमेन वै यज्ञो युज्यते, यत्तरोभि.र्वो विदद्वसु.मित्याह- यज्ञ.मेव तद्युनक्ति।
- <15.10.5> वामदेव्यस्यर्क्षु रथन्तरं पृष्ठं भवति।
- <15.10.6> गायत्री वै रथन्तरस्य योनि- स्स्वाया.मेव तद्योनौ रथन्तरं प्रतिष्ठापयति।

- <15.10.7> तेजो वै गायत्री छन्दसा-न्तेजो रथन्तरं साम्ना-न्तेज.श्चतुर्विंश.स्स्तोमाना-न्तेज एव तत्सम्य.क्सन्दधा,त्यपि ह पुत्रस्य पुत्र.स्तेजस्वी भवति।
- <15.10.8> अष्टाऽक्षरेण प्रथमाया ऋचः प्रस्तौ-त्यष्टाशफां.स्तत्पशू.नव रुन्धे।
- <15.10.9> द्व्यक्षरेणोत्तरयो.र्ऋचोः प्र स्तौति, द्विपा.द्यजमानो- यजमान.मेव यज्ञे पशुषु प्रतिष्ठापयति।
- <15.10.10> गायत्रँ वै रथन्तर ङ्गायत्र.च्छन्दो, यद्गायत्रीषु रथन्तरं भवति- तेन स्वाया ञ्जनताया.मृध्नो,-तीमे वै लोका गायत्री- यद्गायत्रीषु रथन्तरं भव-तीमा.नेव तल्लोका.न्त्समाप्योत्तिष्ठन्ति।
- <15.10.11> मैधातिथं भवति।
- <15.10.12> एतेन वै मेधातिथिः काण्वो विभिन्दुकाद्-व्यूध्नी.र्गा उदसृजत, पशूना.मवरुद्ध्यै- मैधातिथ.ङ्क्रियते।
- <15.10.13> अभीवर्तो ब्रह्मसाम भव-त्येकाक्षर.निधनः प्रतिष्ठायै।
- <15.10.14> एकाक्षरा वै वा-ग्वाच्येव प्रतिष्ठायोत्तिष्ठन्ति।
- <15.10.15> कालेय.मच्छावाकसाम भवति।
- <15.10.16> समानलोके वै कालेयञ्च रथन्तर,ञ्चेयँ वै रथन्तरं- पशवः कालेय-मस्या.ञ्चैव पशुषु च प्रतिष्ठायो.त्तिष्ठन्ति स्तोमः।
- <15.11.1>❃ 15.11 स्वादिष्ठया मदिष्ठयेति गायत्री भवति, मदवद्धै रसव.त्तृतीयसवनं-मद.मेव तद्रस.न्दधाति।
- <15.11.2> गायत्रं भवति, यदेव गायत्रस्य ब्राह्मणम्।
- <15.11.3> संहितं भवति द्व्यक्षर.णिधनं- प्रतिष्ठायै, प्रतिष्ठायैवो.त्तिष्ठन्ति।
- <15.11.4> सफं भवति।
- <15.11.5> सफेन वै देवा इमा.न्लोका.न्त्समाप्नुवन्, यत्समाप्नुवं-स्तत्सफस्य सफत्व,मिमा.नेवैतेन लोका.न्त्समाप्यो.त्तिष्ठन्ति।
- <15.11.6> रोहितकूलीयं भवति, यदेव रोहितकूलीयस्य ब्राह्मणम्।
- <15.11.7> श्यावाश्वान्धीगवे भवत- स्समीच्यौ विराजौ दधा-त्यन्नाद्याय।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

- <15.11.8> पिपीलिका.मध्यासु स्तुवन्ति।
- <15.11.9> इन्द्रो वृत्रं हत्वा नास्तृषीति मन्यमानः परां परावत.मगच्छ,त्स एता.मनुष्टुभँ व्यौह-त्तां मध्ये व्यवासर्प,दिन्द्र.गृहे वा एषोऽभये यजते,ऽभय उत्तिष्ठति- य एवँ विद्वा.नेतासु स्तुवते।
- <15.11.10> यज्ञायज्ञीय.निधनं सौहविषं भवति, यज्ञायज्ञीया.देव त.त्तृतीयसवने न यन्ति।
- <15.11.11> वाजजि.द्भवति।
- <15.11.12> सर्वस्याऽऽप्त्यै- सर्वस्य जित्यै, सर्वँ वा एते वाज.ञ्जयन्ति- ये दशम.मह.रागच्छ,-न्त्यन्नँ वै वाजोऽन्नाद्य.स्यावरुद्ध्यै।
- <15.11.13> दशाक्षर.न्निधन.मुप यन्ति- दशरात्रस्य धृत्यै, दशाक्षरा विरा-ड्वैराज.मन्न-मन्नाद्य.स्यावरुद्ध्यै।
- <15.11.14> सूर्यवतीषु स्तुव-न्त्यन्तो वै सूरो-ऽन्त एत.द्दशम.मह्ना,मन्त एव तदन्तेन स्तुवते- प्रतिष्ठायै।
- <15.11.15> उपवत्यो भवन्ति प्रतिष्ठायै, परिवत्यो भवन्ति सर्वस्य पर्याप्त्यै।
- <15.11.16> चतुर्विंश एव स्तोमो भवति- तेजसे ब्रह्मवर्चसाय।
- <15.12.1> ❁ 15.12 विराड्वै वामदेव्य.मग्निष्टोम.साम भवति- शान्त्यै क्लृप्त्यै।
- <15.12.2> सद्वै वामदेव्यं साम्नां- सद्विरा.ड्छन्दसां- सत्त्रयस्त्रिंश स्स्तोमानां, सता.मन्ता.न्त्सन्धायोत्तिष्ठ,न्त्यपि ह पुत्रस्य सत्त्व.मश्नुते।
- <15.12.3> ब्रह्मवादिनो वदन्ति, यत.स्सत्त्रा.दुदस्थाता3 स्थिता3 इति, यद्यत इति ब्रूयु-रप्रतिष्ठाना अप्रजसो भविष्यन्ती-त्येना.न्ब्रूया,द्यत्स्थिता.दिति ब्रूयु- स्स्थायुकैषां श्री.र्भविष्यति- न वसीयांसो भविष्यन्ती-त्येना.न्ब्रूया,त्पूर्णा.देव पूर्ण.मभ्युदस्थामेति ब्रूयुः।
- <15.12.4> एते वै पूर्णा.त्पूर्ण.मभ्युत्तिष्ठन्ति- ये वामदेव्येन स्तुत्वो.त्तिष्ठन्ति।
- <15.12.5> अन्तरिक्षँ वै वामदेव्य-मन्तरिक्षेणेदं सर्वं पूर्णम्।
- <15.12.6> एष वै समृद्ध स्स्तोमो- यत्त्रयस्त्रिंश,स्त्रयस्त्रिंश.दक्षरासु समृद्धा.वेव प्रति तिष्ठन्ति।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham SGS

- <15.12.7> सर्वेषाँ वा एता.श्छन्दसां रूपँ- यत्त्रिपदा-स्तेन गायत्र्यो, यदेकादशाक्षराणि पदानि- तेन त्रिष्टुभो, यद्द्वादशाक्षरं पद- न्तेन जगत्यो, यत्त्रयस्त्रिंश.दक्षरा-स्तेन विराज-स्तेनैव चानुष्टुभो, न ह्येकस्मा.दक्षरा.द्विराधयन्ति।
- <15.12.8> त्रयस्त्रिंश एव स्तोमो भवति प्रतिष्ठायै- देवतासु वा एष प्रतिष्ठितः।

## ताण्ड्यब्राह्मणे षोडशोऽध्यायः

- <16.1.1> प्रजापतिर्वा इद.मेक आसी-न्नाह.रासी-न्न रात्रि.रासी,त्सोऽस्मि.न्नन्धे तमसि प्रासर्प-त्स ऐच्छ-त्स एत.मभ्यपद्यत, ततो वै तस्मै व्यौच्छ-द्व्युष्टिर्वा एष आह्रियते- यद्वै तज्ज्योति.रभव-त्तज्ज्योतिषो ज्योतिष्ट्वम्।
- <16.1.2> एष वाव प्रथमो यज्ञानाँ, य एतेनानिष्ट्वाऽथाऽन्येन यजते- गर्तपत्य.मेव तज्जीयते- प्र वा मीयते।
- <16.1.3> यथा वा इद.मग्ने.र्जाता.दग्नयो विह्रियन्त- एव.मेतस्मा.दध्यन्ये यज्ञा विह्रियन्ते।
- <16.1.4> यो हि त्रिवृ.दन्यँ यज्ञक्रतु.मापद्यते- स तन्दीपयति, यꣳ पञ्चदश- स्स तँ, यस्सप्तदश- स तँ, य एकविंश- स्स तम्।
- <16.1.5> एत.त्त-द्यदाहु-रेको यज्ञ इ-त्येतद्धि, सर्वे ज्योतिष्टोमा भवन्ति।
- <16.1.6> अस्थूरिर्वा एष सन्ततो यज्ञो, द्वौ द्वौ हि स्तोमौ सवनं वहत,स्त्रिवृ.त्पञ्चदशौ प्रातस्सवनं- पञ्चदश.सप्तदशौ माध्यन्दिनं सवनं- सप्तदशैकविंशौ तृतीयसवनम्।
- <16.1.7> या मितदक्षिणैव स्या.देष एव कार्य, इयँ वै ज्योति-रिय.ममितस्य यन्त्रि.कैषा वा एतँ यन्तु.मर्हति।
- <16.1.8> तस्य नवति.शतं स्तोत्रीया,स्तासाँ या अशीतिशत.न्ता ष्षड्विंशिन्यो- विराज ष्ष.ड्तव- ऋतुष्वेव विराजा प्रति तिष्ठति।
- <16.1.9> अथ या दशैषा वा आत्मन्या विरा-डेतस्याँ वा इदं पुरुषꣳ प्रतिष्ठितः।
- <16.1.10> गौश्चाश्व.श्चाश्वतरश्च गर्दभ-श्चाजा.श्चावयश्च- व्रीहयश्च यवाश्च तिलाश्च माषा-श्चैतस्या.मेव विराजि प्रति तिष्ठति।
- <16.1.11> तस्य द्वादश शत.न्दक्षिणाः।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

- <16.1.12> वीरहा वा एष देवानाँ- य.स्सोम.मभिषुणोति, या.श्शतँ वैर-न्तद्देवा.नवदयते,ऽथ या दश दश प्राणा॰- प्राणां.स्ताभि स्स्पृणोति, यैकादश्यात्मान. न्तया, या द्वादशी- सैव दक्षिणा।
- <16.1.13> श्लेष्म वा एत.द्यज्ञस्य- यद्दक्षिणा, न वा अश्लेष्मा रथो वह,त्यथ श्लेष्मवता य.ङ्काम.ङ्कामयते- तमभ्यश्नुत,-एव.मेतेन दक्षिणावता- यङ्काम.ङ्कामयते- तमभ्यश्नुते।
- <16.1.14> शुभो वा एता यज्ञस्य- य.द्दक्षिणा, यद्दक्षिणावता यजते-शुभ.मेवास्मि.न्दधाति।
- <16.2.1> ❃16.2 अथैष गौः।
- <16.2.2> गवा वै देवा असुरा.नेभ्यो लोकेभ्योऽनुद-न्तैभ्यो लोकेभ्यो भ्रातृव्य.न्नुदते- य एवँ वेद।
- <16.2.3> यद्वै तद्देवा असुरा.नेभ्यो लोकेभ्यो ऽगोवयं-स्तद्गो.र्गौत्वम्। (गोवयतिः तिरोधानार्थकः छान्दसो धातुः)
- <16.2.4> गोवयति पाप्मानं भ्रातृव्यँ- य एवँ वेद।
- <16.2.5> तस्य पञ्चदशं बहिष्पवमानँ, वज्रो वै पञ्चदशो- वज्र.मेव तत्पुरस्ता.न्निदधाति-तेन विजयते।
- <16.2.6> पशुस्तोमो वा एष- एव.मिव वै पशु स्समाहित,श्शिर स्स्थवीयो-ऽणीयस्यो ग्रीवा- पार्श्वाभ्याँ वरीया-न्त्सक्थिभ्यां वरिष्ठः।
- <16.2.7> यत्पञ्चदशं बहिष्पवमानं भवति- त्रिवृ.न्त्याज्यानि- सप्तदश माध्यन्दिनं सवन-मेकविंश.न्तृतीयसवनं, रूपेणैवैन.न्तत्समर्धयति।
- <16.2.8> एका संस्तुतानाँ विराज.मतिरिच्यते- तस्मा.त्पशो॰ पश्चा.दतिरिक्तम्।
- <16.3.1> ❃16.3 अथैष आयुः।
- <16.3.2> आयुषा वै देवा असुरा.नायुवता,ऽऽयुते भ्रातृव्यँ- य एवँ वेद।
- <16.3.3> स्वर्गकामो यजेत।
- <16.3.4> ऊर्ध्वा.स्स्तोमा य-न्त्यनपभ्रंशाय।
- <16.3.5> एतेनैवाऽऽमयाविनँ याजये-दतिरात्र॰ कार्यः।

- <16.3.6> स गायत्रीं सं पद्यते, प्राणो गाय-त्र्यायु.रेष- आयु.श्चैवास्मि.न्प्राण.श्चोभे समीची दधाति।

- <16.3.7> स्वर्ग्या वा एते स्तोमा, यज्ज्योति.र्भवति- ज्योति.रेवास्मै स पुरस्ता.द्धर,त्यथैष गौ.रेकया विराज.मतिरिक्त, आरम्भण.मेव त,दथैष आयु.रेकस्या विराज ऊन- आसाद एव सो,ऽथो ऊनातिरिक्तौ स्तोमौ मिथुनौ- प्रजात्यै।

- <16.3.8> एते वै त्रिकद्रुका स्स्तोमा, एतैर्वा इन्द्र स्सर्वा न्तृप्ति.मतृप्यत्।

- <16.3.9> तृप्यति प्रजया पशुभि-र्य एवँ वेद।

- <16.4.1> ❃ 16.4 प्रजापतिः प्रजा असृजत- ता अस्मै श्रैष्ठ्याय नातिष्ठन्त, स आसा.न्दिशां प्रजानाञ्च रसं प्रवृह्य- स्रज.ङ्कृत्वा प्रत्यमुञ्चत, ततोऽस्मै प्रजा.श्श्रैष्ठ्यायातिष्ठन्त।

- <16.4.2> तिष्ठन्तेऽस्मै समाना श्श्रैष्ठ्याय, य एवँ वेद।

- <16.4.3> सोऽकामय.तेन्द्रो मे प्रजायां श्रेष्ठ स्स्यादिति, तामस्मै स्रजं प्रत्यमुञ्च,त्ततो वा इन्द्राय प्रजा श्श्रैष्ठ्यायातिष्ठन्त, तच्छिल्पं पश्यन्त्यो- यत्पित.र्यपश्यन्।

- <16.4.4> तस्मा.द्यः पुत्राणा न्दाय न्धनतम.मिवोपैति, तं मन्यन्ते-ऽय.मेवेदं भविष्यतीति।

- <16.4.5> ततो वा इद.मिन्द्रो विश्व.मजय,द्यद्विश्व.मजय-त्तस्मा.द्विश्वजित्।

- <16.4.6> सोऽकामयत, यन्मेऽनभिजित.न्तदभि जयेय.मिति- स एत.मभिजित मपश्य-त्तेनानभिजित.मभ्यजयत्।

- <16.4.7> यदभिजि.द्भव-त्यनभिजित.स्याभिजित्यै।

- <16.4.8> तौ वा एता.विन्द्रस्तोमौ वीर्यवन्तौ, शिल्पँ वा एतौ नाम स्तोमा.वास्ताम्।

- <16.4.9> पश्यते गृहे शिल्पँ- य एवँ वेद।

- <16.4.10> न वै यमौ नाम स्तोमौ स्तो, यो यमाभ्याँ यजे-तैताभ्याँ यजेत समृद्ध्यै।

- <16.4.11> पुन.रभ्यावर्तं स्तोमा भवन्ति, पुन.रभ्यावर्तं ह्येताभ्या-मिन्द्रोऽजित. मजयत्।

- <16.4.12> त्रीं.स्त्रिवृ.दभिजितः प्रणयति, त्री.न्पञ्चदश-स्त्री.न्त्सप्तदश-स्त्री.नेकविंश,- स्ते द्वादश सं पद्यन्ते, द्वादश मासा.स्सँवत्सरः प्रजापतिः- प्रजापति मेवाऽऽप्नोति।

- <16.4.13> चतुर.स्त्रिवृ.द्विश्वजित॰ प्रणयति, चतुर॰ पञ्चदश-श्चतुर स्सप्तदश,स्ते द्वादश सं पद्यन्ते, द्वादश मासा.स्सँवत्सर- स्सँवत्सर॰ प्रजापति॰- प्रजापति.मेवाऽऽप्नोति।
- <16.5.1> ❈ 16. 5 उप त्वा जामयो गिर इत्युपवती प्रतिप.द्भवति- स्तोमस्य रूपम्।
- <16.5.2> प्राणै.र्वा एष व्यृध्यत इत्याहु-र्य स्सर्व न्ददाति, सर्वा.न्त्स्तोमा.न्त्सर्वाणि पृष्ठा.न्युपैतीति, यद्वायव्या भवति- प्राणानां समृद्ध्यै।
- <16.5.3> सरस्वतश्च सरस्वत्या.श्चोत्तरे भवतः।
- <16.5.4> मिथुनँ वा एत-द्यत्सरस्वांश्च सरस्वती च, मिथुन.मेवास्य यज्ञमुखे दधाति- प्रजननाय।
- <16.5.5> सावित्री चतुर्थी भवति।
- <16.5.6> दुष्करँ वा एष करोति- य.स्सर्व न्ददाति, यत्सावित्री भवति- सवितृप्रसूतं मे कर्मासदिति- सवितृप्रसूत.मेवास्य कर्म भवति।
- <16.5.7> ब्राह्मणस्पत्या पञ्चमी भवति।
- <16.5.8> ब्रह्म वै ब्रह्मणस्पति-र्ब्रह्मैवास्य यज्ञमुखे दधाति।
- <16.5.9> आग्निपावमानी षष्ठी भवति।
- <16.5.10> अग्नि.रेवैन.न्निष्टपति- पवमान॰ पुनाति- पूत.मेवैनँ यज्ञियं पृष्ठा.न्युप नयति।
- <16.5.11> यन्ति वा एते पथ इत्याहु-र्ये सम्भार्या॰ कुर्वते।
- <16.5.12> पावमान उत्तम.स्तृचो भवति, तेन पथो नयन्ति।
- <16.5.13> स तु वै पृष्ठै.स्स्तुवीते.त्याहु-र्य एतानि बहिष्पवमाने युञ्ज्या.दिति।
- <16.5.14> उपवती प्रतिप.द्भव,त्युप वै रथन्तरं- रथन्तर.मेवास्मै तया युनक्ति।
- <16.5.15> सरस्वती द्वितीया भवति, स्वर्गो लोक स्सरस्वा-न्त्स्वर्गो लोको बृह-द्बृह.देवास्मै तया युनक्ति।
- <16.5.16> सरस्वत्या.स्तृतीया भवति, वाग्वै सरस्वती- वा.ग्वैरूपँ- वैरूप.मेवास्मै तया युनक्ति।
- <16.5.17> सावित्री चतुर्थी भवति, प्रजापति.र्वै सविता- प्रजापति.र्वैराजँ- वैराज.मेवास्मै तया युनक्ति।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

- <16.5.18> ब्राह्मणस्पत्या पञ्चमी भवति, ब्रह्म वै ब्रह्मणस्पति-र्ब्रह्म शक्वर्य-श्शक्वरी.रेवास्मै तया युनक्ति।
- <16.5.19> आग्निपावमानी षष्ठी भवति, गायत्री वै रेवती- गायत्रछन्दा अग्नी-रेवती.रेवास्मै तया युनक्ति।
- <16.5.20> न चत्वारि षड्ह्णो विभवन्ति, य.दनिरुक्तानि- तेन विभवन्ति।
- <16.5.21> सर्वाणि स्वारा.ण्याज्यानि- तज्जामि, नानादेवत्यै स्स्तुव.न्त्यजामितायै।
- <16.5.22> सुषमिद्धो न आवहे-त्याप्रिय आज्यानि भवन्ति।
- <16.5.23> प्रजापतिः प्रजा असृजत- स दुग्धो रिरिचानोऽमन्यत, स एता.न्याप्रिय आज्या.न्यपश्य-त्तैरात्मान.माऽप्रीणा,दुग्ध इव वा एष रिरिचानो- यस्सर्व.न्ददाति, यदाप्रिय आज्यानि भव-न्त्यात्मान.मेवैतै.राप्रीणाति।
- <16.5.24> एतर्हि तु वै पृष्ठानि यथाऽऽयतन.ङ्कल्पन्त इत्याहु- र्य.द्रथन्तरं प्रथमं-बृह.दुत्तमं- मध्य इतराणीति।
- <16.5.24> जामि वा एत.द्यज्ञे क्रियत इत्याहु-र्यत्सर्वाणि निधनवन्ति सह क्रियन्त इति, यदन्तरा सोमा य-न्त्यन्तरोक्थानि शस्यन्ते-ऽन्तरा वषड्कुर्वन्ति- तेनाजामि।
- <16.5.26> व्यत्यास.मिडाश्च निधनानि चाऽऽहु-स्तेनाजामि।
- <16.5.27> च्यवन्ते वा एत.द्देवत्य स्स्वा.दायतना.दित्याहु-र्यत्त्रयस्त्रिंशा.त्स्तोमा.द्यन्तीति, यद्गायत्र्यो भवन्ति- तेनाऽऽयतना.न्न च्यवन्ते, या हि का च गायत्री- सा रेवती।
- <16.6.1>❃ 16.6 परशुभि.र्वा एष व्यृध्यत इत्याहु-र्यस्सर्व न्ददाति, तच्छवीं परि धत्ते-पशुभि.रेव समृध्यते।
- <16.6.2> रोहिणी छवी भव,त्येतद्वै पशूनां भूयिष्ठं रूपँ- यद्रोहितं, साक्षा.देवैना.नव रुन्धे।
- <16.6.3> अरण्ये तिस्रो वस.त्यारण्य,न्ताभि.रन्नाद्य.मव रुन्धे।
- <16.6.4> उदुम्बरे वस-त्यू.र्गुदुम्बर- ऊर्ज.मेवाव रुन्धे।
- <16.6.5> खनित्रेण जीव-त्यवृत्ति.मप जयति।

- <16.6.6> उभयतः~क्ष्णु.दभ्रि.र्भव-त्युभयत एवास्मा अन्नाद्यं रज-त्यस्माच्च लोका.दमुष्माच्च। (रजति - रञ्जयति)
- <16.6.7> निषादेषु तिस्रो वस,त्यस्याँ वा एते परीत्ता- यदेवास्या.मन्नाद्य-न्तदव रुन्धे।
- <16.6.8> जने तिस्रो वसति जन्य,न्ताभि.रन्नाद्य.मव रुन्धे।
- <16.6.9> समानजने तिस्र- स्समान.जन्य.न्ताभिः।
- <16.6.10> द्वादशैता रात्रयो भवन्ति, द्वादश मासा स्सँवत्सर- स्सँवत्सर.मन्वन्नाद्यं प्र जायते, तदेवास्वाऽव रुन्धे।
- <16.6.11> सँवत्सर.न्न याचे,दामाद्य.मिव वा एत-द्य.स्सद्यो.दत्तं प्रत्यत्ति, सद्यो वै देवानां सँवत्सरः।
- <16.6.12> नोदीयमानं प्रति नुदे-दन्नाद्य.स्याप्रतिनोदाय।
- <16.6.13> उष्णीषं बिभर्ति शिल्पत्वाय।
- <16.6.14> न मृन्मयेन पिबे,दाहुतिर्वा एषा- यद्ब्राह्मणस्य मुख,न्न वै मृन्मय.माहुति.मानशे-ऽथ य.दमृन्मयपो भवति- स्व एव मुख आहुति.ञ्जुहोति।
- <16.7.1> ❃ 16.7 पञ्चविंशोऽग्निष्टोमः।
- <16.7.2> सर्वजिता वै देवा स्सर्व.मजय,न्त्सर्वऽऽस्याप्त्यै- सर्वस्य जित्यै- सर्व.मेवैतेनाऽऽप्नोति- सर्व.ञ्जयति।
- <16.7.3> तस्य महाव्रतं पृष्ठम्।
- <16.7.4> अर्क्यं शस्यते।
- <16.7.5> चतुर्विंशति स्सँवत्सर.स्यार्धमासा- स्सँवत्सरः पञ्चविंशो-ऽन्नँ व्रतं- सँवत्सरा देतेनान्नाद्य.मव रुन्धे।
- <16.7.6> अन्नादो भवति- य एवँ वेद।
- <16.7.7> एतेन वै गौ.राङ्गिरस स्सर्वं पाप्मान.मतर,त्सर्वं पाप्मान.न्तर-त्येतेन स्तोमेन तुष्टुवानः।
- <16.8.1> ❃ 16.8 अथैष ज्योतिः।

Sri Sachchidananda Avadhoota Datta Peetham • Mysore •

* <16.8.2> पराङ्वै त्रिरात्रो-ऽर्वा.ङग्निष्टोमो, य.स्त्रिरात्रे विभ्रंशते- न तस्मि.न्पुनर,स्त्यथ योऽग्निष्टोमे प्रायश्चित्तिम-त्तदपि ह्येतेनैकविंशति.दक्षिणेन पुन.र्यजेत, यस्मिन् ह्येव यज्ञक्रतौ विभ्रंशते- सैव तस्य प्रायश्चित्तिः।
* <16.8.3> उपसदि सहस्रं प्रातरनुवाक.मन्वाह, तदसौ लोक स्सहस्र न्दक्षिणा-स्तदन्तरिक्षं सहस्र,मेता.न्यक्षराणि तदयँ लोक, एषु लोकेषु प्रति तिष्ठति- य एवँ वेद।
* <16.8.4> ऋक्स्था वा अन्य.त्सहस्र.मित्याहु-रक्षरेस्था अन्यदिति, यत्त्रिरात्रे दीयते-तदृक्स्था,ऽथ यदग्निष्टोमे- तदक्षरेस्था।
* <16.8.5> यत्सहस्राक्षरासु- ब्रह्मसाम भवति, सहस्रस्यैव सा प्रतिष्ठुतिः।
* <16.8.6> यावद्वै सहस्र.ङ्गाव उत्तराधरा इत्याहु-स्ताव.दस्मा.ल्लोका.त्स्वर्गो लोक इति, तस्मा.दाहु- स्सहस्रयाजी वा इमा.न्लोका.न्प्राऽऽप्नोति।
* <16.8.7> पशुभिर्वा एष व्यृध्यत इत्याहु,र्यस्सद्य स्सहस्रं ददातीति- पङ्क्तिषु ब्रह्मसाम भवति- पाङ्क्तो यज्ञः- पाङ्क्ताः पशवो- यज्ञ एव पशुषु प्रति तिष्ठति।
* <16.8.8> त्रिवृतं स्तोमं सं पद्यते- विराज.ञ्छन्दः।
* <16.8.9> प्राणो वै त्रिवृ.दन्नँ विरा,ण्ण वै प्राण ऋते-ऽन्ना.त्पारयति, नान्न.मृते प्राणा,त्प्राणेषु चैवान्नाद्ये च प्रति तिष्ठति।
* <16.9.1>❃ 16.9 अथैष सर्वज्योति- स्सर्वस्याऽऽप्ति- स्सर्वस्य जिति-स्सर्व.मेवैतेनाऽऽप्नोति- सर्व.ञ्जयति।
* <16.9.2> परमो वा एष यज्ञः- परमं सहस्रं, परमता.ङ्गच्छति- य एवँ वेद।
* <16.9.3> तस्य द्विशता स्स्तोत्रीया, अन्तो वै वाचो द्विशत-मन्त.स्सहस्र,मन्त एव तदन्तं प्रतिष्ठापयति।
* <16.9.4> कृतस्तोमो वा एष, सर्व.मेवैतेनाऽऽप्नोति- सर्व.ञ्जयति- सर्वं हि कृतेन जयति।
* <16.9.5> विराजं सं पद्यते,ऽन्नं विरा-डन्नाद्य.मेवाव रुन्धे।
* <16.9.6> एकविंशोऽग्निष्टोमो भवति, प्रतिष्ठा वा एकविंशो-ऽन्तत एव यज्ञस्य प्रति तिष्ठति।
* <16.10.1>❃ 16.10 अथैष विश्वज्योति.रुक्थ्यः।

Sri Sachidananda Avadhoota Datta Peetham

- <16.10.2> पशवो वा उक्थानि- पशवो विश्व.ञ्ज्योति-र्विश्व एव ज्योतौ पशुषु प्रति तिष्ठति।
- <16.10.3> अहर्भिर्वै त्रिरात्र इमा.न्लोका.नाप्नोति- सवनै.रेष, उत्तर.मुत्तर.न्त्रिरात्रस्याह.र्वर्षीय, उत्तर.मुत्तर.मेतस्य सवनँ वर्षीय-स्तेन त्रिरात्र.माप्नो,त्युत्तर उत्तर एषाँ लोकाना.ञ्ज्यायां-स्तेनेमा.न्लोका.नाप्नोति।
- <16.10.4> अस्थूरि.र्वा एष सन्ततो यज्ञो, द्वौ द्वौ हि स्तोमौ सवनं वहतः।
- <16.10.5> त्रिवृ.त्पञ्चदशौ प्रातस्सवनं- सप्तदश.पञ्चविंशौ माध्यन्दिनं सवनं- चतुर्विंशैकविंशौ तृतीयसवनम्।
- <16.10.6> यद्वै युक्ते सन्तत आधीयते- वहति त,द्यथा युक्ते सन्तत आदध्या-देव.मेतस्मि.न्त्सहस्र.माधीयते।
- <16.10.7> उभे बृह.द्रथन्तरे भवतः।
- <16.10.8> इयँ वै रथन्तर- न्द्यौ.र्बृह,देवास्मा.ल्लोका.द्राय-त्येवामुष्मा,-दुभयो.रनयो.र्लोकयोꣳ प्रति तिष्ठति।
- <16.10.9> अनुष्टुभ्याथर्वणं भवति।
- <16.10.10> भेषजँ वै देवाना.मथर्वाणो- भेषजायैवारिष्ट्यै।
- <16.10.11> उद्वंशीय.मुक्थाना.मन्ततो भवति, सर्वेषाँ वा एत.त्पृष्ठानां रूपं- सर्वेष्वेव रूपेषु प्रति तिष्ठति।
- <16.10.12> उक्थो भवति, पशवो वा उक्थानि- पशव स्सहस्रं- पशुष्वेव तत्पशू.न्दधाति।
- <16.11.1> ❃ 16.11 यो वा अग्निष्टोमे त्रिरात्रं प्रोतँ विद्या-त्सोऽग्निष्टोमे सहस्र न्दद्या,त्त्रिरात्राꣳयतनं हि सहस्रम्।
- <16.11.2> उपास्मै गायता नर- उपोषु जात.मप्तुरं- पवस्व वाचो अग्रिय-इति प्रतिपदो भव-न्त्येतद्वै त्रिरात्र.मकः।
- <16.11.3> पवमाने रथन्तर.ङ्करोति, पवमानस्यान्त्यँ वामदेव्यं बृह.त्पृष्ठम्।

Sri Sachchidananda Avadhoota Datta Peetham

- <16.11.4> इयँ वै रथन्तर-मन्तरिक्षँ वामदेव्य- न्द्यौ.र्बृह,दिमे लोका.स्त्रिरात्रो, यदेतानि सामानि सध्र्यञ्चि करो-तीमा.नेव तल्लोका.न्त्सन्दधाति, तेन त्रिरात्र.माप्नोति।
- <16.11.5> ककुभं प्राची.मुदूहति।
- <16.11.6> पुरो ह्येतया सत्या,ऽपशु वीर्य.ङ्करोति।
- <16.11.7> तस्या.मिडानां सङ्कार४, पुरुषो वै ककु-प्पशव इडानां संङ्कार- आत्म.न्येव तत्पशू.न्प्रतिष्ठापयति।
- <16.11.8> प्रत्नं पीयूषं पूर्व्यँ यदुक्थमिति सतोबृहत्यो भवन्ति।
- <16.11.9> सतोबृहत्या वै देवा इमा.न्लोका.न्व्याप्नुव,न्निमा.नेवैताभि.र्लोका.न्व्याप्नोति।
- <16.11.10> ता वा एता गायत्र्यो- यत्त्रिपदा-स्तेन गायत्र्य,स्ता वा एता जगत्यो- यद्द्वादशाक्षराणि पदानि- तेन जगत्य,स्ता वा एता बृहत्यो- यत्षट्त्रिंश.दक्षरा-स्तेन बृहत्य,- स्सर्वेषाँ वा एता.श्छन्दसां रूपं- सर्वाणि रूपाणि पशूना.मव रुन्धे।
- <16.11.11> एतद्वै प्रत्यक्षं महाव्रत- न्तस्य गायत्रं शिरो- बृहद्रथन्तरे पक्षौ- वामदेव्य.मात्मा- यज्ञायज्ञीयं पुच्छ-न्दक्षिणा एवार्क्य,मेष वाव प्रत्यक्षं महाव्रतेन स्तुवते- य एतेन यजते।
- <16.11.12> तस्य बृह.त्पृष्ठं पङ्क्तिषु ब्रह्मसाम, तदाहु-श्छन्दो व्याधीयते- यद्बृह.त्पृष्ठं भवति- पङ्क्तिषु ब्रह्मसामेति।
- <16.11.13> श्रायन्तीय.मेव कार्य-न्न छन्दो व्याधीयते।
- <16.11.14> एषो सहस्रस्य प्रतिष्ठुतिः।
- <16.11.15> सहस्र.मन्य.मभितिष्ठती.त्याहु- स्सहस्र.मन्योऽन्वातिष्ठतीति।
- <16.11.16> ककुभं प्राची.मुदूह,त्यथ यदेषा द्विपदा ककुभो लोके क्रियते- सहस्रस्यैव सोऽन्वास्थायः।
- <16.11.17> अनुष्टुभं सं पद्यते, वा.गनुष्टु-ब्वाक्त्रिरात्र,स्तेन त्रिरात्र.माप्नोति।
- <16.12.1> ❃ 16.12 आदित्या.श्चाङ्गिरस.श्चादीक्षन्त- ते स्वर्गे लोकेऽस्पर्धन्त, तेऽङ्गिरस आदित्येभ्य श्श्वस्सुत्यां प्राब्रुवं,स्त आदित्या एत.मपश्यं-स्तं सद्य४ परिक्रीयाऽयास्य मुद्गातारँ वृत्वा- तेन स्तुत्वा- स्वर्गँ लोक.माय-न्नहीय.न्ताङ्गिरसः।

- <16.12.2> भ्रातृव्यवान् यजेत।
- <16.12.3> भव.त्यात्मना, पराऽस्य भ्रातृव्यो भवति- य एवँ वेद।
- <16.12.4> तस्मा अमु.मादित्य.मश्वं श्वेत.ङ्कृत्वा दक्षिणा.माऽनयं,स्ते प्रतिगृह्य व्यभ्रंशत, स एता.न्यायास्या.न्यपश्य-त्तै.रात्मानं समश्रीणात्।
- <16.12.5> त.दायास्यानि भवन्ति- भेषजायैव शान्त्यै।
- <16.12.6> स्वर्गकामो यजेत।
- <16.12.7> बृहतीं सं पद्यते, बृहत्या वै देवा स्स्वर्गँ लोक.माय,न्त्स्वर्ग.मेवैतेन लोक.माप्नोति।
- <16.12.8> पशुकामो यजेत।
- <16.12.9> पशवो वै बृहती- पशुष्वेव प्रति तिष्ठति।
- <16.13.1> ❃ 16.13 एतस्यैवैकविंश.मग्निष्टोमसाम कृत्वा,ऽऽमयाविनँ याजयेत्।
- <16.13.2> प्राणो वै त्रिवृ-त्प्राण आदित्यꣳ, प्राणै.रेष व्यृध्यते- य आमयावी, प्राणै.रेवैनं समर्धयति।
- <16.13.3> विराजं सं पद्यते,ऽप वा एतस्मा.दन्नाद्य.ङ्कामति- य आमया,व्यन्नँ विरा-डन्नाद्य.मेवास्मि.न्दधाति।
- <16.13.4> एकविंशोऽग्निष्टोमो भव,त्यप्रतिष्ठितो वा एष- य आमयावी, प्रतिष्ठैकविंशꣳ प्रत्येव तिष्ठति।
- <16.13.5> एतेनैवान्नाद्यकामो वा प्रतिष्ठाकामो वा यजे,तान्नँ विरा-ड्रतिष्ठैकविंशो,ऽत्त्यन्नं प्रति तिष्ठति।
- <16.13.6> उर्वरा वेदि.र्भव,त्येतद्वा अस्या वीर्यवत्तमँ- वीर्येणैव यज्ञं समर्धयति।
- <16.13.7> खल उत्तरवेदि-रत्र हि स रस स्समवैति- सरस.मेव यज्ञ.ङ्करोति।
- <16.13.8> खलेवाली यूपो भव,त्येतया हि तं रस.मुत्कृषन्ति।
- <16.13.9> त्रिवत्स.स्साण्ड.स्सोमक्रयण- स्सेन्द्रत्वाय।
- <16.13.10> सर्वा दिशोऽश्वरथा- स्सोमप्रवाका विधावन्ति।
- <16.13.11> सर्वाभ्य एवास्मै दिग्भ्योऽन्नाद्य.मव रुन्धे।

- <16.13.12> योजने चतुर्वाहिणा प्राच्या.न्दिशि, प्राहैव.मिव वा अध्वानो विमिता-यैवाध्वनो मात्रा- ता.न्धावयन्ति, त्रैपदे प्रष्ठिवाहिनोदीच्या-ङ्गव्यूतौ द्योगेन प्रतीच्या-ङ्कोशे स्थूरिणा दक्षि,णैतद्वै दिशां रूपँ, यदेव दिशां रूप- न्तेन यज्ञं समर्धयन्ति। (द्योगः- अश्वद्वययुक्तो रथः)
- <16.13.13> सक्षीर.दृतयो रथा भवन्ति, ततो यन्नवनीत.मुदिया-त्तदाज्येऽपि कार्यं-सद्यस्त्वाय।
- <16.14.1> ❃ 16.14 अथैषोऽङ्गिरसा.मनुक्रीः।
- <16.14.2> एतेन वा अङ्गिरस आदित्या.नाप्नुवन्, यो हीन आनुजावर इव स्या-त्स एतेन यजेता-ऽऽप्नोति पूर्वेषां प्रहा,माप्नुवन् ह्येतेनाङ्गिरस आदित्यान्।
- <16.14.3> तस्य चतुर्विंशौ पवमानौ।
- <16.14.4> चतुर्विंश.त्यक्षरा गायत्री- गायत्र्या वै देवा इमा.न्लोका.न्व्याप्नुव,-न्निमा.नेवैतेन लोका.न्व्याप्नोति।
- <16.14.5> तेजो ब्रह्मवर्चस.ङ्गायत्री, तेज एव ब्रह्मवर्चस.मव रुन्धे, प्राणो गायत्री प्रजननं- प्राणा.देव गायत्र्याः प्रजायते।
- <16.14.6> उभये स्तोमा युग्मन्त.श्चायुजश्च- तन्मिथुन,न्तस्मा.न्मिथुना.त्प्र जायते।
- <16.14.7> विराजं संपद्यते,ऽन्नं विरा-डन्नाद्य.मेवाव रुन्धे।
- <16.14.8> एकविंशोऽग्निष्टोमो भवति, प्रतिष्ठा वा एकविंशो-ऽन्तत एव यज्ञस्य प्रति तिष्ठति।
- <16.15.1> ❃ 16.15 अथैष विश्वजि.च्छिल्पः।
- <16.15.2> शिल्पँ वा एष स्तोमानां, पश्यति गृहे शिल्पँ- य एवँ वेद।
- <16.15.3> तस्याष्टादशौ पवमानौ।
- <16.15.4> चक्रीवान् वा एष यज्ञः कामाय, यङ्काम.ङ्कामयते- तमेतेनाभ्यश्नुते, यत्र हि चक्रीवता कामयते- तदभ्यश्नुते।
- <16.15.5> स्वर्गकामो यजेत।
- <16.15.6> स्वर्गो लोकः पृष्ठानि, स्वर्ग.मेवैतेन लोक.माप्नोति।

- <16.15.7> तेजो ब्रह्मवर्चसं पृष्ठानि, यदेकधा पृष्ठानि भव-न्त्येकधैवास्मिं.स्तेजो ब्रह्मवर्चस.न्दधाति।
- <16.15.8> अन्नं पशवः पृष्ठानि, यदेकधा पृष्ठानि भव-न्त्येकधैवास्मि.न्नन्नाद्यं पशू.न्दधाति।
- <16.15.9> तदाहु-र्नानालोकानि पृष्ठानि- यदेकस्मिन् यज्ञक्रतौ समवरुध्यन्त- ईश्वरो यजमानोऽप्रतिष्ठातो.रिति।
- <16.15.10> एकविंशं होतुः पृष्ठं भवति, प्रतिष्ठा वा एकविंशो- मध्य एव यज्ञस्य प्रति तिष्ठ,त्येकविंशोऽग्निष्टोमो भवति, प्रतिष्ठा वा एकविंशो-ऽन्तत एव यज्ञस्य प्रति तिष्ठति।
- <16.15.11> द्वावेता.वेकविंशौ भवतो, द्विपाद्यजमानो- यजमान.मेव यज्ञे पशुषु च प्रतिष्ठापयति।
- <16.16.1> ❃ 16.16 अथैष एक.त्रिकः प्रजापते-रुद्भित्।
- <16.16.2> एतेन वै प्रजापति.रेषाँ लोकाना.मुदभिनत्।
- <16.16.3> कृतस्तोमो वा एष- उद्भिन्नं ह्येव कृतस्य।
- <16.16.4> यदेकया स्तुव-न्त्येको वै प्रजापतिः- प्रजापति.मेवाऽऽप्नो,त्यथ यत्तिसृभि-स्त्रय इमे लोका- एष्वेव लोकेषु प्रति तिष्ठति।
- <16.16.5> ता उ चतस्र.स्सं पद्यन्ते, चतुष्पादाः पशवः- पशुष्वेव प्रति तिष्ठति।
- <16.16.6> गायत्रीं सं पद्यते, तेजो ब्रह्मवर्चस.ङ्गायत्री- तेज एव ब्रह्मवर्चस.मव रुन्धे।
- <16.16.7> प्राणो गायत्री प्रजननं, प्राणा.देव गायत्र्याः प्र जायते।
- <16.16.8> या रुचा हरिण्या पुनान- इत्यार्भवः पवमानः।
- <16.16.9> सर्वेषाँ वा एषा छन्दसां रूपं, सर्वेष्वेव छन्द.स्स्वार्भवं पवमानं प्रतिष्ठापयति।
- <16.16.10> तस्या.ङ्गायत्रपार्श्वं,न्न गायत्रा.देति- न साम्नो- न निधनात्।

## ताण्ड्यब्राह्मणे सप्तदशोऽध्यायः

- <17.1.1> ❃17.1 देवा वै स्वर्गँ लोक.मायं,स्तेषा.न्दैवा अहीयन्त- व्रात्यां प्रवसन्त-स्त आऽगच्छन्, यतो देवा स्स्वर्गँ लोक.मायं-स्तेन तं स्तोम.न्न च्छन्दोऽविन्दन्- येन ता.नाप्स्यं,स्ते

देवा मरुतोऽब्रुव- न्नेतेभ्य.स्तं स्तोम.न्तच्छन्द॰ प्रयच्छत- येनास्मा. नाप्नवा.निति, तेभ्य एतं षोडशं स्तोमं प्रायच्छ-न्परोऽक्ष.मनुष्टुभ-, न्ततो वै ते ता.नाप्नुवन्।

- <17.1.2> हीना वा एते हीयन्ते- ये व्रात्यां प्रवसन्ति- न हि ब्रह्मचर्य.ञ्चरन्ति- न कृषिँ- वणिज्याँ, षोडशो वा एत.त्स्तोम स्समाप्तु.मर्हति।
- <17.1.3> मरु.त्स्तोमो वा एष, यानि क्षुद्राणि च्छन्दांसि- तानि मरुताम्।
- <17.1.4> ककुभं प्राची.मुदूह,त्यथ यदेषा द्विपदा ककुभो लोके क्रियते- रूपेणैवेनां.स्तत्समर्धयति।
- <17.1.2> अधा हीन्द्र गिर्वण-इति विषम.ञ्छन्दो, विषम इव वै व्रात- स्सर्वा.नेवैता.न्त्समा.न्करोति।
- <17.1.6> तासु द्यौतानम्।
- <17.1.7> द्युतानो मारुत.स्तेषा.ङ्गृहपति.रासी,त्त एतेन स्तोमेनायजन्त- ते सर्व आर्ध्नुवन्, यदेत.त्साम भव-त्यृद्ध्या एव।
- <17.1.8> यन्निरुक्त.न्निधन.मुपेयु-र्गृहपति.रेवर्ध्नुया-दपेतर आर्ध्नीता,ऽथ य.दनिरुक्त- मुपयन्ति- सर्वा.नेवैता.नृद्धौ भूतौ प्रतिष्ठापयति।
- <17.1.9> गरगिरो वा एते ये ब्रह्माद्य.ञ्जन्य.मन्न.मद,न्त्यदुरुक्त.वाक्य.न्दुरुक्त.माहु,- रदण्ड्य.न्दण्डेन घ्नन्त.श्चर-न्त्यदीक्षिता दीक्षितवाचँ वदन्ति, षोडशो वा एतेषां स्तोम॰ पाप्मान.न्निर्हन्तु.मर्हति, यदेते चत्वार ष्षोडशा भवन्ति- तेन पाप्मनोऽधि निर्मुच्यन्ते।
- <17.1.10> देवो वो द्रविणोदा- इत्यग्निष्टोमसाम कार्य,न्देवतास्वेवैना.न्प्रतिष्ठापयति।
- <17.1.11> अथो खल्वाहु,रदर्शि गातुवित्तम-इत्येव सतोबृहतीषु कार्यँ, विषम इव वै व्रात- स्सर्वा.नेवैना.न्त्सतो.बृहत॰ करोति।
- <17.1.12> तदाहु- श्शिथिल.मिव वा एत.च्छन्द.श्चराचरँ- यत्सतोबृहती, देवो वो द्रविणोदा- इत्येव कार्यम्।
- <17.1.13> एषा वै प्रतिष्ठिता बृहती- या पुन॰पदा, तद्य.त्पदं पुन.रारभते- तस्मा.त्पुत्रो मातर.मध्येति।

- <17.1.14> उष्णीषञ्च- प्रतोदश्च- ज्या.ह्लोडश्च विपथश्च- फलका- स्तीर्णꣳ कृष्णशं वासꣳ- कृष्णवलक्षे अजिने- रजतो निष्क-स्तद्गृहपतेः। (ज्याह्लोडः- ज्या ह्लोडा (गता) यस्य स धनुः, कृष्णशः- कृष्णदशः, वलक्षः- श्वेतः)

- <17.1.15> वलूकान्तानि दामतूषा-णीतरेषा.न्द्वे द्वे दामनी- द्वे द्वे उपानहौ- द्विषंहिता.न्यजिनानि। (वलूक - लोहितवर्णः)

- <17.1.16> एतद्वै व्रात्यधनँ, यस्मा एत.द्ददति- तस्मि.न्नेव मृजाना यान्ति।

- <17.1.17> त्रयस्त्रिंशता त्रयस्त्रिंशता गृहपति.मभि समायन्ति, त्रयस्त्रिंशद्धि देवा आर्ध्नुव-न्नृध्या एव।

- <17.2.1> ❃17.2 अथैष षड्वोडशी, ये नृशंसा निन्दिता स्सन्तो- व्रात्यां प्रवसेयु-स्त एतेन यजेरन्।

- <17.2.2> अभिपूर्वेण वा एते पाप्मना गृहीता- ये नृशंसा निन्दिता स्सन्तो- व्रात्यां प्रवसन्ति, यत्ष.ड्वोडशानि स्तोत्राणि भवन्ति- तेन पाप्मनोऽधि निर्मुच्यन्ते।

- <17.2.3> यदेकविंशोऽग्निष्टोमो भवति, प्रतिष्ठा वा एकविंशो- मध्यत एव यज्ञस्य प्रति तिष्ठति।

- <17.2.4> उक्थो भवति, पशवो वा उक्थानि- पशवो नृशंस-मग्र्यं परि णयन्ति, पशुभि.रेवैना.नग्र्यं परि णयति।

- <17.3.1> ❃17.3 अथैष द्विषोडशी, ये कनिष्ठा स्सन्तो व्रात्यां प्रवसेयु-स्त एतेन यजेरन्।

- <17.3.2> हीना वा एते हीयन्ते- ये कनिष्ठा.स्सन्तो व्रात्यां प्रवसन्ति, य.त्त्रिवृतꣳ पवमाना भवन्ति- मुखँ वै त्रिवृ.त्स्तोमानां- मुखत एवैनान् यज्ञस्य परि णयति।

- <17.3.3> यद्वै षोडशे स्तोत्रे भवत-स्तेन पाप्मनोऽधि निर्मुच्यन्ते।

- <17.3.4> एकविंशोऽग्निष्टोमो भवति, प्रतिष्ठा वा एकविंशो-ऽन्तत एव यज्ञस्य प्रति तिष्ठति।

- <17.4.1> ❃17.4 अथैष शम.नीचा.मेढ्राणां स्तोमो, ये ज्येष्ठा स्सन्तो व्रात्यां प्रवसेयु-स्त एतेन यजेरन्। (स्थविरत्वा.न्नष्टवीर्यः शमनीचामेढ्रः)

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

- <17.4.2> अग्रा.दग्रं रोह-न्त्यूर्ध्वा स्स्तोमा य-न्त्यनपभ्रंशाय।
- <17.4.3> एतेन वै शम.नीचा.मेढ्रा अयजन्त, तेषा.ङ्कुषीतक स्सामश्रवसो गृहपति रासी-त्तान्लुशाकपिः खार्गलि.रनु.व्याहर-दवाकीर्षत- कनीयांसौ स्तोमा.वुपागु.रिति, तस्मा.त्कौषीतकाना.न्न कश्च.नातीव जिहीते, यज्ञावकीर्णा हि।
- <17.5.1> ❀17.5 इन्द्रो वै त्रिशिरस.न्त्वाष्ट्र.महं,स्तमश्लीला वा.गभ्यवद-त्सोऽग्नि मुपाधाव-त्स एत.दग्निस्तोत्र.मपश्य-त्तदात्म.न्यधिविधाय तेनैन.मयाजय,त्तेनास्याश्लीलां वाच.मपाहन्।
- <17.5.2> अपाश्लीलाँ वाचं हते- य एवँ वेद।
- <17.5.3> योऽपूत इव स्या-दग्निष्टुता यजे,ताग्निनैवास्य पाप्मान.मपहत्य- त्रिवृता तेजो ब्रह्मवर्चस.न्दधाति।
- <17.5.4> तदाहु,र्य.त्त्रिवृ.द्भव-त्येकस्मा.देवाङ्गा.त्पाप्मान.मप हन्ति- मुखा.देवेति।
- <17.5.5> ज्योतिष्टोम एव कार्यः।
- <17.5.6> य.त्त्रिवृ.द्भवति- यदेवास्य मुखतोऽपूत-न्तत्तेनाप हन्ति, यत्पञ्चदशो- यदेवास्योरस्तो बाह्वो.रपूत-न्तत्तेनाप हन्ति, य.त्सप्तदशो- यदेवास्य मध्यतोऽपूत-न्तत्तेनाप हन्ति, यदेकविंशो- यदेवास्य पदो.रष्ठीवतो.रपूत- न्तत्तेनाप हन्ति।
- <17.5.7> वैश्वानरँ वा एष प्रविशतीत्याहु-र्योऽग्निष्टुता यजत इति, वारवन्तीय मग्निष्टोम.साम कार्य-न्तस्य यदपूत-न्तदग्निः~ क्षापय,त्यथेतर श्शुचिः पूत उदेति।
- <17.6.1> ❀17.6 त्रिवृ.दग्निष्टु.दग्निष्टोम,स्तस्य वायव्या.स्वग्निष्टोम.साम।
- <17.6.2> ब्रह्मवर्चसकामो यजेत।
- <17.6.3> तेजो वै त्रिवृ.द्ब्रह्मवर्चसँ- यद्वायव्या.स्वग्निष्टोम.साम भव-त्युपैवैन.न्तद्धमति।
- <17.6.4> यथा हिरण्य.न्निष्टपे-देव.मेन.मग्निष्टु.न्निष्टपति।
- <17.7.1> ❀17.7 एतस्यैव रेवतीषु वारवन्तीय.मग्निष्टोम.साम कृत्वा- पशुकामो यजेत।
- <17.7.2> जरत्कक्षो वा एष- योऽपशु,र्यथा वै जरत्कक्षे पशवो न रमन्त- एव.मेतस्मि.न्पशवो न रमन्ते- योऽपशु,र्यदा वै जरत्कक्ष मग्नि.र्दह-त्यथैन.मभिवर्ष-त्यथास्मि.न्नोषधयो जायन्ते-ऽथ वै तस्मि.न्पशवो रमन्ते। (जरत्कक्षः- जीर्णतृणः)

- <17.7.3> रमन्तेऽस्मि.न्पशवो- य एवँ वेद।
- <17.7.4> यदेवास्यापशव्य.न्तदग्निष्टु.न्निर्दहति, यदग्निष्टु.न्निर्दहति- तदद्भी रेवतीभि श्शमयति।
- <17.8.1> ❃17.8 ज्योतिष्टोमेनाऽग्निष्टुता यज्ञ.विभ्रष्टो यजेत।
- <17.8.2> यस्मिन् वा यज्ञक्रतौ विभ्रंशेत।
- <17.8.3> अग्निर्वा एतस्य हव्य.मत्ति- यो यज्ञे विभ्रंशते, न देवता हव्य.ङ्गमय-त्यग्नि.मेवैक.धर्ध्नोति।
- <17.8.4> यद्वै संशीर्यते-ऽथान्य.न्निष्कुर्वन्ति- न तेन तद्याति, यदा वाव तन्निष्कुर्व-न्त्यथ तद्याति, येष्वेव स्तोमेषु विभ्रंशते यस्मिन् यज्ञक्रतौ- तैरेव यजेत, येष्वेव स्तोमेषु विभ्रंशते- यस्मिन् यज्ञक्रतौ- तेष्वेव प्रति तिष्ठति।
- <17.9.1> ❃17.9 सप्तदशेनाऽग्निष्टुताऽन्नाद्यकामो यजेत।
- <17.9.2> अन्नँ वै सप्तदशो-ऽग्नि.रन्नाद्यस्य प्रदाता-ऽग्नि.रेवास्मा अन्नाद्यं प्र यच्छति।
- <17.9.3> अन्नादो भवति- य एवँ वेद।
- <17.9.4> सर्व स्सप्तदशो भवति, प्रजापतिर्वै सप्तदशः- प्रजापति.मेवाऽऽप्नोति।
- <17.10.1> ❃17.10 त्रिवृ.दग्निष्टोम,स्तस्यानिरुक्तं प्रातस्सवनम्।
- <17.10.2> प्रजापतिः प्रजा असृजत, ता अस्मा.त्सृष्टा अपाक्राम-न्त्स एत.दनिरुक्तं प्रातस्सवन.मपश्य-त्तेनाऽऽसां मध्यँ व्यवै-त्ता एन.मुपाऽऽवर्तन्त- पर्येन.माऽविशन्।
- <17.10.3> ग्रामकामो यजेत, यदेत.दनिरुक्तं प्रातस्सवनं भवति- मध्यमेवाऽऽसाँ व्यवै-त्युपैन.मा वर्तन्ते- पर्येनं विशन्ति।
- <17.10.4> स एष प्रजापते.रपूर्वो, नास्मा.त्पूर्वो भवति- य एवँ वेद।
- <17.11.1> ❃17.11 त्रिवृ.दग्निष्टोमः।
- <17.11.2> तस्य प्रातस्सवने सन्नेषु नाराशंसे.ष्वेकादश.दक्षिणा व्यादिश.त्यश्वद्वादशा मध्यन्दिने, ता उभयी.रपाऽऽकरो-त्येकादश तृतीयसवने- ता वशाया.मपाऽऽकरोति।
- <17.11.3> त्रयस्त्रिंश.देता दक्षिणा भवन्ति, त्रयस्त्रिंश.द्देवता- देवता एवाऽऽप्नो,-त्यश्व.श्चतुस्त्रिंशो दक्षिणानां- प्रजापति.श्चतुस्त्रिंशो देवतानां- प्रजापति.मेवाऽऽप्नोति।

- <17.11.4> स एष बृहस्पति.सवो, बृहस्पति.रकामयत देवानां पुरोधा.ङ्गच्छेय.मिति- स एतेनायजत- स देवानां पुरोधा.मगच्छत्।
- <17.11.5> गच्छति पुरोधाँ- य एवँ वेद।
- <17.11.6> स एष स्थपति.सवो, यं स्थापत्या.याभिषिञ्चेर-न्त्स एतेन यजेत।
- <17.11.7> गच्छति स्थापत्यँ- य एवँ वेद।
- <17.11.8> कृष्णाजिनेऽध्यभि.षिच्यत, -एतद्वै प्रत्यक्षं ब्रह्मवर्चसं- ब्रह्मवर्चस एवाध्यभि.षिच्यते।
- <17.11.9> आज्येनाभि.षिच्यते- तेज आज्य- न्तेज आत्म.न्धत्ते।
- <17.12.1> ❃17.12 त्रिवृ.दग्निष्टोम-स्स सर्वस्वारो, यᳵ कामयेताऽनामयताऽमुँ लोक.मिया.मिति- स एतेन यजेत।
- <17.12.2> प्राणो वै त्रिवृ-त्प्राण.स्स्वरᳵ- प्राणा.नेवास्य बहि.र्णिरा दधाति-ताज.क्प्रमीयते।
- <17.12.3> त्रिवृद्वै स्तोमाना.ङ्क्षेपिष्ठो, यत्त्रिवृ.द्भव-त्याशीय स्सङ्गच्छाता इ,त्यनन्तो वै स्वरो-ऽनन्तोऽसौ लोको-ऽनन्त.मेवैनं स्वर्गँ लोक.ङ्गमयति।
- <17.12.4> अभिवत्यᳵ प्रवत्यो भव-न्त्यस्मा.देवैनँ लोका.त्स्वर्गँ लोक.ङ्गमयन्ति।
- <17.12.5> आर्भव.पवमाने स्तूयमान- औदुम्बर्या दक्षिणा प्रावृतो निपद्यते, तदेव सङ्गच्छते।
- <17.12.6> स एष शुनस्कर्ण.स्तोम, -एतेन वै शुनस्कर्णो बाष्किहोऽयजत-तस्मा.च्छुनस्कर्ण.स्तोम इत्या ख्यायते।
- <17.13.1> ❃17.13 त्रिवृ.दग्निष्टोमो वैश्वदेवस्य लोकः।
- <17.13.2> आग्नेयी प्रतिप-द्वैश्वदेवᳵ पशु-र्बार्हस्पत्याऽनूबन्ध्या।
- <17.13.3> न यूपं मिन्वन्ति- नोत्तरवेदि.न्निवपन्ति।
- <17.13.4> परिधौ पशु.न्नियुञ्जन्ति।
- <17.13.5> पञ्चाश.द्दक्षिणा।
- <17.13.6> अहतँ वसानोऽवभृथा.दुदेति-चतुरो मासो न मांस.मश्नाति- न स्त्रिय.मुपैति।

- <17.13.7> तत.श्चतुर्षु मासेषु वरुणप्रघासानाँ लोके द्विदिवः।
- <17.13.8> वारुणी प्रतिप-न्मारुतꣳ पशुः।
- <17.13.1> कवती प्रतिप-द्वारुणꣳ पशुः।
- <17.13.10> मैत्रावरु.ण्यनूबन्ध्या- मिन्वन्ति यूप-न्न्युत्तरवेदिँ वपन्ति- यूपे पशू न्नियुञ्जन्ति।
- <17.13.11> शत.न्दक्षिणा- अहतँ वसानोऽवभृथा.दुदेति- चतुरो मासो न मांस.मश्नाति - न स्त्रिय.मुपैति।
- <17.13.12> तत.श्चतुर्षु मासेषु साकमेधानाँ लोके त्रिरात्रः।
- <17.13.13> अनीकवती प्रतिप-दाग्नेयꣳ पशु,र्मारुती प्रतिप-दैन्द्राग्नꣳ पशु,र्वैश्वकर्मणी प्रतिप-देकादशिनी पशव,स्सौर्याऽनूबन्ध्या- मिन्वन्ति यूप-न्न्युत्तरवेदिँ वपन्ति- यूपे पशू.न्नियुञ्जन्ति, पञ्चाश.च्छत.न्दक्षिणा।
- <17.13.14> अहतँ वसानोऽवभृथा.दुदेति- चतुरो मासो न मांस.मश्नाति- न स्त्रिय.मुपैति।
- <17.13.15> तत.श्चतुर्षु मासेषु शुनासीर्यस्य लोके- ज्योतिष्टोमोऽग्निष्टोमः।
- <17.13.16> उपवती प्रतिप-द्वायव्यꣳ पशु-राश्वि.न्यनूबन्ध्या, मिन्वन्ति यूप-न्न्युत्तरवेदिँ वपन्ति- यूपे पशु.न्नियुञ्जन्ति- द्वादशं शत.न्दक्षिणा।
- <17.13.17> अग्नि स्सँवत्सर- स्सूर्यꣳ परिवत्सर-श्चन्द्रमा इदावत्सरो- वायु रनुवत्सरो,ऽग्निं सँवत्सरँ वैश्वदेवेनाऽऽप्नोति, सूर्यं परिवत्सरँ वरुणप्रघासै- श्चन्द्रमस.मिदावत्सरं साकमेधै-र्वायु.मनुवत्सरं शुनासीर्येण।
- <17.13.18> हविर्यज्ञैर्वै देवा इमँ लोक.मभ्यजय-न्नन्तरिक्षं पशुमद्भि- स्सोमै.रमु,-मिमा.नेव लोका.नाप्नो,त्येषु लोकेषु प्रति तिष्ठति- य एवँ वेद।
- <17.14.1> ❃17.14 यदाऽग्निहोत्र.ञ्जुहो-त्यथ दश गृहमेधिन आप्नो-त्येकया रात्र्या, यदा दश सँवत्सरा.नग्निहोत्र.ञ्जुहो-त्यथ दर्शपूर्णमास.याजिन.माप्नोति, यदा दश सँवत्सरा.न्दर्शपूर्णमासाभ्याँ यजते-ऽथाग्निष्टोम.याजिन.माप्नोति, यदा दशभि रग्निष्टोमै.र्यजते-ऽथ सहस्र.याजिन.माप्नोति, यदा दशभि स्सहस्रै र्यजते-ऽथायुत.याजिन.माप्नोति, यदा

दशभि.रयुतै.र्यजते-ऽथ प्रयुत.याजिन.माप्नोति, यदा दशभिः प्रयुतै.र्यजते-ऽथ नियुत.याजिन.माप्नोति, यदा दशभि.र्नियुतै.र्यजते-ऽथार्बुद.याजिन.माप्नोति, यदा दशभि.रर्बुदै.र्यजते-ऽथ न्यर्बुद.याजिन.माप्नोति, यदा दशभि.र्न्यर्बुदै.र्यजते-ऽथ निखर्वक.याजिन.माप्नोति, यदा दशभि.र्निखर्वकै.र्यजते-ऽथ बद्व.याजिन.माप्नोति, यदा दशभि.र्बद्वै.र्यजते-ऽथाक्षित.याजिन.माप्नोति, यदा दशभि.रक्षितै.र्यजते-ऽथ गौ.र्भवति, यदा गौ.र्भव-त्यथाग्नि.र्भवति, यदाग्नि.र्भव-त्यथ सँवत्सरस्य गृहपति.माप्नोति।

- <17.14.2> यदा सँवत्सरस्य गृहपति.र्भव-त्यथ वैश्वदेवस्य मात्रा.माप्नो,त्यतो वा इतरे परस्तरां परस्तरा.मेव सर्वे।
- <17.14.3> एतानेव लोका.नाप्नो-त्येता.न्लोका.न्जयति- य एवँ वेद।

## ताण्ड्यब्राह्मणे अष्टादशोऽध्यायः

- <18.1.1> ❃18.1 सप्तदशोऽग्निष्टोमः।
- <18.1.2> देवाश्च वा असुराश्च प्रजापते.र्द्वयाः पुत्रा आसं,स्तेऽसुरा भूयांसो बलीयांस आस-न्कनीयांसो देवा,स्ते देवाः प्रजापति.मुपाधाव-न्त्स एत.मुपहव्य.मपश्यत्।
- <18.1.3> स ऐक्षत- यन्निरुक्त.माहरिष्या-म्यसुरा मे यज्ञं हनिष्यन्तीति, सोऽनिरुक्त.माऽहरत्।
- <18.1.4> स उत्तमे स्तोत्रे- देवो वो द्रविणोदा-इति देवा.नभि पर्यावर्तत।
- <18.1.5> ततो देवा अभव-न्पराऽसुराः।
- <18.1.6> भव.त्यात्मना- पराऽस्य भ्रातृव्यो भवति- य एवँ वेद।
- <18.1.7> अथो खल्वाहु- र्यज्ञायज्ञा वो अग्नय- इत्येव कार्यम्।
- <18.1.8> अग्निर्वै सर्वा देवता,स्तेन- न देवताना.ङ्काश्चनान्त.रेति।
- <18.1.9> इन्द्रो यती.न्त्सालावृकेभ्यः प्रायच्छ-त्तमश्लीला वा.गभ्यवद,त्स प्रजापति. मुपाधाव-त्तस्मा एत.मुपहव्यं प्रायच्छ,त्तँ विश्वे देवा उपाह्वयन्त- तस्मा.दुपहव्यः।
- <18.1.10> अभिशस्यमानँ याजयेत्।
- <18.1.11> देवता वा एतं परि व्रजन्ति- यमनृत.मभिशंसन्ति, देवता एवास्यान्न. मादयन्ति।

- <18.1.12> तस्य पूतस्य स्वदितस्य मनुष्या अन्न.मदन्ति।
- <18.1.13> ग्रामकामो यजेत।
- <18.1.14> मारुती भवति, मरुतो वै देवानाँ विशो- विश.मेवास्मा अनु नियुन,क्त्यनपक्रामुकाऽस्मा.द्विङ्भवति।
- <18.1.15> पशुकामो यजेत- पौषी भवति।
- <18.1.16> पशवो वै पूषा- पशू.नेवाव रुन्धे।
- <18.1.17> वैश्वदेवी भवति, विश्वे ह्येन.न्देवा उपाह्वयन्त।
- <18.1.18> बृहत्सामा भवति।
- <18.1.19> प्रजापति.र्ह्येन.मिन्द्राय प्रायच्छत्।
- <18.1.20> अश्व.श्श्यावो दक्षिणा।
- <18.1.21> स ह्यनिरुक्तः।
- <18.1.22> स ब्रह्मणे देयः।
- <18.1.23> ब्रह्मा वा ऋत्विजा.मनिरुक्त,स्स्वेनैवैन.न्तद्रूपेण समर्धयति।
- <18.1.24> यावद्ध वै कुमारे सद्यो जात एनो ना,ऽस्मिं.स्तावच्च नैनो भवति- य एवँ वेद।
- <18.2.1> ❃18.2 सप्तदशोऽग्निष्टोमः।
- <18.2.2> तस्य द्वादश दीक्षोपसदः।
- <18.2.3> स्वर्गकामो यजेत।
- <18.2.4> द्वादश मासा स्सँवत्सर- स्सँवत्सर स्स्वर्गो लोक- स्स्वर्ग.मेवैतेन लोक.माप्नोति।
- <18.2.5> घृतव्रतो भवति।
- <18.2.6> देवव्रतँ वै घृत- न्देवव्रतेनैव देवता अप्येति।
- <18.2.7> उत्तरेणोत्तरेण काण्डेनोपै,त्युत्तर उत्तर एषाँ लोकाना.ञ्ज्याया,न्त्स्वर्गस्य लोकस्य समष्ट्यै।
- <18.2.8> बृहत्साम भवति, बृहता वै देवा स्स्वर्गँ लोक.माय-न्त्स्वर्ग.मेवैतेन लोक.माप्नोति।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

- <18.2.9> ऋत.मुक्त्वा प्रसर्प,न्त्यृतेनैवैनं स्वर्गँ लोक.ङ्गमयन्ति।
- <18.2.10> सोमचमसो दक्षिणा- देवतयैव देवता अप्येति।
- <18.2.11> औदुम्बरो भव,त्यूर्गुदुम्बर- ऊर्ज.मेवाव रुन्धे।
- <18.2.12> सगोत्राय ब्रह्मणे देय,स्सोमपीथ.स्याविदोहाय।
- <18.2.13> सर्व स्सप्तदशो भवति।
- <18.2.14> द्वादश मासाꣳ पञ्चर्तव-स्स वै सँवत्सर, स्सँवत्सर स्स्वर्गो लोक- स्स्वर्ग मेवैतेन लोक.माप्नोति।
- <18.3.1> ❃18.3 सप्तदशोऽग्निष्टोमः।
- <18.3.2> तस्य दीक्षणीयाया.मिष्टौ द्वादश.मानं हिरण्य.न्ददाति, चतुर्विंशति.मानं प्रायणीयाया,न्द्वे चतुर्विंशति.माने आतिथ्याया,श्चत्वारि चतुर्विंशति.मानानि प्रातꣳ प्रथमाया.मुपस,द्यष्टौ चतुर्विंशति.माना.न्यपराह्णे प्रथमाया.मुपसदि, षोडश चतुर्विंशति.मानानि प्रात.र्मध्यमाया.मुपसदि, द्वात्रिंशत.श्चतुर्विंशति.माना.न्यपराह्णे मध्यमाया.मुपसदि, चतुष्षष्टि.श्चतुर्विंशति.मानानि प्रात.रुत्तमाया.मुपस,-द्यष्टाविंशतिशत श्चतुर्विंशति.माना.न्यपराह्ण उत्तमाया.मुपसदि, द्वे अष्टाविंशति.शत.माने अग्नीषोमीयस्य पशो.र्वपाया,श्चत्वार्यष्टाविंशति.शत.मानानि प्रातꣳ पशो.र्वपाया,मष्टावष्टाविंशति.शत. मानानि प्रातस्सवने सन्नेषु नाराशंसेषु, षोडशाष्टाविंशति.शत.मानानि माध्यन्दिने सवनेऽनडुच्छतश्च- रुक्मो होतु-स्स्र.गुद्गातु,-द्वात्रिंशत.मष्टाविंशति.शत.मानानि तृतीयसवने सन्नेषु नाराशंसेषु, चतुष्षष्टि.मष्टाविंशति.शत.माना-न्युदयनीयाया मिष्टा,-वष्टाविंशति.शत.मष्टाविंशति.शत. मानानि वशाया वपायाम्।
- <18.3.3> एष वा अनडुहो लोक.माप्नोति- य एवँ वेद।
- <18.3.4> एष वै ज्योतिष्मन्तं पुण्यँ लोक.ञ्जयति- य एव.न्विद्वा.नेतेन यजते।
- <18.4.1> ❃18.4 सप्तदशोऽग्निष्टोमः।
- <18.4.2> तस्य प्रातस्सवनीया.न्त्सोमा.न्प्रतिदुहा श्रीणाति- शृतेन मध्यन्दिने- दध्ना तृतीयसवने।
- <18.4.3> पशुकामो यजेत।

- <18.4.4> यत्सर्वाणि सवना.न्याशीर्वन्ति भव-न्त्यनुसवन.मेवैनं पशुभि स्समर्धयति- प्रजा त्वस्य मीलितेव भवति, शुक्रिये हि सवने पयसा श्रीणाति।
- <18.4.5> वैश्यँ याजयेत्।
- <18.4.6> एतद्वै वैश्यस्य समृद्धँ- य.त्पशवः, पशुभि.रेवैनं समर्धयति।
- <18.4.7> तस्य कण्व.रथन्तरं पृष्ठम्।
- <18.4.8> सदो.विशीयं ब्रह्मसाम।
- <18.4.9> पशवो वै कण्व.रथन्तरं- पशव स्सदो.विशीय-मभिपूर्वा.नेवास्मि. न्पशू.न्दधाति।
- <18.4.10> सर्व स्सप्तदशो भवति।
- <18.4.11> द्वादश मासाः पञ्चर्तव- स्स वै सँवत्सर- स्सँवत्सरं पशवोऽनु प्रजायन्ते- ता.नेवास्वाऽव रुन्धे।
- <18.5.1> ❃18.5 सप्तदश उक्थ्यः।
- <18.5.2> इन्द्रो वृत्र.मह-न्त्स विष्व.ङ्वीर्येण व्यार्च्छ-त्तस्मै देवाः प्रायश्चित्ति.मैच्छं-स्तन्न किञ्चनाऽधिनो-त्त.न्तीव्रसोम एवाऽधिनोत्।
- <18.5.3> सोमातिपवितँ याजयेत्।
- <18.5.4> छिद्र इव वा एष- यं सोमोऽतिपवते, य.त्तीव्रसोमेन यजते- पिहित्या एवाच्छिद्रतायै।
- <18.5.5> राजान.मपरुद्धँ याजयेत्।
- <18.5.6> विङ्वा एत.मति पवते- यो राजाऽपरुध्यते, यत्तीव्रसोमेन यजते- पिहित्या एवाच्छिद्रतायै।
- <18.5.7> ग्रामकामो यजेत।
- <18.5.8> ग्रामो वा एत.मति पवते- योऽल.ङ्ग्रामाय स-न्ग्राम.न्न विन्दते, यत्तीव्रसोमेन यजते- पिहित्या एवाच्छिद्रतायै।
- <18.5.9> प्रजाकामो यजेत, प्रजा वा एत.मतिपवते- योऽलं प्रजाया स्स-न्प्रजा.न्न विन्दते, य.त्तीव्रसोमेन यजते- पिहित्या एवाच्छिद्रतायै।

- <18.5.10> पशुकामो यजेत, पशवो वा एत.मतिपवन्ते- योऽलं पशुभ्य.स्स-न्पशून्न विन्दते, य.त्तीव्रसोमेन यजते- पिहित्या एवाच्छिद्रतायै।
- <18.5.11> आमयाविनँ याजये,त्प्राणा वा एत.मतिपवन्ते- य आमयावी, य.त्तीव्रसोमेन यजते- पिहित्या एवाच्छिद्रतायै।
- <18.5.12> शत.माशिर.न्दुहन्ति, तीव्रय.न्त्येवैनम्।
- <18.5.13> तत्ता उ एव दक्षिणाः।
- <18.5.14> अभ्यभि सोमा.नुन्नयन्ति- तीव्र एन.न्धिनव.दि,त्युभा.वध्वर्यू- सर्वे चमसाध्वर्यवो-ऽच्छावाकाय प्रति गृणन्ति, तीव्रय.न्त्येवैनम्।
- <18.5.15> त.दभक्षयन्त ऋत्विज.-श्चमसा.नव जिघ्रन्ति- तीव्र.यन्त्येवैन,-न्तत्ता.नच्छावाकस्य स्तोत्रे भक्षयन्ति- तीव्रय.न्त्येवैनम्।
- <18.5.16> तद्य.त्सवनानि व्यवभक्षयेयु-रपक्रामुका यजमाना.च्छ्रीस्स्या,त्सकृत्सकृ-त्सवनाना मन्ततो भक्षयन्ति- सवनाना.मसम्भेदाय।
- <18.5.17> रथन्तरं साम भवति।
- <18.5.18> इयँ वै रथन्तर-मस्याँ वा एष न प्रति तिष्ठति, यो न प्रतितिष्ठ-त्यस्या.मेवैनं प्रतिष्ठापयति।
- <18.5.19> श्रायन्तीयं ब्रह्मसाम भव,त्येत.देवास्मि.न्छ्रीणाति।
- <18.5.20> यज्ञायज्ञीय.मनुष्टुभि भवति।
- <18.5.21> वागनुष्टु.ब्वाचो रसो यज्ञायज्ञीयँ, वाच्येवास्य रस.न्दधाति।
- <18.5.22> विशो.विशीय.मग्निष्टोम.साम भव,त्येत.देवास्मि.न्त्सर्वं प्रतिष्ठापयति।
- <18.5.23> उद्वंशीय.मुक्थाना.मन्ततो भवति, सर्वेषाँ वा एत.त्पृष्ठानां रूपं, सर्वेष्वेव रूपेषु प्रति तिष्ठति।
- <18.5.24> उक्थ्यो भवति, पशवो वा उक्थानि- पशुष्वेव प्रति तिष्ठति।
- <18.6.1> ❃18.6 सप्तदश उक्थ्य,ष्षोडशिमा.न्त्सप्तदशी।
- <18.6.2> यावान् वै प्रजापति.रूर्ध्व-स्तावां.स्तिर्यङ्।
- <18.6.3> यावन्त इमे लोका ऊर्ध्वा-स्तावन्त.स्तिर्यञ्चः।

- <18.6.4> वाजपेय.याजी वाव प्रजापति.माप्नोति।
- <18.6.5> यत्सप्तदश स्तोत्राणि- तेनोर्ध्व.माप्नोति, यत्सर्व स्सप्तदश-स्तेन तिर्यञ्चम्।
- <18.6.6> तस्य नानावीर्याणि सवनानि।
- <18.6.7> अनिरुक्तं प्रातस्सवनँ- वाजव.न्माध्यन्दिनं सवन-श्चित्रव.त्तृतीयसवनम्।
- <18.6.8> यदनिरुक्तं प्रातस्सवनं भव-त्यनिरुक्तो वै प्रजापतिः- प्रजापति.मेवाऽप्नोति, यद्वाजव.न्माध्यन्दिनं सवन-मन्नँ वै वाजो-ऽन्नाद्य.स्यावरुद्ध्यै, यच्चित्रव.त्तृतीयसवनं- स्वर्गस्य लोकस्य समष्ट्यै।
- <18.6.9> वियोनि.र्वाजपेय इत्याहुः- प्राजापत्य स्स.न्निरुक्तसामेति, य.दनिरुक्तं प्रातस्सवन-न्तेन सयोनिः।
- <18.6.10> रथन्तरं साम भव-त्याशीय उज्झित्यै।
- <18.6.11> इयँ वै रथन्तर-मस्या.मेवाध्यभि.षिच्यते।
- <18.6.12> तस्मा.द्वाजपेययाज्यप्रत्यवरोही।
- <18.6.13> अस्यां हि सोऽध्यभि.षिच्यते।
- <18.6.14> अभीवर्तो ब्रह्मसाम भवति- ब्रह्मणो वा एष ऋषभ- ऋषभता. मेवैन.ङ्गमयति।
- <18.6.15> यज्ञायज्ञीय.मनुष्टुभि भवति, वागनुष्टु.ब्वाचो रसो यज्ञायज्ञीयँ- वाच्येवास्य रस.न्दधाति।
- <18.6.16> वारवन्तीय.मग्निष्टोमसाम भव-तीन्द्रियस्य वीर्यस्य परिगृहीत्यै।
- <18.6.17> उद्वंशीय.मुक्थाना.मन्ततो भवति, सर्वेषाँ वा एत.त्पृष्ठानां रूपं- सर्वेष्वेव रूपेषु प्रति तिष्ठति।
- <18.6.18> गौरीवितं षोडशिसाम भवति।
- <18.6.19> अतिरिक्त.ङ्गौरीवित-मतिरिक्त ष्षोड-श्यतिरिक्त एवातिरिक्त.न्दधाति।
- <18.6.20> तदाहु,र्जामि वा एत.द्यज्ञे क्रियते- यदुद्वंशीया.द्गौरीवितेन स्तुवते- स्वारा.त्स्वारेणेति।
- <18.6.21> न जा.म्यस्ति, सवनं सन्तिष्ठते।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

- <18.6.22> उक्थं शस्यते वषट्कारोऽन्तरा, तेनाजामि।
- <18.6.23> अपच्छि.दिव वा एत.द्यज्ञकाण्डँ- यत्षोडशी, तेनाजामि।
- <18.6.24> यज्ञाऽऽरण्ये सन्तिष्ठत इत्याहु,रत्युक्था.न्ये-त्यति षोडशिन,न्न रात्रिं प्राऽऽप्नोतीति।
- <18.6.25> विष्णो श्शिपिविष्टवतीषु- बृह.दुत्तमं भवति।
- <18.6.26> एषा वै प्रजापतेः पशुष्ठा तनू-र्यच्छिपिविष्टः, प्राणो वै बृह-त्प्राण एव पशुषु प्रति तिष्ठति।
- <18.6.27> बृहता स्तुवन्ति, बृह.दमुँ लोक.माप्तु.मर्हति- तमेवाऽऽप्नोति।
- <18.7.1> ❃ 18.7 प्रजापति.रकामयत- वाज.माप्नुयां- स्वर्गँ लोक.मिति, स एतँ वाजपेय.मपश्य-द्वाजपेयो वा एष, वाज.मेवैतेन स्वर्गँ लोक.माप्नोति।
- <18.7.2> शुक्रवत्यो ज्योतिष्मत्यः प्रातस्सवने भवन्ति, तेजो ब्रह्मवर्चस न्ताभि.रव रुन्धे।
- <18.7.3> वाजवत्यो माध्यन्दिने भवन्ति- स्वर्गस्य लोकस्य समष्ट्यै।
- <18.7.4> अन्नवत्यो गणवत्यः पशुमत्य.स्तृतीयसवने भवन्ति, भूमान न्ताभि.रव रुन्धे।
- <18.7.5> सर्व स्सप्तदशो भवति, प्रजापतिर्वै सप्तदशः- प्रजापति.मेवाऽऽप्नोति।
- <18.7.6> हिरण्यस्रज ऋत्विजो भवन्ति- महस एव तद्रूप.ङ्क्रियते।
- <18.7.7> एष मेऽमुष्मि.न्लोके प्रकाशोऽस.दिति।
- <18.7.8> ज्योतिर्वै हिरण्य- ञ्ज्योति.रेवास्मि.न्दधाति।
- <18.7.9> आजि.न्धावन्ति- यजमान.मुज्जापयन्ति, स्वर्ग.मेवैन.न्तल्लोक.मुज्जापयन्ति।
- <18.7.10> नाकं रोहति- स्वर्ग.मेव तल्लोकं रोहति।
- <18.7.11> सरजसे रोहति- मनुष्यलोका.देवैन.मन्त.र्दधाति।
- <18.7.12> वाजिनां साम ब्रह्मा- रथचक्रेऽभि गायति, वाजो वै स्वर्गो लोक-स्स्वर्ग.मेवैन.न्तल्लोक.मुज्जापयति।
- <18.7.13> विष्णो श्शिपिविष्टवतीषु बृह.दुत्तमं भवति, स्वर्ग.मेव तल्लोकं रूढ्वा- ब्रध्नस्य विष्टप.मभ्यति.क्रामति।

- <18.8.1>❁18.8 अग्निष्टोमं प्रथम.माहरति, यज्ञमुखँ वा अग्निष्टोमो-यज्ञमुख.मेवाऽऽरभ्य सव.माक्रमते।
- <18.8.2> अथैषोऽभिषेचनीयः।
- <18.8.3> तस्य द्वात्रिंशाꣳ पवमाना- द्वात्रिंश.दक्षराऽनुष्टु-ब्वागनुष्टु,ब्यावती वा-क्तयैव सूयते।
- <18.8.4> संशर इव वा एष च्छन्दसाँ- यद्विषमा स्तोमा अयथापूर्व.मिति।
- <18.8.5> यत्समाꣳ पवमाना-स्तेनासंशर,स्तेन यथापूर्वम्।
- <18.8.6> आत्मना वा अग्निष्टोमेनर्ध्नो-त्यात्मना पुण्यो भव,त्यथ यदुक्थानि- पशवो वा उक्थानि- वि.ड्डुक्थानि, यदुक्थानि भव.न्त्यनुसन्तत्या एव।
- <18.8.7> वायो शुक्रो अयामि त- इति वायव्या प्रतिप.द्भवति, वाग्वै वायु-र्वाच.मेवास्य यज्ञमुखे युनक्ति- तयाऽभिषिच्यते, सर्वस्या एव वाच.स्सूयते- सर्वा एनँ वाचो राजेति वदन्ति।
- <18.8.8> सम्भार्या भवन्ति- पृष्ठा.न्येव ताभि.र्युनक्ति, यन्नानादेवत्या-स्तेन युनक्ति, वीर्यँ वै पृष्ठानि- वीर्य एवाध्यभिषिच्यते।
- <18.8.9> यन्ति वा एते यज्ञमुखा.दित्याहु-र्ये सम्भार्याꣳ कुर्वत इति।
- <18.8.10> य.त्पवस्य वाचो अग्रिय इति- तेन यज्ञमुखा.न्न यन्ति।
- <18.8.11> दविद्युतत्या रुचेति च्छन्दसां रूप-ञ्छन्दां.स्येवास्य यज्ञमुखे युनक्ति-तैरभिषिच्यते।
- <18.8.12> एतमु त्य.न्दश क्षिप-इत्यादित्या, आदित्या वा इमाꣳ प्रजा-स्तासा.मेव मध्यत स्सूयते।
- <18.8.13> पवस्वेन्दो वृषा सुत इति वृषण्वत्यो भवन्ति त्रिष्टुभो रूपँ, वीर्यँ वै त्रिष्टु-ब्वीर्य एवाध्यभिषिच्यते।
- <18.8.14> उत्ते शुष्मास ईरत- इत्युद्वत्यो भव,न्त्युद्वद्वा अनुष्टुभो रूप-मानुष्टुभो राजन्य-स्तस्मा.दुद्वत्यो भवन्ति।
- <18.8.15> पवमानस्य ते कव- इति प्राणाना.क्लृप्त्यै।

- <18.8.16> अध क्षपा परिष्कृत-इत्यनुष्टु.प्प्रथमा-ऽनुष्टु.बुत्तमा, वाग्वा अनुष्टु-ब्वाचैव प्रयन्ति- वाच.मभ्युद्यन्ति।

- <18.8.17> छिन्नमिव वा एत-द्यदेकर्चा, यदेता.वानुष्टुभौ तृचा.वभितो भवतो, बहव॰ पुरएतारो भवन्ति- बहव॰ पश्चापिनः।

- <18.8.18> सौर्याऽनुष्टु.बुत्तमा भवति- स्वर्गस्य लोकस्य समष्ट्यै।

- <18.9.1>❃18.9 वरुणस्य वै सुषुवाणस्य भर्गोऽपाक्राम-त्स त्रेधाऽपत-द्भृगु.स्तृतीय. मभव-च्छ्रायन्तीय.न्तृतीय-मप.स्तृतीयं प्राविशत्।

- <18.9.2> यद्भार्गवो होता भवति- तेनैव तदिन्द्रियँ वीर्य.माप्त्वाऽव रुन्धे, यच्छ्रायन्तीयं ब्रह्मसाम भवति- तेनैव तदिन्द्रियँ वीर्य.माप्त्वाऽव रुन्धे, यत्पुष्करस्रजं प्रतिमुञ्चते- तेनैव तदिन्द्रियँ वीर्य.माप्त्वाऽव रुन्धे।

- <18.9.3> दशमी भवति।

- <18.9.4> दश चमसा, दश चमसाध्वर्यवो- दश दश चमस.मभिय,न्त्या दशमा.त्पुरुषा,दन्वाख्याय प्रसर्पन्ति, दश समृद्धो ह्येष यज्ञ- एनँ वाव ते तद्यज्ञ.मन्वैच्छन्, य एतेन यजत, -एत.देवेन्द्रियँ वीर्य.माप्त्वाऽस्मि.न्दधाति।

- <18.9.5> सर्व स्सप्तदशो भवति, द्वादश मासा॰ पञ्चर्तव- स्स वै सँवत्सर- स्सँवत्सरा.देवेन्द्रियँ वीर्य.माप्त्वाऽव रुन्धे।

- <18.9.6> इन्द्रो वृत्र.महं-स्तस्येय.श्चित्रा.ण्युपै.द्रूपा-ण्यसौ नक्षत्राणा,मवकाशेन पुण्डरीक.ञ्जायते, यत्पुष्कर.स्रजं प्रतिमुञ्चते- वृत्रस्यैव तद्रूप.ञ्चित्रं प्रतिमुञ्चते।

- <18.9.7> द्वादश पुष्करा भवन्ति, द्वादश मासा.स्सँवत्सर- स्सँवत्सरेऽन्तर्भूतञ्च भव्यञ्च- भूतेन चैवैनं भव्येन च समर्धयति।

- <18.9.8> स्रगुद्गातु,स्सौर्य उद्गाता- न वै तस्मै व्यौच्छ-दथो व्येवास्मै वासयति।

- <18.9.9> रुक्मो होतु-राग्नेयो होताऽ,थो अमु.मेवास्मा आदित्य.मुन्नयति।

- <18.9.10> प्राकाशा.वध्वर्यो,र्या.विव ह्यध्वर्यू- अथो चक्षुषी एवास्मि.न्दधाति।

- <18.9.11> अश्व॰ प्रस्तोतु॰, प्राजापत्योऽश्व॰- प्राजापत्य॰ प्रस्तोता,ऽथो प्रेव ह्यश्व॰ प्रोथति- प्रेव प्रस्तोता स्तौति।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

- <18.9.12> धेनुः प्रतिहर्तुः, पय एवास्मि.न्दधाति।
- <18.9.13> वशा मैत्रावरुणस्य, वशं मा नया.दिति।
- <18.9.14> ऋषभो ब्राह्मणाच्छंसिनो, वीर्यँ वा ऋषभो- वीर्य.मेवास्मि.न्दधाति।
- <18.9.15> वासः पोतुः- पवित्रत्वाय।
- <18.9.16> वरासी नेष्टु,रनुलम्बेव ह्येषा होत्रा। (वरासी - वृक्षत्वचा निर्मिता)
- <18.9.17> स्थूरि यवाचित.मच्छावाकस्य, स्थूरि.रिव ह्येषा होत्रा-ऽथो निर्वरुणत्वायैव, यवा न वै तर्हि यदस्या न्दक्षिणा अभ्यभव-न्नथो अस्य, त एव तेनाभीष्टाः प्रीता भवन्ति।
- <18.9.18> अनड्वा.नग्नीधो- युक्त्यै।
- <18.9.19> अज स्सुब्रह्मण्यायै।
- <18.9.20> वत्सतर्युन्नेतु, स्साण्ड.स्त्रिवत्सो ग्रावस्तुतो- मिथुनत्वाय।
- <18.9.21> द्वादश पष्ठौह्यो गर्भिण्यो ब्रह्मणो, द्वादश मासा.स्सँवत्सर- स्सँवत्सर एव प्रति तिष्ठ,त्यथ यद्गर्भिण्यो- वाग्वै धेनु-र्मन्त्रो गर्भो- वाच्येवास्य मन्त्र.न्दधा,त्यामन्त्रणीयो भव,त्यथ यद्धेनुभव्या द्वादश पयांसि- तान्येवास्मि.न्दधाति, तस्मा.दाहुः- पयस्वी राजा पुण्य इति।
- <18.10.1> ❃18.10 यो वै सवा.देति- नैनं सव उपनम,त्यथ य.स्सामभ्य एति- पापीया.न्त्सुषुवाणो भवति।
- <18.10.2> सम्भार्या भवन्ति- पृष्ठान्येव ताभि.र्युनक्ति।
- <18.10.3> एतानि वाव सामानि- यत्पृष्ठानि।
- <18.10.4> यत्सम्भार्या भवन्ति- तदेव सामभ्यो नैति।
- <18.10.5> यानि देवराज्ञां सामानि- तै.रमुष्मि.न्लोक ऋध्नोति, यानि मनुष्यराज्ञा- न्तै.रस्मि,न्नुभयो.रनयो.र्लोकयो.र्ऋध्नोति- देवलोके च मनुष्यलोके च।
- <18.10.6> साम त्रिष्टु.भ्यध्यभि.षिच्यते, वीर्यँ वै साम त्रिष्टु-ब्वीर्य एवाध्यभिषिच्यते।
- <18.10.7> एकादश राजसामानि भव,न्त्येकादशाक्षरा त्रिष्टु-बोजो वीर्य.न्त्रिष्टु-बोजस्येव वीर्येऽध्यभिषिच्यते।
- <18.10.8> यत्त्रिवृत.मभिषेचनीये कुर्यु-र्ब्रह्म क्षत्रायापि दध्यु,र्यत्त्रिवृत.मुद्धरन्ति- ब्रह्म तत्क्षत्रा.दुद्धरन्ति, तस्माद्धरतां प्रतिदण्डा ब्राह्मणा, न हि ते त्रिवृत.मभिषेचनीये कुर्वन्ति।

* <18.10.9> एकविंशोऽभिषेचनीय.स्योत्तम- स्सप्तदशो दशपेय- एकविंश꣸ केशवपनीयस्य प्रथमः,~ क्षत्रँ वा एकविंशो- विट्सप्तदशः~ क्षत्रेणैवास्मै विश.मुभयत꣸ परि गृह्णा-त्यनपक्रामुकाऽस्मा.द्विड्भवति।

* <18.10.10> यद्वै राजसूयेनाभिषिच्यते- तत्स्वर्गँ लोक.मारोहति, स यदिमँ लोक न्नोपावरोहे-दति जनँ वा गच्छे-दुद्वा माद्ये,द्यदेषोऽर्वाचीनस्तोम꣸ केशवपनीयो भव-त्यस्य लोकस्यानुद्धानाय, यथा शाखाया श्शाखा.मालम्भ.मुपावरोहे-देव.मेतेनेमँ लोक मुपावरोहति प्रतिष्ठायै।

* <18.11.1> ❈18.11 इन्द्रो वृत्रमह,न्त्स विष्वङ्वीर्येण व्यभ्रंशत, स एत.च्छ्रायन्तीय.मपश्य-त्तेनाऽऽत्मानं समश्रीणा,दिन्द्रियेण वा एष वीर्येण व्यृध्यते- यो राजसूये.नाभिषिच्यते, वृत्रं हि हन्ति, यच्छ्रायन्तीयं ब्रह्मसाम भवति- पुन.रेवाऽऽत्मानं संश्रीणाति।

* <18.11.2> यज्ञायज्ञीय.मनुष्टुभि भवति, वाचा वा एष व्यृध्यते- यो राजसूये.नाभिषिच्यते, वृत्रं हि हन्ति, वा.गनुष्टु-ब्वाचो रसो यज्ञायज्ञीयँ- वाच्येवास्य रस.न्दधाति।

* <18.11.3> वारवन्तीय.मग्निष्टोम.साम भव,तीन्द्रियेण वा एष वीर्येण व्यृध्यते- यो राजसूये.नाभिषिच्यते, वृत्रं हि हन्ति, यद्वारवन्तीय.मग्निष्टोम.साम भव-तीन्द्रियस्य वीर्यस्य परिगृहीत्यै।

* <18.11.4> अश्रयन् वाव श्रायन्तीये-नावारयन्त वारवन्तीये,नेन्द्रियस्य वा एषा वीर्यस्य परिगृहीतिः।

* <18.11.5> अप्रतिष्ठितो वा एष- यो राजसूयेनाभिषिच्यते, यदा वा एतेन द्विरात्रेण यजते-ऽथैव प्रतिष्ठा।

* <18.11.6> यावन्ति सँवत्सर.स्याहोरात्राणि- तावत्य एता स्स्तोत्रीया, स्सँवत्सर एव प्रति तिष्ठति।

* <18.11.7> अग्निष्टोम꣸ पूर्व.मह-रतिरात्र उत्तर,न्नानैवाहोरात्रयो꣸ प्रति तिष्ठति।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

- <18.11.8> अमावास्यायां पूर्व.मह-रुद्दिष्ट उत्तर- न्नानैवार्धमासयोः प्रति तिष्ठति, पौर्णमास्यां पूर्व.मह-व्यष्टकाया.मुत्तर- न्नानैव मासोः प्रति तिष्ठति, तदाहु.र्य एव समानपक्षे पुण्याहनी स्याता-न्तयो.रेव कार्यं समृद्ध्यै।
- <18.11.9> अपशव्यो द्विरात्र इत्याहु,र्द्वे ह्येते छन्दसी गायत्रञ्च त्रैष्टुभञ्च-जगती.मन्त.र्यन्तीति, न तेन जगती कृता- यत्तृतीयसवने क्रियते।
- <18.11.10> यदा वा एषाऽहीनस्याह.र्भजते, साह्नस्य वा सवन-मथैव जगती कृता, त्रैशोक.मुत्तरस्याह्नो ब्रह्मसाम भवति- वैखानस.मच्छावाकसाम, यच्छुक्रिये सवने क्रियेते- तेनैव जगती कृता- तेन पशव्यः।
- <18.11.11> व्युष्टिर्वा एष द्विरात्रो- व्येवास्मै वासयति।

## ताण्ड्यब्राह्मणे नवदशोऽध्यायः

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

- <19.1.1> ❃ 19.1 अथैष राट्।
- <19.1.2> यो राज्य आशंसमानो राज्य.न्न प्राऽऽप्नुया-त्स एतेन यजेत- राजैवैनं राजान.ङ्करोति, तन्तु वैराजेति वदेयु-र्यं राजा राजान.ङ्कुर्या-द्राजैवैनं राजान.ङ्करोति।
- <19.1.3> छन्दोऽन्ये यज्ञा स्संपद्यन्ते- स्तोम.मेष, वीर्यँ वै स्तोमो- वीर्य एवा.ध्यभिषिच्यते।
- <19.1.4> अष्टा.वेकविंशा स्संस्तुतो भव,त्यष्टौ वै वीरा राष्ट्रं समुद्यच्छन्ति, राजभ्राता च- राजपुत्रश्च- पुरोहितश्च- महिषी च- सूतश्च- ग्रामणी च- क्षत्ता च- सङ्ग्रहीता- चैते वै वीरा राष्ट्रं समुद्यच्छ-न्त्येतेष्वेवा.ध्यभिषिच्यते।
- <19.1.5> क्षत्रँ वा एकविंशः प्रतिष्ठा, क्षत्रस्यैवास्य प्रकाशो भवति- प्रति तिष्ठति- य एवँ वेद।
- <19.2.1> ❃ 19.2 अथैष विरा-डन्नाद्यकामो यजेत।
- <19.2.2> परोऽक्ष.मन्ये यज्ञा विराजं सं पद्यन्ते- प्रत्यक्ष.मेष विराजं संपन्नः।
- <19.2.3> प्रत्यक्ष.मेतेनान्नाद्य.मव रुन्धे-ऽन्नादो भवति- य एवँ वेद।
- <19.2.4> सर्वो दशदशी भवति, दशाक्षरा विरा-ड्वैराज.मन्न,मन्नाद्य.स्यावरुद्ध्यै।

- <19.2.5> ता उ पञ्च पञ्च भवन्ति, पाङ्क्तो यज्ञः- पाङ्क्ताः पशवो- यज्ञ एव पशुषु प्रति तिष्ठति।
- <19.2.6> एतेनैव प्रतिष्ठाकामो यजेत, दशभिर्वा इदं पुरुषः प्रतिष्ठितो-ऽस्या.मेव प्रति तिष्ठति।
- <19.3.1> ❃ 19.3 अथैष औपशदः।
- <19.3.2> गन्धर्वाप्सरसां स्तोमः, प्रजाकामो यजेत, गन्धर्वाप्सरसो वै मनुष्यस्य प्रजाया वा-ऽप्रजस्ताया वेशते, तेषा.मत्र सोमपीथ-स्ता.न्त्स्वेन भागधेयेन प्रीणाति- तेऽस्मै तृप्ताः प्रीताः प्रजां प्र यच्छन्ति।
- <19.3.3> एकैका स्तोत्रीयोप.जायते, प्रजा.मेवास्मा उप जनयति।
- <19.3.4> ककुभं प्राची.मुदूहति, पुरुषो वै ककु-ब्गर्भ एव स मध्यतो धीयते।
- <19.3.5> अथ यदेषा द्विपदा ककुभो लोके क्रियते- गर्भ एव तद्धि तं प्रजनयति।
- <19.3.6> च्यावनं भवति, प्रजाति.र्वै च्यावनम्।
- <19.3.7> प्र जायते बहु.र्भवति- य एवँ वेद।
- <19.3.8> वसिष्ठस्य जनित्रे भवतो, वसिष्ठो वा एते पुत्रहत स्सामनी अपश्य-त्स प्रजया पशुभिः प्राजायत, यदेते सामनी भवतः प्रजात्यै।
- <19.3.9> द्वे संस्तुतानां विराज.मतिरिच्येते- द्वे स्त्रिया ऊने प्रजननाय, प्रजनन.मेव त.त्क्रियते प्रजात्यै।
- <19.4.1> ❃ 19.4 अथैष पुनस्स्तोमः।
- <19.4.2> यो बहु प्रतिगृह्य गरगी.रिव मन्येत- स एतेन यजेत। (गरगीः- विषभुक् अर्थात् नष्टोस्मीति विषण्णः)
- <19.4.3> यैकादशी- यदेव पूर्ववयसे बहु प्रतिगृह्णाति- यद्गर.ङ्गिरति- य.दनन्न.मत्ति- प्रात.स्सवनाय तन्निहरति।
- <19.4.4> अथ या द्वादशी, यदेवोत्तर.वयसे बहु प्रतिगृह्णति- यद्गर.ङ्गिरति- य.दनन्न.मत्ति- तृतीयसवनाय तन्निहरति।
- <19.4.5> वैराजो वै पुरुष- स्स मध्यतोऽशुद्धो- मध्यत एवैनं पाप्मनो मुञ्चति।

Sri Sachchidananda Avadhoota Datta Peetham

- <19.4.6> शुद्धाशुद्धीये भवतः।
- <19.4.7> इन्द्रो यती.न्त्सालावृकेभ्यः प्रायच्छ-त्तमश्लीला वागभ्यवद-त्सोऽशुद्धो ऽमन्यत, स एते शुद्धाशुद्धीये अपश्य-त्ताभ्या.मशुध्यत्।
- <19.4.8> यदेव बहु प्रतिगृह्णाति- यद्गर.ङ्गिरति- य.दनन्न.मत्ति- यदशुद्धो मन्यते- तदेताभ्यां शुध्यति।
- <19.4.9> गौषूक्त.ञ्चाऽऽश्वसूक्तञ्च भवतः।
- <19.4.10> गौषूक्ति.श्चाऽऽश्वसूक्तिश्च बहु प्रतिगृह्य गरगिरा.वमन्येता,न्तावेते सामनी अपश्यता- न्ताभ्या.ङ्गर.न्निरघ्नाताम्।
- <19.4.11> यदेव बहु प्रतिगृह्णाति- यद्गर.ङ्गिरति- य.दनन्न.मत्ति- तदेताभ्या.न्निर्हते।
- <19.4.12> पञ्चदश स्तोत्राणि भव,न्त्योजो वीर्यं पञ्चदशः- पाप्मन एवैनं मु.त्त्वौजसा वीर्येण समर्धयति।
- <19.5.1> ❋ 19.5 अथैष चतुष्टोमः।
- <19.5.2> पशुकामो यजेत।
- <19.5.3> यच्चतसृभि.र्बहिष्पवमानं भवति- चतुष्पादाः पशवः- पशू.नेवाव रुन्धे।
- <19.5.4> यदष्टाभि.राज्या-न्यष्टाशफाः पशव- श्शफश.स्तत्पशू.नाप्नोति।
- <19.5.5> यद्द्वादशो माध्यन्दिनः पवमानो- द्वादश मासा.स्सँवत्सर- स्सँवत्सरं पशवोऽनु प्र जायन्ते- तानेवाव रुन्धे।
- <19.5.6> यत्षोडशानि पृष्ठानि- षोडश कलाः पशवः- कलाश.स्तत्पशू.नाप्नोति।
- <19.5.7> यद्विंश आर्भवः- पाङ्क्त्व.मेषा.न्तदाप्नोति।
- <19.5.8> यच्चतुर्विंशोऽग्निष्टोम-श्चतुर्विंशत्यक्षरा गायत्री- तेजो ब्रह्मवर्चस.ङ्गायत्री- तेज एव ब्रह्मवर्चस.मव रुन्धे।
- <19.5.9> प्राणो गायत्री प्रजननं- प्राणा.देव गायत्र्याः प्र जायते।
- <19.5.10> एकं साम- बहूनि च्छन्दांसि, तस्मा.देको बहू.न्पोषा.न्पुष्यति।
- <19.5.11> आत्मा वा अग्निष्टोमः- पशव.श्छन्दां-स्यात्मन्येव तत्पशू.न्प्रतिष्ठापयति- नोक्थो- नाग्निष्टोमो- न हि ग्राम्याः पशवो- नाऽऽरण्याः।

• <19.6.1>❃ 19.6 अथ यस्य चत्वारि स्तोत्राणि चतसृभि-श्चत्वा.र्यष्टाभि-श्चत्वारि द्वादशभि-श्चत्वारि षोडशभि- स्स गा.न्नातिवदति।

• <19.6.2> षोडशकलाᳵ पशवᳵ- कलाश.स्तत्पशू.नाप्नोति।

• <19.6.3> उक्थ्य ष्षोडशिमा.न्भवति, पशवो वा उक्थानि- वज्र.ष्षोडशी- वज्रेणैवास्मै पशू.न्परिगृह्ण,त्यनपक्रामुका अस्मा.त्पशवो भवन्ति, नोक्थो- नातिरात्रो- न हि ग्राम्याᳵ पशवो- नाऽऽरण्याः।

• <19.7.1>❃ 19.7 असुराणाँ वै बल.स्तमसा प्रावृतोऽश्मापिधानश्चाऽऽसी-त्तस्मि.न्गव्यँ वस्वन्त.रासी-त्तन्देवा नाशक्नुव.न्भेत्तु,न्ते बृहस्पति.मब्रुव-न्निमा.न्न उत्सृजेति, स उद्भिदैव बलँ व्यच्च्यावय-द्बलभिदाऽभिन-त्तानुत्सेधेनै.वोदसृज-न्निषेधेन पर्यगृह्णात्।

• <19.7.2> पशुकामो यजेत।

• <19.7.3> यदुद्भिदा यजेत- बल.मेवस्मै विच्यावयति, यद्बलभिदा- बल.मेवास्मै भिनत्ति।

• <19.7.4> उत्सेध.निषेधौ ब्रह्मसामनी भवत- उत्सेधेनैवास्मै पशू.नुत्सिध्य- निषेधेन परि गृह्णाति।

• <19.7.5> यज्ञ इन्द्र.मवर्धय.दिति ब्रह्मण आज्यं- रूपेण समृद्धम्।

• <19.7.6> सप्तिसप्तदशौ भवतो, यत्सप्तभि.स्स्तुवन्ति- सप्त ग्राम्याᳵ पशवᳵ पशू.नेवाव रुन्धे, सप्तपदा शक्वरी- पशव श्शक्वरी- पशू.नेवाव रुन्धे,ऽथ यत्सप्तदशभिᳵ- प्रजापति.र्वै सप्तदशᳵ- प्रजापति.मेवाऽऽप्नोति।

• <19.7.7> गायत्रीं सं पद्यते, तेजो ब्रह्मवर्चस.ङ्गायत्री- तेज एव ब्रह्मवर्चस.मव रुन्धे, प्राणो गायत्री प्रजननं- प्राणा.देव गायत्र्याᳵ प्र जायते।

• <19.8.1> ❃ 19.8 अथैषोऽपचिति,रपचितिकामो यजे-तापचि.त्यैवास्मा अपचितिँ विन्दति।

• <19.8.2> तस्य चतुर्विंशौ पवमानौ, चतुर्विंशत्यक्षरा गायत्री- तेजो ब्रह्मवर्चस.ङ्गायत्री- तेजसैवास्मै ब्रह्मवर्चसे.नापचितिँ विन्दति।

• <19.8.3> उभे बृहद्रथन्तरे भवत, उभाभ्या.मेवास्मै बृहद्रथन्तराभ्या.मपचितिँ विन्दति।

- <19.8.4> भर्गयशसी भवतो, भर्गेणैवास्मै भर्गो दधाति- यशसा यशः।
- <19.8.5> उभये स्तोमा युग्मन्त.श्चायुज,श्चोभयै.रेवास्मै स्तोमै.रपचितिँ विन्दति।
- <19.8.6> तदाहु-र्विलोमान स्तोमा- ईश्वरा यजमानं विक्षेतो,र्वि ह्यतियन्तीति।
- <19.8.7> एकविंशोऽग्निष्टोमो भवति, प्रतिष्ठा वा एकविंशो-ऽन्तत एव यज्ञस्य प्रति तिष्ठति।
- <19.9.1>❃ 19.9 अथैष सर्वस्तोमोऽपचिति,रपचितिकामो यजेत- सर्वै.रेवास्मै स्तोमै.रपचितिँ विन्दति।
- <19.9.2> विराजं सम्पद्यत,-एष वा अपचितो- योऽन्नादो,ऽन्नँ विरा-डन्नाद्य.मेवास्मि.न्दधाति।
- <19.9.3> उभे बृह.द्रथन्तरे भवतो- भर्गयशसी भवत- उभये स्तोमा.श्छन्दोमाश्च-पृष्ठ्या,श्चोभयै.रेवास्मै स्तोमै.रपचितिँ विन्दति।
- <19.9.4> तस्य च्छन्दोमाᳶ पृष्ठानि- पशवो वै छन्दोमा- अन्नं पृष्ठा-न्यभिपूर्व.मेवास्मि.न्नन्नाद्यं पशू.न्दधाति, यच्छन्दोमवां-स्तेन द्वादशाह.याजिन.माप्नोति।
- <19.9.5> तदाहु-र्नानालोका स्स्तोमा.श्छन्दोमाश्च पृष्ठ्याश्च- यदेकस्मिन् यज्ञक्रतौ समव.रुध्यन्त- ईश्वरो यजमानोऽप्रतिष्ठातो.रिति।
- <19.9.6> एकविंशोऽग्निष्टोमो भवति, प्रतिष्ठा वा एकविंशᳶ- प्रतिष्ठा.मेव तदभ्यायन्ति।
- <19.10.1> ❃ 19.10 पक्षी वा एष स्तोमः।
- <19.10.2> पक्ष्येष निधीयते।
- <19.10.3> न वा अपक्षᳶ पक्षिण.माप्नो,त्यथ यदेष प.क्ष्यपक्षिणि निधीयते-तस्मा.त्पक्षिणᳶ पक्षैᳶ पतन्ति। (पक्षी, अपक्षिणि)
- <19.10.4> पक्षी ज्योतिष्मा.न्पुण्या.न्लोका.न्त्सञ्चरति- य एवँ वेद।
- <19.10.5> त्रिवृता.वभितो भवत,स्तेजो ब्रह्मवर्चस.न्त्रिवृ-त्तेज एव ब्रह्मवर्चस.मवरुन्धे।
- <19.10.6> अथ पञ्चदशौ, वीर्यँ वै पञ्चदशो- वीर्य.मेवाव रुन्धे।
- <19.10.7> अथ सप्तदशौ, पशवो वै सप्तदशᳶ- पशू.नेवाव रुन्धे।
- <19.10.8> अथैकविंशौ, प्रतिष्ठा वा एकविंशो- मध्यत एव यज्ञस्य प्रति तिष्ठति।

- <19.10.9> अथ त्रिणवा,विमे वै लोका-स्त्रिणव एष्वेव लोकेषु प्रति तिष्ठति।
- <19.10.10> अथ त्रयस्त्रिंशो- वर्ष्म वै त्रयस्त्रिंशः।
- <19.10.11> वर्ष्म स्वानां भवति- य एवँ वेद।
- <19.10.12> एष वाव ब्रध्नस्य विष्टपो, यदेतौ त्रयस्त्रिंशौ मध्यत स्सन्धीयेते- तेन ब्रध्नस्य विष्टप.मा रोहति।
- <19.10.13> मध्यतो वा अग्नि.र्वरिष्ठ,स्तस्मा.देते स्तोमा मध्यतो वरिष्ठा॰ क्रियन्ते।
- <19.10.14> त्रिवृता प्रैति- त्रिवृतोदेति, प्राणो वै त्रिवृ.त्प्राणेनैव प्रैति- प्राण.मभ्युदेति।
- <19.11.1> ❁ 19.11 अथैष ज्योतिः।
- <19.11.2> तस्य त्रिवृ.द्बहिष्पवमानं- पञ्चदशा.न्याज्यानि- चतुर्विंशो माध्यन्दिन॰ पवमान- स्सप्तदशानि पृष्ठानि।
- <19.11.3> प्राणो वै त्रिवृ.दात्मा पञ्चदशः।
- <19.11.4> मुख.ङ्गाय-त्र्यन्नँ वै सप्तदशो- मुखत एव तदन्न.न्धत्ते।
- <19.11.5> अन्न.म-त्त्यन्नादो भवति- य एवँ वेद।
- <19.11.6> माध्यन्दिनेन वै पवमानेन देवा स्स्वर्गँ लोक.मायन्, यदेष चतुर्विंशो माध्यन्दिन॰ पवमानो भवति- स्वर्गस्य लोकस्याऽऽक्रान्त्यै, चतुर्विंशत्यक्षरा गायत्री- तेजो ब्रह्मवर्चस.ङ्गायत्री- तेज एव ब्रह्मवर्चस.मव रुन्धे, प्राणो गायत्री प्रजननं- प्राणा.देव गायत्र्या॰ प्र जायते।
- <19.11.7> उभये स्तोमा युग्मन्त.श्चायुजश्च- तन्मिथुन,न्तस्मा.न्मिथुना.त्प्र जायते।
- <19.11.8> पक्षि वा एत.च्छन्द॰, पक्षी ज्योतिष्मा-न्पुण्या.न्लोकान्त्सञ्चरति- य एवँ वेद।
- <19.11.9> मध्यतो वा अग्नि.र्वरिष्ठ,स्तस्मा.देते स्तोमा मध्यतो वरिष्ठा॰ क्रियन्ते।
- <19.11.10> एका संस्तुतानां विराज.मतिरिच्यत, -एकाकिन.मेवैन. मन्नाद्य.स्याध्यक्ष.ङ्करोति।
- <19.11.11> ज्योतिर्वा एषोऽग्निष्टोमो, ज्योतिष्मन्तं पुण्यँ लोक.ञ्जयति- य एवँ विद्वा.नेतेन यजते।

- <19.12.1> ❀19.12 अथैष ऋषभः।
- <19.12.2> ऋषभो वा एष स्तोमाना,मृषभता.ङ्गच्छति- य एवँ वेद।
- <19.12.3> राजन्यँ याजये,दृषभो वै पशूना.मधिपती- राजन्यो मनुष्याणाम्।
- <19.12.4> यो वा अस्ति- सोऽधिपतिः।
- <19.12.5> अधिपति स्समानानां भवति- य एवँ वेद।
- <19.12.6> तस्य सदो.विशीयं माध्यन्दिने पवमाने भवति- विश.मेवास्मै सवनाभ्यां परि गृह्ना-त्यनपक्रामुकाऽस्मा.द्विङ्भवति।
- <19.12.7> समन्तं भवति- समन्ता.मेवास्मै विश.ङ्करो-त्यनपक्रामुकाऽस्मा.द्विङ्भवति।
- <19.12.8> उभे बृहद्रथन्तरे भवत, इयँ वै रथन्तरं- द्यौ.र्बृह- देवास्मा.ल्लोका.द्वायत्र्येवाऽमुष्मा- दुभयो.रनयो.र्लोकयोः प्रति तिष्ठति।
- <19.12.9> अनुष्टुभि बृह.द्भव,त्यन्तो वा अनुष्टु.प्छन्दसा-मन्तो बृह.त्साम्ना-मन्तो राजन्यो मनुष्याणा-मन्त एव तदन्तं प्रतिष्ठापयति, तस्माद्यो राजन्यानां हीयते- न स पुन.रग्रं पर्यैति।
- <19.13.1> ❀19.13 यो वै वाजपेय- स्स राजसूयो, यो राजसूय- स्स वरुणसवो,ऽथैष गोसव- स्स्वाराज्यो वा एष यज्ञः।
- <19.13.2> स्वाराज्य.ङ्गच्छति- य एवँ वेद।
- <19.13.3> प्रजापतिर्हि स्वाराज्यं- परमेष्ठी स्वाराज्यम्।
- <19.13.4> परमेष्ठिता.ङ्गच्छति- य एवँ वेद।
- <19.13.5> उभे बृहद्रथन्तरे भवत-स्तद्धि स्वाराज्यं- स्वाराज्य.ङ्गच्छति- य एवँ वेद।
- <19.13.6> अयुत न्दक्षिणा,स्तद्धि स्वाराज्यं- स्वाराज्य.ङ्गच्छति- य एवँ वेद।
- <19.13.7> प्रतिदुहाऽभिषिच्यते, तद्धि स्वाराज्यं- स्वाराज्य.ङ्गच्छति- य एवँ वेद।
- <19.13.8> बृहत स्स्तोत्रं प्रत्यभिषिच्यते, तद्धि स्वाराज्यं- स्वाराज्य.ङ्गच्छति- य एवँ वेद।
- <19.13.9> अनुद्धते दक्षिणत आहवनीय.स्याभिषिच्यते-ऽस्या.मेवानन्तर्हिते-ऽध्यभिषिच्यते।

- <19.13.10> सर्व.ष्षड्विंश-स्तेन गोसवः।
- <19.14.1> ❁19.14 अथैष मरुत्स्तोम, एतेन वै मरुतोऽपरिमितां पुष्टि.मपुष्य-न्नपरिमितां पुष्टिं पुष्यति- य एवँ वेद।
- <19.14.2> यद्गणश स्स्तोमा-स्तेन मरुत्स्तोमो, गणशो हि मरुतः।
- <19.14.3> एतेनैव त्रीन् याजयेत्।
- <19.14.4> यत्त्रीणि त्रिवृन्ति स्तोत्राणि भवन्ति- नाना ब्रह्मवर्चसे प्रति तिष्ठन्ति।
- <19.14.5> यत्त्रीणि पञ्चदशानि- नाना वीर्ये।
- <19.14.6> यत्त्रीणि सप्तदशानि- नाना पशुषु।
- <19.14.7> यत्त्रीण्येकविंशानि- नाना प्रति तिष्ठन्ति।
- <19.14.8> प्रति तिष्ठति- य एवँ वेद।
- <19.15.1> ❁19.15 अथैष इन्द्राग्न्योᳵ कुलायᳵ, प्रजाकामो वा पशुकामो वा यजेत- प्रजा वै कुलायं- पशवᳵ कुलाय-ङ्गृहाᳵ कुलाय-ङ्कुलाय.मेव भवति।
- <19.15.2> एतेनैव द्वौ याजयेत्।
- <19.15.3> यत्ष.ड्विवृन्ति स्तोत्राणि भवन्ति- नाना ब्रह्मवर्चसे प्रति तिष्ठतो, यद्वे पञ्चदशे नाना वीर्ये- यद्वे सप्तदशे नाना पशुषु- यद्वे एकविंशे नाना प्रति तिष्ठतᳵ, प्रति तिष्ठति- य एवँ वेद।
- <19.16.1> ❁19.16 अथैष पञ्चदश- इन्द्रस्तोम उक्थ्यः।
- <19.16.2> एतेन वा इन्द्रोऽत्यन्या देवता अभव,दत्यन्याᳵ प्रजा भवति- य एवँ वेद।
- <19.16.3> राजन्यँ याजयेत्।
- <19.16.4> सर्वᳵ पञ्चदशो भव-त्योजो वीर्यं पञ्चदश- ओजसैवैनँ वीर्येण समर्धयति।
- <19.16.5> ऐन्द्रीषु भव-न्तीन्द्रियेणैवैनँ वीर्येण समर्धयति।
- <19.16.6> उक्थ्यो भवति, पशवो वा उक्थानि- वि.डुक्थानि- विश.मेवास्मै पशू.ननु नियुन-क्त्यनपक्रामुऽकास्मा.द्विङ्भवति।
- <19.16.7> पञ्चदश स्तोत्राणि- पञ्चदशानि भव-न्त्योजो वीर्यं पञ्चदशो-ऽभिपूर्व.मेवास्मि.न्नोजो वीर्य.न्दधाति।

- <19.17.1> ❃19.17 अथैष इन्द्राग्न्यो स्स्तोम, एतेन वा इन्द्राग्नी अत्यन्या देवता अभवता-मत्यन्या॰ प्रजा भवति- य एवँ वेद।
- <19.17.2> त्रिवृ.त्पञ्चदशो भवति।
- <19.17.3> ब्रह्म वै त्रिवृ-त्क्षत्रं पञ्चदशो, ब्रह्मण इव चास्य क्षत्रस्येव च प्रकाशो भवति- य एवँ वेद।
- <19.17.4> राजा च पुरोहितश्च यजेयाताम्।
- <19.17.5> गायत्रीञ्च जगतीञ्च संपद्यते।
- <19.17.6> तेजो ब्रह्मवर्चस.ङ्गायत्र्या ब्राह्मणोऽवरुन्धे- विशं राजा जगत्या प्रविशति।
- <19.17.7> पुरोधाकामो यजेत।
- <19.17.8> बृहस्पति.रकामयत देवानां पुरोधा.ङ्गच्छेयमिति- स एतेनायजत- स देवानां पुरोधा.मगच्छ,द्गच्छति पुरोधाँ- य एवँ वेद।
- <19.18.1> ❃19.18 अथैष विघनः।
- <19.18.2> इन्द्रोऽकामयत पाप्मानं भ्रातृव्यँ विहन्या.मिति, स एतँ विघन.मपश्य-त्तेन पाप्मानं भ्रातृव्यं व्यहन्, वि पाप्मानं भ्रातृव्यं हते- य एवँ वेद।
- <19.18.3> यत्त्रिवृ.द्भवति- प्राणां.स्तेनाव रुन्धे, यद्द्वादश.स्सँवत्सर न्तेन- यत्पञ्चदशो वीर्य.न्तेन- यत्सप्तदशोऽन्नाद्य.न्तेन- यदेकविंश॰ प्रतिष्ठा तेन- यन्नवदश॰ प्रजनन.न्तेन- यच्चतुर्विंशो ब्रह्मवर्चस.न्तेन- यत्त्रिणवो वज्रं भ्रातृव्याय प्रहरति।(प्रतिष्ठान्तेन इति साधुः)
- <19.18.4> पशुकामो यजेत, बृहतीं संपद्यते- पशवो वै बृहती- पशू.नेवाव रुन्धे।
- <19.18.5> षडेता बृहत्यो भवन्ति, षड्ऋतव.स्सँवत्सर- स्सँवत्सरं पशवोऽनु प्रजायन्ते- तानेवाऽऽस्वाऽव रुन्धे।
- <19.19.1> ❃19.19 इन्द्र.मदेव्यो माया असचन्त- स प्रजापति.मुपाधाव-त्तस्मा एतं विघनं प्रायच्छ-त्तेन सर्वा मृधो व्यहत, यद्व्यहत- तद्विघनस्य विघनत्वम्।
- <19.19.2> सर्वा मृधो विहते- य एवँ विद्वान् विघनेन यजते- यमेवँ विद्वान् विघनेन याजयति।
- <19.19.3> पशुकामो यजेत, पशवो वै बृहती- पशुष्वेव प्रति तिष्ठति।

# ताण्ड्यब्राह्मणे विंशोऽध्यायः

- <20.1.1> ❃ 20.1 त्रिवृ.द्बहिष्पवमानं- पञ्चदशा.न्याज्यानि- पञ्चदशो माध्यन्दिनः पवमान- स्सप्तदशानि पृष्ठानि- सप्तदश आर्भव- एकविंशोऽग्निष्टोम स्सोक्थ्यः- पञ्चदशी रात्रि- स्त्रिवृत्सन्धिः।

- <20.1.2> ज्योतिष्टोमेनातिरात्रेणर्द्धिकामो यजेता,ऽभिक्रमो वा एष स्तोमाना- मभिक्रान्त्या, अभिक्रान्तेन हि यज्ञस्यर्ध्नोति।

- <20.1.3> एषोऽग्निष्टोम- एष उक्थ्य- एषोऽतिरात्रो,ऽग्निष्टोमेन वै देवा इमँ लोक मभ्यजय,न्नुक्थ्यै-रन्तरिक्षं- रात्र्याऽमुँ लोक.मजय,न्नहोरात्राभ्या.मभ्यवर्तन्त।

- <20.1.4> पराच्यो वा अन्या व्युच्छन्ति- प्रतीच्योऽन्या, एषा वाव प्रतीची व्युच्छति- याऽऽश्विनेन व्युच्छति, प्रतीची.रेवास्मा उषसो विवासयति।

- <20.1.5> द्वे संस्तुतानाँ विराज.मतिरिच्येते, एषा वै स्तनवती विरा-ड्यङ्काम.ङ्कामयते- तमेता.न्दुग्धे।

- <20.1.6> त्रिवृता प्रैति- त्रिवृतोदेति, प्राणो वै त्रिवृ-त्प्राणेनैव प्रैति- प्राण.मभ्युदेति।

- <20.2.1> ❃ 20.2 त्रिवृ.द्बहिष्पवमानं- पञ्चदशा.न्याज्यानि- सप्तदशो माध्यन्दिनः पवमान, एकविंशानि पृष्ठानि- त्रिणव आर्भव-स्त्रयस्त्रिंशोऽग्निष्टोमः- प्रत्यवरोही.ण्युक्थानि- त्रिणवं प्रथम-न्द्वे एकविंशे सषोडशिके- पञ्चदशी रात्रि-स्त्रिवृ.त्सन्धिः।

- <20.2.2> सर्वस्तोमेनातिरात्रेण बुभूषन् यजेत, सर्वस्याऽऽप्त्यै- सर्वस्य जित्यै- सर्व.मेवैतेनाऽऽप्नोति- सर्व.ञ्जयति।

- <20.2.3> यत्त्रिवृद्बहिष्पवमानं भवति- तत्त्रिवृतं स्तोम.माप्नोति- गायत्री.ञ्छन्दो, य.त्पञ्चदशा.न्याज्यानि- तत्पञ्चदशं स्तोम.माप्नोति- त्रिष्टुभ.ञ्छन्दो, यत्सप्तदशो माध्यन्दिनः पवमान-स्तत्सप्तदशं स्तोम.माप्नोति- जगती.ञ्छन्दो, यदेकविंशानि पृष्ठानि- तदेकविंशं स्तोम.माप्नो-त्यनुष्टुभ.ञ्छन्दो, यत्त्रिणव आर्भव-स्तत्त्रिणवं स्तोम.माप्नोति- पङ्क्ति.ञ्छन्दो, यत्त्रयस्त्रिंशोऽग्निष्टोम-स्तत्त्रयस्त्रिंशं स्तोम.माप्नोति- विराज.ञ्छन्दो, यदुष्णि.क्ककुभौ क्रियेते- तदुष्णि.क्ककुभा.वाप्नोति, यदाश्विनं शस्यते- तत्सर्व.मेवैतेना ऽऽप्नोति- सर्व.ञ्जयति।

- <20.2.4> प्राञ्चँ वै त्रयस्त्रिंशो यज्ञं प्रभुजति, तमध्वर्यु.रेकादशिन्या पुरस्ता.त्प्रत्युद्यच्छ,- त्येकादश रशना- एकादश पशव- एकादश यूपा भवन्ति, तत्त्रयस्त्रिंशे त्रयस्त्रिंशं प्रतिष्ठापयति।
- <20.2.5> तया समुद्यतया रात्र्या- यँ.य.ङ्काम.ङ्कामयते- तन्त.मभ्यश्नुते, यँ य.ङ्काम. ङ्कामयते- तन्त.मभ्यश्नुते- य एवँ वेद।
- <20.3.1> त्रिवृ.द्बहिष्पवमानं- पञ्चदशा.न्याज्यानि- सप्तदशो माध्यन्दिनः पवमान- एकविंशं होतुः पृष्ठ-ञ्छन्दोमा इतराणि, त्रिणव आर्भव-स्त्रयस्त्रिंशोऽग्निष्टोमः- प्रत्यवरोही.ण्युक्थानि- त्रिणवं प्रथम,मथैकविंश-मथ सप्तदश-मेकविंश ष्षोडशी पञ्चदशी रात्रि.स्त्रिवृत्सन्धि-स्त्रिवृत्प्रथम,मतिरिक्त.स्तोत्र,-मथ पञ्चदश-मथ सप्तदश-मथैकविंशम्।
- <20.3.2> प्रजापतिः पशू.नसृजत- तेऽस्मा.त्सृष्टा अपाक्रामं,स्तानग्निष्टोमेन नाऽऽप्नो- त्तानुक्थै.र्नाऽऽप्नो-त्तान्त्षोडशिना नाऽऽप्नो-त्तान्रात्र्या नाऽऽप्नो-त्तान्त्सन्धिना नाऽऽप्नो-त्ता.नाश्विनेन नाऽऽप्नो,त्तानग्नि.मब्रवी-दिमान्म ईप्सेति- तानग्नि.स्त्रिवृता स्तोमेन जराबोधीयेन साम्ना नाऽऽप्नो,त्तानिन्द्र.मब्रवी-दिमान्म ईप्सेति- तानिन्द्रः पञ्चदशेन स्तोमेन सत्त्रासाहीयेन साम्ना नाऽऽप्नो,त्तान् विश्वा.न्देवा.नब्रवी-दिमान्म ईप्सतेति- तान् विश्वे देवा स्सप्तदशेन स्तोमेन मार्गीयवेण साम्ना नाऽऽप्नुवं,स्तान् विष्णु.मब्रवी-दिमान्म ईप्सेति- तान् विष्णु.रेकविंशेन स्तोमेनाऽऽप्नो,द्वारवन्तीये.नावारय-तेदँ विष्णु.र्विचक्रम इति व्यक्रमत।
- <20.3.3> यस्मा.त्प्र प्रेव पशवो भ्रंशेर-न्त्स एतेन यजेत।
- <20.3.4> एतेन वै देवा जैत्वानि जित्वा- यँ.य.ङ्काम.मकामयन्त- तन्त.माप्नुवन्, यङ्काम.ङ्कामयते- तमेतेनाऽऽप्नोति।
- <20.3.5> तदप्तोर्याम्नो-ऽप्तोर्यामत्वम्।
- <20.4.1>❃ 20.4 त्रिवृ.द्बहिष्पवमानं पञ्चदशं- होतु.राज्य- न्नव.सप्तदशानि स्तोत्रा- ण्येकविंशोऽग्निष्टोम स्सोक्थः- पञ्चदशी रात्रि-स्त्रिवृ.त्सन्धिः।
- <20.4.2> नव.सप्तदशेनातिरात्रेण प्रजाकामो यजेत, नव वै प्राणाः- प्रजापति स्सप्तदशः- प्राणेभ्य एव तदधि प्रजापतेः प्रजाः प्र जायन्ते।
- <20.4.3> ककुभं प्राची.मुदूहति, पुरुषो वै ककु-ब्गर्भो वा एष मध्यतो धीयते।
- <20.4.4> तस्यां साकमश्वम्।

- <20.4.5> प्रजापति॰ प्रजा असृजत- ता न प्राजायन्त- स एत.त्सामापश्य-त्ता अश्वो भूत्वाऽभ्यजिघ्र-त्ता॰ प्राजायन्त- प्रजननँ वा एत.त्साम।
- <20.4.6> प्रजायते- बहु.र्भवति- य एवँ वेद।
- <20.4.7> द्विपदा.ङ्ककुभो लोके करोति, गर्भ.मेव तद्धितं मध्यत॰ प्रजनयति।
- <20.4.8> अतिरात्रो भव,त्यहोरात्रे वा अनु प्रजा॰ प्रजायन्ते-ऽहोरात्रे एवानु प्रजया पशुभि॰ प्रजायते।
- <20.5.1> ❁ 20.5 त्रिवृ.द्बहिष्पवमानं- पञ्चदशा.न्याज्यानि- पञ्चदशो माध्यन्दिन॰ पवमान- स्सप्तदशानि पृष्ठानि- सप्तदश आर्भव- एकविंशोऽग्निष्टोम- स्सप्तदशा.न्युक्थानि- पञ्चदशी रात्रि-स्त्रिवृ.त्सन्धिः।
- <20.5.2> विषुवताऽतिरात्रेण ज्येष्ठ.ञ्चैष्ठिनेयँ याजये,द्विषुवान् वा एष स्तोमानां, विषुवा.नेव भवति।
- <20.5.3> यदेक एकविंशो भव,त्येकविंशो वा इतोऽसा.वादित्यो- द्वादश मासा॰- पञ्चर्तव-स्त्रय इमे लोका- असा.वादित्य एकविंश, आदित्यस्यैवैनं मात्रा.ङ्गमयति।
- <20.5.4> एष वा उदेति- न वा एन.मन्य.ज्ज्योतिषा.ज्ज्योति॰ प्रत्युदेति।
- <20.5.5> नैन.मन्य स्स्वेषु प्रत्युदेति- य एवँ वेद।
- <20.6.1> ❁ 20.6 पञ्चदशं बहिष्पवमानं- त्रिवृ.न्त्याज्यानि- सप्तदशं माध्यन्दिनं सवन-मेकविंश.न्तृतीयसवनं सोक्थं- पञ्चदशी रात्रि-स्त्रिवृ.त्सन्धि,गौष्टोमेनातिरात्रेण भ्रातृव्यवान् यजेत, गवा वै देवा असुरा.नेभ्यो लोकेभ्योऽनुदन्त, रात्र्याऽनपजय्य.मजय,-न्नेभ्यो लोकेभ्यो भ्रातृव्यं प्रणुद्य- रात्र्याऽनपजय्य.ञ्जयति।
- <20.7.1>❁ 20.7 त्रिवृ.द्बहिष्पवमानं- पञ्चदशा.न्याज्यानि- सप्तदशं माध्यन्दिनं सवन-मेकविंश न्तृतीयसवनं सोक्थं- पञ्चदशी रात्रि-स्त्रिवृ.त्सन्धि,रायुष्टोमेनातिरात्रेण स्वर्गकामो यजे-तोर्ध्वा स्स्तोमा य.न्त्यनपभ्रंशाय, यदतिरात्रो भव-त्यहोरात्राभ्या.मेव स्वर्गँ लोक.मेति।
- <20.8.1>❁ 20.8 त्रिवृ.द्बहिष्पवमानं- पञ्चदशं होतु.राज्यं- सप्तदशं मैत्रावरुणस्य- पञ्चदशं ब्राह्मणाच्छंसिन- स्सप्तदश.मच्छावाक-स्यैकविंशो माध्यन्दिन॰ पवमान, स्सप्तदशं होतु॰ पृष्ठ-मेकविंशं मैत्रावरुणस्य- त्रिणवं ब्राह्मणाच्छंसिन- एकविंश.मच्छावाकस्य- त्रिणव आर्भव-

स्त्रयस्त्रिंशोऽग्निष्टोमः- प्रत्यवरोही.ण्युक्थानि- त्रिणवं प्रथम,न्द्वे एकविंशे सषोडशिके- पञ्चदशी रात्रि-स्त्रिवृ.त्सन्धि,रभिजिताऽतिरात्रेण भ्रातृव्यवान् यजे,ताभिजिता वै देवा असुरा.निमा.न्लोका.नभ्यजय-न्रात्र्याऽनपजय्य. मजय,न्नभिजितैव भ्रातृव्य.मिमा.न्लोका.नभिजित्य- रात्र्या ऽनपजय्य.ञ्जयति।

- <20.9.1>❃ 20.9 त्रिवृ.द्बहिष्पवमानं- पञ्चदशं होतु.राज्यं- सप्तदशं मैत्रावरुण-स्यैकविंशं ब्राह्मणाच्छंसिनः- पञ्चदश.मच्छावाकस्य- सप्तदशो माध्यन्दिनः पवमान- एकविंशं होतुः पृष्ठं- त्रिणवं मैत्रावरुणस्य- सप्तदशं ब्राह्मणाच्छंसिन- एकविंश.मच्छावाकस्य- त्रिणव आर्भव-स्त्रयस्त्रिंशोऽग्निष्टोमः- प्रत्यवरोही.ण्युक्थानि- त्रिणवं प्रथम-न्द्वे एकविंशे सषोडशिके- पञ्चदशी रात्रि-स्त्रिवृ.त्सन्धि,र्विश्वजिताऽतिरात्रेण पशुकामो यजेत।
- <20.9.2> रेतो हि नाभानेदिष्ठीयं- पशवो वालखिल्या, यन्नाभानेदिष्ठीयं पूर्वं शस्यत-उत्तरा वालखिल्या- रेतस.स्तत्पशवः प्रजायन्ते- रूपाणि विकरोति, यद्वार्षाकप.मृतुषु प्रतितिष्ठति- य.देवयामरुत्।
- <20.10.1> ❃ 20.10 त्रिवृताऽतिरात्रेण ब्रह्मवर्चसकामो यजेत, तेजो वै त्रिवृ.द्ब्रह्मवर्चस- न्तेज एव ब्रह्मवर्चस.मव रुन्धे- तेजसि ब्रह्मवर्चसे प्रति तिष्ठति, पञ्चदशे.नातिरात्रेण वीर्यकामो यजे-तौजो वीर्यं पञ्चदश- ओज एव वीर्य.मव रुन्ध- ओजसि वीर्ये प्रति तिष्ठति, सप्तदशे.नातिरात्रे.णान्नाद्यकामो यजे-तान्नँ वै सप्तदशोऽन्नाद्य मेवाव रुन्ध, -एकविंशे.नातिरात्रेण प्रतिष्ठाकामो यजेत- प्रतिष्ठा वा एकविंशो- यदतिरात्रो भव-त्यहोरात्रयो.रेव प्रति तिष्ठति।
- <20.11.1> ❃ 20.11 ज्योतिष्टोमोऽग्निष्टोमः पूर्व.मह- स्सर्वस्तोमोऽतिरात्र उत्तरम्।
- <20.11.2> तस्य चतुर्विंशं बहिष्पवमानं- पञ्चदशा.न्याज्यानि- सप्तदशो माध्यन्दिनः पवमान- एकविंशानि पृष्ठानि- त्रिणव आर्भव-स्त्रयस्त्रिंशोऽग्निष्टोमः- प्रत्यवरोही.ण्युक्थानि- त्रिणवं प्रथम,मथैकविंश-मथ सप्तदश-मेकविंश ष्षोडशी- पञ्चदशी रात्रि-स्त्रिवृ.त्सन्धिः।
- <20.11.3> अङ्गिरस स्स्वर्गँ लोक.मायं-स्तेषां हविष्मांश्च हविष्कृ.च्चाऽऽङ्गिरसा.वहीयेता, न्ता.वाऽगच्छेताँ- यतोऽङ्गिरस स्स्वर्गँ लोक.मायं-स्ता.वतप्येता,न्तावेते सामनी अपश्यता-न्ताभ्या.न्द्विरात्र.मतन्वाता- न्तेन स्वर्गँ लोक.मैताम्।

- <20.11.4> यꣳ पौण्यो हीन इव स्या-त्स एतेन यजेता-ऽऽप्नोति पूर्वेषां प्रहा,माप्नुतां हि ता.वङ्गिरसः।
- <20.11.5> प्रजाकामो यजेत- द्वितीयं ह्येत.द्यत्प्रजाः।
- <20.11.6> स्वर्गकामो यजेत, द्वितीयाद्धि लोका.त्परो लोकोऽभिप्रक्रम्यो, दुराधो द्विरात्र इत्याहु,र्यदग्निष्टोमꣳ पूर्व.मह.र्भव-त्युक्थ्य.मन्त.र्यन्ति, यद्युक्थ्यो-ऽग्निष्टोमम्।
- <20.11.7> यज्ज्योति.रुक्थ्यꣳ पूर्व.मह.र्भवति- नाग्निष्टोम.मन्तर्यन्ति- नोक्थानि।
- <20.11.8> तदाहु-रेषा वाव यज्ञस्य मात्रा- यदग्निष्टोमो, यदग्निष्टोमꣳ पूर्व.मह.र्भवति- यज्ञस्य मात्रा.न्नातिक्राम,त्यथोत्तरस्याह्न उक्थेभ्योऽधि रात्रि.मुपयन्ति तेनोक्था. न्यनन्तरितानि।
- <20.11.9> चतुर्विंशं बहिष्पवमानं भव.त्युत्तरस्याह्न,श्चतुर्विंशत्यक्षरा गायत्री प्रजननं- गायत्री प्रजात्यै।
- <20.11.10> उभये स्तोमा युग्मन्त.श्चायुजश्च- तन्मिथुन-न्तस्मा.न्मिथुना.त्प्रजायते।
- <20.11.11> सर्वस्तोमोऽतिरात्रो भवति- सर्वस्या ऽऽप्त्यै- सर्वस्य जित्यै- सर्व.मेवैतेना ऽऽप्नोति- सर्व.ञ्जयति।
- <20.12.1> ❉ 20.12 अथ यस्य ज्योति.रुक्थ्यꣳ पूर्व.मह.र्भव-त्यायु.रतिरात्र उत्तरम्।
- <20.12.2> तिस्रꣳ पूर्वस्याह्नो विराज.मतिरिच्यन्ते- द्वाभ्या.मुत्तर.मह.र्विराज ऊन,मूनातिरिक्तँ वा अनु प्रजाꣳ प्र जायन्ते।
- <20.12.3> प्र प्रजया प्र पशुभि.र्जायते- य एवँ वेद।
- <20.12.4> एका संस्तुतानाँ विराज.मतिरिच्यत,-एकाकिन.मेवैन.मन्नाद्य.स्याध्यक्ष. ङ्करोति।
- <20.12.5> एतेन वै चित्ररथं कापेया अयाजयं,स्तमेकाकिन.मन्नाद्य.स्याध्यक्ष मकुर्वं,स्तस्मा.च्चैत्ररथीना.मेकः~ क्षत्रपति.र्जायते- ऽनुलम्ब इव द्वितीयः।
- <20.13.1> ❉ 20.13 अथ यस्य त्रिवृ.त्पञ्चदशोऽग्निष्टोमꣳ पूर्व.मह.र्भव-त्यायु.रतिरात्र उत्तरम्।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

- <20.13.2> मिथुनाभ्यां स्तोमाभ्या.मुत्तर.महः४ प्र जनयन्ति, तत्प्रजातं श्व आरभन्ते- चक्रे वा एते साकँवृती- यत्त्रिवृ.त्पञ्चदशौ स्तोमौ, य.ङ्काम.ङ्कामयते- तमेते.नाभ्यश्नुते, यत्र यत्र हि चक्रीवता कामयते- तत्त.दभ्यश्नुते।
- <20.13.3> अथ यदायु.रतिरात्रो भवति- प्रतिष्ठित्यै।
- <20.13.4> एतेन वै कपिवनो भौवायन इष्ट्वाऽरूक्षता.मगच्छत्।
- <20.13.5> अरूक्षो भवति- य एवँ विद्वा.नेतेन यजते।
- <20.14.1>❈ 20.14 त्रिवृ.त्प्रातस्सवनं- पञ्चदशं माध्यन्दिनं सवनं- सप्तदश.न्तृतीयसवनं- पञ्चदशं प्रातस्सवनं- सप्तदशं माध्यन्दिनं सवन-मेकविंश.न्तृतीयसवनं सोक्थ-मेकविंशं प्रातस्सवन- न्त्रिणवं माध्यन्दिनं सवन-न्त्रयस्त्रिंश आर्भव-श्चतुस्त्रिंशोऽग्निष्टोम-एकविंशा.न्युक्थानि सषोडशिकानि- षोडशं प्रथमं रात्रिषाम- पञ्चदशी रात्रि-स्त्रिवृ.त्सन्धिः।
- <20.14.2> प्रजापतिर्वा इद.मेक आसी-त्तस्य वागेव स्व.मासी-द्वा.ग्द्वितीया, स ऐक्षतेमा.मेव वाचँ विसृजा- इयँ वा इदं सर्वँ विभव.न्त्येष्यतीति, स वाचँ व्यसृजत, सेदं सर्वँ विभव.न्त्यै-त्सोर्ध्वो.दातनो-द्यथाऽपा.न्धारा सन्त-तैव.न्तस्या एति, तृतीय.मच्छिन-त्तद्भूमि.रभव-दभू.दिव वा इद.मिति- तद्भूमे.र्भूमित्व,ङ्केति तृतीय.मच्छिन-त्तदन्तरिक्ष. मभव-दन्तरेव वा इद.मिति- तदन्तरिक्ष.स्यान्तरिक्षत्वं, हो इति तृतीय.मूर्ध्व.मुदास्य-त्तद्यौ.रभव-दद्युत.दिव वा इति- तद्दिवो दिवत्वम्।
- <20.14.3> एषा वाव प्रत्यक्षँ वा-ग्यज्जिह्वाऽग्रेणैत.द्वाचो वदति यदेति, मध्ये.नैतद्वाचो वदति यत्केति, सर्वयैत.द्वाचो रसोऽध्यूर्ध्व उ.द्वदति- यद्धो इति।
- <20.14.4> यदेतानि रूपा.ण्यन्वहँ व्यज्यन्ते- मुखत एव तद्वाचँ विसृजन्ते- मुखतो यज्ञिय.ङ्कर्म।
- <20.14.5> प्रजापतिर्वा इद.मेकाक्षराँ वाचं सती.न्त्रेधा व्यकरो,त्त इमे लोका अभव-न्रूक्षा अनुपजीवना,स्स ऐक्षत-कथ.मिमे लोका लोम गृह्णीयु४- कथ.मुपजीवनीया.स्स्यु- रिति, स एत.न्त्रिरात्र.मपश्य-त्तमाऽहर-त्तेनेमा.न्लोका.नन्वातनो- त्ततो वा इमे लोका लोमागृह्ण-स्तत उपजीवनीया अभवं,स्त्रिरात्रस्य वा इदं पुष्ट- न्त्रिरात्रस्योदरणँ-यदिद.मेषु लोके.ष्वधि।
- <20.14.6> गच्छति पशूनां भूमान.न्द्विपदा.श्चतुष्पदाँ- य एवँ वेद।

- <20.14.7> प्रजापति.र्यद्वाचँ व्यसृजत- साऽक्षर-देति प्रथम-ङ्केति द्वितीयं- रेति तृतीयँ, येन येन वै रूपेण प्रजापति.र्वाचँ व्यसृजत- तेन तेन रूपेणाऽऽज्यानि चाऽऽरभ्यन्ते-ऽहानि चाऽऽप्यन्ते। (अक्षरत्- एति अ-इति) (साऽक्षर.देवेति पाठः चिन्त्यः)
- <20.14.8> तदाहु-र्ब्रह्मवादिनो-ऽक्षरेस्थो वै त्रिरात्र इ,त्येकाक्षरा वै वाक्-त्र्यक्षर.मक्षर-न्त्र्यक्षरः पुरुष- स्स वा एनँ वेदेत्याहु-र्य एनं पुरुष.सम्मितँ वेदेति।
- <20.15.1> ❃ 20.15 एतेन वै देवा एषु लोके.ष्वार्ध्नुव-न्नेतेन स्वर्गँ लोक.मायन्।
- <20.15.2> वाग्वै त्रिरात्रो- वाचो रूपेणाऽऽज्यानि चाहानि च विभज्यन्त,-एकाक्षरा वै वाक्-त्र्यक्षर.मक्षर-मक्षरस्य रूपेण विभज्यन्ते, त्रयो गन्धर्वा-स्तेषा.मेषा भक्ति-रग्निः पृथिवी-वायो.रन्तरिक्ष-मसा.वादित्यस्य द्यौ-स्त्रयो घर्मास उषसं सचन्ते।
- <20.15.3> अग्नि.रुषसं सचते- वायु.रुषसं सचते-ऽसा.वादित्य उषसं सचते।
- <20.15.4> त्रीणि मिथुनानि- तान्येषः।
- <20.15.5> मिथुन.न्द्वे सम्भवतो, मिथुना.द्यत्प्रजायते- तत्तृतीयम्।
- <20.15.6> इन्द्रो वृत्राय वज्र.मुदयच्छ-त्सोऽब्रवी-न्मा मे प्रहार्षी-रस्ति वा इदं मयि वीर्य- न्तत्ते प्रदास्यामीति, तदस्मै प्रायच्छ-त्तद्विष्णुः प्रत्यगृह्णा,त्स द्वितीयं- स तृतीय.मुदयच्छ-त्स एवाब्रवी-न्मा मे प्रहार्षी-रस्ति वा इदं मयि वीर्य-न्तत्ते प्रदास्यामीति- तदस्मै प्रायच्छ-त्तद्विष्णुः प्रत्यगृह्णा-देत.द्वाव त.दभ्यनूच्यते।
- <20.15.7> उभौ जिग्यथु.र्न पराजयेथे- न पराजिग्ये कतरश्च नैनोः। इन्द्रश्च विष्णो य.दपस्पृधेथा- न्त्रेधा सहस्रँ वित.दैरयेथा-मिति।
- <20.15.8> एतद्वा आभ्या.न्तत्सहस्रं प्रायच्छत्।
- <20.15.9> तस्यैषा भक्ति-र्य आर्षेयो विद्वां-स्तस्मै प्रथमेऽहनि देयँ, यथा वा इय-मेवं स, प्रतिष्ठि.तेयं- प्रतिष्ठित.स्सः।
- <20.15.10> योऽनार्षेयो विद्वां-स्तस्मै द्वितीयेऽहनि देयँ, यथा वा अन्तरिक्ष-मेवं सो,ऽन्तरिक्ष.मि-त्यन्तरिक्षँ विदु- र्वेद.न्तस्य विदुः।
- <20.15.11> य आर्षेयो विद्वां.स्तस्मै तृतीयेऽहनि देयँ, यथा वै द्यौ-रेवं स, द्यौरिति दिवँ विदु-र्बन्धु तस्य विदुः।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

- <20.15.12> शता.न्यन्वह.न्दीयन्त- एषा वाव यज्ञस्य मात्रा- यच्छतं, सैव साऽविच्छिन्ना दीयते, दशतोऽन्वह.न्दीयन्ते- दशाक्षरा विरा-ड्वैराजो यज्ञ- स्सैव सा ऽविच्छिन्ना दीयते।
- <20.15.13> त्रयस्त्रिंशच्च त्रीणि च शतानि प्रथमेऽहनि देया-स्तथा द्वितीये-तथा तृतीये।
- <20.15.14> अथैषा द्विदेवत्या त्रिरूपा, ब्रह्मणो द्वे- तृतीये तृतीय.मग्नीधः।
- <20.15.15> काम्याऽसि प्रियाऽसि हव्याऽसीडे रन्ते सरस्वति महि विश्रुत- एतानि तेऽघ्न्ये नामानि- देवेषु न स्सुकृतो ब्रूतात्।
- <20.16.1>❃ 20.16 इदँ वाव प्रथमेनाह्ना व्यकरो-द्यदिद.मस्या. मध्यायत्त.मूल, मिद न्द्वितीयेन- यदिदं प्राणा.देज,त्यद.स्तृतीयेन- यद्वर्षति यन्नक्षत्राणि यदमुँ लोकं भेजे।
- <20.16.2> तदाहु.र्ब्रह्मवादिनो- महाव्रतँ वा एत-द्यदेष त्रिरात्र इति, तस्यै तदेव मुखँ- यदेतेषा.मह्नां बहिष्पवमानँ, ये अभितोऽहनी- तौ पक्षौ, यन्मध्यम.मह- स्स आत्मा,ऽग्निष्टोम.सामानि- पुच्छम्।
- <20.16.3> यदेवासा.वुदेति- तन्मुखँ, ये अभितोऽहनी- तौ पक्षौ, यन्मध्यम.मह- स्स आत्मा,ऽग्निः पुच्छम्।
- <20.16.4> यदेवासा.वुदेति- तन्मुखँ, ये अभितोऽहनी- तौ पक्षौ, यन्मध्यम.मह- स्स आत्मा, यदस्त.मेति- तत्पुच्छम्।
- <20.16.5> एतावान् वाव त्रिरात्रो, गायत्रः प्राण- स्त्रैष्टुभ.श्चक्षु- र्जागतं श्रोत्रं, सर्व.मायु.रेति- य एवँ वेद।
- <20.16.6> तदाहु.र्ब्रह्मवादिनः,कियां.स्त्रिरात्र इ-तीयानिति ब्रूया,दियद्येत.दभ्यथो इयानिति ब्रूया,दियद्ध्येवैत-दभि परा3 ङर्वा3 ङित्याहुः, पराङिति ब्रूया-त्पराङ्हि वदति- परा.ङ्पश्यति- परा.ङ्प्राणि,त्येका3 द्वा3 उ त्रया3 इत्याहु-रेक इति ब्रूया,त्समानो ह्येष- यत्प्राणोऽपानो व्यान,स्तद्यथा वा अदो मणौ सूत्र.मोत-मेव.मेषु लोकेषु त्रिरात्र ओत, श्शोभतेऽस्य मुखँ- य एवँ वेद।

• <20.16.7> यद्वै त्रिरात्रस्य सलोम- तदस्य विलोम, यदस्य विलोम- तदस्य सलोम, तद्य.देत.त्परं सदह.रवर.ङ्क्रियते- यजमानायैव तत्पशू.न्परि गृह्णाति प्रजननाय, न ह्यमुष्मि.न्लोके पशवः प्र जायन्ते।

• <20.16.8> एते वाव च्छन्दसाँ वीर्यवत्तमे- यद्गायत्री च त्रिष्टुप्च, यदेते अभितो भवतो- मध्ये जगती- वीर्यवतीभ्या.मेव तच्छन्दोभ्यां पशू.न्परि गृह्णाति प्रजननाय, न ह्यमुष्मि.न्लोके पशवः प्र जायन्ते।

• <20.16.9> असौ वाव त्रिरात्रो, यथोदे-त्येवं प्रथम.मह, र्यथा मध्यन्दिन- एव.न्द्वितीयँ, यथाऽस्त.मे-त्येव.न्तृतीय,ङ्गच्छ.त्यमुष्य सायुज्य-ङ्गच्छति सावेश्यँ- य एवँ वेद।

## ताण्ड्यब्राह्मणे एकविंशोऽध्यायः

• <21.1.1> ❀ 21.1 इन्द्रो मरुत स्सहस्र.मजिना-त्स्वाँ विशं सोमाय राज्ञे प्रोच्य, तस्मा.द्राज्ञे प्रोच्य- विश.ञ्जिनन्ति, तौ यमोऽश्रृणो-न्मरुतो ह सहस्र.मज्याशिष्टा.मिति, स आऽगच्छ-त्सोऽब्रवी-दुप माऽस्मि.न्त्सहस्रे ह्वयेथा.मिति- तमुपाह्वयेतां, स यमोऽपश्य,-देका.ङ्गां सहस्रेऽपि सहस्रस्य पयो बिभ्रतीं, सोऽब्रवी-दिय.मेव ममास्तु- सहस्रँ युवाँ विकल्पयेथा.मिति, तावब्रूताँ- यथा वाव त्व.मेतां पश्य-स्येव.माव.मेतां पश्याव इति। (अज्याशिष्टाम् - अलभेताम्)

• <21.1.2> तया वा इदं सहस्रँ विकल्पयामहा इत्यब्रुवं,स्ता.मुदके प्रावेशयं-स्तेऽब्रुव.न्नंशा.नाहरामहै- यस्मै न इयं प्रथमायोदेष्यतीति, तेंऽशा.नाऽहरन्त -सोमस्य प्रथम ऐ-दथेन्द्र.स्याथ यमस्य।

• <21.1.3> तेऽब्रुव.न्त्सोमाय राज्ञ उदेहि- तृतीयेन चाऽऽत्मन-स्तृतीयेन च सहस्रस्य पयस इति, सा बभ्रुः पिङ्गा.क्ष्येकवर्षोदै-त्तृतीयेन चाऽऽत्मन.स्तृतीयेन च- सहस्रस्य पयस,-स्सा या सोमक्रयणी- सैव सा।

• <21.1.4> तृतीयेन चास्य तस्या आत्मन.स्तृतीयेन च- सहस्रस्य पयस स्सोमः क्रीतो भवति, य एवँ विद्वा.न्त्सोम.ङ्क्रीणाति- यस्मा एवँ.विदुषे सोम.ङ्क्रीणन्ति।

• <21.1.5> तेऽब्रुव-न्निन्द्रायोदेहि तृतीयेन चाऽऽत्मन.स्तृतीयेन च- सहस्रस्य पयस इति, सा शबली पष्ठौ.ह्युदै-त्तृतीयेन चाऽऽत्मन.स्तृतीयेन च सहस्रस्य पयस,स्सा येन्द्रियैष्या- सैव सा। (इन्द्रियैष्या - इन्द्रियैः एष्या)

- <21.1.6> तृतीयेन चास्य तस्या आत्मन.स्तृतीयेन च- सहस्रस्य पयस, इन्द्रियैष्या दत्ता भवति- य एवँ विद्वा.निन्द्रियैष्या.न्ददाति- यस्मा एवँ.विदुष इन्द्रियैष्या.न्ददाति।
- <21.1.7> तेऽब्रुवन् यमायोदेहि- तृतीयेन चाऽऽत्मन.स्तृतीयेन च- सहस्रस्य पयस इति, सा जरती कुष्ठाऽश्श्रुदे.द्भूम्रा वा दित्यौ.हीर्म्मतो ह्सीयसी- तृतीयेन चाऽऽत्मन.स्तृतीयेन च- सहस्रस्य पयस,स्सा याऽनुस्तरणी- सैव सा। (दित्यौही, ईर्मतः - जघनप्रदेशतः)
- <21.1.8> तृतीयेन चास्य- तस्या आत्मन.स्तृतीयेन च- सहस्रस्य पयसो,ऽनुस्तरणी कृता भवति- य एवँ विद्वा.ननुस्तरणी.ङ्करोति- यस्मा एवँ विदुषेऽनुस्तरणी.ङ्कुर्वन्ति- नाऽचकृवा.न्मन्यते।
- <21.1.9> तदाहु.र्ब्रह्मवादिनो- न वा अमुष्मि.न्लोके सहस्रया.डलोकोऽस्तीति, त.द्याव.दित स्सहस्रस्य गौ-र्गवि प्रतिष्ठिता- ताव.दस्मा.ल्लोका.दसौ लोक,स्सहस्रयाजी वा इमा.न्लोका.न्व्याप्नो,त्यथो यावत्सहस्रँ योजना-न्यथो सहस्र.माश्वीना-न्यथो याव.त्सहस्र.मह्न्यानि- तद्गवा, गवा स्पृणोति, समाक्रमणाय वा एता दीयन्ते।
- <21.1.10> सहस्रँ य.दसृजत- तस्य ताप्यँ योनि.रासी,द्यत्ताप्यँ प्रत्यस्य नयति- सयोनित्वाय।
- <21.2.1> ❃ 21.2 प्रजापति॰ प्रजा असृजत- ता अस्मा.त्सृष्टा॰ पराच्य आय-न्नत्स्यति न इति बिभ्यत्य,स्सोऽब्रवी.दुप माऽऽवर्तध्व-न्तथा वै वोऽत्स्यामि- यथाऽद्यमाना भूयस्य॰ प्रजनिष्यथेति, ताभ्यो वै न ऋतं ब्रूही.त्यब्रुवं,स्ताभ्य ऋतनिधनेनर्त.मब्रवी-दीनिधनेनाऽवय-न्नि.णिधनेन प्राजनय,देतैर्ह वा इदं सामभि.र्मृत्यु॰ प्रजा अत्ति च- प्रजनयति। (प्रजनिष्यथ इति द्विवचनाभासकः असंहितपाठः दृश्यते)
- <21.2.2> अद्यमानस्य भूयो भवति- य एवँ वेद।
- <21.2.3> ज्येष्ठ.सामानि वा एतानि- श्रेष्ठसामानि- प्रजापति.सामानि।
- <21.2.4> गच्छति ज्यैष्ठ्यं श्रैष्ठ्यँ- य एवँ वेद।
- <21.2.5> एतैर्वै सामभि॰ प्रजापति.रिमा.न्लोका.न्त्सर्वा.न्कामा.न्दुग्धे, यदाच्या दुग्धे- तदाज्य दोहाना.माज्यदोहत्वम्। (आच्या - अत्र छान्दसो दीर्घः, आच्य जानुनी लौकिकदोहने यथा- प्रजापतिरधोक्, ततः आच्य दोहा अभवन्, तेषामेव आज्यदोह इति संज्ञा)

- <21.2.6> सर्वा.निमा.न्लोका.न्कामा.न्दुग्धे- य एवँ विद्वा.नेतै.स्सामभि.स्स्तुते।
- <21.2.7> इमे वै लोका एतानि सामा,न्यय.मेवर्तनिधन-मन्तरिक्ष.मीनिधन-न्द्यौ.स्त्रि.णिधनम्।
- <21.2.8> यथा क्षेत्रज्ञः~ क्षेत्रा.ण्यनु सञ्चर-त्येव.मिमा.न्लोका.ननु सञ्चरति- य एवँ वेद।
- <21.2.9> अग्नेर्वा एतानि वैश्वानरस्य सामानि, यत्र वा एतै.रशान्तै स्स्तुवन्ति- तत्प्रजा देवो घातुको भव,त्यग्नि.मुपनिधाय स्तुवते- स्वाया एव तद्देवताया स्साम्येक्षाय, नमस्कृत्योद्गायति, शान्तै.स्स्तुवन्ति।
- <21.3.1> ❁ 21.3 वाग्वै शबली- तस्या.स्त्रिरात्रो वत्स,स्त्रिरात्रो वा एतां प्रदापयति।
- <21.3.2> तद्य एवँ वेद- तस्मा एषा प्रत्ता दुग्धे।
- <21.3.3> योऽल.मन्नाद्याय स-न्नथान्न.न्नाद्यात्।
- <21.3.4> बरासीं परिधाय- तप्तं पिब-न्द्वादश रात्री.रध.श्शयीत।(बरासी-अहतँ वासः)
- <21.3.5> या द्वादशी स्या-त्तस्या उपव्युषं शबलीहोमं हुत्वा, पुरा वाग्भ्य स्सम्प्रवदितो-र्यत्र ग्राम्यस्य पशो.र्नाऽऽश्रृणुया-त्तदरण्यं परेत्य- दर्भस्तम्ब.मालभ्य- शबलि शबलीति त्रिराह्वये.-द्यदन्य.च्छुनश्च गर्दभाच्च प्रति वाश्यते- सा समृद्धा।
- <21.3.6> यदि न प्रतिवाश्येत- सँवत्सरे पुन.राह्वयेत्।
- <21.3.7> शबलि समुद्रोऽसि विश्वव्यचा- ब्रह्म देवानां प्रथमजा ऋतस्यान्न.मसि-शुक्र.मसि- तेजोऽस्यमृत.मसि- तान्त्वा विद्म शबलि दीद्याना- न्तस्यास्ते पृथिवी पादो-ऽन्तरिक्षं पादो- द्यौ॰ पाद- स्समुद्र॰ पाद- एषाऽसि शबलि, तान्त्वा विद्म- सा न इष.मूर्ज.न्धुक्ष्व वसोर्धारां-शबलि प्रजानां शचिष्ठा- व्रत.मनु गेषं स्वाहा। (पूर्णाहुति समये छन्दोगैः पठ्यमाने मन्त्रः)
- <21.4.1>❁ 21.4 चतुष्टोमोऽग्निष्टोम- एकविंश उक्थ्य- स्सर्वस्तोमोऽतिरात्रः।
- <21.4.2> प्रजापतेर्वा अक्ष्यश्वय-त्तत्पराऽपत-त्तदश्वोऽभव-त्तदश्वस्याश्वत्व, न्तद्देवा अश्वमेधेन प्रत्यदधु-रेष वाव प्रजापतिं सर्व.ङ्करोति- योऽश्वमेधेन यजते। (अक्षि, अश्वयत्)
- <21.4.3> एष वाव सशरीर स्सम्भव.त्यमुष्मै लोकाय- योऽश्वमेधी।
- <21.4.4> सरघा वा अश्वस्य सक्थ्याऽवृह,त्तद्देवा.श्चतुष्टोमेन प्रत्यदधु,र्यच्चतुष्टोमो भव-त्यश्वस्य सर्वत्वाय।

- <21.4.5> यत्तिस्रोऽनुष्टुभ.श्चतस्रो गायत्री॰ करोति- तस्मा.त्त्रिभि.स्तिष्ठ.न्प्रति तिष्ठति, सर्वा.न्पलायमान॰ प्रति दधाति।
- <21.4.6> अन्तो वा अश्व॰ पशूना-मन्तोऽनुष्टु.प्छन्दसा-मन्तो विष्णु.र्देवताना-मन्त.श्चतुष्टोम.स्स्तोमाना-मन्त.स्त्रिरात्रो यज्ञानाँ, यद्वैष्णव्योऽनुष्टुभ॰ प्रतिपदो भवन्ति- चतुष्टोम स्तोम-स्त्रिरात्रो यज्ञो,ऽन्त एव तदन्तं प्रतिष्ठापयति।
- <21.4.7> एकविंश.मह.र्भवति, यस्मि.न्नश्व आलभ्यत,- एकविंशो वा इतोऽसा.वादित्यो, द्वादश मासा॰ पञ्चर्तव-स्त्रय इमे लोका- असा.वादित्य एकविंश- आदित्यस्यैवैनं मात्रा.ङ्गमयति।
- <21.4.8> तस्य महानाम्न्य॰ पृष्ठं भवन्ति।
- <21.4.9> अन्य.दन्यद्वा एता.श्छन्दो-ऽन्योन्य एते पशव आलभ्यन्त,एता वा एतं समाप्नुवन्ति, यन्महानाम्न्य॰ पृष्ठं भव-न्त्यश्वस्य सर्वत्वाय।
- <21.4.10> पार्थुरश्मं ब्रह्मसाम भवति।
- <21.4.11> ईश्वरो वा एषोऽयतोऽधृत॰ परां परावत.मेतो,रश्मिना वा अश्वो धृतो-यत्पार्थुरश्मं ब्रह्मसाम भव-त्यश्वस्यैव यत्यै।
- <21.4.12> सर्वस्तोमोऽतिरात्रो भवति- सर्वस्याऽऽप्त्यै- सर्वस्य जित्यै- सर्व.मेवैतेनाऽऽप्नोति- सर्व.ञ्जयति।
- <21.4.13> एकयूपो वैकादशिनी वा-ऽन्येषाँ यज्ञानां भव-त्येकविंशि.न्यश्वमेधस्य, खादिरो वा बैल्वो वा पार्णो वाऽन्येषाँ यज्ञानां भवति- नैचुदार एकविंशत्यरत्नि.रश्वमेधस्य, नान्येषां पशूना.न्तेजन्या अवद्य-न्त्यवद्य.न्त्यश्वमेधस्य, दक्षिणतोऽन्येषां पशूना.मव द्यन्त्युत्तरतोऽश्वमेधस्य, प्लक्षशाखा.स्वन्येषां पशूना मव.द्यन्ति- वेतसशाखा.स्वश्वमेधस्य, यूपे ग्राम्या.न्पशू.न्नियुञ्ज-न्त्यारोके.ष्वारण्या.न्धारय,न्त्या ग्राम्या.न्पशू.न्लभन्ते- प्राऽऽरण्या.न्त्सृजन्ति।
- <21.5.1>❃ 21.5 त्रय.स्त्रिवृतोऽतिरात्रा- स्सर्वे षोडशिमन्तः।
- <21.5.2> यो राज्य आशंसेत- स एतेन यजेत।
- <21.5.3> राजा वा एष स्तोमानां- राज्य.मेवास्मि.न्दधाति।
- <21.5.4> यदाक्षाराणि प्रथम.मह.र्भजन्त- एकाक्षरा वै वा-ग्वाचोऽनतिवादाय।

- <21.5.5> अथ यद्व्यक्षर.णिधन.माज्यदोहं भव-त्युत्तरयो.रह्नो.रभिसन्तत्या, अन्वह. माज्यदोहानि भव-न्त्यन्वह.मेवैनं पशुभि स्समर्धयन्ति।
- <21.5.6> सर्वे षोडशिमन्तो भव,न्तीन्द्रियँ वीर्यं षोड.शीन्द्रियेणैवैनान् वीर्येण समर्धयति।
- <21.6.1>❃ 21.6 चतुर्विंशाꣳ पवमाना-स्त्रिवृ.न्त्याज्यानि- पञ्चदशानि पृष्ठानि- सप्तदशोऽग्निष्टोम,श्चतुश्चत्वारिंशाꣳ पवमानाꣳ- पञ्चदशा.न्याज्यानि- सप्तदशानि पृष्ठा-न्येकविंशोऽग्निष्टोम स्सोक्थो,ऽष्टाचत्वारिंशाꣳ पवमाना- एकविंशा.न्याज्यानि- त्रिणवानि पृष्ठानि-त्रयस्त्रिंशोऽग्निष्टोम- एकविंशा.न्युक्थानि सषोडशिकानि- पञ्चदशी रात्रि-स्त्रिवृत्सन्धि-श्छन्दोम.पवमानः।
- <21.6.2> पशुकामो यजेत।
- <21.6.3> पशवो वै छन्दोमा, यच्छन्दोमाꣳ पवमाना भवन्ति- पशू.नेवाव रुन्धे।
- <21.6.4> उभये स्तोमा युग्मन्त.श्चायुजश्च- तन्मिथुन,न्तस्मा.न्मिथुना.त्प्र जायते।
- <21.7.1>❃ 21.7 त्रिवृ.त्प्रातस्सवनं- पञ्चदशं माध्यन्दिनं सवनं-सप्तदश.न्तृतीयसवन,श्चतुर्विंशं प्रातस्सवन- श्चतुश्चत्वारिंशं माध्यन्दिनं सवन-मष्टाचत्वारिंश.न्तृतीयसवनं सोक्थ,मेकविंशं प्रातस्सवन-न्त्रिणवं माध्यन्दिनं सवन-न्त्रयस्त्रिंश.न्तृतीयसवनं सोक्थ,मेकविंश.ष्षोडशी- पञ्चदशी रात्रि-स्त्रिवृ.त्सन्धि-रन्त.र्वसुः।
- <21.7.2> इमे लोका.स्त्रिरात्रः।
- <21.7.3> अस्तीव वा अयँ लोको-ऽस्तीवासौ छिद्र.मिवान्तरिक्षम्।
- <21.7.4> अस्तीव त्रिरात्रस्य प्रथम.मह-रस्तीवोत्तम.ञ्छिद्रमिव मध्यतः।
- <21.7.5> पशवो वै छन्दोमा, यच्छन्दोमा मध्यतो भव-न्त्यपिहित्या एवाच्छिद्रतायै।
- <21.8.1> ❃ 21.8 त्रिवृ.त्प्रातस्सवनं- पञ्चदशं माध्यन्दिनं सवनं-सप्तदश.न्तृतीयसवन,मेकविंशं प्रातस्सवन- न्त्रिणवं माध्यन्दिनं सवन- न्त्रयस्त्रिंश न्तृतीयसवनं सोक्थ-श्चतुर्विंशं प्रातस्सवन-श्चतुश्चत्वारिंशं माध्यन्दिनं सवन-मष्टाचत्वारिंश. न्तृतीयसवनं सोक्थ,मेकविंश ष्षोडशी- पञ्चदशी रात्रि-स्त्रिवृ.त्सन्धिꣳ- पराकः।

- <21.8.2> पराकेण वै देवा स्स्वर्गँ लोक.माय,न्त्स्वर्गकामो यजेत- परा.ङ्वैतेन स्वर्गँ लोक माक्रमते।
- <21.8.3> यद्वा एतस्याक- न्तदस्य पराक्-तत्पराकस्य पराकत्वम्।
- <21.8.4> न वै तत्र जग्मुषे किञ्चनाऽकम्।
- <21.8.5> नास्मा अकं भवति- य एवँ वेद।
- <21.8.6> प्रजाया.स्त्वक्लृप्तꣳ पराङ्ह्येवैतेन स्वर्गँ लोक.माक्रमते, तद्य.देकविंश ष्षोडशी भवति- पञ्चदशी रात्रि-स्त्रिवृ.त्सन्धि-स्तेनास्मि.न्लोके प्रति तिष्ठति।
- <21.9.1> ❁ 21.9 चतुर्विंशाꣳ पवमाना-स्त्रिवृ.न्त्याज्यानि- पञ्चदशानि पृष्ठानि- सप्तदशोऽग्निष्टोम,श्चतुर्विंशाꣳ पवमानाꣳ- पञ्चदशा.न्याज्यानि- सप्तदशानि पृष्ठा-न्येकविंशोऽग्निष्टोम स्सोक्थ,श्चतुर्विंशाꣳ पवमाना- स्सप्तदशा.न्याज्या-न्येकविंशानि पृष्ठानि- त्रिणवोऽग्निष्टोम स्सोक्थ,श्चतुर्विंशाꣳ पवमाना- एकविंशा.न्याज्यानि- त्रिणवानि पृष्ठानि- त्रयस्त्रिंशोऽग्निष्टोम, एकविंशा.न्युक्थानि सषोडशिकानि- पञ्चदशी रात्रि-स्त्रिवृ.त्सन्धिः।
- <21.9.2> अत्रि.रकामयत- चत्वारो मे वीरा आजायेर.न्निति, स एत.मपश्य-त्तस्य चत्वारो वीरा आऽजाय,न्ताऽऽऽस्य चत्वारो वीरा जायन्ते- य एवँ वेद।
- <21.9.3> एकं स्तोम.मुत्सृज्यैक.मभ्यारभते, वीरजननँ वै स्तोमो- वीर.मेवास्मै तत्प्रजनयति।
- <21.9.4> चतुर्विंशाꣳ पवमाना भवन्ति, चतुर्विंश.त्यक्षरा गायत्री- प्रजनन.ङ्गायत्री- प्रजात्यै।
- <21.9.5> उभये स्तोमा युग्मन्त.श्चायुजश्च- तन्मिथुन,न्तस्मा.न्मिथुनात्प्र जायते।
- <21.9.6> अग्निष्टोमꣳ प्रथम.मह-रुक्थो द्वितीयं- षोडशी तृतीय-मतिरात्र.श्चतुर्थ-न्नानावीर्यतायै।
- <21.9.7> नानावीर्या.ण्यहानि करोति।
- <21.9.8> गायत्रँ वै प्रथम.मह-स्त्रैष्टुभ.न्द्वितीय-ञ्जागत.न्तृतीय-मानुष्टुभ.ञ्चतुर्थम्।
- <21.9.9> तदाहु-र्यत्तृतीयेऽहनि षोडशिन.ङ्गृह्णीयु-स्तृतीयेनाह्नाऽनुष्टुभ माप्नुयु-रच्छन्द.श्चतुर्थ.मह स्स्या-दानुष्टुभो वै षोडशीति।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

- <21.9.10> चतुर्थेऽहनि षोडशी ग्रहीतव्य- स्स्व आयतने षोडशी गृह्यते।
- <21.9.11> छन्दोभि.रहानि नानावीर्याणि करोति।
- <21.9.12> नौधसं प्रथमस्याह्नो ब्रह्मसाम- श्यैत.न्द्वितीयस्य- श्रायन्तीय.न्तृतीयस्य- त्रैशोक.श्चतुर्थस्य।
- <21.9.13> तदाहु-रपभ्रंश इव वा एष- यज्ज्यायस श्छन्दसोऽधि कनीय.श्छन्द उपैतीति।
- <21.9.14> तद्य.देषा चतुर्थेऽह-न्यतिजगती क्रियतेऽनपभ्रंशाय।
- <21.9.15> कालेयं प्रथमस्याह्नोऽच्छावाकसाम- माधुच्छन्दस न्द्वितीयस्य- रौरव न्तृतीयस्य- समन्त.श्चतुर्थस्य- नानावीर्यतायै, नानावीर्या.ण्यहानि करोति।
- <21.9.16> अभि त्वा वृषभा सुत-इति तृतीयस्याह्नो रथन्तर,ङ्कस्त.मिन्द्र त्वा वसव-इति वामदेव्यँ, यज्ञा यथा अपूर्वेति चतुर्थस्याह्नो बृह-देदु मधो.र्मदिन्तर-मिति वामदेव्य,ञ्छन्दसा न्नानावीर्यतायै, नानावीर्या.ण्यहानि करोति।
- <21.10.1> ❁ 21.10 त्रिवृ.त्पञ्चदशोऽग्निष्टोमः प्रथम.महः।
- <21.10.2> अथोत्तरस्याह्नो-श्चतुर्विंशं बहिष्पवमानं- पञ्चदशानि त्रीण्याज्यानि- सप्तदश.मच्छावाक-स्यैकविंशो माध्यन्दिनः पवमान- स्सप्तदशे द्वे पृष्ठे- एकविंशे द्वे- एकविंश.न्तृतीयसवनं सोक्थम्।
- <21.10.3> तृतीयस्याह्न एकविंशं बहिष्पवमान- न्त्रीणि चाऽऽज्यानि- पञ्चदश.मच्छावाकस्य- चतुर्विंशो माध्यन्दिनः पवमान- एकविंशानि पृष्ठानि- त्रिणव न्तृतीयसवन-न्द्वे चोक्थे- एकविंश.मच्छावाकस्य।
- <21.10.4> चतुर्थस्याह्न,श्चतुर्विंशाः पवमानाः- पञ्चदशं होतु.राज्यं- सप्तदशानि त्री-ण्येकविंशानि पृष्ठानि- त्रयस्त्रिंशोऽग्निष्टोम- एकविंशा.न्युक्थानि सषोडशिकानि- पञ्चदशी रात्रि-स्त्रिवृ.त्सन्धिः।
- <21.10.5> जमदग्निः पुष्टिकाम एत.माऽहर-त्स इमा.न्पोषा.नपुष्यत्।
- <21.10.6> यदिद.माहु-र्न वा औवौं पलितौ सञ्जानाते इति।
- <21.10.7> तत्सर्वा.न्वैतेन पोषा.न्पुष्यति।

- <21.10.8> जगती छन्दोभि स्सम्पद्यते।
- <21.10.9> जगती वै छन्दसां परमं पोषं पुष्टा- परम.मेवैतेन पोषं पुष्यति।
- <21.10.10> पुरोडाशिन्य उपसदो भवन्ति, पशवो वै पुरोडाशा॰- पशुष्वेव प्रति तिष्ठन्ति।
- <21.10.11> अग्ने- वे.र्हौत्रँ- वे.रध्वर-मा पितरँ वैश्वानर.मवसेऽक,रिन्द्राय देवेभ्यो जुहुता हवि स्स्वाहा। (वेः- विद्धि)
- <21.10.12> देवा.वश्विनौ मधुकशयाऽद्येमँ यज्ञँ यजमानाय मिमिक्षत-मिन्द्राय देवेभ्यो जुहुता हवि स्स्वाहा।
- <21.10.13> देव विष्ण उर्वद्यास्मिन् यज्ञे यजमानायाधि विक्रम-स्वेन्द्राय देवेभ्यो जुहुता हवि स्स्वाहा।
- <21.10.14> देव सोम रेतोधा अद्यास्मिन् यज्ञे यजमानायै-धीन्द्राय देवेभ्यो जुहुता हवि.स्स्वाहा।
- <21.10.15> देव सवित स्सुसावित्र.मद्यास्मिन् यज्ञे यजमानायाऽऽसुव-स्वेन्द्राय देवेभ्यो जुहुता हवि.स्स्वाहा।
- <21.10.16> देव धात स्सुधाताऽद्यास्मिन् यज्ञे यजमानायै-धीन्द्राय देवेभ्यो जुहुता हवि.स्स्वाहा।
- <21.10.17> देवा ग्रावाणो मधुमती.मद्यास्मिन् यज्ञे यजमानाय वाचँ वद-तेन्द्राय देवेभ्यो जुहुता हवि.स्स्वाहा।
- <21.10.18> देव्यनुमतेऽन्वद्येमँ यज्ञँ यजमानाय मन्य-स्वेन्द्राय देवेभ्यो जुहुता हवि.स्स्वाहा।
- <21.10.19> देव्यदिते स्वादित्य.मद्यास्मिन् यज्ञे यजमानायाऽऽसुव-स्वेन्द्राय देवेभ्यो जुहुता हवि.स्स्वाहा।
- <21.10.20> देव्य आपो नन्नम्यध्व.मद्यास्मिन् यज्ञे यजमाना-येन्द्राय देवेभ्यो जुहुता हवि.स्स्वाहा।
- <21.10.21> सद.स्सद॰ प्रजावा.नृभु.र्जुषाण- इन्द्राय देवेभ्यो जुहुता हवि.स्स्वाहा।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

- <21.10.22> देव त्वष्ट स्सुरेतोधा अद्यास्मिन् यज्ञे यजमानायै-धीन्द्राय देवेभ्यो जुहुता हवि.स्स्वाहा।
- <21.10.23> आग्नेय एककपाल- आश्विनो द्विकपालो- वैष्णव.स्त्रिकपाल- स्सौम्य.श्चतुष्कपाल- स्सावित्रꣳ पञ्चकपालो- धात्र ष्षड्कपालो- मारुत स्सप्तकपालो- बार्हस्पत्योऽष्टाकपालो- मैत्रो नवकपालो- वारुणो दशकपाल- ऐन्द्र एकादशकपालो- वैश्वदेवो द्वादशकपालः।
- <21.11.1> ❃21.11 त्रिवृत्प्रातस्सवनं- पञ्चदशं माध्यन्दिनं सवनं- सप्तदश न्तृतीयसवनं, पञ्चदशं प्रातस्सवनं- सप्तदशं माध्यन्दिनं सवन-मेकविंश.न्तृतीयसवनं सोक्थं, सप्तदशं प्रातस्सवन-मेकविंशं माध्यन्दिनं सवन- न्त्रिणव न्तृतीयसवनं सोक्थ-मेकविंशं प्रातस्सवन- न्त्रिणवं माध्यन्दिनं सवन- न्त्रयस्त्रिंश न्तृतीयसवनं- प्रत्यवरोही.ण्युक्थानि, त्रिणवं प्रथम-न्द्वे एकविंशे सषोडशिके- पञ्चदशी रात्रि-स्त्रिवृ.त्सन्धिः।
- <21.11.2> वसिष्ठꣳ पुत्रहतो- हीन इवामन्यत, स एत.मपश्य-त्सोऽग्रं पर्यै,द्यो हीन इव मन्येत- स एतेन यजेत।
- <21.11.3> यत्स्तोमा.त्स्तोम.मभि सङ्क्राम-त्यग्रा.देवाग्रं रोहति, वसिष्ठस्य जनित्रे भवतꣳ- प्रजात्यै।
- <21.11.4> प्रत्यवरोही.ण्युत्तमस्याह्न उक्थानि भवन्ति- प्रतिष्ठित्यै।
- <21.12.1> ❃21.12 त्रिवृ.दग्निष्टोमꣳ- पञ्चदश उक्थ- स्सप्तदश उक्थ- एकविंशोऽतिरात्रो- विश्वामित्रस्य सञ्जयः।
- <21.12.2> जह्नु.वृचीवन्तो राष्ट्र आऽहिंसन्त, स विश्वामित्रो जाह्नवो राजैत.मपश्य-त्स राष्ट्र.मभव-दराष्ट्र.मितरे।
- <21.12.3> भ्रातृव्यवान् यजेत।
- <21.12.4> भव.त्यात्मना- पराऽस्य भ्रातृव्यो भवति- य एवँ वेद।
- <21.12.5> ज्योति.र्वा एष विहृतः।
- <21.12.6> ज्योतिꣳ प्रजानां भवति- य एवँ वेद।
- <21.12.7> चतुष्टोमो वा एष- चतुष्पादाꣳ पशवꣳ- पशुष्वेव प्रति तिष्ठति।

* <21.12.8> एकविंशं स्तोमा नातियन्ति, प्रतिष्ठा वा एकविंशो-ऽन्तत एव यज्ञस्य प्रति तिष्ठति।

* <21.13.1> ❃ 21.13 द्वे त्रिवृती सवने- पञ्चदश.मेक,न्द्वे पञ्चदशे सवने सप्तदश.मेक,न्द्वे सप्तदशे सवने एकविंश.मेक,न्द्वे एकविंशे सवने त्रिणव.मेक,न्द्वे त्रिणवे सवने त्रयस्त्रिंश.मेकं, प्रत्यवरोही.ण्युक्थानि- त्रिणवं प्रथम- न्द्वे एकविंशे सषोडशिके- पञ्चदशी रात्रि-स्त्रिवृ.त्सन्धिः।

* <21.13.2> देवाश्च वा असुरा.श्चास्पर्धन्त- ते न व्यजयन्त, तेऽब्रुवन् वाचो मिथुनेन विजयामहै- यतरे नो वाचो मिथुन.न्न प्रतिविन्दां-स्ते परा भवानिति, ते देवा एक इत्यब्रुव-न्नेके.त्यसुरा- वाचो मिथुनं प्रत्यविन्द,न्द्वाविति देवा अब्रुव-न्द्वे इत्यसुरा- वाचो मिथुनं प्रत्यविन्दं,स्त्रय इति देवा अब्रुवं-स्तिस्त्र इत्यसुरा- वाचो मिथुनं प्रत्यविन्दं,श्चत्वार इति देवा अब्रुवं-श्चतस्त्र इत्यसुरा- वाचो मिथुनं प्रत्यविन्द,न्पञ्चेति देवा अब्रुव-न्नासुरा अविन्दं-स्ततो देवा अभव-न्पराऽसुराः।

* <21.13.3> भव.त्यात्मना- पराऽस्य भ्रातृव्यो भवति, य एवँ वेद।

* <21.13.4> सँवत्सरँ वा एषा.न्तद्वीर्य.मन्नाद्य.मवृञ्जत।

* <21.13.5> सँवत्सरँ वीर्य.मन्नाद्यं भ्रातृव्यस्य वृङ्क्ते- य एवँ वेद।

* <21.13.6> पञ्चरात्रो वा एष, पाङ्क्तः पुरुषः- पाङ्क्ताः पशव-स्तेन पुरुषञ्च पशूं.श्चाऽऽप्नोति।

* <21.13.7> अस्थुरिर्वा एष सन्ततो यज्ञो, द्वौ द्वौ हि स्तोमा.वह.र्वहतो, यङ्काम ङ्कामयते - तमेतेना.भ्यश्नुते।

* <21.13.8> यत्र यत्र ह्यस्थूरिणा कामयते- तत्त.दभ्यश्नुते।

* <21.13.9> अभ्यासङ्ग्यः पञ्चाहो भवति सन्तत्यै।

* <21.13.10> प्रत्यवरोही.ण्युत्तमस्याह्न उक्थानि भवन्ति- प्रतिष्ठित्यै।

* <21.14.1> ❃ 21.14 त्रिवृ.दग्निष्टोमः- पञ्चदश उक्थ- स्सप्तदश उक्थः- पञ्चदश उक्थ- स्सप्तदशोऽतिरात्रः- पञ्चशारदीयो मरुतां स्तोमः।

* <21.14.2> यः कामयेत बहु स्या.मिति- स एतेन यजेत।

* <21.14.3> मरुतो वै देवानां भूयिष्ठा- बहु.रेव भवति।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

- <21.14.4> सप्तदशं स्तोमा नातियन्ति, प्रजापतिर्वै सप्तदश॰- प्रजापति.मेवाऽऽप्नोति।
- <21.14.5> अगस्त्यो वै मरुद्भ्य उक्षण॰ प्रौक्ष-त्तानिन्द्रायाबध्ना-त्ते वज्र.मादाया-ऽभ्यपत.न्त्स एत.त्कयाशुभीय.मपश्य-त्तेनाशमयत्।
- <21.14.6> यत्कयाशुभीयं शस्यते- शान्त्या एव।
- <21.14.7> सप्तदश पृश्नी-नुक्षण॰ पञ्चवर्षा-न्त्सप्तदश पृश्नी- स्त्रिवत्सा अप्रवीता,- स्तान्पर्यग्निकृता.न्प्रोक्षिता,नेतरा लभन्ते- प्रेतरा.न्त्सृजन्ति। (प्रोक्षितान्,एतराः- आ, इतराः)
- <21.14.8> तत स्सँवत्सरे नवनीतपृश्नी.ररुणा आनयन्ति- तांश्चैवोक्षण.स्तान्पर्यग्निकृता न्प्रोक्षिता- नेतरा लभन्ते- प्रेतरा.न्त्सृजन्ति, तत स्सँवत्सरे राजीवा आनयन्ति- तांश्चैवोक्षण. स्तान्पर्यग्निकृता न्प्रोक्षिता- नेतरा लभन्ते- प्रेतरा.न्त्सृजन्ति, तत स्सँवत्सरे पिशङ्गी.रानयन्ति- तांश्चैवोक्षण.स्तान्पर्यग्निकृता.न्प्रोक्षिता- नेतरा लभन्ते- प्रेतरा.न्त्सृजन्ति, तत स्सँवत्सरे सारङ्गी.रानयन्ति- तांश्चैवोक्षण.स्तान्पर्यग्निकृता न्प्रोक्षिता- नेतरा लभन्ते- प्रेतरा.न्त्सृजन्ति।
- <21.14.9> तत स्सँवत्सरे सोमा भवन्ति।
- <21.14.10> त्रींस्त्री-नन्वह.मालभन्ते, पञ्चोत्तमेऽहनि।
- <21.14.11> अजोऽग्नीषोमीयः।
- <21.14.12> ऐन्द्रा मारुता उक्षाणो- मारुत्यो वत्सतर्यः।
- <21.14.13> यदि रुद्रोऽभिमन्ये-ताग्नये रुद्रवते पुरोडाश.मष्टाकपाल न्निरुप्याऽथान्य मालभेत।
- <21.14.14> यदि संशीर्येत- भौम.मेककपाल न्निरु-प्याथान्य मालभेत।
- <21.14.15> यद्यवसीदे-नैर्ऋत.ञ्चरु न्निरु-प्याथान्य मालभेत, यद्यप्सु म्रियेताऽपोनप्त्रीय.ञ्चरु न्निरु-प्याथान्य मालभेत, यद्यन्ध.स्स्या-त्सौर्य ञ्चरु न्निरु-प्याथान्य मालभेत।
- <21.14.16> यदि श्लक्ष्णो वा कूटो वा स्या-द्बार्हस्पत्य.ञ्चरु न्निरु-प्याथान्य मालभेत।
- <21.14.17> यदि पलायेत- वायव्य.ञ्चरु न्निरु-प्याथान्य मालभेत।
- <21.14.18> यदि प्रासहा जयेयु-रिन्द्राय प्रसह्वन एकादशकपाल न्निरु-प्याथान्य मालभेत।

- <21.14.19> यद्यन्येन मृत्युना म्रियेत- प्राजापत्य.न्द्वादशकपाल न्निरु-प्याथान्य मालभेत।
- <21.14.20> एतेन वा एकया वा गान्दमो वेतस्वतीष्ट्वा सर्वा.मृद्धि.मार्ध्नोत्। (गान्दमः - गां दमयतीति गान्दमः। वेतस्वति, इष्ट्वा।)
- <21.14.21> सर्वा.मृद्धि.मृध्नोति- य एवँ वेद।
- <21.15.1> ❃ 21.15 ज्योतिष्टोमोऽग्निष्टोमो- गौरुक्थ्यो महाव्रत-ङ्गौरुक्थ्य- आयु.रतिरात्रः।
- <21.15.2> सँवत्सरो वै व्रत- न्तस्य वसन्त ऋतु.र्मुख-ङ्ग्रीष्मश्च वर्षाश्च पक्षौ- शर.न्मध्यं- हेमन्तꣳ पुच्छम्।
- <21.15.3> तस्मा.च्छरद.मोषधयोऽभि सम्पच्यन्ते, शरद्धि मध्यं सँवत्सरस्य।
- <21.15.4> अकृतँ वा एते कुर्वन्ति- ये पुरा सँवत्सरा.द्व्रत.मुपयन्ति।
- <21.15.5> एतद्वै व्रत.माप्तँ- यत्पञ्चरात्रे, पञ्च ह्यृतवः।
- <21.15.6> आप्तेन व्रतेन स्तुते- सर्व.मायु.रेति- य एवँ वेद।

## ताण्ड्य ब्राह्मणे द्वाविंशोध्यायः

- <22.1.1> ❃22.1 पृष्ठ्य ष्षडहः।
- <22.1.2> ऋतवो न प्रत्यतिष्ठं-स्त एतेन प्रत्यतिष्ठ,न्प्रतिष्ठाकामो यजेत- प्रत्येव तिष्ठति।
- <22.1.3> षड्वा ऋतव- ऋतु.ष्वेवैतेन प्रति तिष्ठति, पृष्ठ्य ष्षडहो भवति- प्रत्यक्ष.मृद्ध्यै।
- <22.1.4> प्रत्यक्षं ह्येतेनर्तव आर्ध्नुव-न्नृध्या एव।
- <22.2.1> ❃22.2 त्रिवृ.दग्निष्टोमꣳ- पञ्चदश उक्थ्य- स्सप्तदश उक्थ्यो- ज्योति.र्गौ.- रायु.रतिरात्रः।
- <22.2.2> यꣳ कामयेत सर्व.मायु.रिया.मिति- स एतेन यजेत।
- <22.2.3> यत्त्र्यहꣳ पुरस्ता.द्भवति, त्रयꣳ प्राणाऽपान.व्याना-स्त एव तत्सन्धीयन्ते।
- <22.2.4> अथ यज्ज्योति.र्गौ.रायु.रतिरात्रो भवति- प्रतिष्ठित्यै।
- <22.3.1> ❃22.3 अभ्यासङ्ग्यꣳ पञ्चाहो- विश्वजि.दतिरात्रः।

- <22.3.2> अन्यस्मै वै कामाय सत्त्र-मन्यस्मै यज्ञो, न तत्सत्रेणाऽऽप्नोति- यस्मै कँ यज्ञो, न तद्यज्ञेनाऽऽप्नोति- यस्मै कं सत्त्रम्। (कमित्यनर्थकः)
- <22.3.3> सत्त्र.मिव वा एत-द्यदनुलोमं पृष्ठानि, यदेकधा पृष्ठानि भव-न्त्येकधैवास्मिं.स्तदोजो वीर्य.न्दधाति।
- <22.3.4> अन्नं पृष्ठा-न्यन्नाद्य.मेवास्मि.न्दधाति।
- <22.3.5> पशवः पृष्ठानि- पशुष्वेव प्रति तिष्ठति।
- <22.3.6> अभ्यासङ्ग्यः पञ्चाहो भवति- सन्तत्यै।
- <22.3.7> विश्वजि.दतिरात्रो भवति- विश्वस्याभिजित्यै।
- <22.4.1> ❃22.1पृष्ठ्य.ष्षडहो- महाव्रत.मतिरात्रः।
- <22.4.2> सप्त ऋषय एतेनाऽऽर्ध्नुवं-स्तेनर्द्धि,स्तस्मा.देतेन यजन्त- ऋद्ध्या एव।
- <22.4.3> सप्त शिरसि प्राणाः- प्राणा इन्द्रिया.णीन्द्रिया.ण्येवैतेनाऽऽप्नोति।
- <22.4.4> सप्त ग्राम्याः पशव-स्तानेतेनाऽऽप्नोति।
- <22.4.5> व्रतं सप्तमस्याह्नः पृष्ठं भवति- तद्यनाप्त,मन्नँ वै व्रत-मन्नाद्य.मेवैतेनाऽऽप्नोति।
- <22.4.6> पृष्ठ्य ष्षडहो भवति- प्रत्यक्ष.मृद्ध्यै।
- <22.4.7> प्रत्यक्षं ह्येतेन सप्त ऋषय आर्ध्नुव-न्नृद्ध्या एव।
- <22.5.1> ❃22.5 पृष्ठ्य ष्षडह- स्सप्तदशं महाव्रत.मतिरात्रः।
- <22.5.2> तस्य त्रिवृ.च्छिरः- पञ्चदशौ पक्षौ- सप्तदश आत्मैकविंशं पुच्छम्।
- <22.5.3> एतेन वै प्रजापतिः प्रजा असृजत।
- <22.5.4> प्र प्रजया प्र पशुभि.र्जायते- य एवँ वेद।
- <22.5.5> सप्तदशो वै प्रजापति,र्यत्सप्तदशँ व्रतं भवति- प्रजापति.मेवाऽऽप्नोति।
- <22.5.6> यत्त्रिवृ.च्छिरो भवति- नव प्राणाः- प्राणेष्वेव प्रति तिष्ठति।
- <22.5.7> यत्पञ्चदशौ पक्षौ- सवीवधत्वाय।
- <22.5.8> सप्तदश आत्मा भवति, प्रजापतिर्वै सप्तदशः- प्रजापति.मेवाऽऽप्नोति।
- <22.5.9> एकविंशं पुच्छं भवति- प्रतिष्ठित्यै।
- <22.6.1> ❃22.6 पृष्ठ्य ष्षडह-श्छन्दोम.पवमानं महाव्रत-मतिरात्रः।

- <22.6.2> पशुकामो यजेत।
- <22.6.3> पशवो वै छन्दोमाः।
- <22.6.4> यच्छन्दोमाः पवमाना महाव्रतस्य भवन्ति- पशू.नेवाव रुन्धे।
- <22.6.5> उभये स्तोमा युग्मन्त.श्चायुजश्च- तन्मिथुन,न्तस्मा.न्मिथुना.त्प्र जायते।
- <22.7.1> ❃22.7 अभ्यासङ्ग्यः पञ्चाहो-ऽथ त्रयस्त्रिंश.मह-स्तस्य चतुस्त्रिंशोऽग्निष्टोम-स्सप्तदशं महाव्रत-मतिरात्र,स्तस्य चतुर्विंशं बहिष्पवमान- न्त्रिवृ.च्छिरः- पञ्चदशौ पक्षौ- सप्तदश आत्मैकविंशं पुच्छम्।
- <22.7.2> एतेन वै जमदग्नि स्सर्वा.न्पोषा.नपुष्य,त्सर्वा.नेवैतेन पोषा.न्पुष्यति।
- <22.7.3> यदभ्यासङ्ग्यः पञ्चाहः पुरस्ता.द्भवति- सन्तत्या एव।
- <22.7.4> अथैत.त्त्रयस्त्रिंश.मह-स्त्रयस्त्रिंश.द्देवता- देवता एवाऽऽप्नोति।
- <22.7.5> तस्य चतुस्त्रिंशोऽग्निष्टोमः, प्रजापति.श्चतुस्त्रिंशो देवतानां- प्रजापति मेवाऽऽप्नोति।
- <22.7.6> चतुर्विंशं बहिष्पवमानं भवति महाव्रतस्य, चतुर्विंशत्यक्षरा गायत्री- प्रजनन.ङ्गायत्री- प्रजात्यै।
- <22.7.7> उभये स्तोमा युग्मन्त.श्चायुजश्च- तन्मिथुन,न्तस्मा.न्मिथुना.त्प्र जायते।
- <22.7.8> यत्त्रिवृ.च्छिरो भवति- नव प्राणाः प्राणेष्वेव प्रति तिष्ठति, यत्पञ्चदशौ पक्षौ- सवीवधत्वाय, सप्तदश आत्मा भवति- प्रजापतिर्वै सप्तदशः- प्रजापति मेवाऽऽप्नो,त्येकविंशं पुच्छं भवति प्रतिष्ठित्यै।
- <22.8.1>❃22.8 ज्योतिष्टोमोऽग्निष्टोमो- गौरुक्थ्य- आयु.रुक्थ्यो-ऽभिजि.दग्निष्टोमो- विश्वजि.दग्निष्टोम- स्सर्वजि.दग्निष्टोम- स्सर्वस्तोमोऽतिरात्रः।
- <22.8.2> एतेन वा इन्द्रोऽत्यन्या देवता अभव,दत्यन्याः प्रजा भवति- य एवँ वेद।
- <22.8.3> यज्ज्योति.र्गौरायु.स्त्र्यहः पुरस्ता.द्भवति- प्रज्ञाता.न्स्तोमा.नुपै-तीमा.नेव लोका-नेष्वेव लोकेषु प्रति तिष्ठति।
- <22.8.4> अथाभिजि,दभिजिता वै देवा इमा.न्लोका.नभ्यजयन्- विश्वजिता विश्व.मजय-न्त्सर्वजिता सर्व.मजयन्।

- <22.8.5> सर्वस्तोमोऽतिरात्रो भवति, सर्वस्याऽऽप्त्यै- सर्वस्य जित्यै- सर्व.मेवैतेनाऽऽप्नोति- सर्व.ञ्जयति।
- <22.9.1> ❃22.9 चत्वारि त्रिवृ.न्त्यहा.न्यग्निष्टोम.मुखानि, विश्वजि.न्महाव्रत-ञ्ज्योतिष्टोमोऽतिरात्रः।
- <22.9.2> एतेन वै प्रजापतिꣳ पुरुष.मसृजत, स सर्वस्यान्नाद्यस्याऽऽधिपत्य.मगच्छत्।
- <22.9.3> सर्वस्यान्नाद्यस्याऽऽधिपत्य.ङ्गच्छति- य एवँ वेद।
- <22.9.4> शिरो वा अग्रे सम्भवत स्सम्भवति, चतुर्धा विहितँ वै शिरꣳ- प्राण-श्चक्षु-श्श्रोत्रँ- वा,गात्मा वै पृष्ठानि- यत्पृष्ठा.न्युपैति- शिर एवाऽऽत्मान.मनु सन्दधाति।
- <22.9.5> एतद्वै पुरुष.मक,स्तस्मा अन्न.मेव व्रत.मपि दधाति।
- <22.9.6> अथ यज्ज्योतिष्टोमोऽतिरात्रो भव-त्यक्लृप्तस्य क्लृप्त्यै।
- <22.10.1> ❃22.10 पृष्ठ्य स्स्तोम ष्षडहो- विश्वजि.दतिरात्रः।
- <22.10.2> अन्यस्मै वै कामाय सत्त्र-मन्यस्मै यज्ञो, न तत्सत्त्रेणाऽऽप्नोति यस्मै कँ यज्ञो, न तद्यज्ञेनाऽऽप्नोति यस्मै कं सत्त्रं, सत्त्र.मिव वा एत-द्यदनुलोमं पृष्ठानि, यदैकधा पृष्ठानि भव-न्त्येकधैवास्मिं.स्तेजो वीर्य.न्दधा,त्यन्नं पृष्ठा-न्यन्नाद्य.मेवास्मि.न्दधाति, पशवꣳ पृष्ठानि- पशुष्वेव प्रति तिष्ठति।
- <22.10.3> यद्वै मनुष्याणां प्रत्यक्ष- न्तद्देवानां परोऽक्ष,मथ यन्मनुष्याणां परोऽक्ष-न्तद्देवानां प्रत्यक्षम्।
- <22.10.4> एतद्वै परोऽक्षं व्रतँ- यद्विश्वजि,त्प्रत्यक्ष.मेवैतेनान्नाद्य.मव रुन्धे।
- <22.11.1> ❃22.11 पृष्ठ्य ष्षडहो महाव्रत-ञ्ज्योतिष्टोमोऽतिरात्रः।
- <22.11.2> एतेन वै देवा देवत्व.मगच्छन्।
- <22.11.3> देवत्व.ङ्गच्छति- य एवँ वेद।
- <22.11.4> एतद्वै व्रत.माप्तँ- यदष्टरात्रे,ऽग्निष्टोमो हि व्रतं सम्पद्यते।
- <22.11.5> अथ यज्ज्योतिष्टोमोऽतिरात्रो भव-त्यक्लृप्तस्य क्लृप्त्यै।
- <22.11.6> अष्टरात्रेण वै देवा स्सर्व.माश्नुवत।
- <22.11.7> सर्व.मश्नुते- य एवँ वेद।

- <22.12.1> ❃22.12 पृष्ठ्य ष्षडहो- ज्योति.र्गौ.रायु.रतिरात्रो, देवा वै मृत्यो.रबिभयु-स्ते प्रजापति.मुपाधावं-स्तेभ्य एतेन नवरात्रेणामृतत्वं प्रायच्छत्।
- <22.12.2> एत.द्वाव मनुष्यस्यामृतत्वँ- यत्सर्व.मायु.रेति- वसीया.न्भवति।
- <22.12.3> सर्व.मायु.रेति- वसीया.न्भवति- य एवँ वेद।
- <22.12.4> नवरात्रो वा एष, नव प्राणाᳲ- प्राणेष्वेव प्रति तिष्ठति।
- <22.12.5> पृष्ठ्य ष्षडहो भवति- प्रत्यक्ष.मृघ्या, अथ यज्ज्योति.र्गौरायु.रतिरात्रो भवति- प्रतिष्ठित्यै।
- <22.13.1> ❃22.13 ज्योतिष्टोमोऽग्निष्टोमो- गौरुक्थ्य- आयुरुक्थ्यो-ऽभ्यासङ्ग्यᳲ पञ्चाहो- विश्वजि.दतिरात्रᳲ- पशुकामो यजेत। (प्रतिसरबन्धने पठन्ति साम्प्रदायिकाः)
- <22.13.2> यज्ज्योति.र्गौरायु.स्त्र्यहᳲ पुरस्ता.द्भवति- प्रज्ञाता.न्स्तोमा.नुपै-तीमा.नेव लोका.नेष्वेव लोकेषु प्रति तिष्ठति।
- <22.13.3> अथ यदभ्यासङ्ग्यᳲ पञ्चाहो मध्यतो भवति- पाङ्क्तᳲ पुरुषᳲ- पाङ्क्ताᳲ पशव-स्तेन पुरुषञ्च पशूंश्चाऽऽप्नोति।
- <22.13.4> विश्वजि.दतिरात्रो भवति- विश्वस्याभिजित्यै।
- <22.14.1> ❃22.14 त्रिवृ.दग्निष्टोमᳲ- पञ्चदश उक्थ्य,स्त्रिवृ.दग्निष्टोम-स्सप्तदशोऽग्निष्टोम- एकविंश उक्थ्य, स्सप्तदशोऽग्निष्टोम-स्त्रिणवोऽग्निष्टोम-स्त्रयस्त्रिंश उक्थ्य,-स्त्रिणवोऽग्निष्टोमो विश्वजि.दतिरात्रः।
- <22.14.2> इन्द्रोऽसुरान् हत्वाऽकार्य.ञ्चकृवाꣳ अमन्यत, तन्देवा एतेन स्तोमेनायाजय,न्त्स पाप्मनो नैर्दश्य.मगच्छत्।
- <22.14.3> तस्मा.दिषुहतो वा दण्डहतो वा- दशमी.न्नैर्दश्य.ङ्गच्छति।
- <22.14.4> दश दशिनी वा एषा विरा,डन्नँ विरा-डन्नाद्य.मेवास्मि.न्दधाति।
- <22.14.5> अग्निष्टोमेन वै देवा असुरा.न्निगृह्य- मध्यत उक्थ्यैᳲ प्रजया पशुभिᳲ प्राजायन्ता,ऽग्निष्टोमेनैव भ्रातृव्य.न्निगृह्य- मध्यत उक्थ्यैᳲ प्रजया पशुभिᳲ प्र जायते।
- <22.14.6> त्रिककुब्वा एष यज्ञः।
- <22.14.7> त्रिककु.प्समानानाञ्च प्रजानाञ्च भवति- य एवँ वेद।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

- <22.15.1> ❃22.15 त्रय.स्त्रिवृतोऽग्निष्टोमा-स्त्रय॰ पञ्चदश उक्थ्या-स्त्रय स्सप्तदश उक्थ्या- एकविंशोऽतिरात्र॰- कुसुरुविन्द.दशरात्रः।
- <22.15.2> य॰ कामयेत बहु स्या.मिति- स एतेन यजेत।
- <22.15.3> यद्गणश स्स्तोमो- बहु.रेव भवति।
- <22.15.4> सह त्रिवृत- स्सह पञ्चदशा- स्सह सप्तदशाः।
- <22.15.5> एकविंशोऽतिरात्रो भवति- प्रतिष्ठित्यै।
- <22.15.6> ज्योतिर्वा एष विहृतः।
- <22.15.7> ज्योतिष्प्रजानां भवति- य एवँ वेद।
- <22.15.8> चतुष्टोमो वा एष- चतुष्पादा॰ पशव॰- पशुष्वेव प्रति तिष्ठति।
- <22.15.9> एकविंशं स्तोमा नातियन्ति, प्रतिष्ठा वा एकविंश॰- प्रत्येव तिष्ठति।
- <22.15.10> एतेन वै कुसुरुविन्द औद्दालकि.रिष्ट्वा- भूमान.माश्नुत।
- <22.15.11> भूमान.मश्नुते- य एवँ वेद।
- <22.16.1> ❃22.16 अभ्यासङ्ग्य॰ पञ्चाह-श्चत्वार.श्छन्दोमा- विश्वजि.दतिरात्र॰, पशुकामो यजेत।
- <22.16.2> यदभ्यासङ्ग्य॰ पञ्चाह॰ पुरस्ता.द्भवति- पाङ्क्त॰ पुरुष॰- पाङ्क्ता॰ पशव-स्तेन पुरुषञ्च पशूं.श्चाऽऽप्नोति।
- <22.16.3> छन्दोमा मध्यतो भवन्ति, पशवो वै छन्दोमा॰- पशूना.मवरुद्ध्यै।
- <22.16.4> विश्वजि.दतिरात्रो भवति- विश्वस्याभिजित्यै।
- <22.17.1> ❃22.17 त्रिष्टोमोऽग्निष्टोमो ज्योति.रुक्थ्य-स्त्रिष्टोमोऽग्निष्टोमो गौरुक्थ्यो-ऽभिजि.दग्निष्टोमो गौरुक्थ्यो- विश्वजि.दग्निष्टोम आयु.रुक्थ्यो- विश्वजि.दग्निष्टोमस्य सर्वस्तोमोऽतिरात्रः।
- <22.17.2> देवा वा असुरै.र्हन्यमाना-स्ते प्रजापति.मुपाधावं-स्तेभ्य एतां देवपुरं प्रायच्छ-त्तां प्राविशन्।
- <22.17.3> अभिचार्यमाणँ याजये,देता.मेव देवपुरं प्रविश-त्यस्तृत्यै।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

- <22.18.1> ❃22.18 अभ्यासङ्ग्य.ष्षडह-स्त्रय.श्छन्दोमा-श्चतुष्टोमोऽग्निष्टोमो- विश्वजि. दतिरात्रः।
- <22.18.2> स्वाराज्यो वा एष यज्ञः।
- <22.18.3> स्वाराज्य.ङ्गच्छति- य एवँ वेद।
- <22.18.4> प्रजापतिर्हि स्वाराज्यं- परमेष्ठी स्वाराज्यम्।
- <22.18.5> परमेष्ठिता.ङ्गच्छति- य एवँ वेद।
- <22.18.6> उभे बृह.द्रथन्तरे भवत-स्तद्धि स्वाराज्य,मयुत न्दक्षिणा-स्तद्धि स्वाराज्यं, षड्विंश.स्स्तोमो भवति- स हि स्वाराज्य,श्चतुष्टोम.स्तोम-स्स ह्यन्तो,ऽन्ते श्रिया गच्छति- य एवँ वेद।
- <22.18.7> एतेन वै क्षौम.न्धृत्वा- पौण्डरीक.मिष्ट्वा- सुदाम्न.स्तीर उत्तरे।
- <22.18.8> सर्वा.मृद्धि.मार्ध्नो,त्सर्वा.मृद्धि.मृध्नोति- य एवँ वेद।

## ताण्ड्यब्राह्मणे त्रयोविंशोऽध्यायः

- <23.1.1> ❃23.1 अतिरात्र४ पृष्ठ्य ष्षडह- स्सर्वस्तोमोऽतिरात्र-श्चत्वार.श्छन्दोमा अतिरात्रः।
- <23.1.2> एष वा आप्तो द्वादशाहो- यत्त्रयोदशरात्रः।
- <23.1.3> समानो ह्येष- यत्प्रायणीय.श्चोदयनीय.श्चातिरात्रौ, यङ्काम.ङ्कामयन्ते- तमेताभि.रभ्यश्नुवते।
- <23.1.4> गृहपतेस्तु वा.गुपदासुका भवति, तद्य.न्मध्ये सर्वस्तोमोऽतिरात्रो भवति- तेन गृहपते र्वा.गनुपदासुका भवति।
- <23.1.5> एता वा अर्यल.गृहपतय आरुणिहोतार स्सुभगासूपयन्ति, ते सर्वा.मृद्धि मार्ध्नुव,न्त्सर्वा.मृद्धि.मृध्नुवन्ति- य एता उपयन्ति।
- <23.2.1> ❃23.2 अतिरात्रो द्वादशाहस्य- दशाहानि महाव्रत.श्चातिरात्रश्च।
- <23.2.2> वाग्वा एषा प्रतायते- यदेष द्वादशाह,स्ताँ विच्छिन्द्यु-र्यन्मध्येऽतिरात्र.ङ्कुर्युः।
- <23.2.3> यदुपरिष्टा.द्व्रत.मुपयन्ति- न वाचँ विच्छिन्द,न्त्याप्नुवन्ति त्रयोदशं मासम्।
- <23.2.4> एता वै प्रतिष्ठिता.स्त्रयोदश रात्रय४, प्रति तिष्ठन्ति- य एता उपयन्ति।

- <23.3.1> अतिरात्र꣬ पृष्ठ्य ष्षडह꣬- पृष्ठ्य.ष्षडह-स्त्रयस्त्रिंशाऽऽरम्भणोऽतिरात्रः।
- <23.3.2> कामसनयो वा एता रात्रयः।
- <23.3.3> विराड्ढि द.शात्मैकादशी- प्रजा द्वादशी- पशव.स्त्रयोदशी- कामाय चतुर्दशी।
- <23.3.4> सर्वा.नेवैताभि꣬ कामा.नव रुन्धते।
- <23.3.5> एता वाव ब्रध्नस्य विष्टपो- यदेतौ त्रयस्त्रिंशौ मध्यत स्सन्धीयेते- तेन ब्रध्नस्य विष्टपं रोहन्ति।
- <23.3.6> द्वि꣬ पृष्ठा.न्युप य-न्त्यभिपूर्व.मेवैताभि.रन्नाद्य.न्दधते।
- <23.3.7> पक्षिण्यो वा एता रात्रयो, यङ्काम.ङ्कामयन्ते - तमेताभि.रभ्यश्नुवते।
- <23.3.8> यत्र यत्र हि पक्षौ कामयते - तत्त.दभ्यश्नुते।
- <23.3.9> त्रिवृता प्रयन्ति- त्रिवृतोद्यन्ति, प्राणा वै त्रिवृ.त्स्तोमानां- प्राणै.रेव प्रयन्ति- प्राणेषु प्रति तिष्ठन्ति।
- <23.4.1> ❃ 23.4 अतिरात्रो ज्योति.र्गौ.रायु-स्त्र्यह꣬ पृष्ठ्य ष्षडह- आयु.र्गौ.र्ज्योति.रतिरात्रः।
- <23.4.2> यांस्तल्पे वोदके वा विवाहे वा मीमांसेरं-स्त एता उपेयुः।
- <23.4.3> यज्ज्योति.र्गौरायु.स्त्र्यह꣬- प्रज्ञाता.न्त्स्तोमा.नुप यन्ति।
- <23.4.4> इमा.नेव लोका-नेष्वेव लोकेषु प्रति तिष्ठान्ति।
- <23.4.5> अथ यत्पृष्ठ्य.ष्षडहो मध्यतो भव-त्येषु वाव देवतल्पो- देवतल्प.मेव तदारोहन्ति- तल्प्या भवन्ति।
- <23.4.6> प्र वसीयस.स्तल्प.माप्नुवन्ति।
- <23.4.7> अथ यदायु.र्गौ.र्ज्योति.रतिरात्रो, येनेतो यन्ति- तेन पुन.रायन्ति।
- <23.5.1> ❃ 23.5 अतिरात्रो गौ.श्चाऽऽयुश्च द्वे अहनी, द्वादशाहस्य दशाहा.न्यतिरात्रः।
- <23.5.2> यद्गौश्चाऽऽयुश्च द्वे अहनी भवतो- मिथुनौ स्तोमा.वुपयन्ति- प्रजात्यै।
- <23.5.3> अथ यानि द्वादशाहस्य दशाहानि, वाच.मविच्छिन्ना.मुपयन्ति- प्रजननाय।
- <23.5.4> एता वै प्रतिष्ठिता.श्चतुर्दश रात्रय꣬, प्रति तिष्ठन्ति य एता उपयन्ति।

- <23.6.1> ❃ 23.6 अतिरात्रꣳ पृष्ठ्य.ष्षडहो- महाव्रतं पृष्ठ्य.ष्षडह-स्त्रयस्त्रिंशाꣷरम्भणोऽतिरात्रः।
- <23.6.2> एताभिर्वै देवा देवत्व.मगच्छ,न्देवत्व.ङ्गच्छन्ति- य एता उपयन्ति।
- <23.6.3> एतद्वै देवानां सत्त्र,न्तदद्यापि देवा स्सत्त्र.मासते।
- <23.6.4> पौर्णमास्यतिरात्रो,ऽथ यानि षडहानि- स पृष्ठ्य.ष्षडह- एकाष्टका महाव्रत,मथ यानि षडहानि- स पृष्ठ्य.ष्षडहो-ऽमावास्याऽतिरात्रः।
- <23.6.5> तस्मा.त्तर्हि मनुष्याणा.न्न सुतो- देवानां हि तर्हि सुतꣳ, प्रत्यक्ष.मेवैताभि.र्देवता अभ्यारोहन्ति।
- <23.6.6> प्रतिनोदात्तु भय्य-मितर.मनुपक्षो दीक्षेर-न्नप्रतिनोदाय।
- <23.7.1>❃ 23.7 अतिरात्र.स्त्रिवृ.दग्निष्टु.दग्निष्टोमो- ज्योति.र्गौरायु.स्त्र्यहꣳ पृष्ठ्य.ष्षडह-आयु.र्गौर्ज्योति.रतिरात्रः।
- <23.7.2> क्षत्रँ वा एता रात्रयोऽभि निर्वदन्ति।
- <23.7.3> ब्रह्मवर्चसकामा उपेयुः।
- <23.7.4> यत्त्रिवृ.दग्निष्टु.दग्निष्टोमो भवति- ब्रह्म तद्यशसाऽर्धयति।
- <23.7.5> ब्रह्म वै त्रिवृत्।
- <23.7.6> यज्ज्योति.र्गौरायु.स्त्र्यहꣳ प्रज्ञाता.न्स्तोमा.नुपय-न्तीमा.नेव लोका.नेष्वेव लोकेषु प्रति तिष्ठ,न्त्यथ यत्पृष्ठ्य.ष्षडहो मध्यतो भव-त्यन्नँ वै पृष्ठा-न्यन्न.मेव तन्मध्यतो धीयते- तस्मा.न्मध्ये सदन्न.न्धिनो,त्यथ यदायु.र्गौर्ज्योति.रतिरात्रो- येनेतो यन्ति- तेन पुन.रायन्ति।
- <23.8.1> ❃23.8 त्रिवृ.दग्निष्टु.दग्निष्टोमो- ज्योति.र्गौरायु.स्त्र्यहो- द्वादशाहस्य दशाहा.न्यतिरात्रः।
- <23.8.2> अन्यस्मै वै कामाय सत्त्र-मन्यस्मै यज्ञो, न तत्सत्त्रेणाꣷप्नोति- यस्मै कँ यज्ञो, न तद्यज्ञेनाꣷप्नोति- यस्मै कं सत्त्रम्।
- <23.8.3> यदन्यतोऽतिरात्रा-स्तेन यज्ञो,ऽथ यानि द्वादशाहस्य दशाहानि- तेन सत्त्रम्।
- <23.8.4> उभा.वेवैताभिꣳ कामा.ववरुन्धते।

- <23.9.1> ❃23.9 अतिरात्रो ज्योति.र्गौरायु.स्त्र्यहो- द्वादशाहस्य दशाहा.न्यतिरात्रः, प्रजाकामा उपेयुः।
- <23.9.2> एताभिर्वै प्रजापतिः प्रजा असृजत, प्र प्रजया प्र पशुभि.र्जायन्ते- य एता उपयन्ति।
- <23.9.3> यज्ज्योति.र्गौरायु.स्त्र्यहः- प्रज्ञाता.न्स्तोमा.नुपय-न्तीमा.नेव लोका.नेष्वेव लोकेषु प्रति तिष्ठन्ति।
- <23.9.4> अथ यानि द्वादशाहस्य दशाहानि- वाच.मविच्छिन्ना.मुप यन्ति प्रजननाय।
- <23.9.5> एता वै प्रतिष्ठिताः पञ्चदश रात्रयः, प्रति तिष्ठन्ति- य एता उपयन्ति।
- <23.10.1> ❃23.10 एता एव समहाव्रताः।
- <23.10.2> एताभिर्वा इन्द्रः परमाँ विजितिँ व्यजयत, परमा.मेवैताभि.र्विजितिँ विजयन्ते।
- <23.10.3> पञ्चदशो वै वज्रो, न वा अगृहीतेन वज्रेण वीर्य.ङ्करोति, या षोडश्यारम्भणमेव- तद्गृहीतेन वज्रेण वीर्य.ङ्करोति।
- <23.11.1> ❃23.11 अतिरात्रो ज्योति.र्गौरायु.-र्गौ.रायुः पञ्चाहो- द्वादशाहस्य दशाहा.न्यतिरात्रः।
- <23.11.2> एताभिर्वै प्रजापति.रनन्तां श्रिय.मजय,दनन्ता वा एता- यत्पञ्चाहविधाः।
- <23.11.3> यत्पञ्चाहो-ऽनन्ता.देव प्रजायन्ते।
- <23.11.4> अथ यानि द्वादशाहस्य दशाहानि, वाच.मविच्छिन्ना.मुपयन्ति- प्रजननाय।
- <23.11.5> एता वै प्रतिष्ठिता स्सप्तदश रात्रयः, प्रति तिष्ठन्ति- य एता उपयन्ति।
- <23.12.1> ❃23.12 अतिरात्रोऽभिप्लव ष्षडहो- द्वादशाहस्य दशाहा.न्यतिरात्रः।
- <23.12.2> देवा वै मृत्यो.रबिभयु,स्ते प्रजापति.मुपाधावं-स्तेभ्य एतेनाऽष्टादशरात्रेणाऽमृतत्वं प्रायच्छत्।
- <23.12.3> एतद्वाव मनुष्यस्यामृतत्वँ- यत्सर्व.मायु.रेति- वसीया.न्भवति।
- <23.12.4> सर्व.मायु.र्यन्ति- वसीयांसो भवन्ति- य एता उपयन्ति।
- <23.12.5> द्विर्वा एता नव- नव प्राणा- अभिपूर्व.मेवैताभि.रायु.र्दधते।

- <23.13.1> ❄23.13 एता एव समहाव्रताः।
- <23.13.2> एताभिर्वै वायु.रारण्यानां पशूना.माधिपत्य.माश्नु,तोभयेषां पशूना माधिपत्य ङ्गच्छन्ति- य एता उपयन्ति।
- <23.13.3> मृगसत्रँ वा एतत्।
- <23.13.4> एताभिर्वा आरण्याः पशवो नाऽऽकृताः प्रजायन्ते। (आङ् ईषदर्थे विद्यते)
- <23.13.5> अनाकृत.मेषां प्र जायते- य एता उपयन्ति।
- <23.14.1> ❄23.14 अत्रिरात्रोऽभिप्लव ष्षडहो-ऽभिजिच्च विश्वजिच्च द्वे अहनी- द्वादशाहस्य दशाहा.न्यतिरात्रः।
- <23.14.2> पुरुषकामा उपेयु,रेताभिर्वै प्रजापतिः पुरुष.मसृजत।
- <23.14.3> स सर्वस्यान्नाद्यस्याऽऽधिपत्य.मगच्छ,त्सर्वस्यान्नाद्यस्याऽऽधिपत्य.ङ्गच्छन्ति - य एता उपयन्ति।
- <23.14.4> पुरुषसत्रँ वा एतत्।
- <23.14.5> विंशो वै पुरुषो, दश हि हस्त्या अङ्गुल्यो- दश पाद्याः।
- <23.14.6> यदेता विंशती रात्रयो भव,न्त्येष्वेवैताभि-र्लोकेषु पुरुषं प्रतिष्ठापयन्ति।
- <23.14.7> एता वै प्रतिष्ठिता विंशती रात्रयः, प्रति तिष्ठन्ति- य एता उपयन्ति।
- <23.15.1> ❄23.15 अतिरात्रोऽभिप्लव ष्षडहो-ऽतिरात्रोऽभिप्लव ष्षडहो-ऽभिप्लव ष्षडहोऽतिरात्रः, पशुकामा उपेयुः।
- <23.15.2> एताभिर्वा आदित्या स्सप्त ग्राम्या.न्पशू.नुदसृजन्त, पशू.नेवैताभि. रुत्सृजन्ते।
- <23.15.3> त्रिर्वै सप्त सप्ताऽऽदित्याः।
- <23.15.4> पशव आदित्याः।
- <23.15.5> आदित्या अस्मि.न्लोक ऋद्धा- आदित्या अमुष्मिन्।
- <23.15.6> पशवोऽस्मि-न्नृतवोऽमुष्मिन्।
- <23.15.7> उभयो.रनयो.र्लोकयो.र्ऋध्नुवन्ति- देवलोके च मनुष्यलोके च- य एता उपयन्ति।

Sri Ganapathy Sachchidananda Avadhoota Dattapeetham

- <23.16.1> ❃23.16 अतिरात्रः पृष्ठ्य.ष्षडह-स्त्रय स्स्वरसामानो- दिवाकीर्त्य.मह-स्त्रय स्स्वरसामानः- पृष्ठ्य.ष्षडह-स्त्रयस्त्रिंशाऽऽरम्भणोऽतिरात्रो, ब्रह्मवर्चसकामा उपेयुः।
- <23.16.2> स्वर्भानुर्वा आसुर स्सूर्य न्तमसाऽविध्य,त्तस्मै देवाः प्रायश्चित्ति.मैच्छं,स्त एता अविन्दं-स्ताभि.रस्मा.त्तमोऽपाघ्नन्।
- <23.16.3> अप तमो घ्नते- य एता उपयन्ति।
- <23.16.4> सौमापौषं पशु.मुपाऽऽलभ्य.मालभेरन्।
- <23.16.5> सोमो वै ब्राह्मणः- पशवः पूषा- स्वामेव तद्देवतां पशुभि.र्बृंहयन्ते- त्वच.मेवाक्रत।
- <23.16.6> मनो.र्ऋच स्सामिधेन्यो भवन्ति।
- <23.16.7> मनुर्वै यत्किञ्चावद-त्तद्भेषजं- भेषजतायै।
- <23.16.8> नैदाधीय उपेयुः।
- <23.16.9> तद्ध्येष प्रति तेजिष्ठ.न्तपति।
- <23.16.10> किलासत्वा.त्तु भय-मति ह्येभ्योऽपहन्ति।
- <23.16.11> एता वा उग्रदेवो राजनि.रुपै-त्स किलासोऽभवत्।
- <23.16.12> अकिलासो भवति- य एवँ विद्वा.नेता उपैति।
- <23.17.1> ❃23.17 अतिरात्रो ज्योति.र्गौरायु.स्त्र्यहोऽभिप्लव ष्षडहो- द्वादशाहस्य दशाहानि- महाव्रत-श्चातिरात्र,श्चान्नाद्यकामा उपेयुः।
- <23.17.2> पञ्चर्तवो- द्वादश मासा-स्त्रय इमे लोका- असा.वादित्य एकविंशो-ऽन्न न्द्वाविंश,मेभ्यो लोकेभ्य स्सँवत्सरा.दमुष्मा.दादित्या.दन्नाद्य.मव रुन्धते- य एता उपयन्ति।
- <23.18.1> ❃23.18 अतिरात्रो ज्योति.र्गौरायु-र्गौरायुः पञ्चाहोऽभिप्लव ष्षडहो- द्वादशाहस्य दशाहा.न्यतिरात्रः, प्रतिष्ठाकामा उपेयुः।
- <23.18.2> एताभिर्वै प्रजापति.रेषु लोकेषु प्रत्यतिष्ठत्।
- <23.18.3> यदेता.स्त्रयोविंशती रात्रयो भवन्ति- त्रय इमे लोका- एष्वेवैताभि.र्लोकेषु प्रति तिष्ठन्ति।
- <23.18.4> एता वै प्रतिष्ठिता.स्त्रयोविंशती रात्रयः, प्रति तिष्ठन्ति य एता उपयन्ति।

- <23.19.1> ❃ 23.19 अतिरात्रः पृष्ठ्य स्स्तोम ष्षडह-स्त्रयस्त्रिंश.मह.रनिरुक्त.मुपहव्यस्य तन्त्रे क्लृप्त,न्तस्य कण्व.रथन्तरं मध्यन्दिने-ऽथ त्रयस्त्रिंश.न्निरुक्त.न्त्रिणव-न्द्वे एकविंशे-त्रिणव.न्त्रयस्त्रिंश.मह.र्निरुक्त-न्त्रयस्त्रिंश.मह.रनिरुक्तं, पृष्ठ्य स्स्तोम ष्षडहः-प्रत्यङ्त्रिवृ.दह.रनिरुक्त- ञ्ज्योतिष्टोमो ऽग्निष्टोमोऽतिरात्रः।
- <23.19.2> एताभिर्वै देवा स्स्वर्गे लोके समसीद,न्त्स्वर्गे लोके सीदामे-त्येताः।
- <23.19.3> एता वाव ब्रध्नस्य विष्टपो- यदेते त्रयस्त्रिंशा मध्यत स्सन्धीयन्ते- तेन ब्रध्नस्य विष्टपं रोहन्ति।
- <23.19.4> मध्यतः पृष्ठा.न्युपय-न्त्यन्नँ वै पृष्ठा-न्यन्न.मेव तन्मध्यतो धीयते-तस्मा.न्मध्ये सदन्न.न्धिनोति।
- <23.19.5> सप्ताहा वा एते।
- <23.19.6> अतो वै प्रजाः प्र जायन्ते।
- <23.19.7> प्र प्रजया प्र पशुभि.र्जायन्ते- य एता उपयन्ति।
- <23.19.8> अपशव्यँ वा एत.त्सत्त्रँ- यदछन्दोमँ, यत्सप्ताहा-स्तेन छन्दोमवत्य-स्तेन पशव्याः।
- <23.19.9> त्रयस्त्रिंश.स्त्रयस्त्रिंश.मन्वेति- त्रिवृ.त्त्रिवृत-मग्रा.दग्रं रोहन्ति, यत्त्रयस्त्रिंश.स्त्रयस्त्रिंश.मन्वेति- प्राणा.त्प्राणेषु प्रतितिष्ठन्ति।
- <23.19.10> यत्त्रिवृ.त्त्रिवृतम्।
- <23.19.11> विलोमानो वा एता रात्रयो- यज्ज्योति.रग्निष्टोम, उत्थानीय.मह.र्भव-त्यक्लृप्तस्य क्लृप्त्यै।
- <23.20.1> ❃23.20 अतिरात्रो द्वा.वभिप्लवौ षडहौ द्वादशाहस्य दशाहा.न्यतिरात्रः, प्रजाकामा वा पशुकामा वोपेयुः।
- <23.20.2> क्लृप्ता.द्वै योनेः प्रजाः पशवः प्र जायन्ते, यत्क्लृप्तौ षडहा.वुपयन्ति- क्लृप्ता.देव योनेः प्रजया पशुभिः प्रजायन्ते।
- <23.20.3> अथ यानि द्वादशाहस्य दशाहानि- वाच.मविच्छिन्ना.मुपयन्ति- प्रजननाय।
- <23.20.4> एता वै प्रतिष्ठिता.श्चतुर्विंशती रात्रयः, प्रति तिष्ठन्ति- य एता उपयन्ति।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

* <23.21.1> ❃23.21 एता एव समहाव्रताः।
* <23.21.2> एताभिर्वै प्रजापति स्सर्व.मन्नाद्य.मवारुन्ध।
* <23.21.3> चतुर्विंशति स्सँवत्सरस्यार्धमासा-स्सँवत्सरः पञ्चविंशो-ऽन्नँ व्रतं, सँवत्सरा.देताभि.रन्नाद्य.मव रुन्धते- य एता उपयन्ति।
* <23.22.1> ❃23.22 अतिरात्रो गौश्चाऽऽयुश्च द्वे अहनी- द्वावभिप्लवौ षडहौ- द्वादशाहस्य दशाहा.न्यतिरात्रः।
* <23.22.2> ऋतवो न प्रत्यतिष्ठं,स्त एताभिः प्रत्यतिष्ठ,न्प्रतिष्ठाकामा उपेयुः- प्रत्येव तिष्ठन्ति।
* <23.22.3> षड्वा ऋतव- ऋतु.ष्वेवैताभिः प्रति तिष्ठन्ति।
* <23.22.4> यद्गौश्चाऽऽयुश्च द्वे अहनी भवतो- मिथुनौ स्तोमा.वुपयन्ति प्रजात्यै।
* <23.22.5> यत्क्लृप्तौ षडहा.वुपयन्ति- क्लृप्त्या एव।
* <23.22.6> अथ यानि द्वादशाहस्य दशाहानि- वाच.मविच्छिन्ना.मुपयन्ति- प्रजननाय।
* <23.22.7> एता वै प्रतिष्ठिता ष्षड्विंशती रात्रयः, प्रति तिष्ठन्ति- य एता उपयन्ति।
* <23.23.1> ❃23.23 अतिरात्रो ज्योति.गौरायु.स्त्र्यहो- द्वावभिप्लवौ षडहौ- द्वादशाहस्य दशाहा-न्यतिरात्र, ऋद्धिकामा उपेयुः।
* <23.23.2> एताभिर्वै नक्षत्राणि सर्वा.मृद्धि.मार्ध्नुव,न्त्सर्वा.मृद्धि.मृध्नुवन्ति- य एता उपयन्ति।
* <23.23.3> यदेता स्सप्तविंशती रात्रयो भवन्ति- सप्तविंशति.र्नक्षत्राणि- नक्षत्रसम्मिता वा एता रात्रयो, नक्षत्राणा.मेवर्द्धि.मृध्नुवन्ति।
* <23.24.1> ❃23.24 एता एव समहाव्रताः पशुकामा उपेयु,र्यदेता अष्टाविंशती रात्रयो भव-न्त्यष्टाशफाः पशव- श्शफश एवैताभिः पशू.नव रुन्धते।
* <23.25.1> ❃23.25 अतिरात्रो ज्योति.गौरायु-गौरायुः पञ्चाहो- द्वावभिप्लवौ षडहौ- द्वादशाहस्य दशाहा.न्यतिरात्रः।
* <23.25.2> एताभि.र्वै प्रजापति.रनन्तां श्रिय.मजयत्।

- <23.25.3> अनन्ता वा एता- या एकया न त्रिंश,न्नेति वै वाचोऽनन्तम्। (एकोनत्रिंशत्- एकया न त्रिंशत्,नेति, वाचः)
- <23.25.4> यदेता एकया न त्रिंश.द्रात्रयो भव-न्त्यनन्ता.मेवैताभि श्श्रिय.ञ्जयन्ति।
- <23.26.1> ❃ 23.26 अतिरात्र-स्त्रयोऽभिप्लवा ष्षडहा- द्वादशाहस्य दशाहा. न्यतिरात्रो,-ऽन्नाद्यकामा उपेयुः।
- <23.26.2> परोऽक्ष.मन्यानि सत्त्राणि विराजं सं पद्यन्ते, प्रत्यक्ष.मेता विराजं सम्पन्नाः।
- <23.26.3> प्रत्यक्ष.मेताभि.रन्नाद्य.मव रुन्धते- य एता उपयन्ति।
- <23.27.1> ❃23.27 एता एव समहाव्रता, एताभिर्वै प्रजापति रभिपूर्व.मन्नाद्य मवारुन्ध।
- <23.27.2> अन्नँ विरा-डन्नँ व्रतम्।
- <23.27.3> अभिपूर्व.मेवैताभि.रन्नाद्य मव रुन्धते।
- <23.28.1> ❃23.28 अतिरात्रो- गौश्चाऽऽयुश्च द्वे अहनी- त्रयोऽभिप्लवा ष्षडहा- द्वादशाहस्य दशाहा-न्यतिरात्रः, पशुकामा उपेयुः।
- <23.28.2> अनुष्टुब्वा एता रात्रयः।
- <23.28.3> द्वात्रिंश.दक्षराऽनुष्टुप्।
- <23.28.4> वा.गनुष्टुप्।
- <23.28.5> चतुष्पादाः पशवः।
- <23.28.6> वाचा पशू.न्दाधार।
- <23.28.7> एताभी रात्रीभिः।
- <23.28.8> तस्मा.त्ते वाचा सिद्धा- वाचाऽऽहूता आ यन्ति।

## ताण्ड्य ब्राह्मणे चतुर्विंशोऽध्यायः

- <24.1.1> ❃ 24.1 अतिरात्र.स्त्रयः पञ्चाहा- विश्वजि.दतिरात्र- एकः पञ्चाहो- द्वादशाहस्य दशाहा-न्यतिरात्रः।
- <24.1.2> प्रजापतिः प्रजा असृजत- ता न प्रत्यतिष्ठं-स्ता एताभिः प्रत्यतिष्ठ,न्निमे लोका न प्रत्यतिष्ठं-स्त एताभिः प्रत्यतिष्ठ,न्प्रतिष्ठाकामा उपेयुः- प्रत्येव तिष्ठन्ति।

Sri Sacchidananda Avadhoota Datta Peetham • Mysore •

- <24.1.3> अरूपेण वा एता स्सरूपा- अरूपेण प्रजा स्सरूपा- अरूपेणेमे लोका स्सरूपा, यद्रथन्तरस्य लोकं बृह.दापद्यते- बृहतो रथन्तर,मरूपेणैवैभ्य-स्तत्सरूपं प्र जनयन्ति।
- <24.1.4> लुप्यते वा एत.त्षष्ठ.मह,र्यत्पञ्चाहा.नुपयन्ति- नर्तव॰ कल्पन्ते, यत्पृष्ठ्य.ष्षडह-स्तेन षष्ठ.मह.र्न लुप्यते, तेनर्तव॰ कल्पन्ते।
- <24.1.5> अथ यानि द्वादशाहस्य दशाहानि, तेन पञ्चाहेभ्यो न यन्ति।
- <24.1.6> ऊधर्वा अन्तरिक्षं स्तना.वभितो,ऽनेन वा एष देवेभ्यो दुग्धे-ऽमुना प्रजाभ्यः।
- <24.1.7> इदँ वा अन्तरिक्षँ विय-दिमौ स्तना.वभितः।
- <24.1.8> तदभ्यनूक्ता।
- <24.1.9> त्रिंशति त्रय॰ परो- ये देवा बर्हि.रासतव्य,न्न ह द्विता तनेति।
- <24.1.10> ऊधर्वै मध्यमोऽतिरात्र- स्स्तना.वभितः।
- <24.1.11> यदेषोऽनतिरात्र स्स्या-दूध॰ प्रति हरेत्।
- <24.1.12> तस्मा.दतिरात्र॰ कार्य- ऊधसोऽप्रतिहाराय।
- <24.1.13> त्रयस्त्रिंश.द्देवता एताभि.रार्ध्नुवं-स्तेनर्द्धि-स्तस्मा.देताभि.र्यजन्त- ऋद्ध्या एव।
- <24.1.14> नाना ब्रह्मसामा.न्युपय-न्त्यह्ना न्नानावीर्यतायै, नानैव वीर्याण्यव रुन्धते।
- <24.2.1> ❃ 24.2 अतिरात्रोऽभिप्लव ष्षडहो-ऽतिरात्रोऽभिप्लव ष्षडहो-ऽतिरात्रोऽभिप्लव ष्षडहो- द्वादशाहस्य दशाहानि- महाव्रत.श्चातिरात्रश्च।
- <24.2.2> आदित्याश्चाङ्गिरसश्चैत.त्सत्त्रं समदधता,ऽऽदित्याना.मेकविंशति-रङ्गिरसा न्द्वादशाह, आदित्या अस्मिन्लोक ऋद्धा- आदित्या अमुष्मि,-न्नङ्गिरसोऽस्मि-न्नङ्गिरसोऽमुष्मि,न्द्वयं सत्त्रँ, यावद्द्वयेन सत्त्रेणर्ध्नुवन्ति- तावत्येतासा.मृद्धिः।
- <24.3.1> ❃ 24.3 अतिरात्र-स्त्रय॰ पञ्चाहा- विश्वजि-दतिरात्र-स्त्रय॰ पञ्चाहा- अतिरात्रः।
- <24.3.2> अपशव्यँ वा एत.त्सत्त्रँ- यदछन्दोमँ, यद्विश्वजिति छन्दोमा.नुपयन्ति- तेन छन्दोमवत्य-स्तेन पशव्याः।
- <24.3.3> पक्षिण्यो वा एता रात्रयो, यङ्काम.ङ्कामयन्ते- तमेताभि.रभ्यश्नुवते, यत्र यत्र हि पक्षी कामयते- तत्त.दभ्यश्नुते।

- <24.3.4> त्रिवृता प्रयन्ति- त्रिवृतोद्यन्ति, प्राणा वै त्रिवृ.त्स्तोमानां- प्राणै.रेव प्रयन्ति- प्राणेषु प्रति तिष्ठन्ति।

- <24.4.1> ❃ 24.4 अतिरात्रो ज्योति.र्गौरायु.स्त्र्यह-स्त्रयोऽभिप्लवा ष्षडहा- द्वादशाहस्य दशाहानि- महाव्रत-श्चातिरात्र,श्चर्द्धिकामा उपेयुः।

- <24.4.2> एताभि.र्वै प्रजापति स्सर्वा.मृद्धि.मार्ध्नो,त्सर्वा.मृद्धि.मृध्नुवन्ति- य एता उपयन्ति।

- <24.4.3> यदेता.श्चतुस्त्रिंश.द्रात्रयो भवन्ति, त्रयस्त्रिंश.द्देवताᳲ- प्रजापति.श्चतुस्त्रिंशो देवतानां- प्रजापते.रेवर्द्धि.मृध्नुवन्ति।

- <24.5.1>❃ 24.5 अतिरात्रो- ज्योति.र्गौरायु- र्गौरायुᳲ पञ्चाह-स्त्रयोऽभिप्लवा ष्षडहा- द्वादशाहस्य दशाहा-न्यतिरात्रᳲ, पशुकामा उपेयुः।

- <24.5.2> यदेताᳲ पञ्चत्रिंश.द्रात्रयो भवन्ति- पाङ्क्ताᳲ पशवᳲ- पशू.न्नेवैताभि.रव रुन्धते।

- <24.6.1> ❃ 24.6 अतिरात्र-श्चत्वारोऽभिप्लवा.ष्षडहा- द्वादशाहस्य दशाहा-न्यतिरात्रᳲ, पशुकामा उपेयुः।

- <24.6.2> एताभि.र्वै देवा आदित्य.मस्तभ्नुव,न्नादित्यलोक.ञ्जयन्ति- य एता उपयन्ति।

- <24.6.3> बृहती वा एता रात्रय,स्स्वाराज्य.ञ्छन्दसां बृहती, यो वै पशूनां भूमान.ङ्गच्छति- स स्वाराज्य.ङ्गच्छति, प्र स्वाराज्य.माप्नुवन्ति- य एता उपयन्ति।

- <24.7.1> ❃ 24.7 एता एव समहाव्रताः।

- <24.7.2> एताभि.र्वै प्रजापति.रुभौ कामा.ववारुन्धा,ऽन्नँ व्रतं- पशवो बृह-त्युभा. वेवैताभिᳲ कामा.वव रुन्धते।

- <24.8.1> ❃ 24.8 अतिरात्रो- गौश्चाऽऽयुश्च द्वे अहनी- चत्वारोऽभिप्लवा ष्षडहा- द्वादशाहस्य दशाहा-न्यतिरात्रᳲ, पशुकामा उपेयुः।

- <24.8.2> यदेता अष्टात्रिंश.द्रात्रयो भव-न्त्यष्टाशफाᳲ पशव- श्शफश एवैताभिᳲ पशू.नव रुन्धते।

- <24.9.1> ❃ 24.9 अतिरात्रो- ज्योति.र्गौरायु.स्त्र्यह-श्चत्वारोऽभिप्लवा ष्षडहा- द्वादशाहस्य दशाहा-न्यतिरात्रः।

- <24.9.2> एताभि.र्वै प्रजापति.रनन्तां श्रिय.मजय,दनन्ता वा एता- या एकया न चत्वारिंश,न्नेति वै वाचोऽनन्तम्।
- <24.9.3> यदेता एकया न चत्वारिंश.द्रात्रयो भव-न्त्यनन्ता.मेवैताभि श्श्रिय.ञ्जयन्ति।
- <24.10.1> ❃ 24.10 एता एव समहाव्रताः।
- <24.10.2> सर्वा वा एता विराजो- दशिनी प्रथमा- विंशिनी द्वितीया- त्रिंशिनी तृती,यैषा वै परमा विरा-ड्यच्चत्वारिंश.द्रात्रयः, पङ्क्तिर्वै परमा विराट्।
- <24.10.3> परमाया.मेव विराजि प्रति तिष्ठन्ति।
- <24.11.1> ❃ 24.11 अतिरात्र-स्त्रीणि त्रिवृ.न्त्यहा.न्यग्निष्टोम.मुखा-न्यतिरात्रो- दश पञ्चदशा उक्थ्या-ष्षोडशिम.द्दशम.मह-रतिरात्रो- द्वादश सप्तदशा उक्थ्या- अतिरात्रः-पृष्ठ्य.ष्षडहो-ऽतिरात्रो- द्वादशैकविंशा उक्थ्या- अतिरात्रः।
- <24.11.2> प्रजापतिः प्रजा असृजत- ता अविधृता असञ्ज्ञानाना अन्योन्या.मादं,स्तेन प्रजापति.रशोच-त्स एता अपश्य-त्ततो वा इदँ व्यावर्तत- गावो गावोऽभव-न्नश्वा अश्वाः- पुरुषाः पुरुषा- मृगा मृगाः।
- <24.11.3> वि पाप्मना वर्तन्ते- य एता उपयन्ति।
- <24.11.4> यदतिरात्रा अन्तरा विधृत्यै- तस्मा.न्नेतर इतरस्मि.न्रेतो दधाति।
- <24.11.5> यत्पृष्ठ्या स्स्तोमा स्संसृष्टा-स्तस्मा.दजावयः पशूनां सह चरन्ति, तस्मादु गर्दभो वडवायां रेतो दधाति।
- <24.11.6> अपशव्यँ वा एत.त्सत्त्रँ- यदछन्दोमँ, यत्सन्धिषामसु च्छन्दां.स्युपयन्ति- तेन छन्दोमवत्य-स्तेन पशव्याः।
- <24.11.7> गायत्रीषु जराबोधीय-मुष्णिक्षु श्रुध्य-मनुष्टुप्सु नानदं- बृहतीषु रथन्तरं- पङ्क्तिषु रायोवाजीय-न्त्रिष्टुप्स्वौशन-ञ्जगतीषु कावम्।
- <24.11.8> ऊर्ध्वानि च्छन्दां.स्युपय-न्त्यनपभ्रंशाय।
- <24.11.9> प्राणो वै स्वरो, यत्स्वरा.वन्ततो भवत-स्तस्माद्वा.वन्ततः प्राणौ।

- <24.12.1> ❉ 24.12 अतिरात्रौ- द्वा.वभिप्लवौ षडहौ- गौश्चा॒ऽयु.श्चातिरात्रौ- द्वा.वभिप्लवौ षडहा-वभिजिच्च विश्वजि-च्चातिरात्रा-वेकोऽभिप्लव ष्षडह- स्सर्वस्तोमश्च नव सप्तदश- श्चातिरात्रो- द्वादशाहस्य दशाहानि- महाव्रत-श्चातिरात्रश्च।
- <24.12.2> आदित्यानाँ य.मातिरात्राः।
- <24.12.3> य.मेवैषा श्रीर्भवति- य एता उपयन्ति।
- <24.12.4> एताभिर्वा आदित्या द्वन्द्व.मार्ध्नुव,न्मित्रश्च वरुणश्च- धाता चार्यमा- चांशश्च भग-श्चेन्द्रश्च विवस्वां,श्चैतासा.मेव देवताना.मृद्धि.मृध्नुवन्ति- य एता उपयन्ति।
- <24.12.5> त.दभ्यनूक्ता।
- <24.12.6> अष्टौ पुत्रासो अदिते-र्ये जाता.स्तन्वं परि- देवा॰ उप प्रै.त्सप्तभि४- परा मार्ताण्ड मा॒ऽस्य.दिति।
- <24.12.7> आदित्या अस्मि.न्लोक ऋद्धा- आदित्या अमुष्मि,न्नुभयो.रनयो.र्लोकयो. र्ऋध्नुवन्ति- देवलोके च मनुष्यलोके च- य एता उपयन्ति।
- <24.13.1> ❉ 24.13 अतिरात्र-श्चत्वारोऽभिप्लवा ष्षडहा- स्सर्वस्तोमोऽतिरात्रो- द्वावभिप्लवौ षडहौ- द्वादशाहस्य दशाहा.न्यतिरात्रः।
- <24.13.2> प्रजापति४ प्रजा असृजत- स रूक्षोऽभव-त्तं रूक्ष.न्नाजन,न्त्स आ चा॒ऽङ्क्ताभि चा॒ऽङ्क्त।
- <24.13.3> य आत्मान न्नेव जानीरं-स्त एता उपेयु,र्यदा चा॒ऽञ्जतेऽभि चा॒ऽञ्जते- शुभ.मेवात्म.न्दधते- जान.न्त्येनान्।
- <24.13.4> गौग्गुलवेन प्रातस्सवने- सौगन्धिकेन माध्यन्दिने सवने- पैतुदारवेण तृतीयसवने।
- <24.13.5> अग्निर्वै देवानां हौत्र.मुपैष्य.ञ्छरीर.मधूनुत, तस्य यन्मांस मासी- त्तद्गुल्गु.ल्वभव,द्यत्स्नाव- तत्सुगन्धि.तेजनँ, यदस्थि- तत्पोतुदा,र्वैतानि वै देवसुरभीणि, देवसुरभिभि.रेव तद.भ्यञ्जते।
- <24.14.1>❉ 24.14 अतिरात्र-श्चतुर्विंशं प्रायणीय.मह-स्त्रयोऽभिप्लवा ष्षडहा- अभिजि-त्त्रय स्स्वरसामानो- दिवाकीर्त्य.मह-स्त्रय स्स्वरसामानो- विश्वजि-देकोऽभिप्लव ष्षडह-

Sri Satchidananda Avadhoota Datta Peetham • Mysore •

आयुश्च गौश्च द्वे अहनी- द्वादशाहस्य दशाहानि- महाव्रत-ञ्चातिरात्रश्च, सँवत्सरसंमिता यावती सँवत्सरस्यर्द्धि-स्ताव.त्येतासा.मृद्धिः।

- <24.14.2> तदाहु-र्यच्चतुर्विंश.मह॰ प्रायणीय.ङ्कुर्यु- स्सँवत्सर.मारभ्य न समापयेयु.रिति, त्रिवृ.देव कार्यं- प्राणा वै त्रिवृ-त्प्राणा.नेवोप यन्ति।
- <24.14.3> अथो खल्वाहु,श्चतुर्विंश.मेव कार्यं- समृद्ध्यै।
- <24.14.4> अथैते स्वरसामान,श्शिरो वै दिवाकीर्त्यं- प्राणा स्स्वरसामानो, यद्दिवाकीर्त्य.मभित स्स्वरसामानो भवन्ति- शिरस्येव तत्प्राणा धीयन्ते।
- <24.14.5> अथ या.वन्त्यौ प्राणौ- तौ विश्वजि.दभिजिता,वथैते गोआयुषी मिथुनौ, स्तोमा.वुपयन्ति- प्रजात्यै।
- <24.14.6> अथैतानि द्वादशाहस्य दशाहानि- वाच.मविच्छिन्ना.मुप यन्ति प्रजननाय।
- <24.14.7> अथैत.द्व्रत,मन्नँ वै व्रत- न्न वा अन्यत्र मुखा.दन्न.न्धिनोति, यदुपरिष्टा.द्व्रत.मुपयन्ति- मुखत एव तदन्नाद्य.न्धीयते- तस्मा.न्मुखे सदन्न.न्धिनोति।
- <24.14.8> अथैतौ प्रायणीयोदयनीया.वतिरात्रौ- येनैव प्राणेन प्रयन्ति- तमभ्युद्यन्ति।
- <24.15.1>❈ 24.10 अतिरात्रो- नव त्रिवृ.न्त्यहा-न्यग्निष्टोम.मुख.ष्षडहो,ऽथ यानि त्रीण्यहा.न्यग्निष्टोमा.वभित- उक्थ्यं मध्यतो- नव पञ्चदशा.न्यहा-न्यग्निष्टोममुख ष्षडहो,-ऽथ यानि त्रीण्यहा-न्यग्निष्टोमा.वभित- उक्थ्यं मध्यतो- नव सप्तदशा.न्यहा- न्यग्निष्टोममुख ष्षडहो,ऽथ यानि त्रीण्यहा-न्यग्निष्टोमा.वभित- उक्थ्यं मध्यतो- नवैकविंशा.न्यहा-न्यग्निष्टोममुख ष्षडहो,ऽथ यानि त्रीण्यहा-न्यग्निष्टोमा.वभित- उक्थ्यं मध्यतो- द्वादशाहस्य दशाहानि- महाव्रत- ञ्चातिरात्रश्च।
- <24.15.2> एताभि.र्वै सविता सर्वस्य प्रसव.मगच्छत्।
- <24.15.3> सर्वस्य प्रसव.ङ्गच्छन्ति- य एता उपयन्ति।
- <24.15.4> यद्गणश स्स्तोमा- बहव एव भवन्ति, सह त्रिवृत- स्सह पञ्चदशा- स्सह सप्तदशा- स्सहैकविंशा, स्सवितुर्वा एता॰ ककुभः।
- <24.15.5> ककुभ स्समानानाञ्च प्रजानाञ्च भवन्ति- य एता उपयन्ति।
- <24.16.1>❈ 24.16 अतिरात्र-श्चत्वारोऽभिप्लवा ष्षडहा- महाव्रत- न्द्वा.वभिप्लवौ षडहौ- द्वादशाहस्य दशाहा-न्यतिरात्रः।

- <24.16.2> ऋतवो न प्रत्यतिष्ठं-स्त एताभि॰ प्रत्यतिष्ठ,न्प्रतिष्ठाकामा उपेयुः।
- <24.16.3> प्रत्येव तिष्ठन्ति, षड्वा ऋतव- ऋतु.ष्वेवैताभि॰ प्रति तिष्ठन्ति, यत्क्लृप्ता.न्त्षडहा नुपयन्ति- क्लृप्त्या एव।
- <24.16.4> अथैत.द्व्रत,मन्नँ वै व्रत-न्न वा अन्यत्र मध्या.दन्न न्धिनोति, यद्व्रतं मध्यत उपयन्ति- मध्यत एव तदन्नाद्य न्धीयते- तस्मा.न्मध्ये सदन्न न्धिनोति।
- <24.16.5> यत्क्लृप्तौ षडहा.वुपयन्ति- क्लृप्त्या एव।
- <24.16.6> अथैतानि द्वादशाहस्य दशाहानि- वाच.मविच्छिन्ना.मुपयन्ति- प्रजननाया,ऽथैतौ प्रायणीयोदयनीया.वतिरात्रौ- येनैव प्राणेन प्रयन्ति- तमभ्युद्यन्ति।
- <24.17.1>❃ 24.17 अतिरात्र- ष्षडभिप्लवा ष्षडहा- द्वादशाहस्य दशाहानि- महाव्रत श्चातिरात्रश्च।
- <24.17.2> एताभिर्वा इन्द्राग्नी अत्यन्या देवता अभवता,मत्यन्या॰ प्रजा भवन्ति- य एता उपयन्ति।
- <24.17.3> इन्द्राग्नी वै देवाना.मोजिष्ठा, ओजिष्ठा भवन्ति- य एता उपयन्ति।
- <24.17.4> यत्क्लृप्ता.न्त्षडहा.नुपयन्ति- क्लृप्त्या एवा,ऽथैतानि द्वादशाहस्य दशाहानि वाच.मविच्छिन्ना.मुपयन्ति प्रजननाया,ऽथैत.द्व्रत-मथैतौ प्रायणीयोदयनीया.वतिरात्रौ-येनैव प्राणेन प्रयन्ति- तमभ्युद्यन्ति।
- <24.18.1> ❃ 24.18 अतिरात्र-श्चतुर्विंशं प्रायणीय.मह-स्त्रयोऽभिप्लवा ष्षडहा॰- पृष्ठ्य.ष्षडहो-ऽभिजि-त्त्रय.स्स्वरसामानो- दिवाकीर्त्य.मह-स्त्रय स्स्वरसामानो- विश्वजि-त्पृष्ठ्य.ष्षडह-स्त्रयस्त्रिंशाऽऽरम्भण- एकोऽभिप्लव ष्षडह- आयुश्च गौश्च द्वे अहनी- द्वादशाहस्य दशाहानि- महाव्रत-श्चातिरात्रश्च- तदेत.देकषष्टि.रात्र-न्दैवानाँ व्रात्यानाम्।
- <24.18.2> दैवा वै व्रात्या.स्सत्त्र.मासत- बुधेन स्थपतिना, ते ह वा अनिर्याच्य वरुणं राजान.न्देवयजन न्दिदीक्षु,स्तान् ह वा वरुणो राजाऽनु व्याजहारा,ऽन्त.रेमि वो यज्ञिया.द्भागधेया-न्न देवयानं पन्थानं प्रज्ञास्यथेति, तस्मा.त्तेभ्यो न हवि.र्गृह्णन्ति-न ग्रहम्।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

- <24.18.3> अथ ह वै तर्हि नौषधीषु पय आसी-न्न क्षीरे सर्पि-र्न मांसे मेदो- न त्वचि लोमानि- न वनस्पतिषु पलाशानि, तद्यत एत.देकषष्टिरात्र न्दैवा व्रात्या उपाऽऽयं,स्ततो वै तानि भूता.न्येतै.र्वीर्यै स्समसृज्यन्त- तेजस्व.न्त्येवास.न्पयस्वन्ति।
- <24.18.4> तदेष श्लोकोऽभ्यनूच्यते।
- <24.18.5> किमकर्तेति यत्पुत्रा.न्मुहु.र्दैवा॰ अपृच्छत। मही बुधस्याऽऽसी-द्दीक्षा स क्षीरे सर्पि.राऽहरत्।
- <24.18.6> मही.न्दीक्षां सौमायनो बुधो य.दुदयच्छत्। अनन्द्.त्सर्व.माप्नो-न्मन्मांसे मेदोऽधा इति।
- <24.18.7> दरिद्रा आस.न्पशवः- कृशा स्सन्तो व्यस्थकाः। सौमायनस्य दीक्षायां समसृज्यन्त मेदसेति।
- <24.18.8> तद्य एत.देकषष्टि.रात्र.मुपेयु-स्ते देवयजन.मध्यवसाय- गार्हपत्य आहुति ञ्जुहुयु- र्देव वरुण देवयजन.न्नो देहि स्वाहेति, ते दत्ते देवजने यजन्ते।
- <24.18.9> ते सर्वा.मृद्धि.मार्ध्नुव,न्त्सर्वा.मृद्धि.मृध्नुवन्ति- य एत.दुपयन्ति।
- <24.19.1>❃ 24.19 अतिरात्रो- ज्योति.र्गौरायु.स्त्र्यह-श्चतुर्दशाभिप्लवा ष्षडहा- द्वादशाहस्य दशाहानि- महाव्रत-श्चातिरात्रश्च।
- <24.19.2> देवा वै मृत्यो.रबिभयु,स्ते प्रजापति.मुपाधावं-स्तेभ्य एतेन शतरात्रेणामृतत्वं प्रायच्छ-देत.द्वाव मनुष्यस्यामृतत्वँ- यत्सर्व.मायु.रेति- वसीया.न्भवति, सर्व.मायु.र्यन्ति- वसीयांसो भवन्ति- य एत.दुपयन्ति।
- <24.19.3> अभिप्रयाय.मभिषुण्व-न्त्यभिक्रान्त्यै, समान.त्राभिषुण्वन्ति प्रतिष्ठित्यै।
- <24.20.1> ❃ 24.20 अतिरात्र-श्चतुर्विंशं प्रायणीय.मह-श्चत्वारोऽभिप्लवा ष्षडहाः- पृष्ठ्य.ष्षडह- स्स मास- स्स द्वितीय- स्स तृतीय- स्स चतुर्थ- स्स पञ्चम-स्त्रयोऽभिप्लवा ष्षडहाः- पृष्ठ्य.ष्षडहो-ऽभिजि,त्त्रय स्स्वरसामानो- दिवाकीर्त्य.मह-स्त्रय स्स्वरसामानो- विश्वजि-त्पृष्ठ्य.ष्षडह-स्त्रयस्त्रिंशाऽऽरम्भण-स्त्रयोऽभिप्लवा ष्षडहाः- पृष्ठ्य.ष्षडह- स्त्रयस्त्रिंशाऽऽरम्भण-श्चत्वारोऽभिप्लवा ष्षडहा- स्स मास- स्स द्वितीय- स्स तृतीय- स्स चतुर्थ- स्त्रयोऽभिप्लवा ष्षडहा, आयुश्च गौश्च द्वे अहनी- द्वादशाहस्य दशाहानि- महाव्रत-श्चातिरात्रश्च।

• <24.20.2> सँवत्सरब्राह्मणं ब्राह्मणम्।

## ताण्ड्यब्राह्मणे पञ्चविंशोऽध्यायः

• <25.1.1>❃ 25.1 अतिरात्र-श्चतुर्विंशं प्रायणीय.मह-र्द्वौ त्रिवृ.त्पञ्चदशौ षडहौ-पृष्ठ्य.ष्षडहो- द्वौ त्रिवृ.त्पञ्चदशौ षडहौ- स मास- स्स द्वितीय- स्स तृतीय- स्स चतुर्थ- स्स पञ्चम-स्त्रय.स्त्रिवृ.त्पञ्चदशा षडहाᳶ- पृष्ठ्य.ष्षडह-स्त्रिवृ.द्बृहस्पतिस्तोम-स्त्रय स्स्वरसामानो-दिवाकीर्त्य.मह-स्त्रय स्स्वरसामानᳶ- पञ्चदश इन्द्रस्तोम उक्थ्यᳶ- पृष्ठ्य ष्षडह-स्त्रयस्त्रिंशाऽऽरम्भण- एकᳶ पञ्चदश-स्त्रिवृ.त्षडहो- द्वादशाहस्य दशाहानि- व्यूढा अग्निष्टोमा.स्त्रिवृत- उद्भिच्च बलभिच्च द्वे अहनी- द्वौ पञ्चदश.त्रिवृतौ षडहौ- पृष्ठ्य.ष्षडहो- द्वौ पञ्चदश.त्रिवृतौ षडहौ- स मास- स्स द्वितीय- स्स तृतीय- स्स चतुर्थᳶ- पञ्चदश.त्रिवृ.त्षडहᳶ-पृष्ठ्य.ष्षडहᳶ- पञ्चदश.त्रिवृ.त्षडहो- गौश्चाऽऽयुश्च द्वे अहनी- छन्दोम.दशाहो-ऽष्टाचत्वारिंशं प्रथम.मह,-रथ चतुश्चत्वारिंशं- चत्वारिंशं- षट्त्रिंशं- द्वात्रिंशं- त्रिंश.न्द्वे अष्टाविंशे- पञ्चविंश-श्चतुर्विंशं- महाव्रत-श्चातिरात्रश्च।

• <25.1.2> आदित्यानां मध्ये.पृष्ठ्यम्।

• <25.1.3> मध्ये.पृष्ठ्येन वा आदित्या स्स्वर्गँ लोक.माऽक्रमन्त, यन्मध्ये.पृष्ठा.न्युपयन्ति-स्वर्गस्य लोकस्याऽऽक्रान्त्यै।

• <25.1.4> अन्नँ वै पृष्ठा-न्यन्न.मेव तन्मध्यतो धीयते, तस्मा.न्मध्ये सदन्न.न्धिनोति।

• <25.1.5> पशवᳶ पृष्ठानि- पशुष्वेव प्रति तिष्ठन्ति।

• <25.1.6> चक्रे वा एते साकँवृती-यत्त्रिवृ.त्पञ्चदशौ स्तोमौ, यङ्काम.ङ्कामयन्ते-तमेतेना.भ्यश्नुवते, यत्र यत्र हि चक्रीवता कामयते- तत्तद.भ्यश्नुते।

• <25.1.7> अथैष त्रिवृ.द्बृहस्पतिस्तोम, एतेन वै बृहस्पति.र्देवानां पुरोधा.मगच्छ,-त्पुरोधाकामा उपेयु-र्गच्छन्ति पुरोधां- पुर एना.न्दधते।

• <25.1.8> अथैते स्वरसामान, श्शिरो वै दिवाकीर्त्यं- प्राणा स्स्वरसामानो, यद्दिवाकीर्त्य.मभित स्स्वरसामानो भवन्ति- शिरस्येव तत्प्राणा धीयन्ते।

• <25.1.9> अथैष पञ्चदश इन्द्रस्तोम उक्थ्य, एतेन वा इन्द्रोऽत्यन्या देवता अभव,-दत्यन्याᳶ प्रजा भवन्ति- य एत.दुपयन्ति।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

- <25.1.10> अथैतानि द्वादशाहस्य दशाहानि- व्यूढा अग्निष्टोमा.स्त्रिवृतो, मध्यतꣳ पाप्मनो मुच्यन्त, -एष वाव देवतल्पो, देवतल्पमेव तदा.रोहन्ति- तल्प्या भवन्ति- प्र वसीयस.स्तल्प.माप्नुवन्ति।
- <25.1.11> अथैता.वुद्भि.द्बलभिदा,वेताभ्याँ वै बृहस्पति.र्दैवेभ्यꣳ पशू.नुदसृज,-त्पशू.नेवैताभ्या.मुत्सृजन्ते।
- <25.1.12> अथैते गो आयुषी, मिथुनौ स्तोमा.वुपयन्ति- प्रजात्यै।
- <25.1.13> अथैष च्छन्दोम.दशाह-श्छन्दसा न्दोहो,ऽर्वाञ्चि च्छन्दां.स्युपयन्ति, तस्मा.दर्वाञ्चो भुञ्जन्तꣳ पशव उप तिष्ठन्ते।
- <25.1.14> अथै.द्व्रत,मन्नँ वै व्रत-न्न वा अन्यत्र मुखा.दन्न न्धिनोति, यदुपरिष्टा.द्व्रत मुपयन्ति- मुखत एव तदन्नाद्य न्धीयते, तस्मा.न्मुखे सदन्न.न्धिनोति।
- <25.1.15> अथैतौ प्रायणीयोदयनीया.वतिरात्रौ, येनैव प्राणेन प्रयन्ति- तमभ्युद्यन्ति।
- <25.2.1> ❃ 25.2 अतिरात्र-श्चतुर्विंशं प्रायणीय.महꣳ- पृष्ठ्य.ष्षडह-श्चत्वार.स्त्रिवृतोऽभिप्लवा ष्षडहा- स्स मास- स्स द्वितीय- स्स तृतीय- स्स चतुर्थ- स्स पञ्चम-स्त्रय.स्त्रिवृतोऽभिप्लवा ष्षडहाꣳ- पृष्ठ्य.ष्षडह-स्त्रिवृ.द्बृहस्पतिस्तोम-स्त्रय स्स्वरसामानो-दिवाकीर्त्य.मह-स्त्रय स्स्वरसामानꣳ- पञ्चदश इन्द्रस्तोम उक्थ्यꣳ- पृष्ठ्य षडह-स्त्रयस्त्रिंशाꣳरम्भण- एक.स्त्रिवृ.दभिप्लव ष्षडहो- द्वादशाहस्य दशाहानि- व्यूढा अग्निष्टोमा.स्त्रिवृत-उद्भिच्च बलभिच्च द्वे अहनी- चत्वार.स्त्रिवृतोऽभिप्लवा ष्षडहाꣳ- पृष्ठ्य.ष्षडह- स्स मास- स्स द्वितीय- स्स तृतीय- स्स चतुर्थो- द्वौ त्रिवृता.वभिप्लवौ षडहौ- पृष्ठ्य.ष्षडह- आयुश्च गौश्च द्वे अहनी- छन्दोम.दशाह-श्चतुर्विंशं प्रथम.मह-र्द्वे अष्टाविंशे- त्रिंश-न्द्वात्रिंशं- षट्त्रिंश-ञ्चत्वारिंश-ञ्चतुश्चत्वारिंश-मष्टाचत्वारिंश-ञ्चतुर्विंशं- महाव्रत-ञ्चातिरात्र-श्चाङ्गिरसां पुरस्ता.त्पृष्ठ्यम्।
- <25.2.2> पुरस्ता.त्पृष्ठ्येन वा अङ्गिरस स्स्वर्गँ लोक.माऽक्रमन्त, यत्पुरस्ता.त्पृष्ठा.न्युपयन्ति- स्वर्गस्य लोकस्याꣳक्रान्त्यै।
- <25.2.3> अन्नँ वै पृष्ठा-न्यन्न.मेव तन्मुखतो धीयते- तस्मा.न्मुखे सदन्न न्धिनोति, पशवꣳ पृष्ठानि- पशुष्वेव प्रति तिष्ठन्ति।
- <25.2.4> यदन्यच्चक्राभ्यां साकवृद्ध्या- न्तत्समान-मा छन्दोम.दशाहात्।

- <25.2.5> अथैष च्छन्दोम.दशाह-श्छन्दसा.न्दोह, ऊर्ध्वानि च्छन्दांस्युप यन्त्यनपभ्रंशा,यैष वाव देवयानः पन्थाः- प्र देवयानं पन्थान.माप्नुवन्ति- य एत.दुपय,न्त्यथैत.द्व्रतम्।
- <25.2.6> अथैतौ प्रायणीयोदयनीया.वतिरात्रौ, येनैष प्राणेन प्रयन्ति- तमभ्युद्यन्ति।
- <25.3.1>❃ 25.3 अतिरात्र-स्त्रिवृता मासं- पञ्चदशेन मासं- सप्तदशेन मास-मेकविंशेन मास- न्त्रिणवेन मास- न्त्रयस्त्रिंशेन मासं- महाव्रत- न्त्रयस्त्रिंशेन मास- न्त्रिणवेन मास-मेकविंशेन मासं- सप्तदशेन मासं- पञ्चदशेन मास- न्त्रिवृता मास-मतिरात्रः।
- <25.3.2> ऋतवो न प्रत्यतिष्ठं-स्त एतेन प्रत्यतिष्ठ,न्प्रतिष्ठाकामा उपेयुः- प्रत्येव तिष्ठन्ति, षड्वा ऋतव- ऋतुष्वेवैतेन प्रति तिष्ठन्ति।
- <25.3.3> यद्व्रतं मध्यत उपयन्ति- मध्यत एव तदन्नाद्य.न्धीयते- तस्मा.न्मध्ये सदन्न.न्धिनोति।
- <25.3.4> पक्षि वा एत.त्सत्त्रायणँ, यङ्काम.ङ्कामयन्ते- तमेतेना.भ्यश्नुवते, यत्र यत्र हि पक्षी कामयते- तत्तद.भ्यश्नुते।
- <25.3.5> त्रिवृता प्रयन्ति- त्रिवृतोद्यन्ति, प्राणा वै त्रिवृ.त्स्तोमानां- प्राणै.रेव प्रयन्ति- प्राणेषु प्रति तिष्ठन्ति।
- <25.3.6> एतद्वै दृति.वातवन्तौ खाण्डव उपेतो, विषुवति वातवा.नुत्तिष्ठति- समापयति दृति,स्तस्मा.त्तनीयांसो वातवता- भूयांसो दार्तेयाः।
- <25.4.1> ❃ 25.4 मास.न्दीक्षिता भवन्ति, ते मासि सोम.ङ्क्रीणन्ति, तेषा.न्द्वादशोपसद, उपसद्भि.श्चरित्वा- सोम.मुपनह्य- मास.मग्निहोत्र ञ्जुह्वति- मास न्दर्शपूर्णमासाभ्याँ यजन्ते- मासँ वैश्वदेवेन- मासँ वरुणप्रघासै-र्मासं साकमेधै-र्मासं शुनासीर्येण त्रिवृता- मासं पञ्चदशेन- मासं सप्तदशेन- मास.मेकविंशेन- मास न्त्रिणवेन- मास.मष्टादश- त्रयस्त्रिंशा.न्यहानि- द्वादशाहस्य दशाहानि- महाव्रत-ञ्चातिरात्रश्च।
- <25.4.2> अग्निहोत्र न्दशहोता- दर्शपूर्णमासौ चतुर्होता- चातुर्मास्यानि पञ्चहोता- सौम्योऽध्वर स्सप्तहोता।
- <25.4.3> एते वाव सर्वेण यज्ञेन यजन्ते- य एत.दुपयन्ति- सर्व एव भवन्ति।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

- <25.4.4> ते सर्वे कुण्डपायिनोऽत्सरुकै.श्चमसै.र्भक्षयन्ति।

- <25.4.5> यो होता- सोऽध्वर्यु- स्स पोता, य उद्गाता- स नेष्टा- सोऽच्छावाको, यो मैत्रावरुण- स्स ब्रह्मा- स प्रतिहर्ता, यः प्रस्तोता- स ब्राह्मणाच्छंसी- स ग्रावस्तु,द्यः प्रतिप्रस्थाता- सोऽग्नी-त्स उन्नेता, गृहपति.र्गृहपति,स्सुब्रह्मण्य.स्सुब्रह्मण्यः।

- <25.5.1> ❃ 25.5 सँवत्सर न्दीक्षिता भवन्ति- सँवत्सर.मुपसद्भि.श्चरन्ति- सँवत्सरं प्रसुतो भवति।

- <25.5.2> तत्सँवत्सर न्दीक्षिता भवन्ति- तप एव तेन तप्यन्ते, यत्सँवत्सर मुपसद्भि श्चरन्ति- पुनत एव तेन, यत्सँवत्सरं प्रसुतो भवति- देवलोक.मेव तेनापि यन्ति।

- <25.5.3> एतेन वै तपश्चितो देवा स्सर्वा.मृद्धि.मार्ध्नुव,न्त्सर्वा.मृद्धि.मृध्नुवन्ति- य एत.दुपयन्ति।

- <25.6.1>❃ 25.6 त्रय.स्त्रिवृत स्सँवत्सरा-स्त्रयः पञ्चदशा-स्त्रय स्सप्तदशा-स्त्रय एकविंशाः, प्रजापते.र्द्वादश.सँवत्सरम्।

- <25.6.2> एतेन वै प्रजापति स्सर्वस्य प्रसव.मगच्छ,त्सर्वस्य प्रसव.ङ्गच्छन्ति- य एत.दुपयन्ति।

- <25.6.3> यत्त्रय.स्त्रिवृत स्सँवत्सरा भवन्ति- तेजो ब्रह्मवर्चस.न्त्रिवृ-त्तेज एव ब्रह्मवर्चस मव रुन्धते, यत्त्रयः पञ्चदशा- ओजो वीर्यं पञ्चदश- ओज एव वीर्य.मव रुन्धते, यत्त्रय स्सप्तदशा- अन्नँ वै सप्तदशो-ऽन्नाद्य.मेवाव रुन्धते, यत्त्रय एकविंशाः- प्रतिष्ठा वा एकविंशो-ऽन्तत एव यज्ञस्य प्रति तिष्ठन्ति।

- <25.6.4> एतेन वै नैमिशीया स्सर्वा.मृद्धि.मार्ध्नुव,न्त्सर्वा.मृद्धि.मृध्नुवन्ति- य एत.दुपयन्ति।

- <25.6.5> ते ह सप्तदशेभ्य एवाध्युत्तस्थु,स्त उ होचु-र्यो नः प्रजाया.मृध्यातै- स एत.त्सत्त्रं समापया.दिति, तदेत.त्समीप्सन्तो ब्राह्मणा.स्सत्त्र.मासते।

- <25.7.1> ❃ 25.7 नव त्रिवृत स्सँवत्सरा- नव पञ्चदशा- नव सप्तदशा- नवैकविंशा- श्शाक्त्यानां षड्त्रिंश.त्सँवत्सरम्।

• <25.7.2> एतेन वै गौरीविति श्शाक्त्य.स्तरसपुरोडाशो यव्यावत्यां सर्वा.मृद्धि.मार्ध्नो,-त्सर्वा.मृद्धि.मृध्नुवन्ति- य एत.दुपयन्ति।

• <25.7.3> बृहती वा एत.त्सत्त्रायणं, स्वाराज्य.ञ्छन्दसां बृहती, प्र स्वाराज्य.माप्नुवन्ति- य एत.दुपयन्ति।

• <25.7.4> तदेत.च्छाक्त्यानां दशवीर,मेषा न्दश वीरा जायन्ते- य एत.दुपयन्ति।

• <25.8.1>❁ 25.8 पञ्चविंशति.स्त्रिवृत स्सँवत्सरा꞉- पञ्चविंशति꞉ पञ्चदशा꞉- पञ्चविंशति स्सप्तदशा꞉- पञ्चविंशति.रेकविंशा, स्साध्यानां शतसँवत्सरम्।

• <25.8.2> साध्या वै नाम देवेभ्यो देवा꞉ पूर्व आसं,स्त एत.त्सत्त्रायण.मुपाऽयं-स्तेनाऽर्ध्नुवं,स्ते सगव स्सपुरुषा स्सर्व एव सह स्वर्गँ लोक.माय,न्नेवँ वाव ते सह स्वर्गँ लोकँ यन्ति- य एत.दुपयन्ति।

• <25.8.3> आयुर्वा एत.त्सत्त्रायणं, शताऽयु꞉ पुरुषो, याव.देवाऽयु-स्तदव रुन्धते, न ह्यत्यायुषं सत्त्र.मस्ति।

• <25.8.4> तदभ्यनूक्ता, तानीदहानि बहुला.न्यासन्- या प्राचीन.मुदिता सूर्यस्य। यत꞉ परि जार इवाऽचर-न्त्युषा दाहृशे न पुनर्यतीवेति।

• <25.8.5> ज्योतिष्टोमस्यायनेन यन्ति- ज्योति.रेव भवन्ति।

• <25.8.6> एकविंशोऽन्तत स्स्तोमानां भवति, प्रतिष्ठा वा एकविंशो-ऽन्तत स्स्तोमानां भवति, प्रतिष्ठा वा एकविंशो-ऽन्तत एव यज्ञस्य प्रति तिष्ठन्ति।

• <25.9.1> ❁ 25.9 अतिरात्र स्सहस्र.महा-न्यतिरात्रोऽग्ने स्सहस्र.साव्यम्।

• <25.9.2> एतेन वा अग्नि स्सर्वस्य प्रसव.मगच्छ,त्सर्वस्य प्रसव ङ्गच्छन्ति- य एत.दुपयन्ति।

• <25.9.3> अग्ने.र्वै सर्व.माद्यं, सर्व.मेषा.माद्यं भवति- य एत.दुपयन्ति।

• <25.9.4> अथ य.त्सहस्रसाव्यं भवति- सहस्राक्षरा वै परमा विरा-ड्परमाया.मेव विराजि प्रति तिष्ठन्ति।

• <25.10.1> ❁ 25.10 सरस्वत्या विनशने दीक्षन्ते।

• <25.10.2> तेषा.न्द्वादश दीक्षा- द्वादशोपसदः।

- <25.10.3> यदह.रतिरात्रो भवति- तदह.र्वत्सा.नपाकुर्वन्ति, संस्थितेऽतिरात्रे सान्नाय्येन यजन्ते।
- <25.10.4> सान्नाय्येनेष्ट्वाऽध्वर्यु श्शम्यां पराऽस्यति, सा यत्र निपतति- तद्गार्हपत्य,स्तत ष्षट्त्रिंशतं प्रक्रमा.न्प्रक्रमति- तदाहवनीयः।
- <25.10.5> चक्रीव.त्सद-श्चक्रीव.द्धविर्धान- श्चक्रीव.दाग्नीध्र-मुलूखल.बुध्नो यूप४- प्रकृष्य उपोप्त एव- नोपरवा.न्खनन्ति।
- <25.10.6> ते त.मापूर्यमाण.मामावास्येन यन्ति।
- <25.10.7> तेषां पौर्णमास्या.ङ्गोष्टोम.स्तोमो भव-त्युक्थ्यो बृहत्सामा।
- <25.10.8> संस्थिते गोष्टोमे पौर्णमास.न्निर्वपन्ते, ते त.मपक्षीयमाणं पौर्णमासेन यन्ति, तेषा.ममावास्याया.मायुष्टोम.स्स्तोमो भव-त्युक्थ्यो रथन्तर.सामा।
- <25.10.9> मित्रावरुणयो.रयनम्।
- <25.10.10> एतेन वै मित्रावरुणा.विमा.न्लोका.नाऽजयता,महोरात्रौ वै मित्रावरुणा- वह.र्मित्रो- रात्रि.र्वरुणो,ऽर्धमासौ वै मित्रावरुणौ- य आपूर्यते स मित्रो- योऽपक्षीयते स वरुण,स्स एष मित्रो वरुणे रेत स्सिञ्चति।
- <25.10.11> सरस्वत्या वै देवा आदित्य.मस्तभ्नुव,न्त्सा नायच्छ-त्साऽभ्यव्लीयत, तस्मा.त्सा कुब्जिमतीव, तं बृहत्याऽस्तभ्नुव-न्त्साऽयच्छ-त्तस्मा.द्बृहती छन्दसाँ वीर्यवत्तमा,ऽऽदित्यं हि तयाऽस्तभ्नुवन्।
- <25.10.12> प्रतीपँ यन्ति- न ह्यन्वीप,मष्ट वै पूर्वेण पक्षसा यन्ति।
- <25.10.13> तद्धि प्रत्येकाऽप्येति।
- <25.10.14> दृषद्वत्येव।
- <25.10.15> दृषद्वत्या अप्ययेऽपोनप्त्रीय.ञ्चरुं निरुप्या,ऽथातियन्ति।
- <25.10.16> चतुश्चत्वारिंश.दाश्वीनानि सरस्वत्या विनशना.त्प्लक्ष४ प्रास्रवण,स्ताव.दित स्स्वर्गो लोक,स्सरस्वतीसम्मिते.नाध्वना स्वर्गँ लोकँ यन्ति।
- <25.10.17> एतेन वै नमी साप्यो वैदेहो राजाऽञ्जसा स्वर्गँ लोक.मै-दञ्जसाऽगामेति, तदञ्जस्कीयाना.मञ्जस्कीयत्वम्।

- <25.10.18> स एत.दवभृथ.मभ्यवै,द्य एष उत्तरेण स्थूलार्मं ह्रद-स्तद्धास्य शत.ङ्गाव स्सहस्त्रं सम्पेदुः।
- <25.10.19> शते गोष्वृषभ.मप्यृजन्ति, ता यदा सहस्त्रं सम्पद्यन्ते,ऽथोत्थानम्।
- <25.10.20> यदा सर्वज्यानि ञ्जीयन्ते,ऽथोत्थानँ, यदा गृहपति.र्म्रियते-ऽथोत्थानम्।
- <25.10.21> यदा प्लक्षं प्रास्त्रवण.मागच्छ-न्त्यथोत्थानम्।
- <25.10.22> प्लक्षं प्रास्त्रवण.मागम्या-ऽग्नये कामायेष्टि न्निर्वपन्ते, तस्या.मश्वाञ्च पुरुषीञ्च धेनुके दत्त्वा। (पुरुषी - दासी)
- <25.10.23> कारपचवं प्रति यमुना.मवभृथ.मभ्यव.यन्ति।
- <25.11.1> ❃ 25.11 अतिरात्र-स्त्रिवृ.त्पञ्चदश-मिन्द्राग्न्यो.रयन,ङ्गोआयुषी इन्द्रकुक्षी-अतिरात्रः।
- <25.11.2> एतेन वा इन्द्राग्नी अत्यन्या देवता अभवता,मत्यन्याः प्रजा भवन्ति- य एत.दुपयन्ति।
- <25.11.3> इन्द्राग्नी वै देवाना.मोजिष्ठा, ओजिष्ठा भवन्ति- य एत.दुपयन्ति।
- <25.11.4> अथ यत्त्रिवृ.त्पञ्चदश-मिन्द्राग्न्यो.रयन-ङ्गोआयुषी इन्द्रकुक्षी भवतो-ऽसँव्याथाय।
- <25.12.1> ❃ 25.12 अतिरात्रो- ज्योति.र्गौरायु.स्त्र्यहो- विश्वजि.दभिजिता.विन्द्रकुक्षी- अतिरात्रः।
- <25.12.2> एतेन वाऽर्यमैतँ लोक.मजयत्।
- <25.12.3> यदाहु-रर्यम्णः पन्था इ-त्येष वाव देवयानः पन्थाः।
- <25.12.4> प्र देवयानं पन्थान.माप्नुवन्ति- य एत.दुपयन्ति।
- <25.12.5> तस्मा.देषोऽरुणतम इव दिव उप.ददृशे,ऽरुणतम इव हि पन्थाः।
- <25.12.6> अथ यज्ज्योति.र्गौरायु.स्त्र्यहो- विश्वजि.दभिजिता.विन्द्रकुक्षी भवतो-ऽसँव्याथाय।

- <25.13.1>❉ 25.13 सँवत्सरं ब्राह्मणस्य गा रक्षे,त्सँवत्सरँ व्यर्णे नैतन्धवेऽग्नि.मिन्धीत, सँवत्सरे परीणह्यग्नी.नादधीत। (व्यर्णः, नैतन्धवः, परीणत् - देशवाचकानि, परीणत् हकारान्तशब्दः)
- <25.13.2> स दक्षिणेन तीरेण दृषद्वत्या आग्नेयेनाष्टाकपालेन शम्यापरासीयात्। (शम्यापरासी, इयात्। शम्यां परास्यातीति शम्यापरासी)
- <25.13.3> इन्द्रश्च रुशमा चांशं प्रास्येताँ, यतरो नौ पूर्वो भूमिं पर्येति- स जयतीति, भूमि.मिन्द्रः॰ पर्यै-त्कुरुक्षेत्रं रुशमा, सोऽब्रवी-दजैष न्त्वे-त्यह.मेव त्वा.मजैष-मितीन्द्रोऽब्रवी,त्तौ देवे.ष्वपृच्छेता,न्ते देवा अब्रुव-न्नेतावती वाव प्रजापते.र्वेदि-र्याव.त्कुरुक्षेत्र.मिति, तौ न व्यजयेताम्।
- <25.13.4> स य आग्नेयेनाष्टाकपालेन दक्षिणेन तीरेण दृषद्वत्या श्शम्यापरास्येति, त्रिप्लक्षा.न्प्रति यमुना.मवभृथ.मभ्यवैति, तदेव मनुष्येभ्य.स्तिरो भवति।
- <25.14.1>❉ 25.14 आग्नेयोऽष्टाकापाल- ऐन्द्र एकादशकपालो- वैश्वदेव.श्चरुः।
- <25.14.2> अदीक्षितः॰ कृष्णाजिनं प्रतिमुञ्चते, य.ददीक्षितः॰ कृष्णाजिनं प्रतिमुञ्चते- यो मानु.ष्यृद्धि-स्ता.न्तेनर्ध्नोति।
- <25.14.3> अथ यत्तप.स्तप्यते- या दैवी- ता.न्तेन।
- <25.14.4> यदाग्नेयोऽष्टाकपालो भव-त्यग्निमुखा वै देवता- मुखत एव तद्देवता ऋध्नो-त्यथो प्रातस्सवन.मेव तेनाऽऽप्नो,त्यथ यदैन्द्र एकादशकपालो भव-त्यैन्द्रँ वै माध्यन्दिनं सवनं-माध्यन्दिन.मेव सवन न्तेनाऽऽप्नो,त्यथ यद्वैश्वदेव.श्चरु.र्भवति- वैश्वदेवँ वै तृतीयसवन-न्तृतीयसवन.मेव तेनाऽऽप्नोति।
- <25.14.5> एतेन वै पुरो देवमुनि स्सर्वा.मृद्धि.मार्ध्नो,त्सर्वा.मृद्धि.मृध्नोति- य एत.दुपैति।
- <25.15.1>❉ 25.15 अतिरात्रा.वभितो-ऽग्निष्टोमा मध्ये- सर्वो दशदशी सँवत्सरो-द्वादशो विषुवा-न्त्सर्पसामानि विषुवति क्रियन्ते।
- <25.15.2> एतेन वै सर्पा एषु लोकेषु प्रत्यतिष्ठ,न्नेषु लोकेषु प्रति तिष्ठन्ति- य एत.दुपयन्ति।

- <25.15.3> जर्वरो गृहपति- र्धृतराष्ट्र ऐरावतो ब्रह्मा- पृथुश्रवा दौरेश्रवस उद्गाता- ग्लाव.श्चाजगावश्च प्रस्तोतृ.प्रतिहर्तारौ- दत्त.स्तापसो होता- शितिपृष्ठो मैत्रावरुण- स्तक्षको वैशालेयो ब्राह्मणाच्छंसी- शिखानुशिखौ नेष्टापोतारा-वरुण आटोऽच्छावाक- स्तिमिर्घो दौरेश्रुतोऽग्नी-त्कौतस्ता.वध्वर्यू- अरिमेजयश्च जनमेजय.श्चार्बुदो ग्रावस्तु- दजिर स्सुब्रह्मण्य- श्चक्रपिशङ्गा.वुन्नेतारौ- षण्ड.कुषण्डा.वभिगरापगरौ।

- <25.15.4> एतेन वै सर्पा अपमृत्यु.मजय,न्नप मृत्यु.ञ्जयन्ति- य एत.दुपयन्ति, तस्मा.त्ते हित्वा जीर्णा.न्त्वच.मतिसर्प-न्त्यप हि ते मृत्यु.मजय,न्त्सर्पा वा आदित्या, आदित्याना.मिवैषां प्रकाशो भवति- य एत.दुपयन्ति।

- <25.16.1> ❃ 25.16 गवा.मयनं, प्रथम स्सँवत्सरो-ऽथादित्याना.मथाङ्गिरसाम्।

- <25.16.2> एतेन वै गावः प्रजातिं भूमान.मगच्छ,न्प्रजायन्ते बहवो भवन्ति- य एत.दुपय,-न्त्येतेन वा आदित्या एषु लोकेषु प्रत्यतिष्ठ,न्प्रति तिष्ठन्ति- य एत.दुपय,न्त्येतेन वा अङ्गिरस स्स्वर्गँ लोक.माय-न्त्स्वर्गँ लोकँ यन्ति- य एत.दुपयन्ति।

- <25.16.3> पर आह्लार.स्त्रसदस्युः पौरुकुत्सो वीतहव्य श्श्रायसः कक्षीवा.नौशिज-स्त एत.त्प्रजातिकामा स्सत्त्रायण.मुपाऽऽयं,स्ते सहस्रं सहस्रं पुत्रा.नपुष्य,न्नेवँ वाव ते सहस्रं सहस्रं पुत्रा.न्पुष्यन्ति- य एत.दुपयन्ति।

- <25.17.1> ❃ 25.17 अतिरात्र-स्सहस्र.न्त्रिवृत स्सँवत्सरा- अतिरात्रः, प्रजापते स्सहस्र.सँवत्सरम्।

- <25.17.2> एतेन वै प्रजापति स्सर्वस्य प्रसव.मगच्छ,त्सर्वस्य प्रसव.ङ्गच्छन्ति- य एत.दुपयन्ति।

- <25.17.3> एतद्वै प्रजापति.र्जीर्या मूर उपै,त्तेन जरा.मपाऽऽहता,ऽप जरा.ङ्घ्नते- य एत.दुपयन्ति। (जीर्या - जरया, मूरः- मूढः)

- <25.17.4> तदेत.त्प्रजापते स्सहस्रसँवत्सर,मेतेन वै प्रजापति स्सर्वा.मृद्धि.मार्ध्नो,त्सर्वा.मृद्धि.मृध्नुवन्ति- य एत.दुपयन्ति।

- <25.18.1> ❃ 25.18 पञ्च पञ्चाशत.स्त्रिवृत स्सँवत्सराः- पञ्च पञ्चाशतः पञ्चदशाः- पञ्च पञ्चाशत स्सप्तदशाः- पञ्च पञ्चाशत एकविंशा- विश्वसृजां सहस्र.सँवत्सरम्।

- <25.18.2> एतेन वै विश्वसृज इदँ विश्व.मसृजन्त, यद्विश्व.मसृजन्त- तस्मा.द्विश्वसृजः।
- <25.18.3> विश्व.मेना.ननु प्रजायते- य एत.दुपयन्ति।
- <25.18.4> तपो गृहपति-र्ब्रह्म ब्र.ह्मेरा प.त्न्यमृत.मुद्गाता- भूतं प्रस्तोता- भविष्यत्प्रतिह.र्तर्तव उपगातार- आर्तवा स्सदस्या- स्सत्यं हो.तर्तं मैत्रावरुण- ओजो ब्राह्मणाच्छंसी- त्विषि.श्चापचितिश्च नेष्टापोतारौ- यशोऽच्छावाको-ऽग्निरे.वाग्नी-द्भगो ग्रावस्तु- दूर्गुन्नेता- वाक्सुब्रह्मण्यः- प्राणोऽध्वर्यु-रपानः प्रतिप्रस्थाता- दिष्टि.र्विशास्ता- बल.न्ध्रुवगोप- माशा हविष्ये-ष्यहोरात्रा.विध्मवाहौ- मृत्यु रशमि.तैते दीक्षन्ते।
- <25.18.5> तदेष श्लोको, विश्वसृजः प्रथमे सत्त्र.मासत- सहस्रसमं प्रसुतेन यन्त-स्ते ह यज्ञे भुवनस्य गोपा- हिरण्मय श्शकुनो ब्रह्मनामेति।
- <25.18.6> ब्रह्मण स्सलोकतां सार्ष्टितां सायुज्य.ङ्गच्छन्ति- य एत.दुपयन्ति।
- <25.18.7> तदेत.द्विश्वसृजां सहस्रसँवत्सर,मेतेन वै विश्वसृज स्सर्वा.मृद्धि.मार्ध्नुव,- न्त्सर्वा.मृद्धि.मृध्नुवन्ति- य एत.दुपयन्ति।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

# षड्विंशब्राह्मणम्

## षड्विंश ब्राह्मणे प्रथमाध्यायः

### प्रथम खण्डः

- ❃ ,,1.1 ब्रह्म च वा इद.मग्रे सुब्रह्म चाऽऽस्ताम्।। 1।।
- तत.स्सुब्रह्मोदक्रामत्।। 2।।
- अथ ह देवा यज्ञेन ब्रह्म पर्यगृह्णत।। 3।।
- अग्नि र्वै ब्रह्मा-ऽसा.वादित्य स्सुब्रह्म।। 4।।
- तद्देवा यज्ञस्य सन्धा.वन्वैच्छन्।। 5।।
- एष वै यज्ञस्य सन्धि- र्यत्रैष उत्करः।। 6।।
- तस्मा.दुत्करे तिष्ठ.न्त्सुब्रह्मण्य स्सुब्रह्मण्या माह्वयति।। 7।।
- सुब्रह्मण्यों 3 सुब्रह्मण्यों 3 सुब्रह्मण्यो 3 मिति स्त्रिय.मिव त्रि.राह।। 8।।
- त्रि.षत्या हि देवाः।। 9।।
- इन्द्राऽऽगच्छेति।। 10।।
- यदाहेन्द्राऽऽगच्छे-त्येतद्वा अस्य प्रत्यक्ष.न्नाम- तेनैवैन न्तदाह्वयति।। 11।।
- हरिव आगच्छेति।। 12।।
- पूर्वपक्षाऽपरपक्षौ वा इन्द्रस्य हरी- ताभ्याँ हीदँ सर्वँ हरति।। 13।।
- मेधातिथे र्मेषेति।। 14।।
- मेधातिथिँ ह काण्व्यायनं मेषो भूत्वा जहार।। 15।।
- वृषणश्वस्य मेन इति।। 16।।
- वृषणश्वस्य ह मेनस्य- मेनका नाम दुहिताऽऽस- ताँ हेन्द्र श्चकमे।। 17।।
- गौरावस्कन्दि.न्निति।। 18।।
- गौर.मृगो ह स्म भूत्वाऽवस्कन्द्याऽरण्या.द्राजानं पिबति।। 19।।
- अहल्यायै जारेति।। 20।।
- अहल्याया ह मैत्रेय्या जार आस।। 21।।
- कौशिक ब्राह्मणेति।। 22।।
- कौशिको ह स्मैनां ब्राह्मण उप न्येति।। 23।।

- गौतम.ब्रुवाणेति।। 24।।
- देवासुरा ह सँयत्ता आसँ-स्ता.नन्तरेण गौतम श्शश्राम, तमिन्द्र उपेत्योवा.चेह नो भवा.न्स्पश.श्चरत्विति- नाह मुत्सह इ,त्यथाहं भवतो रूपेण चराणीति- स यथा मन्यस इति, स य.त्तद्गौतमो वा ब्रुवाण श्चचार- गौतम.रूपेण वा, तदेत.दाह गौतमेति।। 25।।
- इत्यहे सुत्या.मागच्छ मघव.न्निति।। 26।।
- तद्यथाऽर्हतो ब्रूयादि,त्यहे वः पक्तास्मि- तदागच्छते-त्येव.मेवैत.द्देवेभ्य स्सुत्यां प्राऽऽह।। 27।।
- देवा ब्रह्माण इति।। 28।।
- देवा हैव देवा- अथ हैते मनुष्यदेवा- ये ब्राह्मणा.श्शुश्रुवाँसोऽनूचाना-स्ते मनुष्यदेवाः।। 29।।
- आहुतय एव देवाना-न्दक्षिणा मनुष्यदेवाना,माहुतिभि र्ह देवा.न्प्रीणाति- दक्षिणाभि र्मनुष्यदेवा,ञ्छुश्रुवुषोऽनूचाना.न्ब्राह्मणा.न्प्रीणाति।। 30।। ---

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

द्वितीय खण्डः

- ❃ ,,1.2 अथ यत्र सुब्रह्मण्य स्सुब्रह्मण्या.माह्वय-त्येतस्मिन् ह कालेऽसुर.रक्षाँसि देवानाँ यज्ञ.मजिघाँसन्।। 1।।
- ते देवा निहव.मेवाकुर्वत- ब्रह्मो 3 सुब्रह्मो 3 मिति।। 2।।
- ता.नादित्यः पर्जन्यः पुरोबलाको भूत्वाऽभिप्रै,त्ता.न्वृष्ट्याऽशन्या विद्युताऽहन्।। 3।।
- तदाहु- स्स्त्री सुब्रह्मण्या 3 पुमा 3 न्नपुँसका 3 मिति।। 4।।
- सर्व.मेवेति ब्रूयात्।। 5।।
- यत्पर्जन्यः पुरोबलाको भूत्वाऽभिप्रै-त्तेन पुमान्,यद्वृष्ट्या यदशन्या- तेन स्त्री, यद्विद्युता- तेन नपुँसक,न्तस्मा.त्सर्व.मेवेति ब्रूयात्।। 6।।
- तदाहु- र्ऋ.क्सुब्रह्मण्या 3 यजू 3 स्सामा 3 इति- सर्व.मेवेति ब्रूया,द्दच इवास्या नामधेयँ सुब्रह्मण्येति- तस्माद्दृ,ङ्मन्त्र एव खल्वय.न्निगदभूतो भवति- तस्मा.द्यजु,स्सामकारिणः कुर्वन्ति- यथाऽन्यै स्सामभि-स्तस्मा.त्साम, तस्मा.त्सर्व मेवेति ब्रूयात्।। 7।।
- तद्वा एत.त्सुब्रह्मण्या.माहूय- यजमानँ वाचयति- रक्षसा.मपहत्यै।। 8।।
- साऽसि सुब्रह्मण्ये- तस्या.स्ते पृथिवी पाद इत्याह- यान्येव पृथिव्या.मसुर.रक्षाँसि- तान्येव तेनापहते, साऽसि सुब्रह्मण्ये- तस्यास्तेऽन्तरिक्षं पाद इत्याह- यान्येवान्तरिक्षेऽसुर.रक्षाँसि-

तान्येव तेनापहते, साऽसि सुब्रह्मण्ये- तस्यास्ते द्यौः पाद इत्याह- यान्येव दिव्यसुर.रक्षाँसि- तान्येव तेनापहते, साऽसि सुब्रह्मण्ये- तस्यास्ते दिशः पाद इत्याह- यान्येव दिक्ष्वसुर.रक्षाँसि- तान्येव तेनापहते, परोरजा.स्ते पञ्चमः पाद इत्याह- पराँ रजसो वै ब्रह्मण स्स्थान- न्तदेत.दाह, सा न इष.मूर्ज.न्धुक्ष्वेत्या-हेष मेवास्मा ऊर्ज न्दुग्धे, वीर्य मन्नाद्य न्धेहीत्याह- वीर्य.मेवास्मा अन्नाद्य.न्दधाति।। 9।।

- ब्रह्मश्री वैं नामैत.त्साम- यत्सुब्रह्मण्या, तस्मा त्प्रात.रनुवाक उपाऽऽकृते- वि सँस्थिते च यज्ञे- सुब्रह्मण्य स्सुब्रह्मण्या माह्वयति।। 10।।
- एष वै ब्रह्म सुब्रह्म चाऽऽप्नोति- य एत.दनो युक्तँ सुब्रह्मण्याय ददाति।। 12।।
- ब्रह्मणा चैवास्य श्रिया च यज्ञं समर्धयति- य एवँ वेद।। 13।।
- अथो खल्वाहु- र्यच्चावगतँ यच्चानवगतं- सर्वस्यैषैव प्रायश्चित्ति रिति, तस्मा.देवँविदं सुब्रह्मण्य ङ्कुर्वीत- नानेवँविदम्।। 14।। ---

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

## तृतीय खण्डः

- ❄ ,,1.3 एकच्छन्दः प्रातस्सवन- न्तस्मा.देकपा.त्पुरुषो हर-त्यन्यं प्र.त्यन्येन तिष्ठति।। 1।।
- त्रिच्छन्दा माध्यन्दिनः पवमान-स्तस्मा त्त्रयोऽधः प्राणाः।। 2।।
- द्वे गायत्र्याँ सामनी- तस्मा.द्द्वय.मधरेण प्राणेन करोति।। 3।।
- द्वे बृहत्यां सामनी- तस्मा.द्द्वय.मुत्तरेण।। 4।।
- एक.न्त्रिष्टुभि साम- तस्मा.देकैव नाभिः।। 5।।
- प्राणाना.मिव तु विधृतिः।। 6।।
- अथ यदेव तत ऊर्ध्व- न्तानि पृष्ठानि।। 7।।
- बार्हता.न्येकगायत्रीकाणि, तस्मा.द्बृहत्य एव पर्शवो- बृहत्य एव कीकसाः- पृष्ठ.मभि समायन्ति ।। 8।।
- अथ यदेव तत ऊर्ध्वँ- स आर्भवः पवमानः।। 9।।
- प्राणो गायत्री- श्रोत्रे उष्णि.क्ककुभौ- वागनुष्टु-प्चक्षु र्जगती।। 10।।
- पुष्टि र्य.दन्यत्।। 11।।
- द्वे गायत्र्याँ सामनी- तस्मा.द्द्वयं प्राणेन करोति- प्राणिति चापानिति, चैक.ञ्छन्दः ककु.बुष्णिहौ द्वे सामनी- तस्मा त्समानँ स.च्छ्रोत्र न्द्वेधैव श्रृणोति, द्वे अनुष्टुभि सामनी- तस्मा.द्द्वयँ

वाचा करोति- सत्य.ञ्चानृतञ्च वद,त्येक ञ्जगत्यां साम- तस्मा.द्वे अक्षिणी सती- समानं पश्यतो, न हि पश्चा.दायन्तं पश्यति।। 12।।

- अथ यदेव तत ऊर्ध्वं मूर्धा- त.द्यज्ञायज्ञीयम्।। 13।।
- मूर्धा स्वानां भवति- य एवँ वेद।। 14।।
- अध इव वा अन्या.न्यङ्गा-न्युपरीव मूर्धा,ऽध इवास्मा अन्ये स्वा भव,न्त्युपरीव स्वानां भवति- य एवँ वेद।। 15।।
- यज्ञो वा अथ जज्ञ इत्याहु,रेष वाव जात- एषोऽवलुप्त.जरायु-रेष आर्त्विजीनो- य एतँ वेद.मनुब्रूते, यदा वा एतँ वेद.मनुब्रूते,ऽथ हैनँ श्रृण्व.न्त्यसा.वन्ववोचतेति- तद्धै स जायते।। 16।।
- ऊनाक्षरा गायत्री प्रातस्सवने- प्रजानां प्रजात्या, -ऊना.दिव हि प्रजाः प्रजायन्ते।। 17।।
- ऊनाक्षरा गाय.त्र्यामहीयवे- प्रजानां प्रजात्या- ऊना.दिव हि प्रजाः प्रजायन्ते।। 18।।
- ऊनाक्षरा गायत्री पृष्ठेषु वामदेव्ये- यजमान.लोक एव- स मध्ये हि यज्ञस्य यजमानः।। 19।।
- ऊनाक्षरा गायत्री सँहिते प्राणापानयो.रुच्चार- ऊना.दिव हि प्राणापाना.वुच्चरतः।। 20।।
- ऊनाक्षरँ यज्ञायज्ञीयं- प्राणाना.मुत्सृष्ट्यै।। 21।।
- यो हि पूर्ण.मुपधमे-द्यदि प्रतीया- द्विपदे,द्यदि न प्रतीया-द्विष्यन्देत।। 22।। (विपदेत् - विपन्नो भवेत्। आत्मनेपद पद धातोः - श्यनः स्थाने शप्, परस्मापदत्वञ्च छान्दसत्वात्।)
- तदाहु स्सवनानाञ्च वा एत उदानाः प्राणाना.ञ्चोत्सृष्टि.रिति।। 23।।---

## चतुर्थः खण्डः

- ❃ ,,1.4 अध्वर्य.वित्याहोद्गाता- मा स्म मेऽनिवेद्य होत्रे प्रात.रनुवाक मुपाऽऽकरो.रिति।। 1।।
- सोऽध्वर्युः प्राऽऽह।। 2।।
- स हूतो व्रजति- स पूर्वया द्वारा हविर्धाने प्रपद्यते।। 3।।
- स दक्षिणस्य हविर्धान.स्योत्तर.ञ्चक्र.मभ्यप.श्रयमाण उद.ङ्ङासीनो विश्वरूपा गायति।। 4।।
- क्षत्रँ वै स्तोत्रँ- विट्छस्त्र- ङ्क्षत्रेणैवास्मै विश.मनु वीर्य.मनुवर्त्मान.ङ्करो,त्यथो स्तुतशस्त्रयो.रेव समारम्भायाऽव्यवसंस्राय सन्तत्यै।। 5।।

- एतद्ध स्माऽऽह ग्लावो मैत्रेय॰- प्राह्णे वा अद्याहं पाप.वसीयसँ व्याकरिष्यामीति, स ह स्म सदस्येवोपवसथ्येऽह.न्युद.ङ्गासीनो विश्वरूपा गायति।। 6।।

- तदुपवादोऽ-स्त्यध्वर्यो किं स्तुतं स्तोत्रं होता प्रात.रनुवाकेनान्वशंसी.दिति, स ब्रूया-दकार्ष.मह- न्तद्य.न्मम कर्म- होतारं पृच्छतेति, होत॰ किं स्तुतं स्तोत्रं प्रात.रनुवाकेनान्वशंसी.रिति, स ब्रूया-दकार्ष.मह-न्तद्य.न्मम क.र्मोद्गातारं पृच्छते,त्युद्गात॰ किं स्तुतं स्तोत्रं होता प्रात.रनुवाकेनान्वशंसी.दिति- स ब्रूया.दकार्ष.मह- न्तद्य.न्मम कर्माऽगासिषँ-यद्गेयमिति।। 7।।

- तञ्चे.द्ब्रूयु-स्तमो वै त्व.मगासी- र्न ज्योति.रिति।। 8।।

- स ब्रूया.ज्ज्योति- स्तेन- येन ज्योति.र्ज्योति- स्तेन येन ज्योति,स्तेन येन गायत्री ज्योति,स्तेन येन च्छन्दो ज्योति-स्तेन येन साम ज्योति- स्तेन येन देवता, ज्योति.रेवाह.मगासिष-न्न तमो, युष्माँस्तु पाप्मना तमसा विध्यानीत्याह- पाप्मनैवैनाँ.स्तत्तमसा विध्यति।। 9।।

- युञ्जे वाचं शतपदी मित्याह, वाग्वाव शतप-द्यृ.क्छतपदी- शत.सनि.मेव तदात्मानञ्च यजमानञ्च करोति।। 10।।

- गाये सहस्रवर्तनीति, साम वै सहस्रवर्तनि- सहस्रसनि.मेव तदात्मानञ्च यजमानञ्च करोति।। 11।।

- गायत्र.न्त्रैष्टुभ.ञ्जग.दिति, गायत्रँ वै प्रातस्सवन- न्त्रैष्टुभं माध्यन्दिनं सवन- ञ्जागत न्तृतीयसवनं, सवना.न्येव त.द्यथास्थानँ यथारूप.ङ्कल्पयति।। 12।।

- विश्वा रूपाणि सम्भृतेति, विश्व.मेव तद्वित्त.मात्मने च यजमानाय च सं भरति।। 13।।

- देवा ओकांसि चक्रिर इति।। 14।।

- ओको हास्मिन् यज्ञ॰ कुरुते- य एवँ वेद।। 15।।

- असितमृगा ह स्म वै पुरा कश्यपा उद्गाय,न्त्यथ ह युवान मनूचान.ङ्कुसुरुबिन्द मौद्दालकिं ब्राह्मणा उद्गीथाय वव्रे, ते होचु॰- परि वै नोऽय.मार्त्विज्य मादत्ते- हन्तेम मनु.व्याहरामेति, तं हानुव्याहरिष्यन्त उप निषेदु,स्स होवाच- ब्राह्मणा नमो वो अस्तु- प्राह्णे वा अहँ यज्ञं समस्थापयँ-यथा तु वै ग्रामस्य यातस्य शीर्णँ वा भग्नँ वाऽनु समावहे-देवँ वा अहँ यज्ञस्यातो ऽधिकरिष्यामीति, ते ह हिङ्कृ.त्योत्तस्थु॰- क इद.मस्मा अवोच.दिति।। 16।।---

**पञ्चमः खण्डः**

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

- ❃ ,,1.5 इन्द्रो ह वै विश्वामित्रायोक्थ मुवाच- वसिष्ठाय ब्रह्म, वागुक्थ.मित्येव विश्वामित्राय- मनो वाव ब्रह्म वसिष्ठाय।। 1।।
- तद्वा एत.द्वासिष्ठं ब्रह्म।। 2।।
- अपि हैवँविदँ वा वासिष्ठँ वा ब्रह्माण.ङ्कुर्वीत।। 3।।
- तद्यथोभयवर्तनिना रथेन याँ यान्दिशं प्रार्थयते- तान्ता.मभि प्राऽऽप्नो,त्येव.मेतेनोभयवर्तनिना यज्ञेन यङ्काम.ङ्कामयते- तमभ्यश्नुते।। 4।।
- अथार्धभा.ग्वै मनः प्राणानां, स यद्याहरति- वाचि तन्मनः प्रतिष्ठापयति, तद्यथैक.वर्तनिना रथेन न काञ्चन दिशँ व्यश्नुते- तादृ.गेतत्।। 5।।
- याव.दृचा यजुषा साम्ना कुर्यु-स्ताव.द्ब्रह्मा वाचँयमो बुभूषेत्।। 6।।
- प्रजापतिर्वा इमां.स्त्रीन् वेदा.नसृजत- त एनं सृष्टा नाधिन्वं,स्ता.नभ्यपीडय-त्तेभ्यो भूर्भुव.स्स्व-रित्यक्षर,द्भू.रित्यृग्भ्योऽक्षर-त्सोऽयँ लोकोऽभव,द्भुव.रिति यजुर्भ्योऽक्षर-त्सोऽन्तरिक्षलोको ऽभव,त्स्वरिति सामभ्योऽक्षर-त्स स्वर्गो लोकोऽभवत्।। 7।। (रेफान्तो भुवश्शब्दो विशिष्यते)
- तद्य.द्यृक्त उल्बण.ङ्क्रियेत- गार्हपत्यं परेत्य- भूस्स्वाहेति जुहुया,दयँ वै लोको गार्हपत्यो-ऽयँ लोक ऋग्वेद,स्तद्वा इमञ्च लोक.मृग्वेदञ्च स्वेन रसेन समर्द्धयति।। 8।।
- अथ यदि यजुष्ट उल्बण.ङ्क्रियेताऽन्वाहार्यपचनं परेत्य- भुव.स्स्वाहेति जुहुया-दन्तरिक्षलोको वा अन्वाहार्यपचनो-ऽन्तरिक्षलोको यजुर्वेद-स्तद्वा अन्तरिक्षलोकञ्च यजुर्वेदञ्च स्वेन रसेन समर्द्धयति।। 9।।
- अथ यदि सामत उल्बण.ङ्क्रियेताऽऽहवनीयं परेत्य- स्व.स्स्वाहेति जुहुया-त्स्वर्गो वै लोक आहवनीय- स्स्वर्गो लोक स्सामवेद- स्तद्वै स्वर्गञ्च लोकं सामवेदञ्च स्वेन रसेन समर्द्धयति।। 10।।
- अतो वाव यतमस्मि.न्नेव कतमस्मिं.श्चोल्बण.ङ्क्रियेत- सर्वेष्वेवानु.पर्याय.ञ्जुहुया-त्तथा हास्य यज्ञोऽस्कन्न स्स्वगाकृतो भवतीति।। 11।।
- अथ स्कन्ना.द्वा भिन्ना.द्वा त्रेधा यज्ञ उत्क्रामति, देवा.न्दिव.न्तृतीय-मन्तरिक्षं मनुष्यां.स्तृतीयं- पृथिवीं पितॄं.स्तृतीयम्।। 12।।

- तदभिमृशे-द्देवा.न्दिवँ यज्ञोऽगा-त्ततो मा द्रविण.म,ष्ट्वन्तरिक्षं मनुष्यान् यज्ञोऽगा-त्ततो मा द्रविण.मष्टु, पृथिवीं पितॄन् यज्ञोऽगा-त्ततो मा द्रविण.मष्टु, यत्र क्व च यज्ञोऽगा-त्ततो मा द्रविण.मष्ट्विति, तद्वा आत्मानञ्च यजमानञ्च स्वेन रसेन समर्द्धयति।। 13।।
- वरुणो वा एतद्विष्णौ यज्ञ.मुपार्पयति।। 14।।
- यद्यज्ञ उल्बण.ङ्क्रियते- तदप उप निनये,द्ययो.रोजसा स्कभिता रजांसि- वीर्येभि र्वीरतमा शविष्ठा- या पत्येते अप्रतीता सहोभि-र्विष्णू अग.न्वरुणा पूर्वहूतौ स्वाहेति, तद्वा आत्मानञ्च यजमानञ्च स्वेन रसेन समर्द्धयति।। 15।। ---

षष्ठ खण्डः

- ❃ ,,1.6 ये विराज.मतियजन्ते- विराज.मेव त ईप्सन्तोऽमुष्मि.न्लोके श्राम्य,न्त्यथ य एना मर्वा.क्स्तुवन्ति- विराज.मेव त ईप्सन्तोऽमुष्मि.न्लोके श्राम्यन्ति, तेषा न्तथा श्राम्यतां सुकृत.ङ्क्षीयते, न हि त.दमुष्मि.न्लोके शक्नुवन्ति- यदस्मा ल्लोका.दकृत्वा प्रयन्ति।। 1।।
- एतद्ध स्माऽऽहोद्दालक आरुणिः- कथन्ते यजेर-न्कथँ वा याजयेयु- र्ये यज्ञस्य व्यृद्धेन न नन्दन्ति- नन्दन्ति यत्समृद्धेनेति।। 2।।
- अहँ वाव काले यजेयाऽह.ङ्काले याजयेयँ- योऽहँ यज्ञस्य व्यृद्धेन न नन्दामि- नन्दामि य.त्समृद्धेनेति।। 3।।
- अपि ह स्वा.देव कामा.द्यज्ञस्य व्यर्द्धयति- भूयसी रुपाऽऽप्सी-रुपाऽऽप्स्यामि भिष.क्कृत्वा।। 4।।
- एतद्ध स्म वै तद्विद्वा.नाह- यावद्वा ऋचा होता करोति- होतृष्वेव ताव.द्यज्ञो, याव.द्यजुषाऽध्वर्यु- रध्वर्यु.ष्वेव ताव,द्याव.त्साम्नोद्गा.तोद्गातृ.ष्वेव ताव,द्ब्रह्मण्येव ताव.द्यज्ञे यत्रोपरताः।। 5।।
- तस्मा.त्तस्मि.न्नन्तर्धौ ब्रह्मा वाचँयमो बुभूषेत्।। 6।।
- स यदि प्रमत्तो व्याहरे-देता वा व्याहृती र्मनसाऽनुद्रवे-द्भूर्भुव.स्स्वरिति।। 7।।
- वैष्णवीँ वर्च-मिदं विष्णु.र्विचक्रम इति।। 8।। (वा, ऋचम्)
- राज्ञो ह मितस्य मर्कटोंऽशू.नादाय वृक्ष.मापुप्लुवे।। 9।। (मर्कटः- तद्वेषधारी इन्द्रः, मितः राजा सोमः)
- स हाऽऽरुणि.राहुति.मुद्यत्योवाच- पुन र्वैना.न्निवप्स्य-स्यतो वाव मृतोऽव.पत्स्यस इति।। 10।।



Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

- स होवाच- किं होष्यसीति।। 11।।
- प्रायश्चित्त.मिति।। 12।।
- किं प्रायश्चित्त.मिति।। 13।।
- सर्वप्रायश्चित्त.मिति।। 14।।
- किं सर्वप्रायश्चित्त.मिति।। 15।।
- महाव्याहृती.रेव मघव.न्निति।। 16।।
- स होवा.चोम् आरुणे यदाहुति.मनूचिषे- कथन्नु विदा.ञ्चकर्थ- मर्कटोंऽशूनाऽदत्तेति।। 17।।
- स होवाच- यच्चावगतँ यच्चानवगतं- सर्वस्यैषैव प्रायश्चिति.रिति।। 18।।
- तस्मा.देता.मेव जुहुयात्।। 19।।
- अपि वा-ऽज्ञातँ यदनाज्ञातँ यज्ञस्य क्रियते मि.थ्वग्ने तदस्य कल्पय- त्वं हि वेत्थ यथायथं स्वाहे,त्यपि वा प्राजापत्यां- प्रजापते न त्व.देता.न्यन्यो विश्वा जातानि परि ता बभूव- यत्कामा.स्ते जुहुम.स्तन्नो अस्तु- वयं स्याम पतयो रयीणां स्वाहेति, तद्वा आत्मानञ्च यजमानञ्च स्वेन रसेन समर्द्धयति।। 20।।
- अथ यद्वै किञ्च यज्ञे मृन्मयं भिद्येत- तदभि.मृशे,द्भूमि.र्भूमि.मगा-न्माता मातर.मप्यगा-द्भूयाम पुत्रैः पशुभि-र्योऽस्मा.न्द्वेष्टि स भिद्यता.मिति, तद्वा आत्मानञ्च यजमानञ्च स्वेन रसेन समर्द्धयति।। 21।।---

सप्तम खण्डः

- 卐 1.7 घ्नन्तीव वा एतत्सोमं राजानं, प्रेव मीयते- यदेन.मभिषुण्वन्ति, तस्यैता.मनुस्तरणी.ङ्कुर्वन्ति- यत्सौम्य.ञ्चरु,न्तस्मा.त्पुरुषाय पुरुषायाऽनुस्तरणी क्रियते।। 1।।
- साध्यानाँ वै देवानां सत्र.मासीनानां शर्करा अक्षसु जज्ञिरे, ते हेन्द्र मुप निषेदुः- कथन्नु तेषां शर्करा अक्षसु जायेरन्- या.स्त्वँ विद्या इति, तेभ्य एत.त्सौम्ये चरौ श्याव.माज्यं प्रायच्छ-त्तदवेक्षन्त- ते प्रापश्य,न्प्रपश्य-त्यनन्धो भवति- य एवँ विद्वा.न्त्सौम्य.ञ्चरु.मवेक्षते।। 2।।
- योऽल.मन्नाद्याय स.न्नथान्न.न्नाद्या-द्दक्षिणार्धं सदसो ग.त्वैतं सौम्यातिशेषं प्राश्नीया,ज्जनँ वा एतस्मा.दन्नाद्य.ङ्गामति- योऽल.मन्नाद्याय स.न्नथान्न.न्नात्ति, जनोऽस्मा.त्पितरो जन्येनैवान्ने.नान्न.मत्त्यन्नादो भवति।। 3-।। ।। इति प्रथमोऽध्यायः।। ---

# षड्विंश ब्राह्मणे द्वितीयोऽध्यायः

## प्रथम खण्डः

- 卐 2.1 प्रजापति.रकामयत- बहु.स्स्यां प्रजायेयेति, स एतां रेतस्या.मृचं साम्ना प्रच्छन्ना.मगाय,द्य.द्दच.मसाम्नी.मगास्य-दस्थ्यमांस.मजनिष्यत, यत्सामाऽनृचं- मांस मनस्थिक मजनिष्यत, ऋचं साम्ना प्रच्छन्ना.ङ्गायति- तस्मा.त्पुरुषः प्रच्छन्नो मांसेन त्वचा लोम्ना जायते।। 1।।
- त्रिरु.द्गृह्णाति।। 2।।
- त्रय इमे लोका- एषाँ लोकाना मवरुद्ध्यै, त्रिभ्यश्च रेत स्सिच्यते।। 3।।
- न हिङ्कुर्यात्।। 4।।
- वज्रो वै हिङ्कारो- बल.मिव रेतो, यद्धिङ्कुर्या-द्वज्रेण हिङ्कारेण रेत.स्सिक्तँ विच्छिन्द्यात्।। 5।।
- रेतस्या छन्दसा प्राजापत्या देवतया, सर्व.मेतया ध्याय.न्गाये-त्सर्वं हीदं रेतः।। 6।।
- द्वितीया.ङ्गायति।। 7।।
- तस्या द्वे अक्षरे सशयनी व्यतिषजति, मध्यमस्य च पादस्योत्तम.मुत्तमस्य च प्रथमम्।। 8।।
- व्यतिषक्तौ प्राणापानौ प्रजा दधतः।। 9।।
- गायत्री छन्दसाऽऽग्नेयी देवतया, पृथिवी.मेतया ध्याय.न्गायेत्।। 10।।
- तृतीया.ङ्गायति।। 11 ।
- तां बलव.दिवोरसेव गायति।। 12।।
- तस्या द्वे उत्तमार्धेऽक्षरे द्योतयति।। 13।।
- चक्षु.रेव तद्युनक्ति- तस्माद्युक्त.श्चक्षुः।। 14।।
- त्रिष्टु.प्छन्दसैन्द्री देवतया-ऽन्तरिक्ष.मेतया ध्याय.न्गायेत्।। 15।।
- चतुर्थी.ङ्गायति।। 16।।
- तस्या.श्चत्वारि चत्वा.र्यक्षराणि निक्रीडय.न्निव गाय-त्या द्वादशेभ्योऽक्षरेभ्यः।। 17।।
- द्वादशाक्षरपदा जगती- पशवो वै जगती- पशुष्वेव प्रति तिष्ठति।। 18।।
- तस्या.श्चत्वा.र्युत्तमार्धेऽक्षराणि द्योतयति।। 19।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

- श्रोत्र.मेव तद्युनक्ति- तस्मा.द्युक्तं श्रोत्रं, श्रोत्रे द्वे प्रतिश्रवणे द्वे- तस्मा.त्पुरुष स्सर्वा दिश.श्श्रृणो,त्यपि पराङ् यन्- प्रत्यङ् श्रृणोति।। 20।।
- जगती छन्दसा सौरी देवतया, दिव.मेतया ध्याय.न्गायेत्।। 21।।
- पञ्चमी.ङ्गायति।। 22।।
- ता.न्निनर्द.न्निव गायति।। 23।।
- आह बहुतमा.त्पुरुषा.दन्न.म,त्त्यन्नादो भवति- य एवँ वेद।। 24।।
- निरुक्ता,ञ्चानिरुक्ता.ङ्गायति।। 25।।
- निरुक्तेन वै वाचो भुञ्जते-ऽनिरुक्त.मस्या उपजीवन्ति, भुङ्क्ते वाच-मुपैना.ञ्जीवति- य एवँ वेद।। 26।।
- अनुष्टु.प्छन्दसा प्राजापत्या देवतया, सर्व मेतया ध्याय.न्गाये-त्सर्वं हीदं प्राजापत्यम्।। 27।।
- षष्ठी.ङ्गायति।। 28।।
- तस्या द्वे द्वे अक्षरे, उदास.ङ्गाय-त्या षड्भ्यो ऽक्षरेभ्यः।। 29।।
- षडृतव- ॠतुष्वेव प्रति तिष्ठति।। 30।।
- पङ्क्ति.श्छन्दसा सौमी देवतया, दिश एतया ध्याय.न्गायेत्।। 31।।
- इहेव च वा एष- इहेव च मनसा गच्छति- यो गायत्रे प्रातस्सवने त्रिष्टुभ.ङ्गायति- जगती.ङ्गाय-त्यनुष्टुभ.ङ्गायति- पङ्क्ति.ङ्गाय.त्यास्ते।। 32।।
- गायत्रे द्वे गायति।। 33।।
- प्राण.मेव त.दभ्येति- प्राणो हि गायत्रं, पन्थान.मेव तदभ्येति- पन्था हि गायत्रम्।। 34।।
- रथन्तर.वर्णा.मुत्तमा.ङ्गायति।। 35।।
- इयँ वै रथन्तर-मस्या.मेव प्रति तिष्ठति।। 36।।

द्वितीयः खण्डः

- 卐 2.2 ता वा एता देवलोकाय युज्यन्ते- यत्पराच्यः।। 1 ।।
- प्रतीच्यो मनुष्यलोकाय।। 2।।
- एष वाव जात- एषोऽवलुप्तजरायु-रेष आर्त्विजीनो- यस्य धुरो गीयन्ते- यश्चैवँ विद्वा.न्धुरो गायति- जात.मेवैन मन्नाद्याय परिवृण-क्त्युभा.वन्न.मत्त- उद्गाता च यजमानश्च।। 3।।
- या प्रथमा- ता.मन्नाद्य.न्ध्याय.न्गायेत्।। 4।।

Sri Ganapathy Sachchidananda Avadhoota Datta Peetham • Mysore •

- रेतस एव तत्सिक्तायाऽन्नाद्यं प्रति दधाति।। 5।।
- न हिङ्कुर्यात्।। 6।।
- य.द्धिङ्कुर्या-द्वज्रेण हिङ्कारेण रेत स्सिक्तँ विच्छिन्द्यात्।। 7।।
- रेतस्या छन्दो युज्यते- मनो धीयते।। 8।।
- या द्वितीया- ता.ङ्गायत्री.मागा.ङ्गायं-स्तस्या द्वे अक्षरे सशयनी व्यतिषजति, मध्यमस्य च पदस्योत्तम-मुत्तमस्य च प्रथमँ, व्यतिषक्तौ प्राणापानौ प्रजा दधतो, गायत्री छन्दो युज्यते- प्राणापानौ धीयेते।। 9।।
- या तृतीया ता.न्त्रिष्टुभ.मागा.ङ्गायं-स्तस्या द्वे उत्तमार्धेऽक्षरे द्योतयति- चक्षु.रेव तद्युनक्ति, तस्मा.द्विरूप.ञ्चक्षुः- कृष्ण मन्य- च्छुक्ल.मन्य,त्त्रिष्टु.प्छन्दो युज्यते- चक्षुषी धीयेते।। 10।।
- या चतुर्थी- ताञ्जगती.मागा.ङ्गायं-स्तस्या.श्चत्वा.र्युत्तमार्धेऽक्षराणि द्योतयति- श्रोत्र.मेव तद्युनक्ति- तस्मा.द्युक्तं श्रोत्रं, श्रोत्रे द्वे प्रति श्रवणे द्वे- तस्मा.दपि पराङ् यन्- प्रत्यङ् श्रृणोति- जगती छन्दो युज्यते- श्रोत्रे धीयेते।। 11।।
- या पञ्चमी- ता.मनुष्टभ.मागा.ङ्गायं-श्चतुर्धा व्यावृज्य- गाये,च्चतुर्धा वा इदं पुरुषो वीर्याय विकृतो जायते, वीर्यायैवैना न्तद्व्यावृज्य गाय,त्युच्चावचा.मिव गाये-दुच्चावचैव हि वा,क्सङ्क्षणुत्येव गाये-त्सङ्क्षुत्येव हि वाचं पुरुषो वद,त्यनुष्टु.प्छन्दो युज्यते- वाग्धीयते।। 12।।
- या षष्ठी- तां पङ्क्ति.मागा.ङ्गायं-स्तस्या द्वे द्वे अक्षरे उदास.ङ्गाय-त्या षड्भ्योऽक्षरेभ्य,ष्षडृतव- ऋतुष्वेव प्रति तिष्ठति, पङ्क्ति.श्छन्दो युज्यते- समानोदानौ धीयेते।। 13।।
- सदिति प्रथमाया धुरो निधनं, रेतसो ह्यधि सञ्जायते।। 14।।
- समिति द्वितीयाया- रेतसो ह्यधि सम्भवः।। 15।।
- स्वरिति तृतीयायाः प्र स्वर्गँ लोक.ञ्जानाति।। 16।।
- इडेति चतुर्थ्याः- पशवो वा इडा- पशुष्वेव प्रति तिष्ठति।। 17।।
- वागिति पञ्चम्या- स्सर्वा अस्मि.न्पुण्या वाचो वदन्ति।। 18।।
- य एवँ वेद।। 19।।
- या प्रथमा- ता.मायच्छ.न्निव गाये,दायत इव ह्यय.मवाङ् प्राणः।। 20।।
- या द्वितीया- ता.ङ्घोषिणी.मिव गाये-द्घोषीव ह्यय.मपानः।। 21।।
- या तृतीया- तामुद्यच्छ.न्निव गाये-दुद्यत इव ह्ययं प्राणः।। 22।।
- या चतुथी- ता.न्निक्रीडय.न्निव गाये-न्निक्रीडित इव ह्ययँ व्यानः।। 23।।

- या पञ्चमी- ता.न्निरुक्ता.मनिरुक्ता.मिव गाये-न्निरुक्तोऽनिरुक्त इव ह्ययं समानः।। 24।।
- या षष्ठी- तामुदास.मिव गाये-दुदस्त इव ह्यय.मुदानो- यच्छ्रङ्गम्।। 25।।
- रथन्तरवर्णा.मुत्तमा.ङ्गाये-दियँ वै रथन्तर.मस्या.मेव प्रति तिष्ठति।। 26।।

तृतीयः खण्डः

-卐 2.3 देवाश्च वा असुरा.श्चैषु लोके.ष्वस्पर्धन्त, ते देवाꣳ प्रजापति.मुपाधावन्।। 1।।
- तेभ्य एता.न्धुरꣳ प्राणा.न्प्रायच्छ-न्मनꣳ प्रथम-मथ प्राण-मथ चक्षु-रथ श्रोत्र-मथ वाचम्।। 2।।
- ताभ्यꣳ पञ्चभ्यो धूर्भ्यꣳ पुरुषञ्च पशूंश्च निरमिमीत।। 3।।
- तेन पुरुषेणासुरा.नधूर्वन्- यदधूर्व.स्तद्धुरां धूस्त्व,न्धूर्वति पाप्मानं भ्रातृव्यँ- य एवँ वेद।। 4।।
- यो वै धुरा.न्धूस्त्वँ वेद- धुरा धुरा भ्रातृव्या.द्वसीया.न्भव,त्येतद्वै धुरा.न्धूस्त्वँ- यन्नानावीर्या नानारूपा नानाछन्दस्या नानादेवत्या,स्समानं हिङ्कार.मभि संपद्यन्त,- एतद्वै धुरा न्धूस्त्व- न्धुरा धुरा भ्रातृव्या.द्वसीया.न्भवति- य एवँ वेद।। 5।।
- यो वै धूर्षु महाव्रतँ वेद- सर्वा अस्मि.न्पुण्या वाचो वदन्ति।। 6।।
- शिरो गाय-त्र्युर स्त्रिष्टु-म्मध्य.ञ्जगती- पादा.वनुष्टु-प्सर्वा अस्मि.न्पुण्या वाचो वदन्ति- य एवँ वेद।। 7।।
- यो वा एव.न्धुरो विद्वा-नथाऽऽसाँ व्रत.ञ्चर-त्यागमिष्यतोऽस्य पूर्वेद्युꣳ पुण्या कीर्ति.रागच्छति।। 8।।
- सुरभि.रेव गन्धो गायत्र्या व्रत-न्दर्शनीय न्त्रिष्टुभ- श्श्रवणीय ञ्जगत्या, यदेव वाचा पुण्यँ वदति- तदनुष्टुभ,स्तदु सर्वासाँ व्रतम्।। 9।।
- तदु विद्वांस.माहु,रति नोऽवादी.रिति- त.दनादृत्यम्।। 10।।
- यस्य वै धुरो विगीता- स्तस्य सङ्गीताः।। 11।।
- यस्य वा एता बहिष्पवमाने विगीयाऽन्तराऽऽज्येषु सङ्गायन्ति, तस्य वै धुरो विगीता-स्तस्य सङ्गीताः।। 12।।
- यꣳ कामयेतैकधा यजमानँ यश ऋच्छे-द्यथाऽऽदिष्टं प्रजा स्स्युरिति, होतु.राज्ये गाये-देकधा यजमानँ यश ऋच्छति- यथाऽऽदिष्टं प्रजा भवन्ति।। 13।।

• यꣳ कामयेत कल्पेर.न्प्रजा- यथाऽऽदिष्टँ यजमान स्स्यादिति, यथाऽऽज्य.ङ्गाये-त्कल्पन्ते प्रजा- यथाऽऽदिष्टँ यजमानो भवति।। 14।।

• यो वा एव.न्धुरो वेदाऽनपजय्य.मात्मने च यजमानाय च लोक.ञ्जय-त्यति यजमान.मात्मानं मृत्युं परं स्वर्गँ लोकं हरति।। 15।।

## चतुर्थः खण्डः

• 卐 2.4 प्राञ्च मग्नि.मुन्नयन्ति- तस्मा.त्प्राङासीनो होताऽन्वाह- प्राङासीनो यजति- प्राङासीन श्शंसति।। 1।।

• असा.वादित्यꣳ प्राङपा.ङ्ङ्चरति- तस्मा.दध्वर्युꣳ प्राङपा.ङ्ङ्चरति।। 2।।

• अथैष चन्द्रमा दक्षिणेनैति, तस्मा.द्ब्रह्माण न्दक्षिणत आसयन्ति।। 3।।

• अथैतस्या मुदीच्या.न्दिशि भूयिष्ठँ विद्योतते- तस्मा.देता.न्दिश.मुद्गाता प्रत्युद्गायति।। 4।।

• अथैष आकाशो मध्यतो भूतानां सन्न,स्तस्मा न्मध्ये सदस्य.मासयन्ति।। 5।।

• उच्चावचा वा आप- उतेव गाधा भवृ-न्त्युतेव गम्भीरा,स्तस्मा.द्धोत्राऽऽशंसिन उतेव पञ्चर्चैन कुर्व.न्त्युतेव भूयसा।। 6।।

• आदित्यस्यैव गतं रश्मयोऽनु यन्ति, तस्मा.दध्वर्यो.रेव गतचमसाध्वर्यवोऽनुयन्ति।। 7।।

## पञ्चमः खण्डः

• 卐 2.5 स प्रातस्सवने सवनमुखीये.ष्वाहूतेषूपहव.मिच्छते।। 1।।

• अग्नि र्मे होता- स मोप ह्वयतां- होत.रुप मा ह्वयस्वे.त्युच्चैः।। 2।।

• आदित्यो मेऽध्वर्यु- स्स मोप ह्वयता,मध्वर्य उप मा ह्वयस्वे.त्युच्चैः।। 3।।

• चन्द्रमा मे ब्रह्मा- स मोप ह्वयतां, ब्रह्म.न्नुप मा ह्वयस्वे.त्युच्चैः।। 4।।

• पर्जन्यो म उद्गाता- स मोप ह्वयता-मुद्गात.रुप मा ह्वयस्वे.त्युच्चैः।। 5।।

• आकाशो मे सदस्य-स्स मोप ह्वयतां- सदस्योप मा ह्वयस्वे.त्युच्चैः।। 6।।

• आपो मे होत्राऽऽशंसिन-स्ते मोप ह्वयन्तां- होत्राऽऽशंसिन उप मा ह्वयध्वमि.त्युच्चैः।। 7।।

• रश्मयो मे चमसाध्वर्यव-स्ते मोप ह्वयन्ता- ञ्चमसाध्वर्यव उप मा ह्वयध्वमि.त्युच्चैः।। 8।।

• ता वा एता देवता- ऋत्विजा.मेव वाग्भि.रुप ह्वयन्ते।। 9।।

• स उपहूतो भक्षयति।। 10।।

• प्राणो यजमानो,ऽथो यत्रैतासा न्देवतानाँ लोक-स्तदुपहूतो भवति।। 11।।

षष्ठः खण्डः

- ॐ 2.6 माध्यन्दिने सवने- सवनमुखीये.ष्वाहृतेषूपहव.मिच्छते।। 1।।
- वाङ्मे होता- स मोप ह्वयतां- होत.रुप मा ह्वयस्वे.त्युच्चै,श्चक्षु र्मेऽध्वर्यु-स्स मोप ह्वयता-मध्वर्य उप मा ह्वयस्वे.त्युच्चै,र्मनो मे ब्रह्मा- स मोप ह्वयतां- ब्रह्म.न्नुप मा ह्वयस्वे.त्युच्चै,श्श्रोत्रं म उद्गाता- स मोप ह्वयता-मुद्गात.रुप मा ह्वयस्वे.त्युच्चैः।। 2।।
- योऽय.मन्त.श्चक्षु.ष्याकाश-स्स मे सदस्य-स्स मोप ह्वयतां- सदस्योप मा ह्वयस्वे.त्युच्चै,र्या इमा अन्त.श्चक्षु.ष्याप-स्ते मे होत्राऽऽशंसिन-स्ते मोप ह्वयन्तां- होत्राऽऽशंसिन उप मा ह्वयध्व मि.त्युच्चै,रङ्गानि मे चमसाध्वर्यव-स्ते मोप ह्वयन्ता-श्चमसाध्वर्यव उप मा ह्वयध्व.मित्युच्चैः।। 3।।
- ता वा एता देवता- ऋत्विजा.मेव वाग्भि.रुप ह्वयन्ते।। 4।।
- स उपहूतो भक्षयति।। 5।।
- अपानो यजमानो-ऽथो यत्रैतासा.न्देवतानाँ लोक- स्तदुपहूतो भवति।। 6।।

सप्तमः खण्डः

- ॐ 2.7 स तृतीयसवने सवनमुखीये.ष्वाहृतेषूपहव.मिच्छते।। 1।।
- प्राणो मे होता- स मोप ह्वयतां- होत.रुप मा ह्वयस्वे.त्युच्चै,रपानो मेऽध्वर्यु- स्स मोप ह्वयता-मध्वर्य उप मा ह्वयस्वे.त्युच्चै,र्व्यानो मे ब्रह्मा- स मोप ह्वयतां- ब्रह्म.न्नुप मा ह्वयस्वे.त्युच्चै-स्समानो म उद्गाता- स मोप ह्वयता-मुद्गात.रुप मा ह्वयस्वे.त्युच्चैः।। 2।।
- योऽय.मन्तꣳपुरुष आकाश- स्स मे सदस्य-स्स मोप ह्वयतां सदस्योप मा ह्वयस्वे.त्युच्चै-र्या इमा अन्तꣳपुरुष आप-स्ते मे होत्राऽऽशंसिन-स्ते मोप ह्वयन्तां- होत्राऽऽशंसिन उप मा ह्वयध्व.मित्युच्चै-र्लोमानि मे चमसाध्वर्यव-स्ते मोप ह्वयन्ता-श्चमसाध्वर्यव उप मा ह्वयध्व मि.त्युच्चैः।। 3।।
- ता वा एता देवता- ऋत्विजा.मेव वाग्भि.रुप ह्वयन्ते।। 4।।
- स उपहूतो भक्षयति।। 5।।
- स उदानो यजमानो-ऽथो यत्रैतासा न्देवतानाँ लोक-स्तदुपहूतो भवति।। 6।।
- सर्वेषाँ वै वषट्कर्ता चमसं भक्षयेत्।। 7।।
- देवानाँ वा एत.द्यज्ञस्य मुखँ- यदुद्गातृ.चमस-न्तस्मा.दुद्गातृ.चमस.न्नान्यो भक्षयेत्।। 8।।

Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

- एवँविदुषो ह वै यज्ञो न व्यथत, -एवँविदुषो ह वै यजमानस्य स्वर्ग्यं पुत्र्यं पशव्य मिष्टं भव,-त्येवँविद्वान् ह वै यजमानो द्विषन्तं भ्रातृव्य मभि भव,त्यथ वा अतो यज्ञे हीन.ङ्कुर्यात्।। 9।। इति द्वितीयोऽध्यायः ।।

## षड्विंशब्राह्मणे तृतीयोऽध्यायः।।

### प्रथमः खण्डः

- 卐 3.1 यद्धोता जहाति- वाग्घ तद्यजमान.ञ्जहाति, स यत्त.त्करोति- स्वाँ वाचँ यजमाने दधाति, स विष्वङ् वाचाऽमुष्मि.न्लोके संभवति।। 1।।
- यदध्वर्यु र्जहाति- चक्षुर्ह तद्यजमान.ञ्जहाति, स यत्त.त्करोति- स्व.ञ्चक्षु र्यजमाने दधाति, स विष्व.ङ्चक्षुषाऽमुष्मि.न्लोके संभवति।। 2।।
- यद्ब्रह्मा जहाति- मनो ह तद्यजमान.ञ्जहाति, स यत्त.त्करोति- स्वं मनो यजमाने दधाति, स विष्व.ङ्मनसाऽमुष्मि.न्लोके संभवति।। 3।।
- यदुद्गाता जहाति- श्रोत्रं ह तद्यजमान.ञ्जहाति, स यत्त.त्करोति- स्वं श्रोत्रँ यजमाने दधाति, स विष्वङ्छ्रोत्रेणाऽमुष्मि.न्लोके संभवति।। 4।।
- यत्सदस्यो जहा-त्यात्मा ह तद्यजमान.ञ्जहाति, स यत्त.त्करोति- स्व.मात्मानँ यजमाने दधाति, स विष्व.ङ्ङात्मनाऽमुष्मि.न्लोके संभवति।। 5।।
- यद्धोत्राऽऽशंसिनो जह-त्यङ्गानि ह तद्यजमान.ञ्जहति, ते यत्त.त्कुर्वन्ति- स्वा.न्यङ्गानि यजमाने दधति, ते विष्वञ्चोऽङ्गै.रमुष्मि.न्लोके संभवन्ति।। 6।।
- यच्चमसाध्वर्यवो जहति- लोमानि ह तद्यजमान.ञ्जहति, ते यत्त.त्कुर्वन्ति- स्वानि लोमानि यजमाने दधति, ते विष्वञ्चो लोमभि.रमुष्मि.न्लोके संभवन्ति।। 7।।
- तस्मा.देवँवि.द्यज्ञे हीन.न्न कुर्यात्।। 8।।
- अथ वा अत ऋत्विजा.मेव विज्ञानम्।। 9।।
- पशवो हाध्वर्यु.मनु- कीर्ति.र्होतारँ- योग.क्षेमो ब्रह्माण-मात्मा च प्रजा चोद्गातारम्।। 10।।

### द्वितीयः खण्डः

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

• 卐 3.2 स यदि पशुतो व्याधीयेता-ऽध्वर्यु.र्म इद.मक.रिति विद्या,दथ यद्येनं पापिका कीर्ति.रनूदिया-द्धोता म इद.मक.रिति विद्या,दथ यद्यस्य योगक्षेमो व्यथेत- ब्रह्मा म इद.मक.रिति विद्या,दथ यद्यात्मना वा प्रजया वा व्याधीये.तोद्गाता म इद.मक.रिति विद्यात्।। 1।।

• प्राणदेवत्यो वै ब्रह्मा- वाग्देवत्या इतर ऋत्विज,स्स यदि मन्येत ब्रह्मा म इद.मक.रिति- हरितं हिरण्यं दर्भनाड्या प्रबध्य- स्रुच्यवधाय चतुर्गृहीत.माज्य.ङ्गृहीत्वा जुहुया- न्नमः प्राणाय वाचस्पतये स्वाहेति, यद्यु वा इतरे- नमो वाचे प्राणपत्न्यै स्वाहेति, यदीतरो यदि वेतरे- सर्वे.ष्वेवानुपर्याय.ञ्जुहुया- न्नमः प्राणाय वाचस्पतये स्वाहा- नमो वाचे प्राणपत्न्यै स्वाहेति।। 2।।

• अथ तद्धिरण्यं ब्रह्मणे दद्यात्।। 3।।

• अथ यदाह- यज्ञो वाव यज्ञस्य प्रायश्चित्ति.रिति- पुन.र्यज्ञ एव स, एते उ ह त्वेवाऽऽहुती- यज्ञविभ्रष्टस्य प्रायश्चित्ति.रिति।। 4।।

## तृतीयः खण्डः

• 卐 3.3 ते वा ऋत्विज-स्स यजमानो, दैवा वा अन्य ऋत्विजो- मानुषा अन्ये, य.न्दैवा याजयन्ति- देवलोक.मेव स तै.रव रुन्धे- न मनुष्यलोक,मथ यं मानुषा याजयन्ति- मनुष्यलोक.मेव स तैरव रुन्धे- न देवलोक,मथ य.मुभये याजयन्ति- देवलोक.ञ्चैव स तैरव रुन्धे मनुष्यलोकञ्च।। 1।।

• स एता.न्दैवा.नृत्विजो वृणीता-ऽग्नि.र्मे होता-ऽऽदित्यो मेऽध्वर्यु-श्चन्द्रमा मे ब्रह्मा- पर्जन्यो म उद्गाता-ऽऽकाशो मे सदस्य- आपो मे होत्राऽऽशंसिनो- रश्मयो मे चमसाध्वर्यवः।। 2।।

• स एता.न्दैवा.नृत्विजो वृत्वा-ऽथैता.न्मानुषा.न्वृणीत- य एन.मभिराधयेयुः।। 3।।

• अथ क्षत्रिय.न्देवयजनँ याचेत्।। 4।।

• स चे.त्तस्मै दद्या-द्देवयजनवा.न्भूया- इत्येनं ब्रूयात्।। 5।।

• न चे.त्तस्मै दद्या-द्यदह न्देवयजनँ वेद- तस्मिंस्त्वा वृश्चानी.त्येनं ब्रूयात्।। 6।।

• अग्नि.र्वाव तद्देवयजनं- भूमि.र्वाव तद्देवयजन-मापो वाव तद्देवयजनं- श्रद्धा वाव तद्देवयजन-मेतेषु ह वा एन न्देवयजने.ष्वा वृश्च,त्यथो हाऽऽर्ति मेवाऽपौरुषेयी.न्नेति।। 7।। (नेति - नयति)

• अथ तत ए.त्यर्त्विजो देवयजनँ याचेत्।। 8।। (एत्य, ऋत्विजः)

• अग्नि.र्मे होता- स मे देवयजन.न्ददातु- होत.र्दैवयजनं मे देही.त्युच्चै,रादित्यो मेऽध्वर्यु-स्स मे देवयजन.न्ददा-त्वध्वर्यो देवयजनं मे देही.त्युच्चै,श्चन्द्रमा मे ब्रह्मा- स मे देवयजन न्ददातु- ब्रह्म.न्देवयजनं मे देही.त्युच्चैः, पर्जन्यो म उद्गाता- स मे देवयजन न्ददा-तूद्गात दैवयजनं मे

देही.त्युच्चै,राकाशो मे सदस्य-स्स मे देवयजन न्ददातु- सदस्य देवयजनं मे देही.त्युच्चै,रापो मे होत्राऽऽशंसिन-स्ते मे देवयजन.न्ददतु- होत्राऽऽशंसिनो देवयजनं मे दत्ते.त्युच्चै, रश्मयो मे चमसाध्वर्यव-स्ते मे देवयजन.न्ददतु- चमसाध्वर्यवो देवयजनं मे दत्ते.त्युच्चैः।। 9।।

- ता वा एता देवता- ऋत्विजा.मेव वाग्भि र्दैवयजन.न्ददति, स दत्ते यजते।। 10।।
- यदुन्नतं भूम्या अनूषरं- यत्र बहुला ओषधय श्चात्वाल.सरिण्यो- यत्राऽऽप.स्स्यु-स्तस्य नु पुरः।। 11।।
- तस्य न पुरस्ता.द्देवयजनमात्र.मतिशिष्या-द्यावा.न्छम्या.प्रासः।। 12।।
- अवर.पुरुषा हाऽस्माच्छ्रेयांसो भवन्ति- यस्यैव मति.रेचयन्ति।। 13।।
- काम.न्दक्षिणत- आगामुका हैन न्दक्षिणा भवन्ति।। 14।।
- कामं पश्चा-दवर.पुरुषा हास्माच्छ्रेयांसो भवन्ति।। 15।।
- काम मुत्तरत- उत्तरा हैन.न्देवयज्योप.नामुका भव-त्युत्तरोत्तरणी हास्य श्री.र्भवति।। 16।।
- यस्य पुरस्ता.त्त्रीणि ज्योतींषि दृश्येर-न्नग्नि-राप- आदित्य,स्तद्देवयजन- न्त.त्त्रिशुक्रियम्।। 17।।
- पुरस्ता.च्चित्र न्देवयजनम्।। 18।। (देवयजनम् - यागदेशः)
- पश्चा.च्चित्रं श्मशानकरणम्।। 19।।
- प्रा.गुद.क्प्रवण.न्देवयजनम्।। 20।।
- पश्चा.द्दक्षिणाप्रवणं श्मशानकरणम्।। 21।।
- यथा वै दक्षिण॰ पाणि-रेव.न्देवयजनम्।। 22।।
- यथा सव्य-स्तथा श्मशानकरणम्।। 23।।
- यथा श्मशानकरण- न्तथाऽभिचरणीयाना.न्देवयजनम्।। 24।।
- अप्यु हैक आहु, र्यस्मि.न्नेव कस्मिंश्चि.द्देशे श्रद्दधानो यजत- ऋध्नो.त्येवेति।। 25।।

## चतुर्थः खण्डः

- 卐 3.4 यावान् यज्ञे रसो भवति- तेनात एव प्राचीनं प्रचर,न्त्यथैत.द्यातयाम परिशिष्यत- ऋजीष न्त.न्नाहु, तस्मै यद्वृथैवाऽपास्येयु-र्नो तस्मै, यदप्ना.वनुप्रहरेयु- स्तेनाऽऽप एवाभ्यव यन्ति।। 1।।
- आपो वै सर्वस्य शान्ति॰ प्रतिष्ठा।। 2।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

- पाप्मानं हैष हन्ति- यो यजते, त.मिमं पाप्मानं हत-मपो हराणीति।। 3।।
- तेनान्तरेण प्रति पद्यन्ते- चात्वाल.श्चोत्करश्च।। 4।।
- एतद्वै देवाना.न्तीर्थम्।। 5।।
- तदेत.दृषि.राहा-ऽम्नानं तीर्थ.ङ्क इह प्रवोच-द्येन देवा꠳ पथा प्रपिबन्ते सुतस्येति।। 6।।
- एतद्वै देवाना न्तीर्थं,मतीर्थं ह्येव यज्ञस्यातोऽन्यत्।। 7।।
- तस्मा.देतेनैव प्रसृते प्रपद्ये-तैतेन निष्क्रामेत्।। 8।।
- ता.न्प्रच्युता.न्देवयजना.दप्राप्ता.नप एतस्मि.न्नवकाशे रक्षां.स्यजिघांस,न्त्स एत.दग्नी रक्षोहा सामापश्य,त्तान्येतेनाऽपाऽहत, तान्यमु.र्ह्यपहतानि सन्तीति- देवा अकुर्व,न्नित्येव रक्षांस्यप सेधति।। 9।। (अमुर्हि- अदसः मकार-उत्वादेशौ, र्हिल्। अनद्यतने र्हिलन्यतरस्याम् पा.सू 5.3.21)
- तस्याऽहावोऽहाव इति स्तोभा.न्त्स्तोभ,त्यहावोऽस्त्वहावोऽस्त्वि.त्येवैत.द्रक्षां.स्यप सेधति।। 10।।
- अग्नि.ष्टपति- प्रतिदहती.त्याह- रक्षांस्येव तत्प्रति दहति।। 11।।
- पादाय पादाय स्तोभा अनु वर्तन्ते- रक्षसा.मपहत्यै।। 12।।
- विश्वँ समत्रिण.न्दह विश्वँ समत्रिण न्दहे-त्यत्रिणो वै रक्षाँसि- पाप्मानोऽत्रिणो-ऽत्रिण एवैत.द्रक्षाँसि पाप्मान मपसेधति।। 13।।
- तस्य त्रिर्निधन.माहुः।। 14।।
- यँ वै सुहत.ङ्घ्नन्ति- न स पुन.रुद्रिङ्क्ते, यथा ह पुन꠳ पुन.रादाय- सुहतं हन्या-त्तादृ.गेतत्।। 15।।
- तद्वा अतिच्छन्दस्सु भवति।। 16।।
- वारण.मिव वा एत.च्छन्दो- यदतिच्छन्दा, वारणानीव रक्षाँ.स्यायतनानि, तद्यथा स्व.मरण्य मभयेनातिक्रामे-त्तादृ.गेतत्।। 17।।
- तद्वै सप्तपदासु भवति।। 18।।
- सप्त वै छन्दांसि चतु.रुत्तराणि, तद्यथा सर्वै श्छन्दोभि रभयेनातिक्रामे- त्तादृ.गेतत्।। 19।।
- तस्य त्रिर्वचन- एकविंशति꠳ पदानि, त्रिस्सामाऽह- तच्चतुर्विंशतिः।। 20।।
- चतुर्विंशति.रर्धमासा स्सँवत्सर- स्सँवत्सर स्साम।। 21।।

Sri Sachchidananda Avadhoota Datta Peetham • Mysore

- तस्य ह वा एतस्य सँवत्सरस्य साम्नो-ऽहोरात्राणि हिङ्कारो-ऽर्धमासा४ प्रस्तावो- मासा आदि- र्ऋतव उद्गीथ४- पौर्णमास्य४ प्रतिहारो-ऽष्टका उपद्रवो-ऽमावास्या निधनम्।। 22।।
- तस्य ह वा एतस्य सँवत्सरस्य साम्नो- वसन्तो हिङ्कारो- ग्रीष्म४ प्रस्तावो- वर्षा उद्गीथ- श्शर.त्प्रतिहारो- हेमन्तो निधनम्।। 23।।
- तस्मा.द्धेमन्तं प्रजा निधनकृता इवाऽऽसते, निधनरूप.मेवैतर्हि।। 24।।
- तदाहु४- कान्दिश.मवभृथ.मभ्यवेयु.रिति।। 25।।
- प्राञ्चोऽभ्यवेयु,र्देवानाँ वा एषा दि-ग्य.त्प्राची, या देवाना.न्दि-क्तान्नोऽनु यज्ञ स्सन्तिष्ठाता इति।। 26।।
- दक्षिणाऽभ्यवेयु४, पाप्मानँ हैष हन्ति- यो यजते, तमिमं पाप्मानँ हत न्दक्षिणा हराणीति, पितृणाँ वा एषा दि-ग्य.द्दक्षिणा, या पितृणा.न्दि.क्तान्नोऽनु यज्ञ स्सन्तिष्ठाता इति।। 27।।
- प्रत्यञ्चोऽभ्यवेयु,र्मनुष्याणाँ वा एषा दि-ग्य.त्प्रतीची, या मनुष्याणा न्दि-क्तान्नोऽनु यज्ञ स्सन्तिष्ठाता इति।। 28।।
- उदञ्चोऽभ्यवेयु,र्नक्षत्राणाँ वा एषा दि-ग्य.दुदीची, या नक्षत्राणा.न्दि-क्ता न्नोऽनु यज्ञ स्सन्तिष्ठाता इति।। 29।।
- अतो वाव यतमथैव कतमथा चाऽऽप स्स्यु-स्तदभ्यवेयुः।। 30।।
- यद्वै विद्वा.न्कर्म करो-त्यस्मा.दिद.मिति- वसीया.नेव तेन भवति।। 31।।
- तदाहु- स्स्रवन्ती.ष्वभ्यवेयू 3 स्स्थावरासू 3 इति।। 32।।
- स्रवन्ती.ष्वभ्यवेयु४, पाप्मानं हैष हन्ति- यो यजते, तमिमं पाप्मानं हत-मप४ प्रवहता.मिति।। 33।।
- स्थावरा या.श्शीपल्या-स्ता.स्वभ्यवेयु,रितो मा यज्ञो विक्षुब्ध४ प्रत्युप.तिष्ठाता इति।। 34।।
- अतो वाव यतरथैव कतरथा चाऽऽप.स्स्यु-स्तदभ्यवेयुः।। 35।।
- यद्वै विद्वा.न्कर्म करो-त्यस्मा.दिद.मिति- वसीया.नेव तेन भवति।। 36।।

पञ्चमः खण्डः,

- 卐 3.5 एकस्यै हि.ङ्करोति स प्रथमया- तिसृभ्यो हि.ङ्करोति स मध्यमया- पञ्चभ्यो हि.ङ्करोति स उत्तम,यैकस्यै हिङ्करोति स प्रथमया- तिसृभ्यो हिङ्करोति स पराचीभि४- पञ्चभ्यो हिङ्करोति- स एकया- स एकया- स तिसृभि,रिषु.स्त्रिवृतो विष्टुतिः।। 1।।

- अभिचर.न्त्स्तुवीत।। 2।।
- अनीकं प्रथ.मेषु-र्धनु.ज्या, यत्तिस्र स्सन्दधाति- व्येव पञ्चभि स्सृजते।। 3।।
- स्तृणुते भ्रातृव्यँ- वसीया.नात्मना भवति- य एतया स्तुते।। 4।।

षष्ठः खण्डः

- 卐 3.6 तिसृभ्यो हि.ङ्करोति स पराचीभि- स्तिसृभ्यो हिङ्करोति स पराचीभि- र्नवभ्यो हि.ङ्करोति स तिसृभि स्स तिसृभि स्स तिसृभिः।। 1।।
- अभिचर.न्त्स्तुवीत।। 2।।
- वज्रो वै त्रिवृ-द्वज्र स्त्रिणवो, यत्त्रिवृ.त्त्रिणवाभ्यां पञ्चदशँ विदधाति- वज्र.मेव तत्सम्य.क्सन्दधाति।। 3।।
- एव.मिव वै वज्र स्साधु- र्यदारम्भणतोऽणीया-न्प्रहरणत स्स्थवीयान्।। 4।।
- तेन पाप्मानं भ्रातृव्यं स्तृणुते- वसीया.नात्मना भवति- य एतया स्तुते।। 5।।

सप्तमः खण्डः

- 卐 3.7 एतयैवाऽभिचर.न्त्स्तुवीत।। 1।।
- वज्रो वै त्रिवृ-द्वज्रः पञ्चदशो- वज्र स्त्रिणवो, यत्त्रिवृ.त्पञ्चदश.त्रिणवै स्सप्तदशँ विदधाति- वज्र.मेव तत्सम्य.क्सन्दधाति।। 2।।
- एव.मिव वै वज्र स्साधु- र्यदारम्भणतोऽणीया-न्प्रहरणत स्स्थवीयान्।। 3।।
- तेन पाप्मानं भ्रातृव्यं स्तृणुते- वसीया.नात्मना भवति- य एतया स्तुते।। 4।।

अष्टमः खण्डः

- 卐 3.8 तिसृभ्यो हिङ्करोति स पराचीभि- र्नवभ्यो हिङ्करोति स तिसृभि स्स तिसृभि स्स तिसृभि- र्नवभ्यो हि.ङ्करोति स तिसृभि स्स तिसृभि स्स तिसृभि,रभिचर.न्त्स्तुवीत।। 1।।
- वज्रो वै त्रिवृ-द्वज्र.स्त्रिणवो, यत्त्रिवृ.त्त्रिणवाभ्या मेकविंशँ विदधाति- वज्र.मेव तत्सम्य.क्सन्दधाति।। 2।।
- एव.मिव वै वज्र स्साधु- र्यदारम्भणतोऽणीया-न्प्रहरणत स्स्थवीयाँ-स्तेन पाप्मानं भ्रातृव्यं स्तृणुते- वसीया.नात्मना भवति, य एतया स्तुते।। 3।।

नवमः खण्डः

- 卐 3.9 नवभ्यो हि.ङ्करोति- स तिसृभि स्स तिसृभि स्स तिसृभि, र्नवभ्यो हिङ्करोति- स तिसृभि स्स तिसृभि स्स तिसृभि,र्नवभ्यो हिङ्करोति- स तिसृभि.स्स तिसृभि.स्स तिसृभि,रभिचर.न्त्स्तुवीत।। 1।।
- वज्रो वै त्रिणवो- वज्र.मेव तत्पराञ्चं प्रवर्तयति- स्तृत्यै, तेन पाप्मानं भ्रातृव्यं स्तृणुते- वसीया.नात्मना भवति, य एतया स्तुते।। 2।। इति तृतीयोऽध्यायः।।

## षड्विंश ब्राह्मणे चतुर्थोऽध्यायः।।

### प्रथमः खण्डः

- ❃,4.1 स्वरान्तः प्रथम स्त्रिरात्रो- गायत्री।। 1।।
- प्राणो वै गायत्री- प्रजापति स्स्वरः- प्रजापति.मेवाऽऽप्नोति।। 2।।
- निधनान्तो द्वितीय.स्त्रिष्टुप्।। 3।।
- वीर्यँ वै त्रिष्टु-प्त्रैष्टुभः पुरुषः- पुरुष.मेवाऽऽप्नोति।। 4।।
- इडाऽन्त स्तृतीयो- जगती।। 5।।
- पशवो वा इडा- पशवो जगती- जागताः पशवः- पशू.नेवाऽऽप्नोति।। 6।।
- प्रसृतच्छन्दाः प्रथम.स्त्रिरात्र- स्तेन सोऽयातयामा।। 7।।
- अथोत्तरस्य च्छन्दांसि व्यूहन्ति, त्रिष्टुभः प्रतिपदो भवन्ति, त्रिष्टुभाँ लोके जगत्यो- जगतीना.ङ्गायत्र्य- स्तेन सोऽयातयामा।। 8।।
- अथोत्तमस्य च्छन्दांसि व्यवोहन्ति, जगत्यः प्रतिपदो भवन्ति, जगतीनाँ लोके त्रिष्टुभ- स्त्रिष्टुभा.ङ्गायत्र्य,स्तेनो एव सोऽयातयामा।। 9।।
- अभि वा एता अन्योऽन्यस्यै लोक.मभ्यध्याय-न्काम.मेवैना गमय,त्याप्नोति तङ्कामँ- यस्मै कामायैष आह्रियते।। 10।।
- तस्मा.द्युजौ न सह्.ग्वहत,स्तस्मा.द्विपरिणीतौ वहीयाँसौ भवत-स्तस्मा.दुभयतोदन्त स्स्यन्दन्ते।। 11।।
- तृचे वा अन्य ऋषयो विराज मपश्यन्, वसिष्ठ.श्चतुर्ऋचे।। 12।।
- तेन स चतुर्ऋचो, यत्तृचेऽन्य.त्साम भव-त्येकर्चेऽन्य,द्य.द्वाव चतसृ.ष्वेकं साम- स एव चतुर्ऋचः।। 13।।
- साम भूयांसं पोषं पुष्यति, तमनु पोषं पोषुको भवति।। 14।।

- एतद्ध स्माऽऽह मुञ्ज स्सामश्रवस- एतँ ह वै वयँ साम्नः पोषँ विद्मेति, तस्मा.द्वय.मप्रतिगृह्णन्तो- न सहस्रपोषा.च्च्यवामहा इति।। 15।।
- तदु ह स्माऽऽह वासिष्ठ श्चैकितानेय- स्साम हैव नूनं भूयांसं पोषं पुष्यति- तमनुपोषं पोषुको भवति, विधवाया इव त्वेवैत.ज्जन्म- यदसाम्नी चतु-र्थ्येवं ह वा एते विदु.रिति, तस्मा.देतेषाँ युवान श्श्रोत्रियाः पुराऽऽयुषः प्रमायुका भवन्ति- युवतयो जाया विधवा भवन्तीति, यत्तृचेऽन्य.त्साम भव- त्येकर्चेऽन्य,द्य.द्वाव चतसृ.ष्वेकं साम- स एव चतुर्ऋच इति।। 16।।
- पशु.रतिरिच्यते- स ऐन्द्राग्न आलम्भ्यः।। 17।।
- इन्द्राग्नी वै देवाना.मोजिष्ठौ, ता उ अयातयामानौ- तावेव तद्युनक्ति- स्वर्गस्य लोकस्य समष्ट्यै।। 18।।
- सौर्यं ब्रह्मवर्चस.काम आलभेत।। 19।।
- एतस्याँ वा एकादशिन्या.मादित्या स्सूर्य.मजनय-त्स तेजो ब्रह्मवर्चस.मवारुन्ध, तेजस्वी ब्रह्मवर्चसी भवति- य एवँ वेद।। 20।।
- अथो खल्वाहु-राग्नेय एवाऽऽलाम्भ्य इ,त्यग्नि र्वै सर्वा देवता-स्तेन न देवताना.ङ्काञ्चना ऽन्त.रेति।। 21।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham SGS Mysore

## द्वितीयः खण्डः

- ❋,4.2 अथैष श्येनः।। 1।।
- अभिचरन् यजेत।। 2।।
- श्येनो वै वयसा.ङ्क्षेपिष्ठो, यथा श्येन आददी-तैव.मेवैन.मेतेनाऽऽदत्ते।। 3।।
- त्रिवृतः पवमाना भवन्ति।। 4।।
- त्रिवृद्वै स्तोमाना.ङ्क्षेपिष्ठो, यत्त्रिवृ.द्भव-त्याशीय.स्तृणवा इति।। 5।।
- रथौ हविर्धाने भवतो, रथवज्र.मेवास्मै तत्प्रवर्तयति- स्तृत्यै।। 6।।
- वषट्कार.णिधनं भवति।। 7।।
- एष वै वज्राणा.मोजिष्ठो- यत्साम वज्रो, यं बहवो वषट्कुर्वन्ति- तमेवास्मै वज्रं प्रहरति- स्तृत्यै।। 8।।
- उभे बृह.द्रथन्तरे भवत- उभाभ्या मेवास्मै बृह.द्रथन्तराभ्याँ वज्रं प्रहरति- स्तृत्यै।। 9।।
- पराचीषु रथन्तरं भवति।। 10।।
- पराञ्च.मेवास्मै वज्रं प्रहरति- स्तृत्यै।। 11।।

- तस्य रथन्तरं पृष्ठं- बृह.द्ब्रह्मसा,मैष वै साम वज्र- स्तमेवास्मै वज्रं प्रहरति- स्तृत्यै।। 12।।
- यङ्कामयेत क्षीयेतेति- तस्य बृह.त्पृष्ठ.ङ्कुर्या-द्रथन्तरं ब्रह्मसाम, क्षत्रँ वै बृह-त्पशवो रथन्तर,ङ्क्षत्रेणैवास्य पशून् ह-न्त्यपशु र्भवति- क्षीयते।। 13।।
- यङ्कामयेत परां परावत.मिया-न्न प्रतितिष्ठे.दिति, पवमाने रथन्तर.ङ्कुर्या-द्बृह.त्पृष्ठं- प्लवं ब्रह्मसाम, बृह.द्रथन्तराभ्या.मेवैन.मेभ्यो लोकेभ्य उद्धृत्य प्लवेन प्रप्लावयति, परां परावत.मेति- न प्रति तिष्ठति।। 14।।
- वार्षाहरे पवमान.मुखे भवत,स्सफौपगवे नानद.ङ्कूराणि सामानि संभवन्ति- स्तृत्यै।। 15।।
- तैल्वको वा बाधको वा यूप.स्स्फ्याग्रः।। 16।।
- शव.नभ्ये अधिषवणे।। 17।।
- अग्नये रुद्रवते लोहितꣳ पशुः।। 18।।
- सादय.न्त्युपांश्वन्तर्यामौ।। 19।।
- शरमयं बर्हि.श्शीर्त्यै।। 20।।
- वैभीतक इध्मो विभित्त्यै।। 21।।
- लोहितोष्णीषा- लोहित वाससो- निवीता ऋत्विजꣳ प्रचरन्ति- स्तृत्यै।। 22।।
- नव नव दक्षिणा भवन्ति।। 23।।
- नावय.न्त्येवैन.न्तत्।। 24।।

## तृतीयः खण्डः

- ❈,4.3 त्रिवृ.दग्निष्टोमः।। 1।।
- तस्येषुँ विष्टुति.ङ्कृत्वाऽभिचरन् यजेत।। 2।।
- इषुवधो वै पुराऽऽयुषो भवति, यदिषुँ विष्टुति.ङ्करोति- पुरैवैन.मायुषꣳ प्रवृश्चति।। 3।।
- त्रिवृद्वै स्तोमाना.ङ्क्षेपिष्ठो, यत्त्रिवृ.द्भव-त्याशीय.स्तृणवा इति।। 4।।
- वषट्कार.णिधनं भवति।। 5।।
- सप्तहं भव-त्या सप्तमा.त्पुरुषा.दनायतनो भवति- यमेतेनाभिचरन्ति।। 6।।
- समान.मितर.च्छ्येनेन।। 7।।

## चतुर्थः खण्डः

- ❃,4.4 अथैष सन्दंशः।। 1।।
- अभिचरन् यजेत।। 2।।
- यद्वै दुरादानं सन्दंशेन- त.दादत्ते।। 3।।
- यद्वौ द्वौ स्तोमौ सह यथा ह दुरादानँ- सन्दंशेनानुहायाऽऽददी-तैव.मेवैन.मेतेनाऽऽदत्ते।। 4।।
- त्रिवृतं स्तोमं संपद्यते- बृहती छन्दो, वज्रो वै त्रिवृ-त्पशवो बृहती- वज्रेणैवास्य पशून् ह,न्त्यपशु.र्भवति।। 5।।
- वैय्यश्वं भवति- व्यश्व.मेवैन.ङ्करोति।। 6।।
- परिष्टुब्धेडं भवति- पर्येवैनँ वृश्चति।। 7।।
- वार्षाहरे पवमान.मुखे भवतः, काशीतोपगवे नानद.ङ्कूराणि सामानि संभवन्ति- स्तृत्यै।। 8।।
- निस्सप्तदश-स्तेन क्रूरः।। 9।।
- समान.मितर.च्छ्येनेन।। 10।।

### पञ्चमः खण्डः

- ❃,4.5 अथैष वज्रोऽभिचरन् यजेत, वज्रेणैवास्मै वज्रं प्रहरति- स्तृत्यै।। 1।।
- सर्वः पञ्चदशो भवति।। 2।।
- वज्रो वै पञ्चदश,स्त.मेवास्मै वज्रं प्रहरति- स्तृत्यै।। 3।।
- उक्थ्य ष्षोडशिमा.न्भवति।। 4।।
- पशवो वा उक्थानि- वज्र ष्षोडशी- वज्रेणैवास्मै वज्रं प्रहरति- स्तृत्यै।। 5।।
- तस्य महानाम्न्य- ष्षोडशि.साम भवन्ति।। 6।।
- वज्रो वै महानाम्न्यो- वज्र ष्षोडशी- वज्रेणैवास्मै वज्रं प्रहरति- स्तृत्यै।। 7।।
- समान.मितर.त्पूर्वेण।। 8।।

### षष्ठः खण्डः

- ❃,4.6 अतिरात्र.श्चतुर्विंशं प्रायणीय.मह.रभिजि-त्त्रय स्स्वरसामानो- दिवाकीर्त्य.मह-स्त्रय.स्स्वरसामानो- विश्वजि-न्महाव्रत-श्चातिरात्रश्च।। 1।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

- विश्वे देवा स्सत्र.मासत सोमेन राज्ञा गृहपतिना, तेऽब्रुव-न्त्सोम एव नो राजा सर्वत्र विभवे.दिति, तस्मा.त्सोमो राजा सर्वाणि नक्षत्रा.ण्युपैति, सोमो हि रेतोधाः।। 2।।
- नवाहं सँवत्सरस्य गर्भ.मुपयन्ति।। 3।।
- नवाहो वै सँवत्सरस्य प्रतिमा- नव प्राणाः- प्राणा.नेवाव रुन्धते।। 4।।
- प्रजावन्तो जीवा ज्योति.रश्नुवते- य एता उपयन्ति।। 5।। इति चतुर्थोऽध्यायः।।

## षड्विंशब्राह्मणे पञ्चमोऽध्यायः

### प्रथमः खण्डः

- ❃,5.1 प्रजापति.स्तपोऽतप्यत, तस्य ह वै तप्यमानस्य मनः प्राजायत, देवा.न्त्सृजेयमिति- त इमे देवा असृजन्त, दिवा देवा नसृजत- नक्त मसुरान्, यद्दिवा देवा.नसृजत- तद्देवाना.न्देवत्वँ, यदसूर्य- न्तदसुराणा मसुरत्वँ, यत्पीतत्व- न्तत्पितृणां पितृत्वम्।। 1।।
- देवा वै स्वर्गकामा.स्तपोऽतप्यन्त, तेषा न्तप्यमानानाँ रसोऽजायत- पृथि.व्यन्तरिक्ष.न्द्यौरिति, तेऽभ्यतपं-स्तेषा.न्तप्यमानानां रसोऽजायत- ऋग्वेदः पृथिव्या- यजुर्वेदोऽन्तरिक्षा-त्सामवेदोऽमुष्मा,त्तेऽभ्यतपं-स्तेषा न्तप्यमानानां रसोऽजायत- ऋग्वेदा.द्गार्हपत्यो- यजुर्वेदा द्दक्षिणाग्नि- स्सामवेदा.दाहवनीय,स्तेऽभ्यतपं- स्तेषा.न्तप्यमानानां पुरुषोऽजायत- सहस्रशीर्ष स्सहस्राक्ष स्सहस्रपात्।। 2।।
- ते देवाः प्रजापति.मुपाधावन्- वेद.शरीरं वा इद.ममृतशरीर-न्न ह वा इदं मृत्यो रसमाप्स्यतेति, तेऽब्रुव-न्को नामाऽसीति।। 3।।
- स होवाच- यज्ञो नामेति।। 4।।
- तेषां प्रजापति स्सद्यो.यज्ञसँस्था.मुपैति, सद्यो ह वा एष यज्ञ.स्संस्था.मुपैति।। 5।।
- यद्गार्हपत्यं प्रादु.ष्करोति- सा दीक्षणीया, यद्दक्षिणाग्नि.श्चाऽऽहवनीयश्च- सा प्रायणीया, यत्समिधोऽभ्यादधाति- ता उपसदः।। 6।।
- अथ यस्याऽऽज्य.मुत्पूतं स्कन्दति- सा वै स्कन्ना नामाऽऽहुति,स्ततो वै यजमानः प्रमायु.र्भवति, वरो देय- स्सैव तस्य प्रायश्चित्तिः।। 7।।
- अथ यस्याऽऽज्य.मनुत्पूतं स्कन्द-त्यसौ वा अस्कन्ना नामाऽऽहुति,स्ततो वै यजमानस्य चित्तं प्रमायु.र्भवति, चित्र.न्देयं- सैव तस्य प्रायश्चित्तिः।। 8।।

- यद्गार्हपत्ये जुहोति- तत्प्रात.स्सवनँ, यद्दक्षिणाग्नौ जुहोति- तन्माध्यन्दिनं सवनँ, यदाहवनीये जुहोति- तत्तृतीय.सवनम्।। 9।।
- यन्मार्जयते- सोऽस्यावभृथः।। 10।।
- यदन्ना ददाति तेनोदयनीय.स्योदवसानीयस्य समाप्त्यै।। 11।। (अन्ना- अन्नानि)
- अथ यस्याग्नि.र्मथ्यमानो न जायेता-ऽन्य.माहृत्याऽन्यस्मि.न्नवकाशे जुहुया-द्ब्राह्मणस्य वा हस्ते-ऽजस्य वा कर्णे- कुशस्तम्बे वा-ऽप्सु वा जुहुयात्।। 12।।
- अन्यैꣳ शतहुता.द्धोमा-देक श्शिष्यहुतो वरं, शिष्यै.श्शतहुता-द्धोमा.देकꣳ पुत्रहुतो वरं, पुत्रै श्शतहुता द्धोमा-देको ह्यात्महुतो वरम्।। 13।।
- स्वयं होता- स्वय.न्दोही- स्वय.मेवोप तिष्ठेताऽग्निहोत्रम्।। 14।।
- होम्यशेष.न्दक्षिणा।। 15।।
- सर्वै र्ह वा एतस्य यज्ञक्रतुभि.रिष्टं भवति- य एवँ विद्वा.नग्निहोत्र.ञ्जुहोति।। 16।।

द्वितीयः खण्डः

- ❃,5.2 प्रजापति र्वा एत.त्सत्रँ सहस्रसँवत्सर.मसृजत, तेषां प्रजापति स्सहस्र.सँवत्सर ङ्गवा.मयनेऽवारुन्ध, गवामयन.न्द्वादशाहे- द्वादशाह.मतिरात्रे-ऽतिरात्रँ षोडशिनि- षोडशिन.मुक्थ्य- उक्थ्य.मग्निष्टोमे-ऽग्निष्टोम.मिष्टिपशुबन्धयो-रिष्टिपशुबन्धा.वग्निहोत्रे, सर्वै र्ह वा एतस्य यज्ञक्रतुभि.रिष्टं भवति- य एवँ विद्वा.नग्निहोत्र.ञ्जुहोति।। 1।।

तृतीयः खण्डः

- ❃,5.3 प्रजापति.र्देवेभ्य औदुम्बरी.मुच्छ्रय-त्यसुषि.रमूला.मग्रन्थिं पृथुबुध्ना मेकजाम्।। 1।।
- यजमानमा.त्र्यौदुम्बरी भवति।। 2।।
- अथ कुब्ज.वामना यजमाना- ह्रस्वा.श्चोर्ध्वबाहवꣳ प्रच्छेदन.ङ्कुर्युः।। 3।।
- कतिच्छदनौदुम्बरी भवति- नव.च्छदनाऽग्निष्टोम.साद्यस्क्रे-ष्वेकादश वैश्यस्तोमा-ऽतिरात्र. पौण्डरीकेषु- सप्तदश वाजपेयाऽप्तोर्याम्णो-रेकविंश.त्यश्वमेधे-ऽष्टाचत्वारिंशतं पुरुषमेधे-ऽपरिमितं सर्वमेधे।। 4।। (कतिच्छदना, औदुम्बरी)
- य एवँ वेद- यदौदुम्बरी.मुच्छ्रय-त्यपचिति.मेवाऽऽप्नोति।। 5।।

• प्रजापति.रकामयताऽपचितिं प्राऽऽप्नवानी-त्यू.र्गुदुम्बर- ऊर्गन्न- मन्नं साम- तस्मा.त्सामगेभ्यो ऽपचिति.ङ्करवाणीति, य एवँ वि.त्त्वौदुम्बरी मुच्छ्रय-त्यपचिति मेवाऽऽप्नोति।। 6।।

चतुर्थः खण्डः

- ❃,5.4 यूप.ङ्करोति- सक्षीरं- स्थूलं मूले- वालाग्र.मनुरूपम्।। 1।।
- वज्रो वै यूपो- वज्रेणैवास्मै भ्रातृव्यं प्रहरति।। 2।।
- अष्टाश्री॰ करोति।। 3।। (अश्रीः - अश्रि,शस्)
- दश दिश॰ परिगृह्णा-त्युभयत॰ पाङ्क्ते- द्वे यूपे करोति।। 4।।
- पञ्चदश सप्तदशैकविंश.त्यरत्निँ वा।। 5।।
- पालाशं पुष्टिकामस्य- बैल्वं ब्रह्मवर्चसकाम-स्यौदुम्बर.मन्नाद्यकामस्य- खादिरं बलकामस्य- वैभीतक.राजवृक्षौ भ्रातृव्यवत॰- क्रमुका.श्वत्थ.पाषाणा यशस्कामस्य- यत्किञ्च यज्ञियं पशुकामस्य।। 6।।
- तत्र वर्जनीया भवन्ति, गडुलो- व्रणिलो- व्यावृत्त॰- कुठि॰-कुब्ज- श्शूलो- दग्ध- श्शुष्क- स्सुषिरो- घुण.जग्ध- इत्यप्रशस्ताः।। 7।।
- अथ प्रशस्ता- श्शुद्धाऽऽवर्ता- अनु.पूर्वसमा॰ प्रशस्ताः।। 8।।
- यूपस्याऽश्रदेवता,न्यग्नि॰ पूर्वायाँ- यमो दक्षिणायाँ- वरुण॰ पश्चिमायां- सोम उत्तरायाँ- या विदिश-स्ता.स्वादित्य.रुद्र.मरु.द्वसवो-ऽपराजिता॰ पितर.श्चाधरायां- साध्या.श्चोर्ध्वायाम्।। 9।।
- सर्वदेवत्यो वै यूपो- यूपो वै बहुरूपो- वज्रीभूत्वा देवा.नुपतिष्ठते।। 10।।
- ते देवा॰ प्रजापति.मुपाधावन्, यूपेन प्रहर-न्त्यारोपय-न्त्या योधयन्ति च, तद्यूपस्य यूपत्वम्।। 11।।
- मूल.मरत्निं सत्वच.न्निखनेत्।। 12।।
- तस्य य.न्नैखान्य- न्तत्पितृणाँ, यदूर्ध्वं- न्तन्मनुष्याणाँ,य.त्तदधो रशनाया- ओषधि.वनस्पतीनाँ, यदूर्ध्वं रशनाया-स्तद्विश्वेषा.न्देवानाम्।। 13।।
- आप्लावय-न्त्यलङ्कुर्व-न्त्यहतेन वसनेनाऽऽच्छादयन्ति च।। 14।।
- तद्गन्धर्वाप्सरसाम्।। 15।।
- इन्द्रस्य चषालँ, यदूर्ध्व ञ्चषालस्याऽङ्गुलमात्र.ङ्कार्य-न्तत्साध्याना.न्देवानाम्।। 16।।
- प्राचीं सन्नम-त्येतद्वै विष्णो॰ परमं पदम्।। 17।।

- तस्यर्तव श्शरीरँ- शिर स्सँवत्सरो- वेदा रूपाणि- सँवत्सर एव प्रति तिष्ठति- य एवँ वेद।। 18।।

पञ्चमः खण्डः

- ❃,5.5 ब्रह्मवादिनो वदन्ति, कस्मा.द्ब्राह्मण स्साय.मासीन स्सन्ध्या.मुपाऽऽस्ते- कस्मा. त्प्रात.स्तिष्ठ,न्का च सन्ध्या- कश्च सन्ध्याया꣡ काल꣡- किञ्च सन्ध्याया स्सन्ध्यात्वम्।। 1।।
- देवा.श्चासुरा.श्चास्पर्धन्त, तेऽसुरा आदित्य.मभिद्रव-न्त्स आदित्योऽबिभे-त्तस्य हृदयं कूर्मरूपेणाऽतिष्ठत्।। 2।।
- स प्रजापति.मुपाधाव,त्तस्य प्रजापति.रेत.द्भेषज.मपश्य-द्दतञ्च सत्यञ्च ब्रह्म चोङ्कारञ्च त्रिपदाञ्च गायत्रीं- ब्रह्मणो मुख मपश्यत्।। 3।।
- तस्मा.द्ब्राह्मणोऽहोरात्रस्य सँयोगे सन्ध्या.मुपाऽऽस्ते, सज्योति-ष्या ज्योतिषो दर्शना,त्सोऽस्या꣡ काल- स्सा सन्ध्या, तत्सन्ध्याया स्सन्ध्यात्वँ, यत्साय मासीन स्सन्ध्या.मुपाऽऽस्ते- तया वीरस्थान ञ्जय,त्यथ यदप꣡ प्रयुङ्क्ते- ता विप्रुषो वज्रीभवन्ति- ता विप्रुषो वज्रीभूत्वाऽसुरा.नप घ्नन्ति, ततो देवा अभव- न्पराऽसुरा, भव.त्यात्मना- पराऽस्य भ्रातृव्यो भवति- य एवँ वेद, यत्सायञ्च प्रातश्च सन्ध्या मुपाऽऽस्ते- तया वीरस्थानं स्थानञ्च सन्तत मविच्छिन्नं भवति- य एवँ वेद।। 4।। (सज्योतिषि, आ ज्योतिषः दर्शनात्.. नक्षत्रदर्शनसमयादारभ्य सूर्यदर्शनपर्यन्तं प्रातः, सूर्यदर्शनादारभ्य नक्षत्रदर्शनपर्यन्तं सायमिति मुख्यः कालः)

Sri Ganapathy Sachchidananda Avadhoota Datta Peetham • Mysore •

षष्ठः खण्डः

- ❃,5.6 अथैषा चन्द्रमसः~ क्षयवृद्धि.र्भवति, यदा वै चन्द्रमाः~ क्षीयते चाऽऽप्यायते च, तदनु व्याख्यास्यामः।। 1।।
- पूर्वपक्षे वै देवा दीक्षन्ते- तेऽपरपक्षे सोमं भक्षयन्ति, तत्रेमानि त्रीणि पात्रा.ण्युपधीयन्ते- पृथिवी पात्र-मन्तरिक्षं पात्र-न्द्यौ꣡ पात्र.मिति, तन्देवा दिव्येन पात्रेणाऽऽदित्या꣡- प्रथमं पञ्चकलं पञ्चमीं भक्षयन्ति, तेऽन्तरिक्षेण पात्रेण रुद्रा- द्वितीयं पञ्चकल न्दशमीं भक्षयन्ति, ते पृथिव्या पात्रेण वसव-स्तृतीयं पञ्चकलं पञ्चदशीं भक्षयन्ति, षोडशी कलाऽवशिष्यते, षोडशकलो वै चन्द्रमा- स्स ओषधीश्च वनस्पतींश्च गाश्च पशूँश्चाऽऽदित्यञ्च ब्रह्म च ब्राह्मणां.श्चानु प्रविशति, तन्देवा इन्द्रज्येष्ठा स्सोमपा.श्चासोमपाश्च, यथा पितरं पितामहं प्रपितामहँ वा वृद्धं प्रलय.मुपगच्छमानँ व्याधिगतं

मरिष्यतीति वा- ताँ रात्रिँ वसन्ते- तदमावास्याया अमावास्यात्व, न्तस्मा. दमावास्याया.न्नाध्येतव्यं भवति।। 2।।

- अथ सम्भरण,न्तमोषधिभ्यश्च वनस्पतिभ्यश्च गोभ्यश्च पशुभ्य श्चाऽऽदित्याच्च ब्रह्मणश्च ब्राह्मणा स्सन्नयन्ते, तत्सान्नाय्यस्य सान्नाय्यत्वम् ।। 3।।
- चन्द्रमा वै धाता, या पूर्वा पौर्णमासी- साऽनुमति,र्योत्तरा- सा कुहू,र्योऽनुपश्य-त्यन्य.न्न पश्यति- तन्मिथुन.मेवास्य भवति।। 4।।
- पुष्ये चाऽनुमति र्ज्ञेया- सिनीवाली तु द्वापरे-खार्वायान्तु भवे.द्राका- कृत.पर्वे कुहू.र्भवेत्।। 5।।
- न्यूने चानुमतिँ विद्या-द्यस्मि.न्दृश्येत सा सिनीवाली- राकायान्तु संपूर्ण.श्चन्द्रस्तु- कुहू.र्न दृश्येत।। 6।।

सप्तमः खण्डः

- ❀,5.7 स्वाहा वै कुत.स्सम्भूता? कस्य दुहिता? केन प्रकृता? किङ्गोत्रा? कत्यक्षरा? कतिपदा? कति मात्रा? कतिवर्णा? कत्युच्छ्वासा? किञ्चास्या.श्शरीरम्? कान्यङ्गानि? कानि लोमानि? कति शिरांसि? कति वा चक्षूँषि? किमस्या आस्यम्? किं प्रावृता? कौ बाहू? कौ पादौ? क्व च स्थिता? किमधिष्ठाना? कथञ्च स्वाहां प्रति गृह्णासि? ब्रूहि स्वाहाया रूपञ्च दैवतञ्च।। 1।।
- स्वाहा वै सत्यसम्भूता, ब्रह्मणो दुहिता, ब्रह्मप्रकृता, लातव्य.सगोत्रा, त्रीण्यक्षरा-ण्येकं पद,- न्त्रयोऽस्यै वर्णा- श्शुक्ल॰ पद्म.स्सुवर्ण इति, चत्वारोऽस्यै वेदा श्शरीरं, षडङ्गा.न्यङ्गा,- न्योषधि.वनस्पतयो लोमानि,- द्वे चास्या.श्शिरसी- एकँ शिरोऽमावास्या- द्वितीयं पौर्णमासी, चक्षु श्चन्द्राऽऽदित्या,वाज्यभागौ हुत,न्दक्षिणा प्रावृता, बृहद्रथन्तरं बाहू, ऋग्यजु.स्साम गति, स्सा स्वाहा- सा स्वधा- स वषड्कार,स्सैषा देवेषु वषड्कारभूता प्रयुज्यते- पितृयज्ञेषु स्वधाभूता, शकटीमुखीं पृथिवी.मन्तरिक्षेण विपर्येति, तस्या अग्नि र्दैवतं- ब्राह्मणो रूपँ, यत्कामा.स्ते जुहुम स्तन्नो अस्तु- वयं स्याम पतयो रयीणां स्वाहेति।। 2।। (बृहद्रथन्तरमि.त्यनन्तरं बाहू इति पदं क्वचि.न्नास्ति)
- तस्यानु तृप्ति.न्तृप्यति प्रजया पशुभि रन्नाद्येन तेजसा ब्रह्मवर्चसेनेति।। 3।। इति पञ्चमोऽध्यायः।।

## षड्विंशतिब्राह्मणे षष्ठोऽध्यायः

### प्रथमः खण्डः

- ❃,6.1 अथातोऽद्भुताना.ङ्कर्मणां शान्तिँ व्याख्यास्यामः।। 1।।
- पालाशानाँ समिधा.मष्टसहस्त्र.ञ्जुहुयात्।। 2।।
- ऐन्द्र-याम्य-वारुण-धानदाऽऽग्नेय-वायव्य-सौम्य-वैष्णव्ये-त्यष्टौ।। 3।।

(दिक्पालकदिक्सम्बन्धः लोकरूढिभिन्नतया श्रूयते)

- इन्द्रायेन्दो मरुत्वते-नाके सुपर्ण.मुप य.त्पतन्त-ङ्घृतवती भुवनाना.मभिश्रिया-ऽभित्य न्देवं सवितार.मोण्यो-रग्नि.न्दूतँ वृणीमहे- वात आ वातु भेषजं- सोमँ राजानं वरुण-मिदँ विष्णु र्विचक्रम- इति।। 4।।
- एतानि सामप्रभृ.त्यष्टशत.ञ्जपित्वा- स्वस्ति वाचयित्वा, स्वस्ति हैषां भवति।। 5।।
- स्वस्तिदा विशस्पति-स्स्वस्त्ययन न्तार्क्ष्य मरिष्ट नेमि- न्त्यमूषु वाजिन न्देवजूत-मायु.र्विश्वायु- श्शत.ञ्जीव शरदो वर्धमान- इति।। 6।।
- एतै.स्सम्भाराणा.मुपस्थान.ङ्कृत्वा- स्वस्ति वाचयित्वा, स्वस्ति हास्य भवति- स्वस्ति हास्य भवति।। 7।।

### द्वितीयः खण्डः

- ❃,6.1 देवाश्च वा असुरा.श्चैषु लोके.ष्वस्पर्धन्त, ते देवाः प्रजापति.मुपाधावं-स्तेभ्य एता.न्दैवीं शान्तिं प्रायच्छत्।। 1।।
- ते तत.श्शान्तीका असुरा.नभ्यजयं,स्ततो देवा अभव- न्पराऽसुरा, भव.त्यात्मना-पराऽस्य भ्रातृव्यो भवति- य एवँ वेद।। 2।।
- अथ पूर्वाह्ण एव प्रात.राहुतिँ हुत्वा- दर्भा.न्छमीँ वीरणा-न्दधि सर्पि स्सर्षपा-न्फलवती-मपामर्गँ शिरीष-मित्येता.न्याहरे.दाहारये.द्वा, स्नातः- प्रयत- श्शुचि- श्शुचिवासा, स्स्थण्डिल.मुपलिप्य- प्रोक्ष्य- लक्षण.मुल्लिख्या-ऽद्भि.रभ्युक्ष्या-ऽग्नि मुपसमाधाय, नित्य.तन्त्रेणौदन कृसर यवागू.रक्तपायस- दधि- क्षीर- घृत.पायस- घृत.मिति घृतोत्तराः पृथक्करव स्सर्वे, सर्वेषाँ वा पायसः।। 3।।

### तृतीयः खण्डः

- ❃,6.3 स प्राची.न्दिश.मन्वावर्तते। 1।

- अथ यदाऽस्य मणि- मणिक.कुम्भ- स्थाली.दरण,मायासो, राजकुल.विवादो वा, यान.च्छत्र- शय्या-ऽऽसना-ऽवसथ- ध्वज- पताका- गृहैकदेश प्रभञ्जनेषु, गज वाजिमुख्या वाऽप्रमीयाः प्रमीयन्त- इत्येव.मादीनि, तान्येतानि सर्वाणीन्द्र.देवत्या.न्यद्भुतानि प्रायश्चित्तानि भवन्ति।। 2।। (दरणम् - विध्वंसः)

- इन्द्रायेन्दो मरुत्वत इति स्थालीपाकं हुत्वा- पञ्चभि.राज्याऽऽहुतिभि रभि जुहो,तीन्द्राय स्वाहा- शचीपतये स्वाहा- वज्र.पाणये स्वा-हेश्वराय स्वाहा- सर्वपाप.शमनाय स्वाहेति- व्याहृतिभि र्हुत्वा,ऽथ साम गायेत्।। 3।।

### चतुर्थः खण्डः

- ❁,6.4 स दक्षिणा.न्दिश.मन्वावर्तते।। 1।।

- अथ यदाऽस्य प्रजायां पशुषु शरीरे वाऽरिष्टानि प्रादु.र्भवन्ति- व्याधयो वाऽनेक.विधा, अति.स्वप्न- मस्वप्न- मतिभोजन- मभोजन- मालस्य- व्रण- मजीर्ण- निद्राणी-त्येव.मादीनि, तान्येतानि सर्वाणि यम.देवत्या.न्यद्भुतानि प्रायश्चित्तानि भवन्ति।। 2।।

- नाके सुपर्ण.मिति स्थालीपाकं हुत्वा- पञ्चभि.राज्याऽऽहुतिभि.रभि जुहोति, यमाय स्वाहा- प्रेताधिपतये स्वाहा- दण्डपाणये स्वा-हेश्वराय स्वाहा- सर्वपाप.शमनाय स्वाहेति- व्याहृतिभि र्हुत्वा,ऽथ साम गायेत्।। 3।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

### पञ्चमः खण्डः

- ❁,6.5 स प्रतीची न्दिश.मन्वावर्तते।। 1।।

- अथ यदाऽस्य क्षेत्र-गृह-सँस्थेषु धान्ये.ष्वीतयः प्रादु.र्भव,न्तीतयो वाऽनेकविधा- आखु- पतङ्ग-पिपीलिका- मध्वक- भौमक- शुक- शरभक- सौक्ष्मक- इत्येव.मादीनि, तान्येतानि सर्वाणि वरुणदेवत्या.न्यद्भुतानि प्रायश्चित्तानि भवन्ति।। 2।।

- धृतवतीति स्थालीपाकं हुत्वा- पञ्चभि.राज्याऽऽहुतिभि.रभि जुहोति, वरुणाय स्वाहा-ऽपां पतये स्वाहा- पाश.पाणये स्वा-हेश्वराय स्वाहा- सर्वपाप.शमनाय स्वाहेति- व्याहृतिभि र्हुत्वा,ऽथ साम गायेत्।। 3।।

### षष्ठः खण्डः

- ❁,6.6 स उदीची.न्दिश.मन्वावर्तते।। 1।।

- अथ यदाऽस्य कनक- रजत- वर.वस्त्र- वज्र- वैडूर्य- मुक्तामणि वियोगो भव,त्यारम्भा वा विपद्यन्ते,ऽथवाऽन्यानि क्रूराणि, मित्राणि वा विरज्यन्ते,ऽरिष्टानि वा, वयाँसि गृह.मध्यासन्ते, वाल्मीक.भौमानि वा जायन्ते, छत्राकँ वोपजायते, मधूनि वा निलीयन्त- इत्येव.मादीनि, तान्येतानि सर्वाणि वैश्रवण.देवत्या.न्यद्भुतानि प्रायश्चित्तानि भवन्ति।। 2।।(छत्राकं - सिलिग्रहम् लताविशेषः)
- अभि त्य.न्देव.मिति स्थालीपाकं हुत्वा- पञ्चभि.राज्याऽऽहुतिभि रभि जुहोति, वैश्रवणाय स्वाहा- यक्षाधिपतये स्वाहा- हिरण्यपाणये स्वा-हेश्वराय स्वाहा- सर्वपाप.शमनाय स्वाहेति व्याहृतिभि र्हुत्वा,ऽथ साम गायेत्।। 3।।

सप्तमः खण्डः

- ❃,6.7 स पृथिवी.मन्वावर्तते।। 1।।
- अथ यदाऽस्य पृथिवी तटति- स्फुटति- कूजति- कम्पति- ज्वलति- रुदति- धूमाय-त्यकस्मा. त्सलिल.मुद्गिरति- प्लव.न्न मज्जति- न निमग्न.मुत्प्लव-त्यकाले च पुष्पफल.मभि निवर्तयती, त्यश्वतरी.गर्भो जायते- यदा मज्जति हस्तिनी- भूकम्पो जायते- प्रासादं भिनत्ति यत्र-तत्र राजा विनश्यति, गौ.र्गृह.मारोहे-द्ग्राम.महिषी-त्येव.मादीनि, तान्येतानि सर्वा.ण्यग्निदेवत्या. न्यद्भुतानि प्रायश्चित्तानि भवन्ति।
- अग्नि.न्दूतँ वृणीमह इति स्थालीपाकं हुत्वा- पञ्चभि.राज्याऽऽहुतिभि.रभि जुहो,त्यग्नये स्वाहा- हविष्पतये स्वाहा,ऽर्चिꣳपाणये स्वा-हेश्वराय स्वाहा- सर्वपाप.शमनाय स्वाहेति-व्याहृतिभि.र्हुत्वा,ऽथ साम गायेत्।। 3।।

अष्टमः खण्डः

- ❃,6.8 सोऽन्तरिक्ष.मन्वावर्तते।। 1।।
- अथ यदाऽस्य विवाता वाता वायन्ते-ऽभ्रेषु चाप.रूपाणि दृश्यन्ते- खर-करभ.मन्थ- कङ्क-कपोतोलूक- काक- गृध्र- श्येन- भास- वायस- गोमायु सँस्था,न्युपरि पांसु मांस-पेश्यस्थि-रुधिर.वर्षाणि प्रवर्तन्ते, काक.मिथुनानि दृश्यन्ते, रात्रौ मणि.धनुं पश्ये,च्छशका ग्रामं प्रविशन्ति, वृक्षा.स्स्रवन्ति रुधिरा,ण्याकाशे राजकुलँ वसती-त्येव.मादीनि, तान्येतानि सर्वाणि वायु.देवत्या.न्यद्भुतानि प्रायश्चित्तानि भवन्ति।। 2।। (राजकुलं गन्धर्वकुलादिकम्)

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

- वात आवातु भेषज.मिति स्थालीपाकं हुत्वा- पञ्चमि.राज्याऽऽहुतिभि.रभि जुहोति, वायवे स्वाहा- मह.द्भूताधिपतये स्वाहा- शीघ्रपाणये स्वा-हेश्वराय स्वाहा- सर्वपाप.शमनाय स्वाहेति व्याहृतिभि.र्हुत्वा,ऽथ साम गायेत्।। 3।।

**नवमः खण्डः**

- ❃,6.9 स दिव.मन्वावतते।। 1।।
- अथ यदाऽस्य तारावर्षाणि चोल्का४ पतन्ति- निपतन्ति- धूमायन्ति, दिशो दह्यन्ति, केतव श्चोत्तिष्ठन्ति, गवां शृङ्गेषु धूमो जायते, गवां स्तनेषु रुधिरं स्रव,त्यत्यर्थँ हिम.न्निपतती, त्येव.मादीनि, तान्येतानि सर्वाणि सोमदेवत्या.न्यद्भुतानि प्रायश्चित्तानि भवन्ति।। 2।।
- सोमं राजानँ वरुण.मिति स्थालीपाकं हुत्वा- पञ्चभि राज्याऽऽहुतिभि.रभि जुहोति, सोमाय स्वाहा- नक्षत्राधिपतये स्वाहा- शीतपाणये स्वा-हेश्वराय स्वाहा- सर्वपाप.शमनाय स्वाहेति व्याहृतिभि.र्हुत्वा,ऽथ साम गायेत्।। 3।।

**दशमः खण्डः**

- ❃,6.10 स पर.न्दिव.मन्वावर्तते।। 1।।
- अथ यदाऽस्याऽयुक्तानि यानानि प्रवर्तन्ते, देवताऽऽयतनानि कम्पन्ते, दैवत.प्रतिमा हसन्ति- रुदन्ति- गायन्ति- नृत्यन्ति- स्फुटन्ति- स्विद्य-न्त्युन्मीलन्ति- निमीलन्ति, प्रति प्रयान्ति नद्य४, कबन्ध.मादित्ये दृश्यते, विजले च परिविष्यते, केतु-पताक-च्छत्र-वज्र-विषाणानि प्रज्वल,-न्त्यश्वाना.ञ्च वालधीष्वङ्गाराः~ क्षर,न्त्यहतानि चर्माणि कनिक्रन्त- इत्येव.मादीनि, तान्येतानि सर्वाणि विष्णुदेवत्या.न्यद्भुतानि प्रायश्चित्तानि भवन्ति।। 2।।
- इदँ विष्णु र्विचक्रम इति स्थालीपाकं हुत्वा- पञ्चभि.राज्याऽऽहुतिभि.रभि जुहोति, विष्णवे स्वाहा- सर्वभूताधिपतये स्वाहा- चक्रपाणये स्वा-हेश्वराय स्वाहा- सर्वापाप.शमनाय स्वाहेति व्याहृतिभि.र्हुत्वा,ऽथ साम गायेत्।। 3।।
- खनना- द्दहना- दभिमर्शना- द्गोभि.राक्रमणाच्च चतुर्भि श्शुध्यते भूमि४, पञ्चमा.च्चोपलेपनात्।। 4।।
- सम्भारा.न्प्रदक्षिण.मानीय- ब्राह्मणा.न्त्स्वस्ति वाच्य।। 5।।
- एतै स्सम्भारै.र्यदुपस्पृष्ट- न्तदभ्युक्षे,च्छाम्यति हाऽतः।। 6।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

- ब्राह्मण.भोजनँ-हिरण्य-ङ्गौ-र्वासो-ऽश्वो-भूमि.र्दक्षिणा इति, शाम्यति हाऽत-श्शान्त्यर्थ-श्शान्त्यर्थः।। 7।।

### एकादशः खण्डः

- ❃,6.11 सोऽधस्ता द्दिश.मन्वावर्तते।। 1।।
- अथ यदाऽस्य गवां- मानुष- महि-ष्यजाऽश्वोष्ट्राः प्रसूयन्ते, हीनाङ्गा.न्यतिरिक्ताङ्गानि विकृत.रूपाणि वा जायन्ते,ऽसम्भवानि संभव-न्त्यचलानि चलन्ती-त्येव.मादीनि, तान्येतानि सर्वाणि रुद्र.देवत्या.न्यद्भुतानि प्रायश्चित्तानि भवन्ति।। 2।।
- आ वो राजान.मिति स्थालीपाकं हुत्वा- पञ्चभि.राज्याऽऽहुतिभि.रभि जुहोति, रुद्राय स्वाहा- पशुपतये स्वाहा- शूलपाणये स्वा-हेश्वराय स्वाहा- सर्वपाप.शमनाय स्वाहेति- व्याहृतिभि.र्हुत्वा,ऽथ साम गायेत्।। 3।।

### द्वादशः खण्डः

- ❃,6.12 स सर्वा.न्दिश.मन्वावर्तते।। 1।।
- अथ यदाऽस्य मानुषाणा.मतिधृति.रतिदुःखँ वा, पर्वता.स्स्फुटन्ति, निपत.न्त्याकाशा,द्भूमिः कम्पते, महा.द्रुमा उन्मूल,न्त्यश्मानः प्लवन्ति, तटाकानि प्रज्वलन्ति, चतुष्पादं पञ्चपादँ वा भवन्ती-त्येव.मादीनि, तान्येतानि सर्वाणि सूर्यदेवत्या.न्यद्भुतानि प्रायश्चित्तानि भवन्ति।। 2।।
- उदुत्य.ञ्जातवेदस.मिति स्थालीपाकं हुत्वा- पञ्चभि राज्याऽऽहुतिभि.रभि जुहोति, सूर्याय स्वाहा- सर्वग्रहाधिपतये स्वाहा- किरणपाणये स्वा-हेश्वराय स्वाहा- सर्वपाप.शमनाय स्वाहेति व्याहृतिभि.र्हुत्वा,ऽथ साम गायेत्।। 3।। इति षष्ठोऽध्यायः।। षड्विंश ब्राह्मणं समाप्तम्।। ---

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

# अथ सामविधानब्राह्मणम्

## प्रथमाध्यायः

### प्रथम खण्डः

- ❃{1.1 ब्रह्म ह वा इद.मग्र आसीत्।। 1।।
- तस्य तेजो रसोऽत्यरिच्यत। स ब्रह्मा समभवत्।। 2।।
- स तूष्णीं मनसाऽध्यायत्। तस्य यन्मन आसी-त्स प्रजापति.रभवत् ।। 3।।
- तस्मा.त्प्राजापत्यां मनसा जुह्वति। मनो हि प्रजापतिः।। 4।।
- तस्य द्यौ.श्शिर आसी-दुरोऽन्तरिक्षं- मध्यँ समुद्रः- पृथिवी पादौ।। 5।।
- स वा इदँ विश्वं भूत.मसृजत। तस्य सामोपजीवनं प्रायच्छत्।। 6।।
- उपजीवनीयो भवति- य एवँ वेद।। 7।।
- तद्योऽसौ क्रुष्टतम इव साम्न स्स्वर-स्त.न्देवा उप जीवन्ति, योऽवरेषां प्रथम-स्तं मनुष्या, यो द्वितीय-स्त.ङ्गन्धर्वाप्सरसो, य.स्तृतीय-स्तं पशवो, य.श्चतुर्थ-स्तं पितरो- ये चाण्डेषु शेरते,- यः पञ्चम-स्त.मसुर.रक्षाँसि, योऽन्त्य- स्त.मोषधयो वनस्पतयो- यच्चान्य.ज्जग,त्तस्मा.दाहु स्सामैवान्न.मिति- साम ह्येषा.मुपजीवनं प्रायच्छत्।। 8।।
- उपजीवनीयो भवति- य एवँ वेद।। 9।।
- तस्य ह वा एतस्य साम्न- ऋगेवास्थीनि- स्वरो मांसानि- स्तोभा लोमानि।। 10।।
- यो ह वै साम्न स्स्वँ- य.स्सुवर्णँ वेद- स्वञ्च ह वै साम्न स्सुवर्णञ्च भवति, स्वरो वाव साम्न.स्स्व- न्तदेव सुवर्णम्।। 11।।
- यो ह वै साम्नः प्रतिष्ठाँ वेद- प्रति ह तिष्ठ-त्यस्मिंश्च लोकेऽमुष्मिंश्च, वाग्वाव साम्नः प्रतिष्ठा, यद्वेत.द्वागि-त्यृगेव सा, ऋचि साम प्रतिष्ठितम्।। 12।। (यत्,उ,एतत्,वाक्,इति,ऋक्,एव)
- स यदा गायत्रं बृहत्या.ङ्गायति- बार्हत.ञ्जगत्या- ञ्जागत.न्त्रिष्टुभि- समता.ञ्चाऽऽपद्यते, तस्मा. देत.त्सामेत्याह, साम उ ह वा अस्मिं.श्छन्दांसि साम्या.दिति, तत्साम्न स्सामत्वम्।। 13।।
- क्रुष्टः प्राजापत्यो ब्राह्मो वा वैश्वदेवो वा-ऽऽदित्यानां प्रथम- स्साध्याना. न्द्वितीयो- ऽग्ने.स्तृतीयो- वायो श्चतुर्थ- स्सौमो मन्द्रो- मित्रावरुणयो.रतिस्वार्यः।। 14।।

- ते देवा॰ प्रजापति.मुपाधावं,स्तेऽब्रुव-न्कथ.न्नु वयं स्वर्गँ लोक.मियामेति, तेभ्य एतान् यज्ञक्रतू.न्प्रायच्छ-देतै र्लोक.मेष्यथेति, तै.स्स्वर्गँ लोक.मायन्।। 15।।
- स्वर्गँ लोक.मेति- य एवँ वेद।। 16।।
- तेषा.महीयन्ता,ऽजा॰- पृश्नयो- वैखानसा- वसुरोचिषो- ये चापूता- ये च कामेप्सव,स्तेऽब्रुव-न्कथ.न्नु वयं स्वर्गँ लोक.मियामेति, तेभ्य एत.त्स्वाध्यायाध्ययनं प्रायच्छ-त्तप,श्चैताभ्यां स्वर्गँ लोक.मेष्यथेति, ताभ्यां स्वर्गँ लोक.मायन्।। 17।।
- स्वर्गँ लोक.मेति- य एवँ वेद- य एवँ वेद।। 18।।

द्वितीयः खण्डः

- ❃{1.2 अथात,स्त्री.न्कृच्छ्रा.न्व्याख्यास्यामः।। 1।।
- हविष्या-न्प्रातराशा-न्भुक्त्वा, तिस्रो रात्री र्नाश्नीयात्।। 2।।
- अथापर.न्त्र्यह.न्नक्तं भुञ्जीत।। 3।।
- अथापर.न्त्र्यह.न्न कञ्चन याचेत्।। 4।।
- अथापर.न्त्र्यह.मुपवसेत्।। 5।।
- तिष्ठे.दहनि- रात्रा.वासीत क्षिप्रकामः।। 6।।
- सत्यँ वदे- दनार्यै र्न संभाषेत- रौरव यौधाजये नित्यं प्रयुञ्जी-तानुसवन.मुदकोपस्पर्शन. मापोहिष्ठीयाभिः। अथोदक.तर्पणम्।

नमोऽहमाय- मोहमाय- मँहमाय- धून्वते- तापसाय- पुनर्वसवे- नमो नमः।

मौञ्ज्या.यौर्म्याय- सौम्याय- शम्याय- शिवाय नमो नमः।

पाराय- सुपाराय- महापाराय- पारदाय- पारविन्दाय नमो नमः।

पुरुषाय- सुपुरुषाय- महापुरुषाय- मध्यमपुरुषायोत्तमपुरुषाय- ब्रह्मचारिणे नमो नम इति।

एत.देवाऽऽदित्योपस्थानम्।

एता एवाऽऽज्याऽऽहुतयो द्वादशरात्रस्यान्ते स्थालीपाकं श्रपयि.त्वैताभ्यो देवताभ्यो जुहुयात्।

अग्नये स्वाहा- सोमाय स्वाहा- ऽग्नीषोमाभ्या-मिन्द्रग्निभ्या-मिन्द्राय- विश्वेभ्यो देवेभ्यो- ब्रह्मणे- प्रजापतये-ऽग्नये स्विष्टकृत इति।

अथो ब्राह्मण.तर्पणम्।। 7।।

- एतेनैवातिकृच्छ्रो व्याख्यातः।। 8।।



Sri Ganapathi Sachchidananda Avadhoota Datta Peetham • Mysore •

- याव.त्सकृ.दाददीत- ताव.दश्नीयात्।। 9।।
- अब्भक्ष स्तृतीय- स्स कृच्छ्रातिकृच्छ्रः।। 10।।
- प्रथम.ञ्चरित्वा- शुचिः पूतः कर्मण्यो भवति, द्वितीय.ञ्चरित्वा- यत्किञ्चि.दन्य.न्महापातकेभ्यः पाप.ङ्कुरुते- तस्मा.त्प्रमुच्यते, तृतीय.ञ्चरित्वा- सर्वस्मा.देनसो मुच्यते।। 11।।
- अथैतां.स्त्री.न्कृच्छ्रां.श्चरित्वा- सर्वेषु वेदेषु स्नातो भवति- सर्वेषु देवेषु ज्ञातो भवति- यश्चैवँ वेद- यश्चैवँ वेद।। 12।।

तृतीयः खण्डः

- ❃{1.3 अथात.स्स्वाध्यायाध्ययनस्य।। 1।।
- काम.मुक्त्वोपक्रामे-दन्ते वा। त्री.न्कृच्छ्रां.श्चरित्वा पूतो भवति। अग्निं प्रतिष्ठाप्य। अग्न्यभावे तूदक.मादित्यँ वोपसमाधाय। दर्भा.नुपस्तीर्य- दर्भे.ष्वासीनः- प्राक्कूलेषूद.क्कूलेषु वा- दक्षिणेन पाणिना दर्भमुष्टि.ङ्गृहीत्वा।। 2।।
- प्रथम.न्त्रिवर्ग.न्नवकृत्वो नवकृत्वो गायेत्।। 3।।
- एवं सदा प्रयुञ्जानो ऽग्न्याधेय.मवाऽप्नोति।। 4।।
- इन्द्राय पवते मद इति- पवमानहवीं.ष्येतेन कल्पेन।। 5।।
- सुव र्महा-स्सुव.र्मये.त्येताभ्या न्दर्श.पूर्णमासा.वेतेनैव कल्पेन।। 6।।
- भृत्यातिथि.शेषभोजी- काले दारा.नुपेयात्। यथाशक्ति चातिथिभ्यो दद्या-दप्युदक.मन्ततः। एवँ व्रतो- यदिन्द्राह- यथा त्व-मित्येते सदा प्रयुञ्जीत। सुव.र्महा- स्सुव.र्मये-त्येते च पर्वणि। तथा हास्याग्निहोत्र- मविलुप्तं सदा हुतं सदर्श.पूर्णमासं भवति।। 7।।
- कर्मान्तेऽग्निं प्रतिष्ठाप्य, व्रीहि.यवां.स्तण्डुलां-स्त्रिः प्रक्षाल्य जुहुयात्। अग्नये स्वाहा- सोमाय पवित्रवते- वरुणाय-धन्वन्तरये-मनसा प्राजापत्यां ब्रह्मणे-ऽग्नये स्विष्टकृत इति पश्चात्।। 8।।
- अथातः पाञ्चरात्रिकाणाम्। व्रीहि.यवौ भोजन.मसौहित्यम्।
- अन्ते त्वग्न्यादि.रुक्तः कल्पः।
- काम्याना.ञ्चाविप्रतिषेधः।
- तमिन्द्रँ वाजयामसीति चतु.र्वर्गेण- चातुर्मास्या.न्यवाऽऽप्नो,त्यस्य प्रेषेति पाशुकानि।। 9।।
- त्रातार.मिन्द्रँ- यजामह इत्येताभ्यां पशुबन्धम्।। 10।।

• पयो.व्रत एतेन कल्पेन- बृह.दिन्द्राय गायतेति चतुर्वर्गेण- सौत्रामण्यौ सौत्रामण्यौ।। 11।।

## चतुर्थः खण्डः

• ❃{1.4 अथात स्साप्तरात्रिकाणाम्। भैक्षं पयो वा व्रत.मेके। भैक्षार्थायैव ग्रामं प्रविशेत्। नान्यत्र स्वाध्याया.द्वाच.मुत्सृजेत्। अध.श्शयीत। नापोऽभ्यवेयात्। अन्ते त्वग्न्यादि.रुक्तः कल्पः। काम्याना.ञ्चाप्रतिषेधः।। 1।।

• ईङ्खयन्ती.रिति दशतं रथन्तरञ्च वामदेव्य,ञ्चैता.न्यनुसवनं प्रयुञ्जानो ऽग्निष्टोम.मवाऽऽप्नोति।। 2।।

• यज्ञायज्ञा वो अग्नय इति चतुर्वर्गेणाऽत्यग्निष्टोमम्। नमस्ते अग्न ओजस इति- दशतोक्थ्यम्। पुनान स्सोम धारयेति वर्गेण षोडशिनम्। परीतो षिञ्चता सुत मिति वर्गेणाऽतिरात्रम्।। 3।।

• पयोव्रत एतेन कल्पेन- तिस्रो वाच उदीरत इति वर्गेण वाजपेयम्।। 4।।

• मास.मेतेन कल्पेना-ऽऽव इन्द्र.ङ्क्रिविँ यथेति दशताऽप्तोर्यामाणम्।। 5।।

• मास.ञ्चतुर्थे काले भुञ्जान- आजुहोता हविषा मर्जयध्व-मिति दशता द्वादशाहम्।। 6।।

• सँवत्सर.मेतेन कल्पेना-ऽबो.ध्यग्नि रिति दशतं- रथन्तरञ्च- वामदेव्यञ्च- बृहच्च- वैरूपञ्च- वैराजञ्च- महानाम्न्यश्च- रेवत्य,श्चैता.न्यनुसवनं प्रयुञ्जानो- गवा.मयन मवाऽऽप्नोति।। 7।।

• राजन.रौहिणाभ्या- न्तापश्चिते।। 8।।

• पयोव्रत एतेन कल्पेन- सोमः पवते जनिता मतीना.मिति चतुर्वर्गेण- चातुर्मास्यानि सौमिका.न्यवाऽऽप्नोति।। 9।।

• सँवत्सर.मष्टमे काले भुञ्जानो ग्राम्य.मन्नं- प्र तु द्रवेति दशत.मावर्तय-न्नैमिशीय न्द्वादश.सँवत्सर.मवाऽऽप्नोति।। 10 ।।

• आग्नेय-मैन्द्रं- पावमान- मित्येतेन कल्पेन- चत्वारि वर्षाणि प्रयुञ्जान- श्शत.सँवत्सर. मवाऽऽप्नोति।। 11।।

• सर्वं प्रयुञ्जान- स्सहस्र.सँवत्सर मवाऽऽप्नोति। अनश्न.न्त्संहिता.सहस्रेण वा पृष्ठोपताप. शतसहस्रेण वा।। 12।।

• प्रथम.स्त्रिवर्ग- स्सावित्र्या.ङ्गायत्रं महानाम्न्य-श्चैषाऽमृता नाम संहि,तैतया वै देवा अमृतत्व.मायन्।। 13।।

- अमृतत्व.मेति- य एवँ वेद।। 14।।
- इदं ह्यन्वोजसेति प्रथमोत्तमे, त्वामिदा ह्यो नर- स्स पूर्व्यो महोनां- पुरां भिन्दु र्युवा कवि-रुपप्रक्षे मधुमति क्षियन्तः- पवस्व सोम मधुमाँ ऋतावा- सुरूपकृ-द्राहसं माधुच्छन्दस,मेषा माधुच्छन्दसी नाम संहि,तैतया वै देवा स्स्वर्गँ लोक.मायन्।। 15।।
- स्वर्गँ लोक.मेति- य एवँ वेद।। 16।।
- आ वो राजा- तद्वो वर्ग- आज्य.दोहानि देवव्रतानि -चैषा रौद्री नाम संहि-तैतां प्रयुञ्ज-न्रुद्रं प्रीणाति।। 17।।
- इदँ विष्णुः- प्रक्षस्य वृष्णः- प्रकाव्य.मुशनेव ब्रुवाण इति- वाराह मन्त्यं, पुरुषव्रते चैषा वैष्णवी नाम संहि-तैतां प्रयुञ्जन् विष्णुं प्रीणाति।। 18।।
- अदर्द- स्सुष्वाणास- आ तू न इति वर्गा- मृज्यमान स्सुहस्त्या इति प्रथम.षष्ठे, चैषा वैनायकी नाम संहि-तैतां प्रयुञ्जन् विनायकं प्रीणाति।। 19।।
- आ मन्द्रै.रिन्द्र हरिभि-रा नो विश्वासु हव्यं- प्र सेनानी रिति वर्गाः- पवित्र.न्त इति द्वे- एषा स्कन्दस्य संहि,तैतां प्रयुञ्ज.न्त्स्कन्दं प्रीणाति।। 20।।
- यद्वा उ विश्पति- स्सना.दग्ने-ऽक्ष.न्नमीमदन्त- ह्यभि त्रि पृष्ठ- मक्रा.न्त्समुद्रः- कनिक्रन्तीति द्वे, एषा पित्र्या नाम संहि-तैतां प्रयुञ्ज.न्पितृ.न्प्रीणाति।। 21।।
- आस्यदघ्न उदके तिष्ठ.न्नक्ये नाकी इत्येत.त्त्रि.स्सप्तकृत्वो गाये,देत.त्सर्ववाचो.गत.संमित-मेतेन सर्वा.न्कामा.नवाऽऽप्नोति।। 22।।
- यश्चैवँ वेद- यश्चैवं वेद।। 23।।

## पञ्चमः खण्डः

- ❃{1.5 अथातः प्रायश्चित्तानाम्।। 1।।
- अनादेशे मन्त्रा बलवन्त- स्तपोऽन्विताः- पावना भवन्ति।। 2।।
- आपन्नः प्रायश्चित्त.ञ्चरेत्।। 3।।
- अभ्यास.स्साम्नां शत-न्दशावरम्।। 4।।
- काहल.मुक्त्वा- दधिक्राव्णो अकारिष.मि-त्येत.द्गायेत्।। 5।। (काहलं - अश्लीलं, गुरुनिन्दादिकम्)
- परुष.मुक्त्वेदँ विष्णु र्विचक्रम इति।। 6।।
- ब्राह्मण.मुक्त्वा त्रिः।। 7।।

Sri Sachchidananda Avadhoota Datta Peetham • Mysore

- भ्रातरं मातुलं पितृव्य मिति- गुरु.जातीया.न्प्रसाद्य- पक्षिणीं रात्रि.मुपोष्य- तवाहं सोम रारणेति।।
- प्रथम.मेकविंशति.कृत्वः।। 8।।
- उपाध्यायं मातरं पितर मि-त्येतेषु त्रिरात्र मुपवस.न्नेतस्यैवान्त्यम्।। 9।।
- अनध्याप्य.मध्याप्य, सप्तरात्र.मुपवस-न्तसदा गाव श्शुचयो विश्वधायस- इत्येत.द्गायेत्।। 10।।
- अयाज्य.याजने, दक्षिणा.स्त्यक्त्वा- मास.श्चतुर्थे काले भुञ्जानꣳ- कानी इत्येत.द्गायेत्।। 11।।
- अमेध्य.दर्शने- ये ते पन्था- अधो दिव इति, तथाऽमेध्यघ्राणे।। 12।।
- अभोज्य.भोजने-ऽमेध्य.प्राशने वा, निष्पुरीषीभाव.स्त्रिरात्रावर न्तूपवस-न्नेतो न्विन्द्रं स्तवाम शुद्ध मिति पूर्वं- सदा सहस्रकृत्व आवर्तयन्।। 13।।
- बह्व.न्यप्युप.पतनीयानि कृत्वा- त्रिभि.रनश्न.न्पारायणैꣳ पूतो भवति।। 14।।
- सुरां पीत्वा- सवत्सर.मष्टमे काले भुञ्जानो- यत्पाण्यो स्सम्भवे-दवाङ्गाभ्यूर्ध्व.ञ्जानु बर्हित स्त्रि.रह्न उपस्पृशं-स्तथा रात्रौ स्थानाऽऽसनाभ्या,न्तिष्ठे.दहनि- रात्रा.वासीत, पवित्र.न्त इत्युत्तरेणाऽहोरात्राणि जप-न्ग्रामद्वारे स्थानाऽऽसन भोजनानि- यत्र लभे-त्तत्र वसे,न्न प्रवसेत्। स्वकर्मणाऽभिभाषेत। चतुर्णां ब्राह्मणाना.मग्रतꣳ प्राश्नीयात्। ग्रामद्वारस्यै.वाग्रत आवश्यकायाऽभिक्रामेत्। अतोऽन्यथाऽऽशङ्क्य पूर्णे सँवत्सरे तैलँ लवण.ङ्क्षुर.मग्नि.ञ्जां बीजानी-त्यालब्धवन्तं ब्राह्मणा ब्रूयु- श्चरित न्तवे-त्योम् भो इति ब्रूयात्। सप्तावरा.न्त्सप्तपरान् ह.न्त्यनृत.श्चरित.न्तव- सुचरित.न्तवे-त्योम् भो इति ब्रूयात्। अत ऊर्ध्व.ङ्केश-श्मश्रु-लोम-नखानि वापयित्वा,ऽहतँ वसनं परिधाय, ब्राह्मणा.न्त्स्वस्ति वाचयित्वा, पूतो भवति।। 15।।
- एतेन कल्पेन भ्रूणहा पूर्व-मेतेन ब्रह्महा शुद्धशुद्धीय मुत्तर- मेतेन सुवर्ण.स्तेनोऽभि त्रिपृष्ठ मि-त्यभि त्रिपृष्ठ.मिति।। 16।।

**षष्ठः खण्डः**

- ❃{1.6 ब्राह्मणस्वं हृत्वा- मास.मुदके वास-श्चतुर्थे काले भोजन- न्दिवा बहि.रास्या,द्व्रतान्ते शुक्र.न्ते अन्य द्यजत.न्ते अन्य-दित्येत.द्गायेत्।। 1।।
- अन्यस्य हृत्वा- कृच्छ्र.श्चर- न्नयं सहस्र.मानव- इति द्वितीयम्।। 2।।
- गुरुदारा.न्गत्वा- सुराकल्पेना-ऽक्रा-नित्येत.द्गायेत् ।। 3।।

- ब्राह्मण.दारा.न्गत्वा- त्रीन्कृच्छ्रां.श्चर-न्ब्रह्म जज्ञान-मिति पूर्वम्।। 4।।
- अन्यस्य गत्वा- कृच्छ्र.ञ्चर- न्नरण्यो-रित्येतत्।। 5।।
- शूद्रा.ङ्गत्वा त्रिरात्र.मुपवस- न्निडा.मग्न- इत्येतत्।। 6।।
- अकाले दारा.नुपेत्य- त्री.न्प्राणाऽऽयामा.नायम्य- कयानाया द्वितीय.मावर्तयेत्।। 7।।
- ब्राह्मणा.द्वार्धुषिं हत्वा- त्री.न्कृच्छ्रां.श्चर-न्ब्रह्म जज्ञान- मित्युत्तरम्।। 8।। (वार्धुषिः उत्तमवर्णाया वृद्ध्या प्राप्तं धनम्)
- अन्यस्य हत्वा- कृच्छ्र.ञ्चर- न्ननु हि त्वा सुतं सोमे-त्यनु हि त्वा सुतं सोमेति।। 9।।

सप्तमः खण्डः

- ❃{1.7 राज्ञ॰ प्रतिगृह्य- मास.मुदके वस-न्दिवा भुञ्जानो, मह.त्तत्सोमो महिष.श्चका-रेत्येत.द्गायेत्।। 1।।
- अन्यस्याऽप्रतिग्राह्यस्य- कृच्छ्र.ञ्चरं-स्त्रिकद्रुकेष्वि.त्येतत्।। 2।।
- अदत्ताऽऽदान- एकरात्र.मुपवस-न्नग्नि.स्तिग्मेनेति द्वितीयम्।। 3।।
- ब्राह्मणायाऽवगूर्य प्राण.ङ्गाये,न्निहत्याऽपानं, शोणिते क्षरति- प्र सोम देववीतय इति द्वितीयम्।। 4।।
- राजन्य.वैश्यौ सवन.गतौ हत्वा- ब्राह्मणस्व.कल्पेन, शुद्धाशुद्धीय मुत्तरम्।। 5।।
- शूद्रं हत्वा- द्वादशरात्र.मुपवास- उदके च वासो-ऽयन्त इन्द्र सोम- इति द्वितीयम्।। 6।।
- गां हत्वा- द्वादशरात्र.मुपवास- उदके च वासो- वय.ङ्घ त्वा सुतावन्त- इति द्वितीयम्।। 7।।
- अन्य.त्प्राणि ह-त्वैकरात्र.मुपवस-न्नग्नि.स्तिग्मेनेति द्वितीयम्।। 8।।
- अवकीर्णी- त्री.न्कृच्छ्रां.श्चर-न्परीतो षिञ्चता सुत- मिति चतुर्थ मार्वतेयत्।। 9।।
- एतेन कल्पेन- परिवेत्ता परिविन्दश्च, सोमं राजानं वरुण-मित्येतत्।। 10।।
- अयोनौ रेत.स्सिक्त्वा-ऽग्नि.र्मूर्द्धा- घृतवती द्वितीयँ- यदित.स्तन्वो ममेति च।। 11।।
- शूद्र.जीविकायां सेवि.त्वोपरम्य, त्री.न्कृच्छ्रां.श्चरं-श्चक्र-मित्येत.द्गायेत्।। 12।।
- वैश्य.जीविकायाँ- वय.स्सुपर्णा इत्येत,द्राजन्य. जीविकायां- पवस्व सोम मधुमा॰ ऋता.वेत्येत- दभि त्यं मेष मिति वा।। 13।।
- सदा प्रयोगः।। 14।।
- ब्राह्मण.मनृत.मभिशस्य- तत्पापं प्रतिपद्यते, गुह्यं प्रकाशय- न्नर्धभा.ग्भवति।। 15।।

- अग्नि.स्तिग्मेनेति वर्गं प्रयुञ्जान-स्तेन तत्तरति- तेन तत्तरति।। 16।।

अष्टमः खण्डः

- ❃{1.8 रसान् विक्रीय- कृच्छ्रं.श्चर-न्घृतवती द्वितीयम्।। 1।।
- उभयतोदन्तान् विक्रीय- कृच्छ्रं.श्चर-न्को अद्य युङ्क्ते- इत्येतत्।। 2।।
- ता.न्प्रतिगृह्यैतेनैव कल्पेन- शं पद- मित्येतत्।। 3।।
- अदत्ता.ङ्कन्यां प्रकृत्य- कृच्छ्रं.श्चर- न्नभ्रातृव्यो अना त्व-मित्येत.द्गायेत्।। 4।।
- तां प्रतिगृ-ह्यैतेनैव कल्पेन- शं पद- मित्येतत्।। 5।।
- अभ्युदितो- भद्रो नो अग्नि.राहुत- इत्येत.द्गायेत्। अभ्यस्त.मितो- न तस्य मायया च नेति।। 6।।
- दुस्स्वप्ने-ष्वद्या नो देव सवित-रिति द्वितीयम्।। 7।।
- अन्यस्मिं.स्त्वनाज्ञाते- कयानाया द्वितीय.मावर्तयेत्।। 8।।
- अग्नि.दग्धे- घृताक्तान् यवा.न्जुहुया-ज्जातः परेण धर्मणे-त्येतेनाग्नये स्वाहेति च।। 9।।
- मूषिक.जग्धे- तिला.न्जुहुया- न्नकि.देवा इनीमसी-तीन्द्राय स्वाहेति च।। 10।।
- कूर्चनाश- एकरात्र.मुपवस-न्नग्नि.स्तिग्मेनेति द्वितीयम्।। 11।।
- अन्यस्मिं.स्त्वनाज्ञाते- यँ वृत्रे.ष्विति द्वितीयम्।। 12।।
- मनुष्ये.ष्वभिवातेषु- घृताक्तानाँ यवाना.माढक.ञ्जुहुया-दग्ने त्वन्नो अन्तम इति चतुर्वर्गेण सामान्तेषु स्वाहाकारै,रग्नये स्वाहा- वायवे स्वाहा- सूर्याय स्वाहा- चन्द्राय स्वाहेति च, स्नेहव.दमांस.मन्नं ब्राह्मणा.न्भोजयित्वा- स्वस्ति वाचयित्वा- स्वस्ति हैषां भवति।। 13।।
- गोष्वभि.वातासु- घृताक्तानाँ यवाना.माढक.ञ्जुहुया-दा वो राजान मित्येतेन- रुद्राय स्वाहेति च, यावती.र्धूम.स्स्पृशति- स्वस्ति हाऽसां भवति।। 14।।
- अश्वेष्वभि.वातेषु- घृताक्तानाँ यवाना.माढक.ञ्जुहुया-दश्वी रथी द्वितीये-नाश्विभ्यां स्वाहेति च, यावतो धूम.स्स्पृशति- स्वस्ति हैषां भवति- स्वस्ति हैषां भवति।। 15।। इति प्रथमाध्यायः।।

---

## सामविधान ब्राह्मणे द्वितीयाध्यायः

प्रथमः खण्डः

- ❃{2.1 अथातः काम्यानाम्।। 1।।

- अनादेशे- त्रिरात्र.मुपवासः, पुष्येणाऽऽरम्भः।। 2।।
- आयुष्या.ण्येव प्रथमम्।। 3।।
- अबो.ध्यग्नि-र्महित्रीणा मिति द्वे, त्वावत- इन्द्र न्नरो- ग्रामे.गेय मायु.रिति चास्य निधन.ङ्कुर्या,-त्त्यमू षु द्वे- त्रातार.मिन्द्रं- हवि.रित्येतस्य स्थाने स्वस्ति न इति, सोमः पुनान्त्यं- स सु प्रथमँ विश्वतो दाव.न्निति पूर्वं रहस्य,- उदुत्तमँ वरुण पाश मि.त्येषोऽरिष्टवर्ग, एतेषा मेक.मनेकँ वा सर्वाणि वा प्रयुञ्जान.श्शतँ वर्षाणि जीवति- जरयैव विस्रंसते।। 4।।
- भ्राजाभ्राजे शुक्र.चन्द्रे- राजन.रौहिणके- शुक्रियाद्ये- हा उ स्वराऽऽदीनि चत्वारि- सेतु.षाम चैष पवित्र.वर्ग, एतेषा.मेक.मनेकँ वा सर्वाणि वा प्रयुञ्जानः पूतो भवति।। 5।।
- बहु प्रतिगृह्य- याजयित्वा- वाऽऽसन्न.मात्मानं मन्यमानो, गौषूक्ताश्वसूक्ते- शुद्धाशुद्धीये- तरत्स मन्दी- त्येतानि प्रयुञ्जानः पूतो भवति।। 6।।
- तव श्यावीयं प्रयुञ्जान- श्शुचिः पूतो- ब्रह्म.लोक मभि संपद्यते- न च पुन.रावर्तते।। 7।।
- उदुत्तमँ वरुण पाश.मित्येत.त्सदा प्रयुञ्जान- स्संबाध.न्न निगच्छति- निगतश्च प्रमुच्यते।। 8।।
- गौरा.न्त्सर्षपां-स्तुचे तुनाय तत्सु न- इत्येतेन प्राश्नीया,द्दीर्घायु.र्भवति।। 9।।
- त्रीन् वोदकाञ्जली.न्त्सदाऽऽचामे-त्पिबा सोम मिन्द्र मन्दतु त्वे.त्येताभ्या- न्दीर्घायु र्भवति- दीर्घायु.र्भवति।। 10।।

द्वितीयः खण्डः

- ❀{2.2 अथ यस्या जातानि प्रमीयेर-न्न्यग्रोध.शुङ्गां शरमूल.ञ्चोत्थाप्य, तदह.स्त्रिवृत.ङ्कारये- न्मणि.मग्निं प्रतिष्ठाप्याऽऽवृता हुत्वा, मणि.न्निधाया-ऽबोध्यग्नि.रित्येतेनाभि जुहुया.त्सहस्रकृत्व श्शतावर,न्तृतीये गर्भमासि निदध्या.दाज्य शेषं,मेखलायां मणि न्धारये,त्पुमांसं ह जनयति, जातस्य कण्ठेऽवसजे,त्कुमार. माज्य.शेषं प्राशये,त्सर्वाणि स्रोतांसि तर्पये,दभ्यञ्जीताऽहरह- स्तत ऊर्ध्व-मुपयुङ्क्ते पुनः प्रयोग, श्शतँ वर्षाणि जीवति- जरयैव विस्रंसते।। 1।।
- अथ यो रक्षसा गृहीत स्स्या-दशनिहतस्य वृक्षस्येध्म-श्शुक्लाया गो स्सरूप.वत्साया- अन्यस्या वाऽऽज्यं, बैल्वं मणि मुत्थाप्य, तदह.स्त्रिवृत.ङ्कारये.न्मणि,मग्निं प्रतिष्ठाप्या-ऽऽवृता हुत्वा, मणि.न्निधा-येन्द्र त्रिधातु शरण मित्येतेनाभि जुहुया-त्सहस्रकृत्व श्शतावर,न्तं मणि.ङ्कण्ठेन

शिरसा वा धारय-न्मुच्यते रक्षसा, यद्वा उ विश्पति.रिति चैत-त्सदा प्रयुञ्जीत, स्वस्ति हास्य भवति।। 2।।

- आमयावी कौम्म्य.ङ्घृतँ- विश्वाः पृतना अभिभूतर.न्नर इत्येतेनाभिजुहुया-त्सहस्रकृत्व श्शतावर,ञ्जीवेति चास्य निधन.ङ्कुर्या-देतेनैव सदा प्राश्नीया-न्मुच्यत आमया,व्या नो मित्रावरुणेति चैत-त्सदा प्रयुञ्जीत, स्वस्ति हास्य भवति- स्वस्ति हास्य भवति।। 3।।

तृतीयः खण्डः

- ❃{2.3 अथ यदस्य रुजे-च्छन्नो देवी रहस्येन, घृत.मभिगीयाऽभ्यञ्ज्या-च्छाम्यति ह।। 1।।
- द्विकाऽऽद्येन वोदकं पायये-च्छीताभि.रद्भि रभिषेचये- त्सोमं राजानं- सना.दग्ने-ऽ ग्निं होतार- मित्येतानि चैन मभिश्रावये,च्छाम्यति ह।। 2।। (द्विकं शन्नो देवी इत्याद्यं द्वयोः, यस्य तत्)
- शङ्खपुष्पीं सर्प.सुगन्धा.श्चोत्थाप्य- तदह.स्त्रिवृत.ङ्कारये.न्मणि,मग्निं प्रतिष्ठाप्याऽऽवृता हुत्वा, मणि.न्निधाय, चर्षणीधृत मिति वर्गेणाभिजुहुया-त्सहस्रकृत्व श्शतावर,न्तं मणि.ङ्कण्ठेन शिरसा वा धारयतो- न सर्पभयं भवति, कयानाया.श्च सर्प.साम सदा प्रयुञ्जीत, स्वस्ति हास्य भवति।। 3।।
- श्वेतपुष्पां बृहती.मुत्थाप्य, तदह.स्त्रिवृत.ङ्कारये.न्मणि,मग्निं प्रतिष्ठाप्याऽऽवृता हुत्वा, मणि.न्निधाय, मोषु त्वा वाघत.श्चने.त्येतेनाभि जुहुया-त्सहस्रकृत्व श्शतावर,न्तं मणि.ङ्कण्ठेन शिरसा वा धारयतो- न शस्त्र.भयं भवति, यत इन्द्र भयामह इति चैत.त्सदा प्रयुञ्जीत, स्वस्ति हास्य भवति।। 4।।
- श्वेतपुष्प.मर्क.मुत्थाप्य, तदह.स्त्रिवृत.ङ्कारये.न्मणि,मग्निं प्रतिष्ठाप्याऽऽवृता हुत्वा, मणि.न्निधाय, स्वाशिरा.मर्केणाभि जुहुया-त्सहस्रकृत्व श्शतावर, न्तं मणि.ङ्कण्ठेन शिरसा वा धारय-न्बह्वन्नो भवति।। 5।।
- दीर्घतमसोऽर्कोऽर्कशिरोऽर्कग्रीवा इति चैतानि प्रयुञ्जान- स्सर्वत्रान्नँ लभते।। 6।।
- स.मन्या यन्तीऽनिधनं प्रयुञ्जानो- न पिपासया म्रियते।। 7।। (यन्ति, ईनिधनं)
- इष्टाहोत्रीयं प्रयुञ्जानो- नाप्सु म्रियते।। 8।।
- अचोदस इति तृतीयं प्रयुञ्जीत- नैनँ यक्ष्मा गृह्णाति।। 9।।
- त्वमिमा ओषधी-रित्येत.त्सदा प्रयुञ्जानो- न गरेण म्रियते।। 10।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

• सन्ते पयांसीति पूर्वेण प्रथम.ङ्ग्रास.ङ्ग्रसे-दुत्तरेण निगिरे,द्विष.मप्यस्यान्नं भवति- नैनँ हिँसति- नैनँ हिँसति।। 11।।

## चतुर्थः खण्डः

• ❃{2.4 करवीर.दण्ड.मुत्थाप्य, देवव्रतै.रभिजुहुया-दनुगान.शस्तेन हस्त.गतेन, यत्र क्व च गच्छति- सर्वत्र हास्य स्वस्ति भवति।। 1।।

• तेन नगरँ वा निगमँ वा ग्रामँ वा गोष्ठँ वाऽगारँ वा मनसा ध्याय-न्परिलिखे-न्नात्रानिष्टाः प्रविशन्ति।। 2।।

• प्रतिभयेऽध्वनि देवव्रत.माद्य.ङ्गीत्वा- मध्य.मावर्तये,द्वतेऽध्व.न्युत्तमं समापयित्वा विरमेत्।। 3।।

• उद्यत.शस्त्रा न्छत्रू.न्दृष्ट्वा- देव.व्रतानि मनसा ध्याये-न्नैनँ हिंसन्ति।। 4।।

• अमानुषे भये- कयानाया.स्तृतीय मावर्तये-न्नैनं हिंसन्ति।। 5।।

• अध्वान.मभ्युत्थित- आमन्द्रै.रिति वर्ग.ङ्गीत्वाऽनपेक्षमाणो व्रजे,त्स्वस्त्यर्थ.चरितः पुन.रैति- नाध्वनि च प्रमीयते।। 6।।

• अन्यो वैन.मनु गाये-त्कदा चन स्तरीरसी.त्येतेन चैन.मभि श्रावये,दर्द्ध.साम्नि प्रदक्षिण मावर्तये,त्समाप्याऽनपेक्षमाणः परो व्रजे,त्स्वस्त्यर्थ.चरितः पुन.रैति- नाध्वनि च प्रमीयते।। 7।।

• एषो उषा अपूर्व्येति सँविश-न्त्सदा प्रयुञ्जीताऽकालं स्वस्त्ययनम्। उदिते- यदद्य कच्च वृत्रह-न्नित्याकालं स्वस्त्ययनम्।। 8।।

• मूलफलै.रुपवसथ.ङ्कृत्वा- मास.मुपवसे.दरण्ये निस्तान्तवो मुनि,र्या रौहिणी वा पौषी वा पौर्णमासी स्या-त्तदह.रुद्यन्त मादित्य मुपतिष्ठे.तोद्वय.न्तमस.स्परीत्येतेन, तत ऊर्ध्व. न्तद्व्रत.स्तद्भक्ष- श्चत्वारि वर्षाणि प्रयुञ्जानो- जरामृत्यू जहाति- जरामृत्यू जहाति।। 9।।

## पञ्चमः खण्डः

• ❃{2.5 अथैकमनुष्याणा.मावर्त्तनम्। स्त्रिया वा- पुंसो वा।। 1।।

• श्रवणेन व्रत.मुपेत्य- पूर्वैः प्रोष्ठ.पदैः।। 2।।

• पांसुभिः प्रतिकृति.ङ्कृत्वा- प्राक्छिरसं पूर्वाह्णे- दक्षिण.शिरसं मध्याह्ने- प्रत्यक्छिरस मपराह्णे- ऽर्द्धरात्र उद.क्शिरस, न्तस्या हृदयदेश.मधिष्ठा,याऽऽयन्त इन्द्रसोम इति ब्राह्मण-स्येद.न्त एक

मिति क्षत्रिय-स्यैष प्रकोश इति वैश्यस्य- विभो.ष्ट इन्द्र राधस इति शूद्र-स्योद्वय न्तमस.स्परीति वा सर्वेषां, सौवर्णीँ प्रतिकृति.ङ्कुर्या.द्ब्राह्मणस्य- राजती.ङ्क्षत्रिय-स्यौदुम्बरीँ वैश्यस्या-ऽऽयसीं शूद्र-स्यौदुम्बरीँ वा सर्वेषा,मय.मसा.विति प्राक्छिरस.मग्नौ प्रतिष्ठा,प्यौदुम्बरेण स्रुवेणाऽऽज्येनाभि जुहुया- दच्छाव इतीऽऽनिधनेन, गुणी हास्य भवति।। 3।।

- कृष्ण.व्रीहीणा न्नख.निर्भिन्नानां पिष्टमयीं प्रतिकृति.ङ्कृत्वा- पिष्ट.स्वेदँ स्वेदयित्वा- सर्षप.तैलेनाभ्यज्य, तस्याः~ क्षुरेणाऽङ्गा.न्यवदायाऽग्नौ जहुया-त्र मन्दिन इत्येतेन, शेषं स्वयं प्राश्नीया- दितरथा.भावे म्रियेत।। 4।।
- अथ यꣳ कामयेताऽऽवर्तयेय.मि,त्येकरात्र.ङ्क्षुर.सँयुक्त स्तिष्ठे-त्सुतासो मधुमत्तमा इति वर्ग, एतेषा मेक मनेकँ वा सर्वाणि वा प्रयुञ्जान- एकरात्रेण कुटुम्बिन मावर्तयति।। 5।।
- द्विरात्रेण राजोपजीविन-न्त्रिरात्रेण राजान-ञ्चतूरात्रेण ग्रामं- पञ्चरात्रेण नगरं- षड्रात्रेण जनपदं- सप्तरात्रे.णासुर.रक्षां-स्यष्टरात्रेण पितृ.पिशाचा-न्नव.रात्रेण यक्षा-न्दश.रात्रेण गन्धर्वाप्सरसो- ऽर्द्धमासेन वैश्रवणं- मासेनेन्द्र-ञ्चतुर्भिꣳ प्रजापतिं- सँवत्सरेण यत्किञ्च जग,त्सर्वं हास्य गुणी.भवति- गुणीभवति।। 6।।

**षष्ठः खण्डः**

- ❀{2.6 अथात.स्सौभाग्यानाम्।। 1।।
- यदिन्द्रो अनय- दुच्चा ते जात.मन्धस इति नवम.दशमे, एतेषा.मेक.मनेकँ वा सर्वाणि वा प्रयुञ्जान- स्सुभगो भवति।। 2।।
- द्वन्द्वाऽऽद्याया स्सप्तमाष्टमाभ्या- मिन्द्राणीं सदा तर्पय.न्त्सुभगो भवति।। 3।।
- अपामार्ग न्दन्तपवन.ङ्कृत.मधु.लिप्तं- भद्रो नो अग्नि.राहुत इत्येतेनानिष्ठीव.न्त्सँवत्सरं भक्षय-न्त्सुभगो भवति।। 4।।
- भगो न चित्र इत्येताभ्या.मञ्जय-न्त्सुभगो भवति।। 5।।
- इम.मिन्द्रेति वर्गं प्रयुञ्जान- स्सर्वजनस्य प्रियो भवति।। 6।।
- परि प्रिया दिवꣳ कवि रि.त्येते, या.ङ्कामये-त्तां श्रावये-त्कामयते हैनम्।। 7।।
- अथ याऽस्य न गुणी स्या-त्तां ब्रूया.दाचामे,तीन्द्रो विश्वस्य राजती.त्येताभ्या.माचामेत्।। 8।।
- पद.पांसून् वाऽस्या अग्नौ जुहुया-द्ये ते पन्था- अधो दिव इति।। 9।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

- तैलँ वैनाँ याचित्वा- पाणी परिमृद.न्नग्नौ प्रतापये- दग्न आयाहि वीतय इति द्वितीयेन, नाऽनागतायाँ विरमेत्।। 10।। (परिमृदन् - परिमर्दनं कुर्वन्)

- गो.जरायुक. महस्त.स्पृष्टँ शोषयित्वा, प्रियङ्गुकां सहां सहदेवा.मध्यण्डां भूमि.पाशकां सचा.ङ्काचपुष्पी-मित्येता उत्थाप्य, तदह.श्चूर्णानि कारये,दा नो विश्वासु हव्य.मित्येतेन-त्रिस्संपातां.श्चूर्णेषु कृत्वा,ऽग्न आयाहि वीतय इति रहस्येनाऽद्भि स्सँयूय, तानि नाशुचिः पश्ये-द्वोपस्पृशेद्वा, तदनुलेपन,मेतेनानुलिप्तो- याँ या.मुपस्पृशते- सा सैन.ङ्कामयते।। 11।।

- गम्या.न्नास्नात उपस्पृशेत्।। 12।।

- उत्पले बुद्धे प्रियङ्गुका आवपे-द्यदा पर्णानि संहरे-दथैन.मुत्थाप्य-चतुरङ्गुल.मुभयतः परिच्छिद्य- मध्य.मुद्धरे,त्तदनुलेपन-न्तेनानु.लिम्पे-दवांशश्च, नि त्वा नक्ष्य विश्पत- इ-त्येतेनास्य वेशस्थाः प्रव्रजिताश्च वश्या भवन्ति।। 13।।

- कन्या.प्रवहण- एकरात्रोपोषितो-ऽमावास्याया.न्निशि चतुष्पथ- एह्यूषु ब्रवाणि त इत्येतेना ऽभिषिञ्चे,त्त्रि.रभिषिक्ता प्रदीयते।। 14।।

- आ ते वत्सा इति पुंसः।। 15।।

- त्रिरात्रोपोषितः कृष्ण.चतुर्दश्यां शवा.दङ्गार- माहृत्य, चतुष्पथे बाधक.मिध्म.मुपसमाधाय, मत्स्य.ङ्कर.मित्येतौ जुहुया-दग्ने मृड महाँ असीति, पूर्वेणाग्नि र्वृत्राणीति द्वितीया,न्ते आहुती कोशे कृत्वा- हरितालेन गोहृदय.शोणितेन चोत्तरेण सन्नये,द्य.न्द्विष्या-त्प्रमंहिष्ठीयेनास्य शय्या मवकिरे-दगारञ्च भस्मना, नैकग्रामे वसति।। 16।।

- अथातो यशस्याना- न्त्व.मिन्द्रयशा असि- पवते हर्यतो हरि-रित्येतेषा-मेक.मनेकँ वा सर्वाणि वा प्रयुञ्जानो- यशस्वी भवति।। 17।।

- प्रियङ्गुका वा पुष्येणाभि जुहुया-द्यशो मेति, तदनुलेपन-न्तेनानु लिम्पे.त्सँवत्सरँ, यशस्वी भवति- यशस्वी भवति।। 18।।

## सप्तमः खण्डः

- ❃{2.7 अथातो ब्रह्मवर्चस्यानां, रथन्तरँ वामदेव्य न्नौधसं श्यैतं महानाम्न्यो यज्ञायज्ञीय.मि,-त्येतेषा मेक.मनेकँ वा सर्वाणि वा प्रयुञ्जानो- ब्रह्मवर्चसी भवति।। 1।।

- कस्त.मिन्द्रेति द्विकं प्रयुञ्जानो- ब्रह्मवर्चसी भवति- श्रद्धा चास्य भवति।। 2।।

- जगृह्मा त इति षड्वर्गं प्रयुञ्जानो- ब्रह्मवर्चसी भवति।। 3।।

- अष्टरात्रोपोषितो ब्राह्मी.मुत्थाप्य- प्रजापते.र्हृदये.नाभिगीय- सहस्रकृत्व॰ प्राश्नीया-च्छ्रुत.निगादी भवति।। 4।।
- पुष्पाणि वाऽस्या उदकेन सँवत्सरँ यण्वेन प्राश्नीया- च्छ्रुत.निगादी भवति।। 5।। (यण्वं साम)
- मासं सोमभक्ष स्स्या-त्सदस.स्पति मद्भुत मित्येतेन, श्रुत.निगादी भवति।। 6।।
- सदा वैत.त्प्रयुञ्जीत- श्रुत.निगादी भवति।। 7- ।।
- भारद्वाजिकाया जिह्वा.मुत्थाप्य- तदह.श्चूर्ण.ङ्कारयित्वा- मधु.सर्पिर्भ्यां सँयूय-प्रा.गन्नप्राशना-त्कुमारं प्राशये- दिन्द्र.मिद्गाथिनो बृह.दित्येतेन, श्रुत.निगादी भवति।। 8।। (भारद्वाजिका पक्षी)
- हरिद्राया.स्तुलावरार्द्ध.श्चूर्णयि-त्वैतेनैव कल्पेन सँवत्सरँ यण्वेन प्राश्नीया-च्छ्रुत.निगादी भवति।। 9।।
- वचा.मेतेन कल्पेन वाचो व्रतेन पूर्वेण प्राश्नीया-च्छ्रुत.निगादी भवति।। 10।।
- मत्स्याक्षक- शङ्खपुष्पी- वचा- केरडी.घृतानि बार्हद्गिरेणाभि जुहुया-त्सहस्र.कृत्व श्शतावर-मेतेनैव प्राश्नीया-च्छ्रुत.निगादी भवति।। 11।।
- वचाया.स्त्रिवृत.ङ्कारये.न्मणि,मग्निं प्रतिष्ठाप्याऽऽवृता हुत्वा, मणि न्निधाय- वाचो व्रतेनोत्तरेणाभि जुहुया-त्सहस्रकृत्व श्शतावर,न्तं मणि.ङ्कण्ठेन शिरसा वा धारय-न्कथासु श्रेया.न्भवति।। 12।।
- वचां मधुक.मित्येते- आस्येऽवधाया-ऽपां फेनेने.त्येत.न्मनसाऽनुद्रुत्या,ऽन्ते स्वाहाकारेण निगीर्य, राजन्वा.नह- मराजक.स्त्वमसी-त्युक्त्वा विवदे.त्पर्षदि, राजनि चोत्तरवादी भव-त्युत्तरवादी भवति।। 13।।

अष्टमः खण्डः

- ❃{2.8 अथात॰ पुत्रियाणाम्।। 1।।
- नि त्वा नक्ष्य- नि त्वा.मग्ने- प्र यो राये-ऽय.मग्नि.स्सुवीर्यस्य- जात॰ परेण- न हि व.श्चरमञ्च न- सोम॰ पवते जनिता मतीना मिति सर्वा-ण्यपत्य.न्नित्यवत्सा रथन्तरँ व्याहृति.वर्गौ, ऽरूरुच.दिति द्वे, एतेषा.मेक.मनेकँ वा सर्वाणि वा प्रयुञ्जान.स्सुरूपा.न्दीर्घाऽऽयुष॰ पुत्रा.न्लभते।। 2।।

- रोहिण्याँ वा- रोहिण्या गो स्सरूप.वत्साया꞉ पयसि रक्तशालीनां स्थालीपाकं श्रपयित्वा- परमेष्ठिन꞉ प्राजापत्यस्य व्रतेनाभि जुहुया-त्सहस्रकृत्व श्शतावर,मेतेनैवाभिगी.योद्धृत्य सभार्य꞉ प्राश्नीया,त्सुरूपा.न्दीर्घाऽऽयुष꞉ पुत्रा.न्लभते।। 3।।
- कृष्णाया गो.स्सरूप.वत्साया꞉ पयसि- कृष्ण.षष्टिकानां स्थालीपाकं श्रपयित्वा- कृष्ण.पञ्चम्या मुदिते सोमे- त्व.मिमा ओषधी.रित्येतेनाभि जुहुया-त्सहस्रकृत्व श्शतावर, मेतेनैवाभिगी.योद्धृत्य सभार्य꞉ प्राश्नीया,त्सुरूपा.न्दीर्घाऽऽयुष꞉ पुत्रा.न्लभते।। 4।।
- कौम्म्य.ङ्घृतं पुरुषव्रतेनाभि जुहुया.दनुगानश, उत्तरेण सदा प्राश्नीया-त्सुरूपा.न्दीर्घाऽऽयुष꞉ पुत्रा.न्लभते।। 5।।
- उडङ्गवानाँ योऽग्रे गच्छे-त्त.ङ्गृहीत्वा, तदह.स्त्रिवृत.ङ्कारये.न्मणि,मग्निं प्रतिष्ठाप्याऽऽवृता हुत्वा, मणि.न्निधा-योचा ते जात.मन्धस इति तृतीयेनाभि जुहुया-त्सहस्रकृत्व श्शतावर,न्तं मणि.ङ्कण्ठेन शिरसा वा धारय-न्छतानुचरो भवति- शतानुचरो भवति।। 6।। इति द्वितीयाध्यायः।। --- (उडङ्गवाः- धान्यविशेषाः)

## सामविधान ब्राह्मणे तृतीयाध्यायः ।।

### प्रथमः खण्डः

- ❋{3.1 अथातो धन्यानाम्।। 1।।
- शुक्लवाससा प्रयोग, स्स्नान-मवलेखन-मनिष्ठीवनं- सदा चाञ्जनं- सत्यवचनं- सुमनसा.न्धारण-ङ्केश.श्मश्रु.लोम.नखाना.न्तु नान्यत्र व्रता-द्दारा.नेवोपेया.त्काले। एवँ.व्रतो यदुदीरत- आ हर्यतायेति वर्ग, एतेषा.मेक मनेकँ वा सर्वाणि वा प्रयुञ्जान- श्श्रीमान् यशस्वी पुष्टिमा.न्धन्यो भवति।। 2।। (सुमनांसि - पुष्पाणि)
- गिर्वण꞉ पाहि न.स्सुत मिति चैत.त्सदा प्रयुञ्जीत- मयि श्रीरिति चास्य निधन.ङ्कुर्या- च्छ्रीमा.न्भवति।। 3।।
- त्रीन् वोदकाञ्जली न्त्सदाऽऽचामे-दयँ सहस्र.मानव इत्येताभ्यां- श्री.रिति चोत्तरस्य निधन.ङ्कुर्या- च्छ्रीमा.न्भवति।। 4।। (वा, उदकाञ्जलीन्)
- सक्तु.मन्थ- न्दधि- मधु- घृत.मिश्र- मा त्वा विश.न्त्विन्दव इत्येतेन सन्नये-दा मा विश.न्त्विन्दवो- न मा.मिन्द्रातिरिच्यत- इत्येतेन पिबे,दलक्ष्मी नुदते।। 5।।
- तिष्येण घृत.ङ्क्रीणीया-दा याहि सुषुमा हि त- इत्येतेन पिबे,दलक्ष्मी नुदते।। 6।।

- गौरा.न्त्सर्षपां.स्तिष्येण चूर्ण.ङ्कारयि-त्वेन्द्रेहि मन्स्यन्धस- इत्येतेन सँयूय- तै.र्मुखं पाणी पादौ च सर्वाणि चाङ्गानि सर्वांश्च संश्लेषा.नुत्सादय-न्नलक्ष्मी नुदते।। 7।।
- गौरा.न्त्सर्षपा.नग्नौ जुहुया- द्यद्वीडा.विन्द्र य.त्स्थिर- इत्येतेन, हिरण्यँ लभते।। 8।।
- व्रीहि.यवा.नग्नौ जुहुया-त्सुनीथो घा स मर्त्य- इत्येतेन, धान्यँ लभते।। 9।।
- व्रीहि.यवौ- सर्पि- र्मधु.मिश्रा.वास्येऽवधाय, स पूर्व्यो महोना-मित्येतं मनसाऽनुद्रुत्या-ऽन्ते स्वाहाकारेण निगिरे,देवं सदा प्रयुञ्जान- स्सहस्रँ लभते।। 10।।
- इम उ त्वा विचक्षत इत्येतेनाऽऽहुति.सहस्र.ञ्जुहुया,त्सहस्रँ लभते।। 11।।
- मासोपोषितो- बिल्वाना.न्दधि- मधु- घृताक्तानां- श्रायन्तीये.नाष्टसहस्र.ञ्जुहुया-त्सिद्धे सौवर्णा,न्यसिद्धे राजतानि।। 12।।
- नैयग्रोध.न्दन्तपवन-ङ्कृत.मधु.लिप्त-ङ्गव्यो षु ण इत्येताभ्या मनिष्ठीव.न्त्सँवत्सरं भक्षय-न्त्सहस्रँ लभते- सहस्रँ लभते।। 13।।

## द्वितीयः खण्डः

- ❃{3.2 त्रिरात्रोपोषितो- भद्रो नो अग्नि.राहुत इत्येतेनाऽऽहुति.सहस्र.ञ्जुहुया,त्सहस्रँ लभते।। 1।।
- औदुम्बरीर्वा समिधो घृताक्ता- स्सहस्र.ञ्जुहुया-द्गा लभते।। 2।।
- व्रीहि.यवा.नग्नौ जुहुया-द्धान्यँ लभते।। 3।।
- द्वादश.रात्रोपोषित- एवा ह्यसि वीरयु-रित्येतेनाऽऽहुति.सहस्र.ञ्जुहुया-द्ग्रामँ लभत- एतांश्च सर्वा.न्कामा.नवाऽऽप्नोति।। 4।।
- श्रत्ताष्टकं प्रयुञ्जान꞉ प्रथमेन हिरण्यँ लभते- द्वितीयेन धान्य- न्तृतीयेन पशूं- श्चतुर्थेन पुत्रा-न्पञ्चमेन ग्रामा,न्त्षष्ठेन यश- स्सप्तमेन ब्रह्मवर्चस-मष्टमेन स्वर्गँ लोक.मवाऽऽप्नोति।। 5।। (श्रत्ताष्टकं - श्रत्ते होयीत्यादीन्यष्टौ सामानि)
- सँवत्सर.ङ्गो. ग्रास.माहरे- द्राव.श्चिद्धा स मन्यव- इत्येतेना,ऽनन्त्याँ विन्दते श्रियम्।। 6।।
- वैरूपाष्टक.न्नित्यं प्रयुञ्जानो- लक्ष्मी.ञ्जुषते।। 7।।
- अन्त्यँ वा जानुदघ्न- उदके तिष्ठन्।। 8।।
- नाभिदघ्ने धान्य-ङ्कक्षदघ्ने पशू-नास्य.दघ्ने पुत्रा.न्यामञ्च।। 9।।
- अनपेक्षितो वाऽसकृ.द्गीत्वोत्तीर्ण- स्सहस्रँ लभते।। 10।।
- आहुतिसहस्रँ वा जुहुया-त्सामान्तेषु स्वाहाकारैः।। 11।।

- एतेषा.ङ्कल्पानाँ यथा भूय-स्तथा श्रेय- स्तथा श्रेयः।। 12।।

तृतीयः खण्डः

- ❃{3.3 गा४ प्रकाल्यमाना.श्चोपकाल्यमानाश्च सदोपतिष्ठेत- गव्यो षु ण इत्येताभ्याँ, स्फीयन्ते बहुला भवन्ति।। 1।। (प्रकाल्यमानाः- प्रस्थाप्यमानाः)
- सदा भोजन.स्योपनीत.स्याग्र.मग्नौ जुहुया-दग्ने विवस्व.दुषस इति पूर्वेण। बलि.श्चोत्तरेण कुर्यात्। बहु.पशु.धन.धान्यो भवति।। 2।।
- अष्टरात्रोपोषितोऽमावास्याया न्निश्येकवृक्षे क्षीरि.ण्यरण्ये मांसं सुसंस्कृत मेकतृप्यवरार्ध्यं माणिभद्रायोपहरे-देष स्य ते मधुमा९ इन्द्र सोम इत्येतेन, हिरण्य.द्रोणँ लभते।। 3।।
- त्रिरात्रोपोषित श्शुक्लचतुर्दश्यां- शौनं मांसं पायसं वोपहरे-त्त्रि.रस्मै सप्त धेनवो दुदुहिर इत्येतेन, दैवा.न्पोषा.न्पुष्यति । बहु.पुरुष.श्चास्य भवति- क्रिया.श्चानेन कुरुते।। 4।।
- त्रिरात्रोपोषित४ कृष्णचतुर्दश्यां मत्स्या.नुपहरे-न्महाराजाय संश्रवस इति वर्गेणा, ऽऽसुरा.न्पोषा. न्पुष्यति, बहु.पुरुष.श्चास्य भवति- क्रिया.श्चानेन कुरुते।। 5।।
- अथातो वास्तु.शमनम्।। 6।।
- प्रदक्षिणं प्रतिदिशं रज्वा यच्छेत्। अवान्तर.देशेषु च यत्राभिसमेयु- स्तत्रोपलिम्पेत्। रज्वन्तेषु च शमी.पलाश.श्रीपर्णीनां पत्रै- र्वास्तूपकिरेत्। अक्षतैश्च सुमनोभिश्च। पूर्वै४ प्रोष्ठपदै.र्गृहेऽग्निं प्रतिष्ठाप्य- धानावन्त.ङ्करम्भिण.मित्येत.द्गीत्वा- पायस.मग्नौ जुहुयात्। परेषाञ्च पलाशपर्णमध्यमेषु बल्युपहारः। प्रजापतये स्वाहेति मध्य उपहरे-दिन्द्रायेति पुरस्ता-द्वायव इत्यवान्तरदेशे- यमायेति दक्षिणत४- पितृभ्य इत्यावान्तरदेशे- वरुणायेति पश्चा- न्महाराजाये.त्यवान्तरदेशे- सोमाये.त्युत्तरतो- महेन्द्राये.त्यवान्तरदेशे- वासुकय इत्यधस्ता.दूर्ध्व-न्नमो ब्रह्मण इति दिवि। बहु.पशु.धन.धान्य.हिरण्य.मायुष्म.त्पुरुषँ- वीरसू.सुभगाऽविधवस्त्रीकं- शिवं- पुण्यं वास्तु भवति। चतुर्षु मासेषु प्रयोग- स्सँवत्सरे वा पुन४ प्रयोग४- पुन४ प्रयोगः।। 7।। (सुमनांसि - सुगन्धिपुष्पाणि)

चतुर्थः खण्डः

- ❃{3.1 अथातोऽदृष्ट.दर्शनानाम्।। 1।।

• सङ्करा.त्सङ्करेवासिनी.मावहे,च्छूर्पेणाक्षता.न्गन्धा.न्त्सुमनस.श्चात्र कृत्वा, सँविष्टः प्राक्छिरा- श्शुचौ देशे शिरस्तः कृत्वा, क इम मुहुवे.त्येत.द्गीत्वा, वाग्यतः प्रस्वपे-त्पश्यति ह।। 2।। (सङ्करः- संमार्जनी)

• गर.गोलिकाँ वा समुद्गेऽवधाया,ऽऽयाहि सुषुमा हि त- इत्येत.द्गीत्वा, वाग्यतः प्रस्वपे-त्पश्यति ह।। 3।। (समुद्गम् - सम्पुटम्)

• कन्याँ वोपवासये.ददृष्टरजस.मादर्श-ञ्चाय.मग्नि श्श्रेष्ठतम इत्येतेन, व्युष्टायां रात्रा. वेतेनैवाभिगीय- परिमृज्य ब्रूया.त्पश्येति, पश्यति ह।। 4।।

• उद.शरावँ वोपवासये-त्त्र मित्राय प्रार्यम्ण इत्येतेन, व्युष्टायां रात्रा.वेतेनैवाऽभिगीय- प्रोक्ष्य ब्रूया-त्पश्येति, पश्यति ह।। 5।।

• वंशमय्यौ वा शलाके गन्धैः प्रलिप्य- मध्यमेनोप वासये,द्व्युष्टायां रात्रा.वेतेनैवाऽभिगीय परिमृज्य- ब्रह्मचारिणौ ब्रूया- द्धारयत.मिति, सन्नमत्यो.स्सिद्धिँ विद्यात्।। 6।।

• यष्टिँ वाऽन्त्येन चतुरङ्गलशो निमीयोपवासयेत्। व्युष्टायां रात्रा.वेतेनैवाभिगीय- परिमृज्य प्रमिणुया-दङ्गुलि.पर्वभिः पूर्यमाणेषु सिद्ध्यति।। 7।।

• आषाढ्यां पौर्णमास्यां बीजानि धारयित्वोपवासये.त्तुला-ञ्चेन्द्रमि.द्देवतातय इत्येतेन, व्युष्टायाँ रात्रा.वेतेनैवाभिगीय परिमृज्य प्रोक्ष्य धारयेत्। यानि गरीयांसि- ता.न्यृध्यन्ते।। 8।।

• अक्षताना.न्द्वौ राशी कुर्या.द्भावाभावयो-रा नो विश्वासु हव्य मित्येतेन, व्युष्टायाँ रात्रा.वेतेनैवाभिगीय प्रोक्ष्य ब्रूया-दालभस्वेति, भाव.मालभमाने सिद्ध्यति।। 9।।

• ज्योतिष्मताँ विधूमाना.मङ्गाराणा न्द्वौ राशी कुर्या,द्यावन्तो वा स्यु-स्तेनार्थिन- श्श्रुष्ट्यग्ने नवस्य म- इत्येतेनैनान् युगपद् घृतेनाभिषिञ्चेत्। यः पूर्वः प्रज्वलितो विधूमेनार्चिषा प्रदक्षिण मभिपर्यावर्तते- स जयतीति विद्यात्।। 10।।

• ज्योतिष्का.न्कुर्या.न्मानुषीणा.ङ्घृतेन सद्यो.मथितेन- प्र सोम देववीतय- इत्येतेनैना.न्ज्वलये,द्यः पश्चा.च्छाम्यति- स चिर.ञ्जीवति- स चिर.ञ्जीवति।। 11।।

पञ्चमः खण्डः

• ❃{3.5 राजान.मभिषेचये-त्तिष्येण श्रवणेन वा।। 1।।

• व्रीहि.यवै- स्तिल.माषै- र्दधि.मधु.सुमनो.जातरूपै- र्यशस्विनीभ्यो नदीभ्य- स्समुद्रा.च्चोदका न्याहृत्यौदुम्बरे भद्राऽऽसने वैयाघ्रे चर्म.ण्युत्तरलो.म्न्यासीन-ञ्जीवन्तीना.ङ्गवां श्शृङ्गकोशै रभिषिञ्चे- दभ्रातृव्य इति रहस्येन।। 2।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

- य.ङ्कामये.तैकराज.स्स्या-न्नास्य चक्रं प्रतिहन्येते-त्येकवृषेणाऽभिषिञ्चेत्।। 3।।
- अभिषेक्रे दद्या-द्ग्रामवर- न्दासीशतं- सहस्र,न्तदधीनश्च भवेत्।। 4।।
- अद्भुते यव.द्रोण.ञ्जुहुया-द्वात आ वातु भेषज.मित्येतेन, शाम्यति ह।। 5।।
- कृष्णां.स्तिला.नग्नौ जुहुया-त्त्र दैवोदासो अग्नि- रित्येतेन, नैन.ङ्कृतानि हिंसन्ति- तान्येव प्रति गच्छन्ति।। 6।।
- व्रीहि.यवा.नग्नौ जुहुया-त्पञ्च.निधनेन वामदेव्येन, नैन.ङ्कृतानि हिंसन्ति- तान्येव प्रति गच्छन्ति।। 7।।
- ताम्र.रजत.जातरूपायसी.मुद्रा.ङ्कारयि-त्वोच्चा ते जात.मन्धस इति चतुर्थेनाभि जुहुया-त्सहस्रकृत्व श्शतावर,न्तां मुद्रा न्दक्षिणेन पाणिना धारये-न्नैन.ङ्कृतानि हिंसन्ति, तान्येव प्रति गच्छन्ति- तान्येव प्रति गच्छन्ति।। 8।।

**षष्ठः खण्डः**

- ❀{3.6 सङ्ग्रामँ युयुत्समान.स्योदक.मभि जुहुया-त्सोमं राजानँ वरुण मित्येतेन, तत एनं पायये-द्यो राजा चर्षणीना.मिति पूर्वेण, ये चात्र मुख्या.स्स्यु- स्ता.नुत्तरेणाभि षिञ्चेत्।। 1।।
- अथ हैनं सन्नाहये-त्त्र सेनानी.रिति वर्गेण।। 2।।
- अथास्य रथँ युञ्ज्या-दा त्वा सहस्र.मा शत मिति वर्गेण।। 3।।
- बृह.द्रथन्तराभ्या.ञ्चक्रे- वामदेव्येनाधिष्ठानम्।। 4।।
- सङ्घातँ वृषणं रथ.मित्येतेनाधितिष्ठे-त्प्रयान्त.ञ्चैन.मनुगाये-दिन्द्रस्य नु वीर्याणीति।। 5।।
- आजिशीर्ष.ङ्गत्वा- त्री.निषू.नस्ये- दुत्वा मन्दन्तु सोमा- इत्येतेन, जयति- न पराजीयते।। 6।।
- सन्दर्शने- धूम्राया गो स्सरूप.वत्साया घृतद्रोण.ञ्जुहुया-त्सत्य.मित्थेति रहस्येन, जयति- न पराजीयते।। 7।।
- बाधकमयीनां समिधा.ङ्घृताक्तानां सहस्र.ञ्जुहुया-दभि त्वा पूर्वपीतय इति, वषट्कार.ञ्चास्य निधन.ङ्कुर्या,ज्जयति- न पराजीयते।। 8।। (बाधकमयी - राजकवृक्षः)
- सैध्रकमयीनां समिधा.ङ्घृताक्तानां सहस्र.ञ्जुहुया-दभि त्यं मेष.मि-तीन्द्र इव दस्यू.न्प्रमृण- इति चास्य निधन.ङ्कुर्या,ज्जयति- न पराजीयते।। 9।।
- सप्तरात्रोपोषित- स्सप्त.मुख्या.नुद्दिश्य- सद्यः पीडितेन सर्षप.तैलेन सप्तहेनाऽऽहुति.सहस्र. ञ्जुहुया,त्सप्तरात्रा.न्न भवन्ति।। 10।।

• हस्त्यश्व.रथ.पदातीनां पिष्टमयीः प्रतिकृतीः कृत्वा, पिष्ट.स्वेदँ स्वेदयित्वा-सर्षप.तैलेनाभ्यज्य- तासा.ङ्क्षुरेणाङ्गा.न्यवदायाऽग्नौ जुहुया,दभि त्वा शूर नोनुम इति रहस्येन यत्र हीशब्दो, यावता.ञ्जुहोति- सर्वे न भवन्ति।। 11।।

• त्रिरात्रोपोषितः कृष्ण.चतुर्दश्यां शवा.दङ्गार माहृत्य- चतुष्पथे बाधक.मिध्म.मुपसमाधाय- वैभीतकेन स्रुवेण- सर्षप.तैलेनाऽऽहुति.सहस्र.ञ्जुहुया.त्संमील्येन, यत्र वृश्च.शब्द स्स्या-त्तत्र पुरुष श्शूल.हस्त उत्तिष्ठति, तं ब्रूया-दमु.ञ्जहीति, हन्त्येनम्।। 12।। (संमील्यम् - साम)

• आमगर्भस्य वा क्षुरेणाङ्गा.न्यवदायाऽग्नौ जुहुया-त्कक्ष.वर्गाऽऽद्यै.श्चतुर्भि- स्सपत्नं मनसा ध्याय,न्त्सद्यो न भवति- सद्यो न भवति।। 13।।

## सप्तमः खण्डः

• ❈{3.7 अथ यः कामयेताऽमुष्य.न्त्सर्वा.ण्याजनित्राणि परिक्रामेय.मिति, महे नो अद्य बोधये-त्येत.त्सदा प्रयुञ्जीता,ऽन्तवेलाया.ञ्चैत.त्स्मरे,दमुष्य.न्त्सर्वा.ण्याजनित्राणि परिक्रामति।। 1।।

• अथ यः कामयेत सर्वत्राग्नि.र्मे ज्वले.दिति, सँवत्सरं शिरसाऽग्नि. न्धारये- दग्न आ याहि वीतय इति, प्रथमेनोपतिष्ठे-द्वितीयेन परिहरे-त्तृतीयेन परिचरे,त्सर्वत्र हास्य ज्वलति- यदिच्छति तद्दहति।। 2।।

• अथ यः कामयेत पिशाचा.न्गुणीभूता.न्पश्येय.मिति, सँवत्सर.ञ्चतुर्थे काले भुञ्जानः-कपालेन भैक्ष.ञ्चर-न्प्राणा शिशु.रित्यन्त्यं, सदा सहस्र.कृत्व आवर्तय.न्पश्यति।। 3।।

• अयाचित.मेतेन कल्पेन- द्वितीयं प्रयुञ्जानः पितृ.न्पश्यति।। 4।।

• सँवत्सर.मष्टमे काले भुञ्जानः पाणिभ्यां पात्रार्थ.ङ्कुर्वाणो- वृत्रस्य त्वा श्वसथा.दीषमाणा- इत्येतयोः पूर्वँ, सदा सहस्रकृत्व आवर्तय-न्गान्धर्वाप्सरसः पश्यति।। 5।।

• अयाचित मेतेन कल्पेन- द्वितीयं प्रयुञ्जानो- देवा.न्पश्यति।। 6।।

• यद्वर्च इति दिशाँ व्रत.न्दशानुगान- मेतेन कल्पेन चत्वारि वर्षाणि प्रयुञ्जीत- निधयोऽस्य प्रकाशन्ते- ये दैवा- स्तां.स्तेन।। 7।।

• मास.मुपवसे.देक.मेक-मयाचितं भुञ्जीत, मयि वर्च इत्येतेन कल्पेन चत्वारि वर्षाणि प्रयुञ्जीत, निधयोऽस्य प्रकाशन्ते- ये पृथिव्याम्।। 8।।

Sri Ganapathy Sachchidananda Avadhoota Datta Peetham Mysore SGS

- अष्टरात्रोपोषितोऽमावास्यायां मुख आज्य.ङ्कृत्वा,ऽग्नि.न्नर इत्येतयोः पूर्वं मनसाऽनुद्रुत्या-ऽन्ते स्वाहाकारेणाऽग्नौ जुहुयात्। व्युष्टायां रात्रौ भूतौ पश्यति। पञ्च हास्य कार्षापणा भवन्ति- व्ययकृताश्च पुन.रायन्ति। मूल मशून्य.ङ्कुर्यात्।। 9।।
- गवां प्रविशन्तीनाँ- या पश्चा.त्स्या-त्तस्या शिशरोऽभ्यनुमृज्य- पुच्छ.मनुमृज्य- पाणी संहृत्या-ऽनङ्ग.मेजय.स्तिष्ठेत्। सर्वां रात्रि न्द्वितीय मावर्तयन्। जम्भका हास्य सार्वकामिका भवन्ति- सार्वकामिका भवन्ति।। 10।। (जम्भकाः- भूतविशेषाः)

## अष्टमः खण्डः

- ❃{3.8 अथ यः कामयेत- पुन.र्न प्रत्या.जायेय.मिति।। 1।।
- रात्रिं प्रपद्ये- पुनर्भू-म्मयोभू-ङ्कन्यां- शिखण्डिनीं- पाशहस्तां- युवति.ङ्कुमारिणी,मादित्य.श्चक्षुषे- वातः प्राणाय- सोमो गन्धाया-ऽप स्नेहाय- मनोऽनुज्ञाय- पृथिव्यै शरीरम्।। 2।।
- सा हैन.मुवाचा-ऽस्मि.न्तसँवत्सरे मरिष्य-स्यस्मि.न्नयने-ऽस्मि.न्नृता-वस्मि.न्मासे-ऽस्मि.न्नर्द्धमासे-ऽस्मि.न्द्वादशरात्रे-ऽस्मि.न्त्षड्रात्रे-ऽस्मिं.स्त्रिरात्रे-ऽस्मि.न्द्विरात्रे-ऽस्मि. न्नहोरात्रे-ऽस्मि.न्नह-न्यस्यां रात्रा-वस्याँ वेलाया-मस्मि.न्मुहूर्ते- मरिष्य,स्येहि स्वर्गँ लोक,ङ्गच्छ देवलोकँ वा- ब्रह्मलोकँ वा- क्षत्रलोकँ वा, विरोचमान.स्तिष्ठ- विरोचमाना.मेहि- योनिं प्रविश।। 3।।
- नाहँ योनिं प्रवेक्ष्यामि, भूतोत्तमाया ब्रह्मणो दुहितु- स्संराग.वस्त्राया जायते- म्रियते- सन्धीयते च।। 4।।
- रात्रि.स्तु मा पुनातु, रात्रिः ख.मेत-त्पुष्पान्तँ-य.त्पुराण-माकाश- न्तत्र मे स्थान.ङ्कु-र्वपुन.र्भवा.यापुन.र्जन्मन, एताव.देव रात्रौ- रात्रे.र्व्रतञ्च- रात्रे.र्व्रतञ्च।। 5।। (पुष्पान्तम् - कर्मफलोपभोगस्थानात् बहिर्भूतम्)

## नवमः खण्डः

- ❃{3.9 चतुरो मासा.न्पयोभक्षी, गा अनुगत्वा-ऽरण्ये शुचौ देशे- मठ.ङ्कृत्वा- तत्र प्रविशे, त्कमण्डलु मुदकोपस्पर्शनार्थ.मादाय, त्री.न्त्सप्तरात्रा.ननुदक उपवस-न्नृचं साम यजामह इत्येतयोः पूर्वं, सदा सहस्रकृत्व आवर्तयन्, यदि देवताः पश्यति- सिद्ध.न्तदि,त्यथोत्थान-मन्तरिक्ष्या हास्य सिद्धा भव-न्त्यन्तरिक्ष.क्रमणञ्च द्वाराणि चास्य विव्रीयन्ते।। 1।।
- द्वितीय.मेतेन कल्पेन प्रयुञ्जानः- काम.चारी मनो.जवा भवति।। 2।।

- शुक्ला.नुपवसे.त्सर्वा.न्काला- न्मृष्ट.श्शुक्ल.वासा-श्चन्दनेनानुलिप्त- स्सुमनसो धारयं-स्त्यमूषु पूर्वं सदा सहस्रकृत्व आवर्तयन्, ये मानुषा॰ कामा-स्ता.नवाऽऽप्नोति।। 3।।
- द्वितीय.मेतेन कल्पेन प्रयुञ्जानो, ये दैवा- स्तां.स्तेन।। 4।।
- मास.मुपवसे,देक.मेक.मयाचितं भुञ्जीत, मयि वर्च इत्येतेन कल्पेन चत्वारि वर्षाणि प्रयुञ्जान,- स्त्रयाणाँ लोकाना.माधिपत्य.ङ्गच्छति- व्यृद्धा.वप्यस्यैकस्य।। 5।।(अपि, अस्य, एकस्य)
- अथ यान्यनादिष्ट.काम.कल्पानि, तेषाँ यथा.श्रुति.स्मृति.लिङ्गै॰, कामाः~ क्षुरसँयुक्ताः।। 6।। (क्षुरसँयुक्ताः - वपनादि नियमसँयुक्ताः)
- आभिप्रायिक.ङ्कर्म।। 7।।
- सोऽयं प्राजापत्यो विधि,स्तमिमं प्रजापति र्बृहस्पतये प्रोवाच- बृहस्पति र्नारदाय- नारदो विष्वक्सेनाय- विष्वक्सेनो व्यासाय पाराशर्याय- व्यास॰ पाराशर्यो जैमिनये- जैमिनि॰ पौष्पिञ्ज्याय- पौष्पिञ्ज्य॰ पाराशर्यायणाय- पाराशर्यायणो बादरायणाय- बादरायण स्ताण्डि.शाट्यायनिभ्यां- ताण्डि.शाट्यायनिनौ बहुभ्यः।। 8।।
- सोऽय.मनूचानाय ब्रह्मचारिणे समावर्तमानायाऽऽख्येयः। 9।
- उपाध्यायाय ग्रामवरं- सहस्रं- श्वेत.ञ्चाश्वं प्रदाया-ऽनुज्ञातो वा, य.ङ्काम.ङ्कामयते- तमाप्नोति तमाप्नोति ।। तृतीयाध्यायः।। ।। इति सामविधानब्राह्मणं समाप्तम्।। ---

Sri Ganapathy Sachchidananda Avadhoota Datta Peetham • Mysore •

# अथ आर्षेय ब्राह्मणम्।।

## आर्षेय ब्राह्मणे प्रथमाध्यायः - आग्नेयपर्व

### प्रथम खण्डः

- ❈.,1.1 अथ खल्वय.मार्ष॰ प्रदेशो भवति।। 1।।
- ऋषीणा.न्नामधेय.गोत्रोपधारणम्।। 2।।
- स्वर्ग्यँ यशस्य.न्धन्यं पुण्यं पुत्र्यं पशव्यं ब्रह्मवर्चस्यं स्मार्त.मायुष्यम्।। 3।।
- प्राक्प्रात.राशिक.मित्याचक्षते।। 4।।
- तदप्येव.माहु- र्य इद.मुपधारयत एकैकर्षे.र्दिव्यँ वर्षसहस्र.मतिथि र्भव-त्यभिनन्दित॰-प्रतिनन्दितो- मानित॰- पूजित,स्तत स्स्वाध्याय.फल.मुपजीवतीति।। 5।।

- अथापि ब्राह्मणं भवति, यो ह वा अविदिताऽऽर्षेय.च्छन्दो.दैवत.ब्राह्मणेन मन्त्रेण याजयति वाऽध्यापयति वा- स्थाणुँ वर्च्छति- गतँ वा पद्यति- प्र वा मीयते- पापीया.न्भवति- यातयामा.न्यस्य च्छन्दांसि भव,न्त्यथ यो मन्त्रे.मन्त्रे वेद- सर्व.मायु.रेति- श्रेया.न्भव,- त्ययातयामा.न्यस्य च्छन्दांसि भवन्ति, तस्मा.देतानि मन्त्रे मन्त्रे विद्या.दिति।। 6।।
- ऋषीणां संस्थानो भवति- संस्थानो भवति ब्रह्मण- स्स्वर्गे लोके महीयते, स्मर.न्ना जायते पुन- र्य एवँ वेद।। 7।।
- तान्येता.न्यार्षेयाणि योऽधीते ब्राह्मणꣳ- पङ्क्ति.पावनो भव.त्यर्घ्यः।। 8।।
- य एवँवि.त्स्या- न्न मृन्मये भुञ्जीत- तथा ह्यस्याऽऽयु र्न रिष्येत- तेजश्च।। 9।।
- अथात उपदेशः।। 10।।
- ओ.मित्येत.त्परमेष्ठिनꣳ प्राजापत्यस्य साम, परमेष्ठिनो वा- ब्राह्मणस्य- ब्रह्मणो वा- ब्रह्मवाचो वा।। 11।।
- सत्य.साम स्वर्गस्य वा लोकस्य द्वार.विवरण- न्देवानाँ वौक-स्त्रयस्य वा वेदस्याऽऽप्यायन,- मयातया.माक्षरस्थं साम।। 12।।
- वासिष्ठो हिङ्कारꣳ प्राजापत्यो- गवाँ वा।। 13।।
- गायत्रं पौष्कल.माग्नेयम्।। 14।।
- प्रथमायाँ वा यथाऽऽदिष्ट.ज्ञेयं- प्रथमस्वरै र्वा- चतुरक्षर.वृद्धान्तैः।। 15।।
- आद्यपा.त्प्रस्ताव ओकारान्तः।। 16।।
- हुम् आ वे.त्यन्त.स्तोभो वृद्धो वा।। 17।।---

द्वितीय खण्डः

- ❈.,1.2 गोतमस्य पर्का.वभितꣳ। कश्यपस्य बर्हिष्यं मध्यमम्।। 1।।
- सौपर्णञ्च वैश्वमनसञ्च।। 2।।
- बृह.द्भारद्वाजं- बृह.दाग्नेयं- बृहद्वा सौरम्।। 3।।
- श्रौतर्षाणि त्रीणि।। 4।।
- औशने च शैरीष.ञ्चौशने वाऽभित- श्शैरीषं मध्यमं- शैरीषे वोत्तरे सर्वाणि वौशनानि- सर्वाणि वा शैरीषणि।। 5।।
- इन्द्रस्य साँवर्ग.वार्त्रघ्ने द्वे।। 6।।
- साक.मश्वस्य शौनश्शेपे स्सामनी द्वे।। 7।।

- वत्सस्य काण्वस्य सामनी द्वे।। 8।।
- अग्नेश्च वैश्वानरस्याऽऽर्षेयम्।। 9।।
- सुमित्रस्य च वाध्र्यश्वे.स्साम।। 10।।
- वाध्र्यश्वस्य वाऽनूपस्य।। 11।।---

तृतीय खण्डः

- ❈.,1.3 अग्ने.स्सँवर्गः। 1।।
- वैश्वमनसञ्च।। 2।।
- श्वाभा.श्चौष्टीये द्वे।। 3।।
- वैश्वामित्रञ्च।4।।
- अग्ने.र्जराबोधीये द्वे।। 5।।
- रुद्रस्य वा।। 6।।
- मारुतञ्च।। 7।।
- भार्गवे द्वे- शौनश्शेपे- वेन्द्रस्य वारवन्तीय.न्तृतीयं, सर्वाणि वा भार्गवाणि- सर्वाणि वा शौनश्शेपानि- सर्वाणि वा वारवन्तीयानि।। 8।।
- और्वस्य वैधारयस्य सामनी द्वे। अग्ने र्वा सामुद्रे। समुद्रस्य वा वाससी।। 9।।
- अत्रे श्वासङ्गः। 10।
- प्रजापतेश्च निधनकामम्।। 11।।---

चतुर्थ खण्डः

- ❈.,1.4 सैन्धुक्षितानि त्रीणि।। 1।।
- अग्ने र्हरसी द्वे- इहव.द्वामदेव्य न्तृतीयम्।। 2।।
- यामे द्वे।। 3।।
- अग्ने रक्षोघ्ने द्वे।। 4।।
- वैश्वमनस.श्चाग्ने श्चाऽऽर्षेयम्।। 5।।
- सोम.साम च।। 6।।
- गौपवनञ्च।। 7।।
- सूर्यसामनी च। 8।

- कावञ्च वसुरोचिषः।। 9।।
- सूर्यवर्चस स्सामनी द्वे।। 10।।
- वसुरोचिषो वा पारावते४- काशीते वा- कापोते वा- वासुमन्दे वा।। 11।।
- गो.राङ्गिरसस्य सामनी द्वे।। 12।।
- गोतमस्य वा मनाज्ये।। 13।।---

पञ्चम खण्डः

- ※.,1.5 भरद्वाजस्यौपहवौ द्वौ- श्नौष्टीगव.न्तृतीय- मग्ने.र्वैश्वानरस्य यज्ञायज्ञीयम्।। 1।।
- भरद्वाजस्य वा।। 2।।
- कार्तयशञ्च- कार्तवेशँ वा- नार्मेधञ्च- कार्तवेशञ्चैव।। 3।।
- भरद्वाजस्य पृश्निनी द्वे।। 4।।
- उरो.राङ्गिरसस्य साम।। 5।।
- गोतमस्य पौरुमद्गे द्वे- पुरुमद्गस्य वाऽङ्गिरसस्य।। 6।।
- मण्डो.र्जामदग्न्यस्य सामनी द्वे- माण्डवे वा।। 7।।
- भरद्वाजस्य गाथम्।। 8।।
- गोतमे द्वे। 9।
- अग्ने.रायुः।। 10।।
- अग्ने.र्हरसी द्वे- दैर्घश्रवसे द्वे।। 11।।---

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

षष्ठ४ खण्डः

- ※ अग्ने.राग्नेये द्वे। गोतमस्य मनाज्ये द्वे।। 1।।
- दैवराजञ्च।। 2।।
- गाथिनश्च कौशिकस्य साम।। 3।।
- बार्ह.दुक्थे द्वे।। 4।।
- पौरुमीढञ्च।। 5।।
- कार्णश्रवसं प्रास्कण्वँ वा।। 6।।
- दैवोदासञ्च।। 7।।
- सौक्रतवञ्च।। 8।।

- काण्वे द्वे।। 9।।
- मानवे द्वे।। 10।।---

सप्तम खण्डः

- ❉.,1.7 अग्नेश्च द्रविणम्।। 1।।
- बार्हस्पत्यञ्च।। 2।।
- वसिष्ठस्य च वीङ्कम्।। 3।।
- विष्पर्धस.श्चाऽङ्गिरसस्य साम।। 4।।
- ऐतवाद्ध्य.ञ्च।। 5।।
- मनसश्च दोहः।। 6।।
- समन्तानि त्री-ण्यग्ने.रेकँ वसिष्ठस्य वा- वरुणस्य द्वे।। 7।।
- वाम्रस्य च वैखानसस्य सामा-ऽङ्गिरस्य वा दानवस्य।। 8।।---

अष्टम खण्डः

- ❉.,1.8 श्यावाश्व- ञ्चर्तु.षामणी च- यामञ्च।। 1।।
- अग्ने.श्चाऽर्षेयम्।। 2।।
- कौत्सँ वा यज्ञसारथि वा।। 3।।
- अग्ने.र्वैश्वानरस्य सामनी द्वे।। 4।।
- आश्वे द्वे- ऐटते वा।। 5।।
- वामदेव्यञ्च- रौद्रँ वा।। 6।।
- वैश्वज्योतिषे द्वे।। 7।।
- यामे द्वे।। 8।।
- इन्द्रस्य वैराजे द्वे।। 9।।
- वसिष्ठस्य वा- प्रजापते.र्वा- राशि.मराये मराय.राशिने वा- स्फाति.करणे वा- च्यावने वा- शैखण्डिने- वैन्वके वा।। 10।।---

नवम खण्डः

- ❉.,1.9 श्येनश्च- श्यैनँ वा- श्यैतँ वा- शयनँ वा- शायनँ वा- प्रजापते.र्वा- दीर्घाऽयुष्यँ वा।। 1।।

- वासुक्रञ्च।। 2।।
- पौषञ्च।। 3।।
- कौत्सञ्च।। 4।।
- काश्यपे द्वे।। 5।।
- घृताचे.राङ्गिरसस्य साम।। 6।।
- भरद्वाजस्य प्रासाहम्।। 7।।
- अग्ने.र्वैश्वानरस्य राक्षोघ्न-मत्रे.र्वा।। 8।।---

दशम खण्डः

- ❀.,1.10 पाथे च।। 1।।
- बृहच्चाऽऽग्नेयम्।। 2।।
- यामञ्च।। 3।।
- बृह.च्चैवाऽऽग्नेयम्।। 4।।
- बृहतश्च कौमुदस्य साम।। 5।।
- अग्ने.र्यद्वाहिष्ठीये द्वे- यन्मंहिष्ठीये वा।। 6।।
- अग्ने.र्विशोविशीय-मैडँ वा शार्ङ्गम्।। 7।।
- प्रजापतेश्च कनीनिके द्वे- अत्रे र्वा।। 8।।
- श्रौतर्वणञ्च।। 9।।
- कश्यपस्य च स्वयो.नीन्द्रस्य चेन्द्रिय-मिन्द्रस्य वा प्रियम्।। 10।।---

एकादश खण्डः

- ❀.,1.11 बार्हस्पत्यञ्च।। 1।।
- आरूढव.च्चाऽऽङ्गिरसँ- यामँ वा।। 2।।
- आसिते द्वे।। 3।।
- त्वाष्ट्री.साम च।। 4।।
- अगस्त्यस्य च राक्षोघ्नम्।। 5।।
- मानवञ्च।। 6।।---

द्वादश खण्डः

Sachchidananda Avadhoota Datta Peetham • Mysore •

- ❄.,1.12 तौदे द्वे दैर्घ.तमसानि त्रीणि। सर्वाणि वा तौदानि- सर्वाणि वा दैर्घ.तमसानि।। 1।।
- श्यावाश्वस्य प्रहितौ द्वौ।। 2।।
- प्रजापते श्श्रुधीये द्वे- श्रुध्ये वा- श्रद्धे वा- सत्ये वा- सामनी वा।। 3।।
- प्रजापते स्सदो.हविर्धानानि त्रीणि, सद४ पूर्वं- हविर्धाने उत्तरे।। 4।।
- त्वष्टु.रातिथ्यम्।। 5।।
- अदितेश्च साम।। 6।।
- वार्कजम्भञ्च।। 7।।
- अगस्त्यस्य च राक्षोघ्नम्।। 8।।
- सौमक्रतव.ञ्च- बृह.दाग्नेयीयँ वा।। 9।।
- अगस्त्यस्य चैव राक्षोघ्नम्।। 10।।---

त्रयोदश खण्डः

- ❄.,1.13 इन्द्रस्य प्रमंहिष्ठीयानि चत्वारि- वसिष्ठस्य वा-ऽसितँ वैषा.न्तृतीयम्।। 1।।
- भरद्वाजस्य वाजभृद्वाऽजाभृद्वा- वाजाभर्मीयँ वा।। 2।।
- सौभराणि त्रीणि।। 3।।
- पक्थस्य सौभरस्य सामनी द्वे -पथो वा पक्थस्य वा।। 4।।
- दैवानीकञ्च।। 5।।
- गौतमञ्च- साध्यँ वा।। 6।।
- जमदग्नेश्च सँवर्गः।। 7।।
- अगस्त्यस्य च राक्षोघ्नम्।। 8।। इति प्रथमाध्यायः।।---

## अथ द्वितीयाध्यायः - ऐन्द्रपर्वणि एकसाम.बहुसामविभागः

### प्रथम खण्डः

- ❄.,2.1 रौद्रे द्वे- मार्गीयवे द्वे।। 1।।
- अपि वा मार्गीयवञ्च रौद्रे च मार्गीयव.ञ्चैव, सर्वाणि वा रौद्राणि- सर्वाणि वा मार्गीयवाणि।। 2।।
- आश्वम्।। 3।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham • Mysore •

- ऐटते द्वे।। 4।।
- श्रौतकक्षे द्वे।। 5।।
- तन्वस्य पार्थस्य सामनी द्वे। दावसो र्वाऽङ्गिरसस्योत्तरम्। वसिष्ठस्य निवेष्ट्यौ द्वौ। इडानाँ वा सङ्कार उत्तरम्।। 6।।
- शार्यातानि त्रीणि।। 7।।
- इन्द्राण्या.स्साम।। 8।।
- गौषूक्त.ञ्चाश्वसूक्त.ञ्च।। 9।।
- गौरीवितम्।। 10।।
- गाराणि त्रीणि।। 11।।

द्वितीयः खण्डः

- ❈.,2.2 सौपर्णानि त्रीणि, शारुप्रवेतसानि वा- विलम्ब.सौपर्णँ वैषा.न्तृतीयम्।। 1।।
- शाकलम्।। 2।।
- आभर.द्वसवे द्वे।। 3।।
- तान्वे द्वे।। 4।।
- इन्द्रस्य रोहित.कूलीये द्वे- विश्वामित्रस्य वा।। 5।।
- इन्द्राण्या स्सामनी द्वे।। 6।।
- इन्द्रस्य च सहस्त्र.बाहवीयम्।। 7।।
- धृषतो मारुतस्य साम- भरद्वाजस्याऽदारसृ-द्धृषत.श्चैव मारुतस्य साम- भरद्वाजस्य चैवाऽदारसृती।। 8।।
- ऐध्मवाहानि त्री.ण्यैध्महाराणि वा।। 9।।
- अहे॰ पैङ्वस्य सामा-ऽहेध्मो ऽहिघ्नो वा- पैङ्वस्य पैल्वस्य वा।। 10।।

तृतीयः खण्डः

- ❈.,2.3 ऐषञ्च।। 1।।
- पौषञ्च।। 2।।
- मरुताञ्च सँवेशीयं- सिन्धु.षाम वा।। 3।।
- हाविष्मते द्वे- हाविष्कृते द्वे।। 4।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

- काक्षीवतञ्च।। 5।।
- औषसञ्च।। 6।।
- भरद्वाजस्य मौक्षे द्वे- दक्ष.णिधनँ वैनयो४ पूर्वम्।। 7।।
- भारद्वाजानि त्री-ण्यार्षभानि वा- सैन्धु.क्षितानि वा।। 8।।
- शाक्त्य.सामनी द्वे।। 9।।
- वार्षधरे द्वे- कुत्सस्य प्रस्तोकौ द्वौ।। 10।।

चतुर्थः खण्डः

- ❃.,2.4 औपगवे द्वे।। 1।।
- सौश्रवसे वाऽथमथे वा- मथाथे वा- सौमित्रे वा- शैखण्डिने वा।। 2।।
- त्वाष्ट्री.साम।। 3।।
- त्वष्टु.रातिथ्ये द्वे।। 4।।
- पौषे द्वे।। 5।।
- श्यावाश्वे द्वे।। 6।।
- प्रजापते स्सुतं.रयिष्ठीये द्वे- सहो.रयिष्ठीये वा।। 7।।
- इष्टाहोत्रीय.ञ्चाऽप्सरसँ वाऽपा.न्निधिः।। 8।।
- प्रजापते.र्निधनकामं- सिन्धु.षाम वा।। 9।।
- रेवत्यश्च वाज.दावर्यो वा।। 10।।
- सौमा.पौषञ्च- गो.अश्वीयँ वा।। 11।।

पञ्चमः खण्डः

- ❃.,2.5 वैतहव्यानि त्री.ण्योकोनिघनँ वैषा.न्तृतीयम्।। 1।।
- शाक्त्य.सामनी द्वे- गौरीविते द्वे- शाक्त्य.साम चैव- गौरीवित.ञ्चैव- सर्वाणि वा शाक्त्य.सामानि- सर्वाणि वा गौरीवितानि।। 2।।
- काण्वे द्वे।। 3।।
- गोरीविते द्वे। श्रौतकक्ष.न्तृतीयम्।। 4।।
- सौमित्रे द्वे। इहव.द्दैवोदास.न्तृतीयम्।। 5।।
- रैणवे द्वे- वैणवे वा। शाक्वर.वर्णँ वैनयो४ पूर्वम्। औदले द्वे। वीङ्कँ वैनयो४ पूर्वम्।। 6।।



Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

- आर्षभानि त्रीणि। सैन्धु.क्षितानि वा वाध्यश्वानि वा।। 7।।
- कोत्से द्वे। पाञ्चवाजे वा दाशवाजे वा।। 8।।
- सौमेधानि त्रीणि। पूर्वातिथानि वा पौर्वातिथानि वा।। 9।।
- दैवातिथञ्च मैधातिथँ वा।। 10।।

**षष्ठः खण्डः**

- ❃.,2.6 आङ्गिरसानि त्रीणि।। 1।।
- अपि वा माधुच्छन्दस.ङ्क्रौञ्च.ङ्घृतश्चु.न्निधनं- प्राजापत्यं माधुच्छन्दसँ वैव।। 2।।
- वाम्राणि त्रीणि। प्रैयमेधानि वा वैयश्वानि वाऽश्वानि वोद्वातृ.दमनानि वा।। 3।।
- गौरीविते द्वे। आपाल.वैणवे द्वे। वैणवे वा-ऽपाले वा-ऽकूपारे वा- पारववे वा।। 4।।
- धुरो.स्सामनी द्वे। महागौरीवित.न्तृतीयम्। गौरीवितँ वैव।। 5।।
- वाच.स्सामनी द्वे। महावामदेव्य न्तृतीयँ- वामदेव्यँ वैव।। 6।।
- इन्द्रस्य सत्रासाहीये द्वे। अजितस्य वाजिती।। 7।।
- वामदेव्यञ्च।। 8।।
- अश्विनोश्च साम।। 9।।
- गौतमस्य च भद्र-मश्विनो.श्चैव साम- सोम.साम वा।। 10।।

**सप्तमः खण्डः**

- ❃.,2.7 त्वाष्ट्री.साम च।। 1।।
- गौधा.साम च।। 2।।
- सवितुश्च साम।। 3।।
- उषसश्च साम।। 4।।
- त्वष्टु.रातिथ्ये द्वे।। 5।।
- पौषञ्च।। 6।।
- इन्द्रस्य च माया।। 7।।
- इन्द्रस्य साँवर्ते द्वे- सँवर्तस्य वाऽङ्गिरसस्य।। 8।।
- शौनश्शेपञ्च- च्यावनँ वा।। 9।।
- प्रतीचीनेडञ्च काशीतम्।। 10।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

अष्टमः खण्डः

- ❃.,2.8 सौमित्रञ्च।। 1।।
- श्यावाश्वे च।। 2।।
- शैखण्डिनञ्च।। 3।।
- वैतहव्यञ्च।। 4।।
- भारद्वाजञ्च।। 5।।
- आरुणस्य च वैतहव्यस्य साम- सौभरँ वा।। 6।।
- सौभर.ञ्चैव।। 7।।
- पाष्ठौहे द्वे।। 8।।
- साकमश्वञ्च धुराँ वा साम।। 9।।

नवमः खण्डः

- ❃.,2.9 यामञ्च।। 1।।
- आङ्गिरसञ्च हरिश्री.निधनम्।। 2।।
- वैरूपञ्च।। 3।।
- आसितञ्च सिन्धु.षाम वा।। 4।।
- यमस्यार्क इन्द्रस्य वा।। 5।।
- सौमित्रे द्वे।। 6।।
- इन्द्रस्य चाभयङ्करम्।। 7।।
- त्वाष्ट्री.साम च।। 8।।
- पौषञ्च।। 9।।
- इन्द्राण्या.स्साम।। 10।।

दशमः खण्डः

- ❃.,2.10 श्यावाश्वञ्च तारणँ वा।। 1।।
- वैरूपञ्च।। 2।।
- सौमित्रञ्च- कौत्सँ वा।। 3।।
- तौभञ्च।। 4।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore • SGS

- श्रौतञ्च।। 5।।
- आभीशवञ्च।। 6।।
- पौषञ्च।। 7।।
- इन्द्रस्य क्षुरपवि।। 8।।
- सौमित्रे द्वे।। 9।।

एकादशः खण्डः

- ❀.,2.11 कौत्से च।। 1।।
- औषसञ्च।। 2।।
- भारद्वाजञ्च।। 3।।
- कौत्स.ञ्चैव।। 4।।
- औषस.ञ्चैव।। 5।।
- मित्रावरुणयोश्च सँयोजनम्।। 6।।
- ऋतु.षाम च।। 7।।
- विष्णोश्च साम।। 8।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

द्वादशः खण्डः

- ❀ कौत्सञ्च।। 1।।
- काश्यप.ञ्चाऽप्सरसँ वा।। 2।।
- बार्ह.दुक्थे द्वे।। 3।।
- कौत्सानि चैव त्रीणि।। 4।।
- और्ध्वसद्मने द्वे।। 5।।
- अभीपादस्य चौद्लस्य साम।। 6।।
- आमहीयवञ्च।। 7।। इति द्वितीयाध्यायः।---

## तृतीयाध्यायः - ऐन्द्रपर्वणि बृहती.त्रिष्टु.बनुष्टुभः

प्रथमः खण्डः

- ❀.,3.1 भरद्वाजस्याऽर्कौ द्वौ। इन्द्रस्य वा।। 1।।
- भारद्वाजे द्वे।। 2।।

- सान्नते द्वे- श्यैत.न्तृतीयम्।। 3।।
- नाविकञ्च प्रजापते.श्चाभीवर्तो-ऽभीवर्तस्य वाऽऽङ्गिरसस्य भाग-श्चेन्द्रस्य चाभीवर्तो- नौधसं पञ्चमम्।। 4।।
- लौशे द्वे- धानाके द्वे- कालेयानि त्रीणि- क्षुल्लक.कालेयँ वैषा.श्चतुर्थ-महाकालेय.मुत्तमम्।। 5।।
- सर्वाणि वैव कालेयानि।। 6।।
- ऐषिरे द्वे- गौश्रृङ्गे द्वे।। 7।।
- पृष्ठ.मेकं- शौल्क.मेक- ञ्जमदग्ने.रभीवर्त एकः।। 8।।
- कौल्मल.बर्हिषे द्वे।। 9।।
- वसिष्ठस्य जनित्रे द्वे।। 10।।
- दैवातिथञ्च मैधातिथँ वा।। 11।।

द्वितीयः खण्डः

- ❃.,3.2 वैखानसञ्च पौरुहन्मनञ्च प्राकर्षँ वा।। 1।।
- सात्यम्।। 2।।
- चत्वारि भारद्वाजानि, कण्व.बृह-द्वैषा.न्द्वितीयम्।। 3।।
- वाम्राणि त्रीणि।। 4।।
- अग्ने.र्गौङ्गव- ञ्जुङ्गो.र्वा।। 5।।
- इन्द्रस्य यशसी द्वे। साध्रँ वैनयो.रुत्तरम्। साध्र.ञ्चैव। विरूपस्य समीचीन.प्राचीने द्वे। इन्द्रस्य वा यशसी।। 6।।
- यौक्त.स्रुचँ वा- यात.स्रुचँ वा।। 7।।
- आत्राणि त्रीणि। वासिष्ठानि वा।। 8।।
- वासिष्ठानि त्रीणि। आत्राणि वा।। 9।।
- गो.राङ्गिरसस्य सामनी द्वे- गोतमस्य वा मनाज्ये।। 10।।

तृतीयः खण्डः

- ❃.,3.3 इन्द्रस्य हारायणानि त्रीणि। हारायणानि वा।। 1।।
- वाम्राणि त्रीणि।। 2।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore • SGS

- वरुण.सामानि त्रीणि।। 3।।
- प्रजापतेश्च वषट्कार.णिधनम्।। 4।।
- धृषतो मारुतस्य साम।। 5।।
- संश्रवसो विश्रवस स्सत्यश्रवस श्श्रवस इति वाय्याना.ञ्चत्वारि सामानि। इन्द्रस्य वा संशानानि।। 6।।
- वाभ्रे पूर्वे वासिष्ठ.न्तृतीयँ- वासिष्ठे वा पूर्वे वाभ्र.न्तृतीयम्।। 7।।
- स्वपस आङ्गिगस्य सामनी द्वे। आङ्गिगस्य दानवस्य वा।। 8।।
- आष्कार.णिधन.ङ्काण्वं महावैष्टम्भ मभि निधनञ्च- काण्वं महावैष्टम्भ.ञ्चैव।। 9।।
- श्चौष्टीगवञ्च।। 10।।

चतुर्थः खण्डः

- ⁂.,3.4 इन्द्रस्य च वृषकम्।। 1।।
- द्यौते द्वे- द्वैगते वा।। 2।।
- कार्तयशञ्च कार्तवेशँ वा।। 3।।
- इन्द्रस्य च शरणम्।। 4।।
- श्रायन्तीयञ्च।। 5।।
- वाभ्र.ञ्चाक्षीलँ वा।। 6।।
- शाक्राणि त्रीणि।। 7।।
- वासिष्ठानि वा वैयश्वा-न्याश्वानि वा- शौल्कानि वा- सुम्नानि वा- द्युम्नानि वा- पृष्ठानि वा यौक्ताश्वानि वा- सोम.सामानि वा।। 8।।
- प्रजापतेश्च निधन.कामम्।। 9।।
- इन्द्रस्य प्रियाणि त्रीणि- वसिष्ठस्य वा।। 10।।
- इन्द्रस्य वैरूपाणि त्रीणि- वसिष्ठस्य वा।। 11।।

पञ्चमः खण्डः

- ⁂.,3.5 पौरुहन्मनञ्च प्राकर्षञ्च।। 1।।
- इन्द्रस्य चाभयङ्करम्।। 2।।
- कावषे च।। 3।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore • SGS

- सूर्य.साम च।। 4।।
- वैश्वदेवे द्वे- आनूपे वाध्र्यश्वे वा।। 5।।
- वैरूपञ्च।। 6।।
- नैपातिथे द्वे।। 7।।
- बृहतश्च कौमुदस्य सामनी द्वे- स्वर्ज्योति.र्निधन.मुत्तरम्।। 8।।
- वाचश्च साम।। 9।।
- वाम्रे द्वे- आक्षीले वा।। 10।।

षष्ठः खण्डः

- ❈.,3.6 गौरीवीते॰ प्रहितौ द्वौ- वासुक्रे वा।। 1।।
- आत्रे द्वे।। 2।।
- गौरीविते द्वे।। 3।।
- वामदेव्यञ्च।। 4।।
- अश्विनोश्च साम।। 5।।
- वसिष्ठस्य पञ्जाणि त्रीणि- पज्रस्य वा वासिष्ठस्य- सफस्य वा पाज्रस्य।। 6।।
- सौभरे द्वे।। 7।।
- वैयश्वञ्च।। 8।।
- इन्द्रस्य च सहस्त्रायुतीये द्वे- प्रजापते र्वा महोविशीये।। 9।।
- इन्द्राण्या.स्साम।। 10।।

सप्तमः खण्डः

- ❈.,3.7 सौभरञ्च।। 1।।
- गार्त्समदञ्च।। 2।।
- वाचश्च साम।। 3।।
- बार्ह.दुक्थञ्च।। 4।।
- वाशञ्च नैपातिथँ वा।। 5।।
- तौरश्रवसञ्च।। 6।।
- त्वाष्ट्र्याश्च साम।। 7।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

- अदितेश्च साम।। 8।।
- आजीगर्तञ्च।। 9।।
- माधुच्छन्दसञ्च।। 10।।

अष्टमः खण्डः

- ❃.,3.8 उषसश्च साम।। 1।।
- अश्विनोश्च साम।। 2।।
- अश्विनोश्च सँयोजनम्।। 3।।
- अश्विनो.श्चैव साम।। 4।।
- सोम.साम च।। 5।।
- आज.मायवञ्च।। 6।।
- समुद्रस्य च प्रैयमेधस्य साम।। 7।।
- इन्द्रस्य वैरूपे द्वे- वसिष्ठस्य वा।। 8।।
- वैश्वदेवञ्च।। 9।।
- पुरीषञ्चाऽथर्वणम्।। 10।।

नवमः खण्डः

- ❃.,3.9 प्राकर्षञ्च वसिष्ठस्य च निहवः।। 1।।
- गृत्समदस्य योनिनी द्वे।। 2।।
- औरुक्षये द्वे।। 3।।
- पार्थे द्वे।। 4।।
- सौपर्णे द्वे- वात्सप्राणि त्रीणि- क्षुल्लक.वात्सप्रँ वैषा.न्तुरीयं- महावात्सप्र.मुत्तमं- सर्वाणि वै वात्सप्राणि।। 5।।
- गौरीवितञ्च।। 6।।
- वैदन्वतञ्च।। 7।।
- यामँ वा- महायामञ्च।। 8।।
- ऋतु.सामनी द्वे। जज्ञानस्य वा ब्राह्मस्य।। 9।।
- इन्द्रस्य वारवन्तीयम्।। 10।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

### दशमः खण्डः

- ❃.,3.10 इन्द्रस्य क्षुरपविणी द्वे- स्यौम.रश्मे द्वे।। 1।।
- धृषतो मारुतस्य सामनी द्वे- द्युतानस्य वा मारुतस्य।। 2।।
- सोम.सामनी द्वे।। 3।।
- इन्द्रवज्रे द्वे।। 4।।
- भृष्टिमत स्सूर्य.वर्चस स्सामनी द्वे।। 5।।
- वसिष्ठस्याऽङ्कुशौ द्वौ- कश्यपस्य वा प्रतोदौ।। 6।।
- भारद्वाजञ्च।। 7।।
- वैश्वदेवञ्च।। 8।।
- पुरीष.ञ्चाऽऽथर्वणम्।। 9।।

### एकादशः खण्डः

- ❃.,3.11 अदित्या स्सामनी द्वे- तार्क्ष्य.सामनी वा।। 1।।
- इन्द्रस्य च त्रातम्।। 2।।
- याज्ञतुरञ्च- वार्त्रतुरँ वा।। 3।।
- धृषतो मारुतस्य सामनी द्वे।। 4।।
- आत्रम्।। 5।।
- गृत्समदस्य मदौ द्वौ- गौतमस्य वाऽनुतोदौ।। 6।।
- वैश्वामित्रम्।। 7।।
- सावित्राणि षट्।। 8।।
- कुतीपादस्य वैरूपस्य साम।। 9।।
- आमहीयवञ्च।। 10।।

### द्वादशः खण्डः

- ❃.,3.12 शैखण्डिने द्वे- विश्वेषा.न्देवाना-मुद्वंशीय न्तृतीयम्।। 1।।
- शैखण्डिनानि चैव त्रीणि। आष्टादंष्ट्रे द्वे। महावैश्वामित्रे द्वे।। 2।।
- इन्द्रस्य प्रियाणि चत्वारि- वसिष्ठस्य वा। गौतमँ वैषा.न्द्वितीयम्।। 3।।
- गृत्समदस्य वीङ्कानि चत्वारि- वसिष्ठस्य वा। आकूपारँ वैषा.न्तृतीयम्।। 4।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

- तिरश्चाऽङ्गिरसस्य सामनी द्वे- तैरश्च्ये वा।। 5।।
- वैश्वामित्रञ्च।। 6।।
- काण्वे च।। 7।।
- वैश्वामित्र.श्चैव।। 8।।
- इन्द्रस्य शुद्धाशुद्धीये द्वे- वसिष्ठस्य वा।। 9।।
- गौतमस्य रयिष्ठे द्वे।। 10।। इति तृतीयाध्यायः

## चतुर्थाध्यायः - ऐन्द्रपर्वणि अनुष्टुबादीनि

### प्रथमः खण्डः

- ❄.,4.1 कौल्मल.बर्हिषे द्वे- इन्द्रस्य नानद.न्तृतीय- न्नदतो वाऽङ्गिरसस्य।। 1।।
- शाकपूतम्।। 2।।
- कौल्मल.बर्हिषे चैव।। 3।।
- प्रजापतेश्च मधुश्चु.न्निधनम्।। 4।।
- उषसश्च साम।। 5।।
- भारद्वाजञ्च।। 6।।
- अग्नेश्च दधिक्रम्।। 7।।
- मारुतञ्च माधुच्छन्दसँ वा।। 8।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

### द्वितीयः खण्डः

- ❄.,4.2 वामदेव्यञ्च।। 1।।
- काश्यप.श्चाऽप्सरसँ वा।। 2।।
- प्रैयमेधञ्च।। 3।।
- बार्ह.दुक्थञ्च।। 4।।
- अग्ने.र्वैश्वानरस्य सामनी द्वे।। 5।।
- शाकपूते द्वे।। 6।।
- वरुणान्या.स्साम।। 7।।
- औषसञ्च।। 8।।
- देवानाञ्च रुचिरुचे र्वा रोचनम्।। 9।।

- ऋ.क्साम्नो स्सामनी द्वे।। 10।।

तृतीयः खण्डः

- ❃.,4.3 त्रैशोकम्।। 1।।
- शैखण्डिने द्वे- अत्रे.र्विवर्तौ द्वौ- महा.सावेतसे द्वे- महा.शैरीषे द्वे।। 2।।
- इन्द्रस्य प्रियाणि त्रीणि- वसिष्ठस्य वा।। 3।।
- इन्द्रस्य वैरूपाणि त्रीणि- वसिष्ठस्य वा।। 4।।
- बार्ह.दुक्थञ्च।। 5।।
- त्रासदस्यवे च।। 6।।
- सौभरे द्वे- सोम.साम वैनयो꣫ पूर्वम्।। 7।।
- द्यावापृथिव्यो स्सामनी द्वे- वरुण.सामनी वा।। 8।।
- इन्द्रस्य च श्येनः।। 9।।
- वैरूपञ्च- च्यावनँ वा।। 10।।

चतुर्थः खण्डः

- ❃.,4.4 इन्द्रस्य क्रोशानुक्रोशे द्वे- कौत्स.न्तृतीयँ- वसिष्ठस्य क्रोशानि।। 1।।
- दैवोदासे द्वे- प्रहितो.स्सँयोजने द्वे- ओको निधनँ वैनयो꣫ पूर्वम्।। 2।।
- हारिवर्णानि चत्वारि।। 3।।
- त्रैतानि चत्वारि।। 4।।
- सुराधसश्च प्राधस.श्चाऽङ्गिरसयो.स्त्रीणि सामानि- मारुतँ वैषा.न्तृतीयम्।। 5।।
- वैश्वमनसम्।। 6।।
- सौमित्राणि त्रीणि।। 7।।
- त्रैककुभानि त्रीणि।। 8।।
- औक्ष्णो.नियानानि त्रीणि। औक्ष्णो.रन्ध्राणि वा।। 9।।

पञ्चमः खण्डः

- ❃.,4.5 प्रयस्वच्च प्राजापत्य.मक्षर-श्चाक्षारँ वा- प्रयस्व.च्चैव।। 1।।
- दैवौदासानि चत्वारि।। 2।।
- इन्द्रस्य साँवर्ते द्वे- सँवर्तस्य वाऽङ्गिरसस्य।। 3।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham • Mysore

- आक्षार.श्चैव यामँ वा।। 4।।
- प्रजापतेश्च दीर्घाऽऽयुष्यम्।। 5।।
- भरद्वाजस्य च शुन्ध्युः।। 6।।
- आदित्यस्याऽपामीवम्।। 7।।
- इन्द्रस्य वैराजे द्वे- वसिष्ठस्य वा- प्रजापते र्वा- सहोदैर्घतमसे वा।। 8।।

षष्ठः खण्डः

- ❃.,4.6 इन्द्रस्याऽभ्रातृव्यम्।। 1।।
- शार्करे द्वे।। 2।।
- बृहत्कम्।। 3।।
- सौयवसानि त्रीणि।। 4।।
- मरुताञ्च धेनु।। 5।।
- मरुतां सँवेशीयं- सिन्धु.षाम वा।। 6।।
- इन्द्रस्याऽऽभरे द्वे- वसिष्ठस्य वा।। 7।।
- वायो.रैषिराणि त्रीणि। ऐषिरस्य वा- प्रैयमेधस्य।। 8।।
- प्रजापते.स्सीदन्तीये द्वे।। 9।।
- पक्थस्य सौभरस्य सामनी द्वे- पथो वा- पक्थस्य वा- सौभरे वा- सौभ्रवे वा।। 10।।

सप्तमः खण्डः

- ❃.,4.7 यामम्।। 1।।
- गृत्समदस्य मदौ द्वौ।। 2।।
- आभीके द्वे- आभीशवे द्वे- बार्ह.द्गिराणि त्रीणि।। 3।।
- इन्द्रस्य च स्वाराज्यम्।। 4।।
- कश्यपस्य च धृष्णु- यामँ वा।। 5।।
- मरुताञ्च सँवेशीयं- सिन्धु.षाम वा।। 6।।
- यामे चैव।। 7।।
- त्रैतानि त्रीणि- सौपर्णे द्वे।। 8।।
- लौशम्।। 9।।

Sri Ganapathy Sachchidananda Avadhoota Datta Peetham • Mysore •

अष्टमः खण्डः

- ❃.,4.8 इन्द्रस्य सञ्जये द्वे- स्त्रौते वा- स्त्रौग्मते वा- द्वि.हिङ्कारँ वा- वामदेव्य.न्द्वितीयम्।।
1।।
- अङ्गिरसा.ञ्चोत्सेध.निषेधौ।। 2।।
- सत्यश्रवसश्च वाय्यस्य साम।। 3।।
- पौषञ्च।। 4।।
- औषसञ्च।। 5।।
- लौशञ्च यामँ वा।। 6।।
- अङ्गिरसा.ञ्चैव निषेधः।। 7।।
- गौरे.राङ्गिरसस्य साम। अंहोमुचो वा।। 8।।

नवमः खण्डः

- ❃.,4.9 इन्द्रस्य सङ्कमे द्वे- वसिष्ठस्य वा। सौहविषाणि त्रीणि- सर्वाणि वा सौहविषाणि।।
1।।
- बाकानि त्रीणि।। 2।।
- प्रजापते र्धर्म.विधर्माणि चत्वारि।। 3।।
- भागञ्च।। 4।।
- वाजिनां साम।। 5।।
- प्रजापते.र्हिक.विक.निकानि त्रीणि- विक.निक.हिकानि वा- निक.विक.हिकानि वा।। 6।।
- आश्वे द्वे- ऐटते वा।। 7।।
- वाजिना.ञ्चैव साम।। 8।।
- आदित्यानाञ्च पवित्रम्।। 9।।

दशमः खण्डः

- ❃.,4.10 इन्द्रस्याऽभरे द्वे- वसिष्ठस्य वा।। 1।।
- वासुमन्दे द्वे- कावषाणि त्रीणि।। 2।।
- प्रजापते श्श्लोकानुश्लोकानि चत्वारि।। 3।।
- वाच.स्सामनी द्वे।। 4।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore • SGS

- मारुतञ्च- माधुच्छन्दसँ वा।। 5।।
- मारुतञ्चैव।। 6।।
- उद्वंशपुत्रस्य।। 7।।

एकादशः खण्डः

- ※.,4.1 धुरो.श्शाम्ये द्वे।। 1।।
- प्रजापतेश्च गूर्द्दः कूर्द्दौ वा- विश्वामित्रस्य चात्यर्द्दः- प्रजापते.श्चैव गूर्द्दौ- विश्वामित्रस्य चात्यर्द्दः।। 2।।
- प्रजापते स्सान्तनिके द्वे।। 3।।
- प्रजापते.र्धन.धर्मणी द्वे।। 4।।
- उषसश्च साम।। 5।।
- भारद्वाजञ्च।। 6।।
- इन्द्रस्य च राति।। 7।।
- भारद्वाजञ्च।। 8।।
- ऐषञ्च।। 9।।
- इन्द्रस्य वैराजे द्वे- वसिष्ठस्य वा- प्रजापते.र्वा- विशाँ वा सामनी।। 10।।

द्वादश खण्डः

- ※.,4.12 प्रजापतेश्च वाजजित्।। 1।।
- गो.राङ्गिरसस्य सामनी द्वे।। 2।।
- प्रयस्वच्च प्राजापत्यम्।। 3।।
- अक्षय्यञ्च रेवत्।। 4।।
- याज्ञतुरञ्च।। 5।।
- एवया.मारुतस्य साम।। 6।।
- भरद्वाजस्य विषमाणि त्रीणि। इन्वकानि वा- सैन्धु.क्षितानि वा।। 7।।
- सवितुश्च साम।। 8।।
- भारद्वाजे द्वे- पारुच्छेपे वा। अग्ने.र्वैश्वानरस्य रक्षोघ्ने द्वे- बार्हस्पत्ये वा। अवभृथ.साम वैनयोः पूर्वं- प्रवर्ग्यं सामोत्तरम्।। 9।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore • SGS

- ऐषञ्च।। 10।। इति चतुर्थाध्यायः।---

## पञ्चमाध्यायः- पवामान पर्व

### प्रथमः खण्डः

- ❈.,5.1 आजिग.ञ्चाऽभीकञ्च ऋषभश्च पवमानः। औक्ष्णो.रन्ध्रो वा। आभीक.ञ्चैव। बाभ्रवे द्वे। इन्द्राण्या.स्साम। शैशवे द्वे। प्रजापते र्दोहा.दोहीये द्वे। इन्द्राण्या.श्चैव साम। आमहीयवञ्च।। 1।।
- आजिगं सुरूपे द्वे। जमदग्ने.श्शिल्पे द्वे। संहितञ्च। वसिष्ठस्य शकुलः। जमदग्नेश्च गम्भीरम्। संहित.ञ्चैव।। 2।।
- सोम.सामनी च। आशु च भार्गवम्। वैश्वदेवे द्वे। इन्द्र.सामनी द्वे। यौक्ताश्वे द्वे।। 3।।
- भासञ्च। सोम.साम च। प्राजापत्यञ्च। सोम.साम चैव। भास.ञ्चैव। प्राजापत्य.ञ्चैव। अध्यर्धेडँ वा सोम.साम।। 4।।
- वैष्टम्भे द्वे। पाष्ठौहे द्वे। वैष्टम्भ.ञ्चैव। क्षुल्लक.वैष्टम्भँ वा। पाष्ठौह.ञ्चैव।। 5।।
- इषोवृधीयञ्च। इन्द्रसाम च। वैश्वदेवे द्वे। आग्नेये द्वे। वैश्वदेव.ञ्चैव। आग्नेय.ञ्चैव।। 6।।
- शैशवानि चत्वारि। च्यावनानि चत्वारि।। 7।।
- प्राजापत्ये द्वे।। 8।।
- वैदन्वतानि चत्वारि। रजे.राङ्गिरसस्य पद.स्तोभौ द्वौ।। 9।।
- और्णायवे द्वे।। 10।।

### द्वितीयः खण्डः

- ❈.,5.2 सौभरे द्वे- सौभ्रवे वा।। 1।।
- इन्द्रस्य वृषकाणि त्रीणि। देवानाँ वर्षीणाँ वार्षेयं प्रथमम्।। 2।।
- बभ्रोः कौम्म्यस्य सामानि त्रीणि।। 3।।
- बभ्रोः कार्तवेशस्य त्रीणि।। 4।।
- शाम्मदे द्वे- ऐटते वा।। 5।।
- वसिष्ठस्य जनित्रे द्वे।। 6।।
- मरुतां प्रक्रीडा वा- सङ्क्रीडा वा- निक्रीडा वा त्रयः।। 7।।
- औशनम्।। 8।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

## तृतीयः खण्डः

- ❃.,5.3 यामानि त्रीणि। देवाना.मृषीणाँ वार्षेय.मुत्तमम्।। 1।।
- अङ्कतेश्च वैरूपस्य साम।। 2।।
- औशने द्वे। देवानाँ वर्षीणाँ वार्षेयं पूर्वम्।। 3।।
- सोम.साम च।। 4।।
- कार्ष्णे द्वे।। 5।।
- वैश्वदेवे द्वे। सोम.साम वैनयो॰ पूर्वं- सूर्य.सामोत्तमम्।। 6।।
- इन्द्रस्य च वार्त्रघ्नम्।। 7।।
- सोम.सामानि त्रीणि।। 8।।
- भारद्वाजञ्च।। 9।।

## चतुर्थः खण्डः

- ❃.,5.4 वार्षाहरम्।। 1।।
- वार्शानि त्रीणि।। 2।।
- इन्द्रस्य वैरूपे द्वे।। 3।।
- तरन्तस्य च वैददश्वे.स्साम।। 4।।
- सोम.साम च।। 5।।
- सूर्य.साम।। 6।।
- दार्ढ्यच्युतानि त्रीणि।। 7।।
- इन्द्रस्य च वृषकम्।। 8।।
- ऐषञ्च।। 9।।
- श्यावाश्वञ्च।। 10।।
- आयास्यञ्च। अयासोमीयँ वा- सोम.साम वा।। 11।।
- आग्नेयञ्च।। 12।।
- आयास्ये चैव।। 13।।
- भारद्वाजञ्च।। 14।।

## पञ्चमः खण्डः

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

- ※.,5.5 आयास्यं- माण्डवञ्च- वसिष्ठस्यापदासे द्वे- सोम.साम वैनयो.रुत्तर-मायास्य.ञ्चैव- माण्डवञ्चै-वोद्वच्च प्राजापत्य-मायास्य.ञ्चैव- कण्व.रथन्तर-मायास्य.ञ्चैव तिरश्चीनिधनं- प्रजापते स्सदो.विशीय-ञ्जमदग्ने स्स्व.वासिनी द्वे- वसिष्ठस्य प्लवो-ऽग्ने रौरव-मिन्द्रस्य यौधाजयँ- युधाजे र्वाऽऽङ्गिरसस्य- युधा.जीवस्य वा- विश्वामित्र.स्येन्द्रस्य।। 1।।
- इन्द्रस्याऽच्छिद्र.रयिष्ठे द्वे वसिष्ठस्य वा- भारद्वाजे द्वे- आभीशवे द्वे- माण्डवे द्वे- अङ्गिरसा मभीवास.परिवाससी द्वे- वैण.सोमक्रतवीये द्वे- माण्डवँ वैनयो.रुत्तरं- प्रजापते.र्गूर्दौ द्वौ कश्यपस्य वा प्रतोदा-वङ्गिरसा.ङ्क्रोष्ठ.पुंस्तिनी द्वे- महा.रौरवञ्च- महा.यौधाजयञ्च।। 2।।
- आश्वानि चत्वार्य्रि सोम.सामानि वा।। 3।।
- आग्नेय.ञ्चाग्ने र्वा त्रिणिधन-ङ्कौत्सँ वा- यज्ञसारथि वा। अग्ने र्वैश्वानरस्य सामनी द्वे- द्वि.हिङ्कारँ वामदेव्य.न्द्वितीयम्। अङ्गिरसा.ञ्चोत्सेध.निषेधौ।। 4।।
- सोम.सामानि षट्। आश्वानि वा।। 5।।
- विष्णो.रयमणी द्वे- वैष्णवे वा। आङ्गिरसानि त्रीणि।। 6।।
- औक्ष्णो.निधानानि त्रीणि। औक्ष्णो.रन्ध्राणि वा। आग्नेयानि त्रीणि। द्व्यध्यासञ्च। सौषाम.वसिष्ठस्य वा। पिप्पल्यौक्ष्णो निधनँ- वौक्ष्णोरन्ध्रँ वा। प्रजापतेश्च वाजिजित्।। 7।।
- वैश्वदेवे द्वे। इन्द्र.सामनी द्वे। स्व*पृष्ठ.ञ्चाऽऽङ्गिरसम्। इन्द्र.सामानि त्रीणि।। 8।।
- सोम.सामनी च। स्व*पृष्ठ.ञ्चैवाऽङ्गिरसम्। सोम.सामनी चैव। देवानाञ्च पवित्रम्। आदित्यानाँ वा।। 9।।

**षष्ठः खण्डः**

- ※.,5.6 औशनम्। वृशस्य वै जानस्याऽभीवर्तौ द्वौ। औशने चैव। सर्वाणि वौशनानि।। 1।।
- वाज.सनी द्वे। वाज.जिती द्वे। वाराहँ वोत्तरम्। सर्वाणि वैव वाराहाणि।। 2।।
- अङ्गिरसां सङ्क्रोशा.स्त्रयः।। 3।।
- साम.सुरसी द्वे- साम.सरसे वा।। 4।।
- वेणो.र्विशाले द्वे- गौतमस्य तन्त्रातन्त्रे द्वे।। 5।।
- अगस्त्यस्य यमिके द्वे। इन्द्रस्य वारवन्तीये द्वे- मरुताँ वा। कालकाक्रन्दौ ज्याह्वोडौ वा।। 6।।
- वासिष्ठा.न्यष्टौ।। 7।।

Sri Sachchidananda Avadhoota Datta Peetham • Mysore •

- वसिष्ठस्य जनित्रे द्वे। अङ्गिरसाँ व्रतोपोहः। वसिष्ठस्य वा सम्पा। वैयश्वञ्च। सोम.सामनी च। ऐषञ्च। माधुच्छन्दसञ्च।। 8।।

### सप्तमः खण्डः

- ❀.,5.7 कुत्सस्याऽधि.रथीयानि त्रीणि। आशु.रथीयानि वा।। 1।।
- वैश्व.ज्योतिषाणि त्रीणि।। 2।।
- वाच.स्सामनी द्वे।। 3।।
- दाशस्पत्ये द्वे।। 4।।
- कश्यपस्य च शोभनम्।। 5।।
- दाशस्पत्यानि चैव चत्वारि।। 6।।
- श्नौष्टानि त्रीणि- श्नुष्टे र्वाऽऽङ्गिरसस्य। अग्ने.र्वैश्वानरस्य सामानि।। 7।।
- आत्रञ्च।। 8।।
- वासिष्ठञ्च।। 9।।
- अपाञ्च साम।। 10।।

### अष्टमः खण्डः

- ❀.,5.8 नकुलस्य वामदेवस्य प्रेङ्खौ द्वौ। महाकार्तयशञ्च- कार्तवेशँ वा। और्ध्व.सद्मनञ्च। श्यावाश्वञ्च। आन्धीगव.ञ्चेति।। 1।।
- क्रौञ्चानि त्रीणि- सोम.सामानि वा।। 2।।
- त्वाष्ट्री.सामनी च। वासिष्ठञ्च। त्वाष्ट्रीसाम च। वासिष्ठञ्च। त्वाष्ट्री.सामनी चैव। वासिष्ठ.ञ्चैव।। 3।।
- क्रौञ्चे द्वे।। 4।।
- सोम.सामानि त्रीणि। क्रौञ्च.ञ्चैव। सोम.साम चैव।। 5।।
- आङ्गिरसानि त्रीणि- प्रैयमेधानि वा।। 6।।
- गृत्समदस्य सूक्तानि चत्वारि- वसिष्ठस्य वा।। 7।।
- आकूपारञ्च।। 8।।
- वैरूपञ्च- नृगस्य वा साम।। 9।।

### नवमः खण्डः

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

- ❃.,5.9 कावम्। वाजसनी द्वे। कावँ वैनयो꣣ पूर्वम्। वाजजिती द्वे। काव.श्चैव।। 1।।

- आङ्गिरसानि त्रीणि। उद्व.द्वैषां भार्गवं प्रथमं- सामराज.मुत्तमम्। साम.राजानि चैव त्रीणि। सिमानाँ वैषा.न्निषेध उत्तमम्।। 2।।

- वासिष्ठम्।। 3।।

- लौशे द्वे। प्रवच्च भार्गवम्। विरूपस्य च तन्त्रम्। यामं पञ्चमम्।। 4।।

- दास.शिरसी द्वे- दास.सरसे वा।। 5।।

- यामानि त्रीणि।। 6।।

- मरुता.न्धेनु।। 7।।

- इन्द्रस्याऽपामीवनी द्वे- वायो र्वाऽभिक्रन्द उत्तरम्।। 8।।

- यामानि चैव त्रीणि।। 9।।

- मरुता.श्चैव धेनु।। 10।।

- अञ्जतो व्यञ्जत स्समञ्जत इति काक्षीवतानि त्रीणि सामानि- शार्ङ्गाणि वा।। 11।।

- आदित्यस्याऽर्कपुष्पे द्वे।। 12।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

### दशमः खण्डः

- ❃.,5.10 वसिष्ठस्य पदे द्वे। वसिष्ठस्यानुपदे द्वे। अपि वा पद.श्चानुपद.श्च- पद.श्चैवानुपद.श्चैव। पौष्कलं पञ्चमम्।। 1।।

- ऐषिराणि पञ्च।। 2।।

- शौक्तानि पञ्च।। 3।।

- कार्णश्रवसानि त्रीणि।। 4।।

- वाच.स्सामनी द्वे। इन्द्र.सामनी द्वे। मरुतां प्रेङ्खो- वसिष्ठस्य वा।। 5।।

- प्राजापत्ये द्वे- वैश्वदेवे वा।। 6।।

- इन्द्रस्य सुज्ञाने द्वे। द्यौते द्वे ज्योतिषे वा। प्रजापते.रातीषादीये द्वे।। 7।।

- सोम.सामानि चत्वारि।। 8।।

- सोमस्य यशांसि त्रीणि।। 9।।

- भारद्वाजञ्च।। 10।।

### एकादशः खण्डः

- ※.,5.11 वासिष्ठञ्च। सफे च। वासिष्ठ.ञ्चैव। सफ.ञ्चैव।। 1।।
- ऐषिराणि चत्वारि।। 2।।
- कार्ण.श्रवसानि त्रीणि। वाच.स्सामानि त्रीणि।। 3।।
- कौल्मल.बर्हिषे द्वे। शङ्कु.तृतीयं सीदन्तीयँ वा। कौल्मल.बर्हिषाणि चैव त्रीणि।।
- 4।।
- भरद्वाजस्य लोमनी द्वे। प्रजापते.र्वा दीर्घे। सोम.सामानि त्रीणि।। 5।।
- शैतोष्माणि चत्वारि- शीतोष्णानि वा।। 6।।
- गायत्र.पार्श्वञ्च। सन्तनि च। सोम.सामानि चैव त्रीणि।। 7। इति पञ्चमाध्यायः।।

## षष्ठाध्यायः(आरण्यक.गान.विषयकम्)

## अर्कपर्व

### प्रथमः खण्डः

- ※.,6.1 अष्टौ वैरूपाणि। अञ्चश्च वैरूपम्। ह्रस्वा च बृहदोपशा। पञ्च.निधनञ्च। षण्णिधनञ्च। सप्त.निधनञ्च। अष्टा.निधनञ्च। द्वादश.निधनञ्च। पुष्यञ्च।। 1।।
- अन्तरिक्षे द्वे।। 2।।
- अरिष्टे द्वे।। 3।।
- अहरीते द्वे।। 4।।

### द्वितीयः खण्डः

- ※.,6.2 वरुणस्य देव.स्थानम्।। 1।।
- बृह.द्देवस्थानम्।। 2।।
- ऐर.यैरिणे द्वे।। 3।।
- आङ्गिरसे द्वे।। 4।।
- बार्हस्पत्यञ्च।। 5।।
- भारद्वाजञ्च।। 6।।
- आथर्वणञ्च।। 7।।
- नार.द्वसवञ्च।। 8।।
- बृहती.वामदेव्ये द्वे।। 9।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore • SGS

- भरद्वाजस्य बृहत्।। 10।।

तृतीयः खण्डः

- ❋.,6.3 वसिष्ठ.जमदग्न्यो.रर्कौ द्वौ। अगस्त्य.जमदग्न्यो.र्वा।। 1।।
- स्वाशिरा.मर्कः।। 2।।
- दीर्घतमसोऽर्कः।। 3।।
- मरुता.मर्कौ द्वौ। संस्तोभो वोत्तरः।। 4।।
- अग्ने.रर्कः।। 5।।
- प्रजापते.श्चार्कः।। 6।।
- इन्द्रस्यार्कौ द्वौ। त्रिष्टुभाँ वा।। 7।।
- अर्क.शिरश्च।। 8।।
- अर्क.ग्रीवाश्च।। 9।।
- वरुण.गोतमयो.रर्कः।। 10।।
- अर्कपुष्पे द्वे।। 11।।

चतुर्थः खण्डः

- ❋.,6.4 अग्ने.र्वैश्वानरस्य त्रीणि।। 1।।
- आज्य.दोहा-न्याचि.दोहा-न्याच्य.दोहानि वा, प्रजापते र्वा- विष्णो र्वा- विश्वामित्रस्य वा।। 2।।
- रुद्रस्य त्रय ऋषभाः।। 3।।
- रैवतो वैराज श्शाक्वर इतीन्द्रस्य त्रयोऽतीषङ्गाः।। 4।।
- अथापरम्। रौद्रो वासवꣳ पार्जन्यो वा वैश्वदेवो वा।। 5।।
- प्राजापत्या श्चत्वारꣳ पद.स्तोभाः।। 6।।
- गौतमा वा वैश्वामित्रा वा ऐन्द्राग्ना वा।। 7।।

पञ्चमः खण्डः

- ❋.,6.5 दश संसर्पाणि, महा.सर्पाणि- सर्प.सामानि वा।। 1।।
- अथापरम्। अग्नेश्च। पृथिव्याश्च। वायोश्च। अन्तरिक्षस्य च। आदित्यस्य च। दिव.श्चापाञ्च। समुद्रस्य च। माण्डवे द्वे।। 2।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

- अथापरम्। बाभ्रावाणि चत्वारि। पावमानानि चत्वारि। दिशां संसर्पे द्वे।। 3।।

**षष्ठः खण्डः**

- ※.,6.6 त्रिषन्धि च।। 1।।
- यज्ञसारथि च।। 2।।
- वृषा च।। 3।।
- एकवृषञ्च।। 4।।
- विद्रथञ्च।। 5।।
- अभ्रातृव्यञ्च।। 6।।
- रैवते द्वे। रेवत्यो वा।। 7।।
- शाक्वर.वर्णञ्च।। 8।।
- नित्य.वत्साश्च।। 9।।
- वसिष्ठस्य च रथन्तरम्।। 10।।
- जमदग्नेश्च सप्तहम्।। 11।।
- पञ्च पविमन्ति महासामानि। शर्वस्य प्रथमोत्तमे। रुद्रस्य त्रीणि।। 12।।
- अथापरम्। अग्ने र्हरसी द्वे। क्षुरस्य हरसी द्वे। मृत्यो.र्हर४ पञ्चमम्। सामनी वा त्रिकाद्ये लोकानाम्। शान्ति.रुत्तरम्।। 13।।
- पञ्च.निधनँ वामदेव्यम्।। 14।।
- इन्द्रस्य महावैराजँ- वसिष्ठस्य वा।। 15।।
- अग्नेश्च प्रियम्।। 16।।
- सर्प.साम- कल्माषँ वा।। 17।।
- स्वर्ग्यं सेतु.षाम- पुरुष.गति र्वा- विशोकँ वा।। 18।।

## द्वितीयपर्व - द्वन्द्वपर्व

**प्रथमः खण्डः**

- ※.,6.7 वसिष्ठस्य प्राणापानौ द्वौ।। 1।।
- इन्द्रस्येन्यौ द्वौ।। 2।। (एन्य.पदयुक्ते सामनी)
- प्रजापते.र्व्रतपक्षौ द्वा.वहोरात्रयो र्वा।। 3।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

- इन्द्राण्या उल्ब.जरायुणी द्वे।। 4।।
- बृहस्पते.र्बलभिदी द्वे। इन्द्रस्य वोद्भि.द्वैनयोः पूर्वम्।। 5।। (वा, उद्भित्, वा, एनयोः)

द्वितीयः खण्डः

- ❃.,6.8 भर्गयशसी द्वे।। 1।।
- यामे द्वे।। 2।।
- घर्म.तनू द्वे।। 3।।
- प्रजापते.स्त्रीणि चक्षूंषि।। 4।।
- त्रीणि वार्षाहराणि।। 5।।

तृतीयः खण्डः

- ❃.,6.9 द्यौते द्वे- द्वैगते वा।। 1।।
- तास्पन्द्रे द्वे- तास्विन्द्रे वा।। 2।।
- तौर.श्रवसे द्वे।। 3।।
- धेनु.पयसी द्वे।। 4।।
- स्वर्ज्योतिषी द्वे।। 5।।

चतुर्थः खण्डः

- ❃.,6.10 यण्वापत्ये द्वे।। 1।।
- आयु.र्नवस्तोभे द्वे।। 2।।
- रायो.वाजीय-बार्हद्गिरे द्वे।। 3।।
- सङ्कृति.पार्थुरश्मे द्वे।। 4।।
- श्येन.वृषके द्वे।। 5।।

पञ्चमः खण्डः

- ❃.,6.11 भद्र.श्रेयसी द्वे।। 1।।
- तन्त्वोतुनी द्वे।। 2।। (तन्तु-ओतु अनयोस्समाहारः तन्त्वोतु, ततः क्लीबे औ)
- सहो.महसी द्वे।। 3।।
- वार्क.जम्भे द्वे।। 4।।
- ईष्.विश्वज्योतिषी द्वे।। 5।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

षष्ठः खण्डः

- ❃.,6.12 द्रविण.विष्पर्धसी द्वे।। 1।।
- याम.मधुच्छन्दसे द्वे।। 2।।
- वसिष्ठस्य शफौ द्वौ।। 3।।
- शुक्र.चन्द्रे द्वे।। 4।।

सप्तमः खण्डः

- ❃.,6.13 वायो.ष्षड्वराणि पराणि वा।। 1।।
- स्पराणि वा। पारणानि वा। अनन्त्यानि वा। आदित्यानि वा। स्वर्ग्याणि वा। स्वर्गस्य लोकस्य गमनानि वा।। 2।।
- विष्णो.स्त्रीणि स्वरीयांसि।। 3।।
- पञ्चानुगान-न्यनुगान-श्चतु.रनुगानम्।। 4।।

## तृतीयपर्व - व्रतपर्व

प्रथमः खण्डः

- ❃.,6.14 वाचो.व्रते द्वे।। 1।।
- शशस्य कर्षूशयस्य व्रतम्।। 2।।
- सत्रस्यर्द्धिः प्रजापतेः प्रतिष्ठा। व्याहृतिश्च।। 3।।
- परमेष्ठिनः प्राजापत्यस्य व्रतम्।। 4।।
- कृष्णस्य चाऽङ्गिरसस्य व्रतम्।। 5।।
- सोम.व्रते द्वे।। 6।।

द्वितीयः खण्डः

- ❃.,6.15 भरद्वाजस्य व्रतम्।। 1।।
- भरद्वाजिनाँ व्रतम्।। 2।।
- यमव्रते द्वे। अङ्गिरसाँ वोत्तरम्।। 3।।
- अश्विनो.र्व्रते द्वे।। 4।।
- गवाँ व्रते द्वे।। 5।।
- कश्यप.व्रते द्वे।। 6।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore SGS

तृतीयः खण्डः

- ❃.,6.16 अङ्गिरसाँ व्रते द्वे।। 1।।
- अपाँ व्रते द्वे।। 2।।
- अहोरात्रयो.र्व्रते द्वे। अह्नः पूर्वं- रात्रे.रुत्तरम्।। 3।।
- विष्णो.र्व्रतम्।। 4।।
- विश्वेषा.न्देवानाँ व्रतम्।। 5।।
- वसिष्ठ.व्रते द्वे।। 6।।

चतुर्थः खण्डः

- ❃.,6.17 इन्द्रस्य सञ्जयम्।। 1।।
- अगस्त्यस्य यशः।। 2।।
- प्रजापते.स्त्रयस्त्रिंश.त्संमित-चतुस्त्रिंश.त्संमिते द्वे।। 3।।
- जमदग्ने.र्व्रतम्।। 4।।
- युग्यञ्च दश.स्तोभम्।। 5।।
- इन्द्रस्य च वार्त्रघ्नम्।। 6।।
- प्रजापते.श्चाष्टा.निधनम्।। 7।।
- इन्द्रस्य राजन.रौहिणे द्वे।। 8।।
- रौहिणे वैकर्षे.र्वा- राजन.न्धातू रौहिणम्।। 9।।

पञ्चमः खण्डः

- ❃.,6.18 अग्ने.रिलान्दं पञ्चानुगानम्। इराऽन्नँ वा।। 1।।
- त्रीणि देवानाँ व्रतानि- देवस्य वा। रौद्रे पूर्वे- वैश्वदेव.न्तृतीयम्। वैश्वदेवे वा पूर्वे- रौद्र.न्तृतीयम्।। 2।।
- ऋतुष्ठा यज्ञायज्ञीयम्।। 3।।
- अजितस्य जितिः।। 4।।
- सोम.व्रतम्।। 5।।
- दीर्घतमसश्च व्रतम्।। 6।।

षष्ठः खण्डः

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

- ❋.,6.19 द्वे पुरुष.व्रते- पञ्चानुगान.ञ्चैकानुगानञ्च।। 1।।
- त्रीणि लोकानाँ व्रतानि।। 2।।
- दिवोऽन्तरिक्षस्य पृथिव्या इति।। 3।।
- अथापर-न्द्यावापृथिव्यो.र्विपरीते।। 4।।
- ऋश्यस्य साम व्रतँ वा।। 5।।

सप्तमः खण्डः

- ❋.,6.20 दिशाँ व्रत न्दशानुगानम्।। 1।।
- कश्यप.व्रत न्दशानुगानम्। कश्यप.ग्रीवा द्वितीयम्। प्रजापते.र्हृदयं पञ्चमम्। इडानां सञ्चार ष्षष्ठः। कश्यप.पुच्छ.न्दशमम्। प्रा.ग्दशमा.द्व्वाँ व्रते।। 2।।
- निह्नवाऽभिनिह्नवौ द्वौ। अनडु.द्व्रते वा।। 3।।

## चतुर्थपर्व - शुक्रियम्

प्रथमः खण्डः

- ❋.,6.21 अग्ने.र्व्रतम्।। 1।।
- वायोश्च व्रतम्।। 2।।
- महावैश्वानर.व्रते द्वे।। 3।।
- सूर्यस्य भ्राजाभ्राजे द्वे।। 4।।
- वायो.र्विकर्ण.भासे द्वे। मृत्यो र्वा।। 5।।
- ऐन्द्रं महादिवा.कीर्त्यं- सौर्यँ वा। दशानुगानम्। तस्य शिरश्च ग्रीवा च स्कन्ध.कीकसौ च पुरीषाणि च पक्षौ चाऽऽत्मा चोरू च पुच्छ-ञ्चैत.त्साम सुपर्ण.मित्याचक्षते।। 6।।

द्वितीयः खण्डः

- ❋.,6.22 आदित्य.व्रत.मेकविंश.त्यनुगान.मिति शाण्डिली.पुत्रः। द्वाविंशति.रिति वार्ष्यायणी.पुत्रः।। 1।।
- वैश्वदेवा स्समैरया स्संशानानि भूतव.दित्येकम्।। 2।।
- चित्र.न्देवाना.मन्त.रिति द्वयो.रपरम्।। 3।।
- गन्धर्वाप्सरसा.मानन्द.प्रतिनन्दौ पक्षौ।। 4।।
- सौर्योऽतीषङ्गः। इन्द्रस्य सधस्थम्। मरुतां भूतिः।। 5।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore • SGS

- प्रजापते.स्तिस्र स्सार्पराज्ञ्याः। सर्पाणाँ वाऽर्बुदस्य वा।। 6।।
- सर्पस्य घर्म.रोचन-मिन्द्रस्य वा।। 7।।
- षडैन्द्राः परिधयः।। 8।।
- ऋतूनाँ वागादि पित्र्यम्।। 9।।
- अन्त्यँ वैकल्पिकम्।। 10।।
- तन्मित्रावरुणयो.श्चश्चक्षु.रित्या चक्षते- श्रोत्रञ्च तदेवैके।। 11।।
- द्वितीयोऽतीषङ्ग-स्त.न्मित्रावरुणयो श्श्रोत्र.मित्या चक्षते- चक्षुश्च तदेवैके।। 12।।
- तृतीयोऽतीषङ्ग-स्त.दिन्द्रस्य शिर इत्या चक्षते।। 13।।
- आदित्य.स्योन्नय- न्त.दादित्याऽऽत्मेत्या चक्षते।। 14।।

## महानाम्नी पर्व

- ऐन्द्यो महानाम्न्यः- प्रजापते र्वा- विष्णो.र्वा- विश्वामित्रस्य वा- सिमा वा- मट्ण्या वा-ऽध्वरगा वा- शक्कर्यो वा- शक्कर्यो वा।। 15।। इति आर्षेयब्राह्मणम् समाप्तम्।। ---

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

# अथ देवताऽध्यायब्राह्मणम्

## प्रथम खण्डः

- ॐ.,1.1 अग्नि.रिन्द्रः प्रजापति.स्सोमो वरुण स्त्वष्टाऽङ्गिरसः पूषा सरस्वतीन्द्राग्नी।। 1।।
- इडा.निधनानि- पदनिधना-नीकार.णिधनानी-त्याग्नेयानि।। 2।।
- सर्वाणि निधनव.न्त्यैन्द्रा-ण्यन्या.न्यादिष्टेभ्यः।। 3।।
- सर्वाणि स्वाराणि प्राजापत्यानि।। 4।।
- यथा.वामदेव्यम्।। 5।।
- ऋक्सामानि सौमानि।। 6।।
- यथौशन.कावे।। 7।।
- वाङ्निधनानि वारुणानि।। 8।।
- यथा यज्ञायज्ञीयम्।। 9।।
- अक्षरानुस्वाराणि त्वाष्ट्राणि।। 10।।
- यथा वारवन्तीय.ञ्चाभीवर्तश्च।। 11।।
- स्वः पृष्ठा.न्याङ्गिरसानि।। 12।।
- स्वर्णिधनानि पौषाणि।। 13।।
- कया न.श्चित्र आभुव-दा पवस्व सहस्रिण.मिति- वाङ्निधने सारस्वते।। 14।।
- य आनय.त्परावत- इत्यैन्द्राग्ने।। 15।।
- सुतं रयिष्ठा.स्सहो रयिष्ठा- इत्याग्नेयैन्द्रे।। 16।।
- वसवो रुद्रा आदित्या विश्वे देवाः।। 17।।
- वसूनां स्वाराणि- रुद्राणा.न्निधनव-न्त्यादित्याना.मैडानि- विश्वेषा.न्देवानाँ वा.ङ्निधनानि।। 18।।
- यथा भूयस्त्वेन प्रदेशा वर्तन्त इत्यन्तराणि।। 19।।
- अथान्तर.तराणि, सर्वा.ण्याग्नेयानि- सर्वा.ण्यैन्द्राणि- सर्वाणि स्वाराणि प्राजापत्यानि सामानी-त्यन्तर.तराणि।। 20।।
- अथान्तर.तमानि, सर्वाणि ब्राह्माणि सामानीति- सर्वान्तर.तमानि।। 21।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

- अथोपनिषत्।। 22।।
- ऋग्वै माता- साम पिता- प्रजापति.स्स्वरः।। 23।।
- अथ यान्यृक्त आख्यायन्ते- मातृत.स्तान्या.ख्यायन्ते,ऽथ यानि सामत आख्यायन्ते- पितृत. स्तान्या.ख्यायन्ते,ऽथ यानि स्वरत आख्यायन्ते- प्रजापतित.स्तान्या.ख्यायन्ते।। 24।।
- स वा एष उद्गीथो- बन्धुमा.न्बन्धुमत्यः।। 25।।
- बन्धुमा.न्बन्धुमत्यो भव,त्यनन्ति ह वा एनं पितृतश्च मातृतश्च- य एवँ वेद।। 26।।

द्वितीयः खण्डः

- ❋.,1.2 अथात.श्छन्दसाँ वर्णाः।। 1।।
- शुक्ला गायत्र्यो रूपेण- सारङ्गं रूप.मुष्णिहाम्। पिशङ्ग.ङ्ककुभां रूप- ङ्कृष्ण.मानुष्टुभ.न्ततः। रोहितं बृहतीनान्तु- नीलं पाङ्क्तं ततꣳ पुनः। सुवर्ण.न्त्रिष्टुभां रूप- ङ्गौर.ञ्जागत.मुच्यते।। 2।।
- अतो या.न्यन्यानि च्छन्दांसि- श्याव.न्तेषा न्ततꣳ पुनः। नकुल न्त्वेकपादाना- न्द्विपदां बभ्रु रुच्यते। सारङ्ग-शुक्ल- कृष्ण.रूपाणि- ऋग्यजु.स्साम.ब्राह्मणान्वितानि।। 3।।
- ये यज्ञेषु प्रयोक्तव्या- स्तेषा.न्दैवत.मुच्यते।। 4।।
- विराजꣳ पृश्नयो विद्यात्।। 5।।
- दैवत.न्तत उत्तरम्।। 6।।
- अग्ने.र्गाय.त्र्यभव-त्सयु.ग्वोष्णिहया सविता संबभूवा-ऽनुष्टुभा सोम उक्थै.र्महस्वा-न्बृहस्पते.र्बृहती वाच.माऽवहत्।। 7।।
- विरा.ण्मित्रावरुणयो रभिश्री-रिन्द्रस्य त्रिष्टु.बिहभागोऽह्नः। विश्वा.न्देवा.न्जग.त्याविवेश- तेन चाक्लृप्त.ऋषयो मनुष्याः।। 8।।
- प्राजापत्या अतिच्छन्दसो- विच्छन्दसो वायुदेवताः। पुरुषो द्विपदाना न्दैवतं- ब्राह्म एकपदा.स्स्मृताः।। 9।।
- वासवी पङ्क्तिः।। 10।।
- सतुलं मन्ये.तैतद्दैवत्या एवैतेषु च्छन्द.स्स्वृचो भवन्तीति।
- छन्दसामु हैत.द्दैवतम्।। 11।।

तृतीयः खण्डः

- ❋.,1.3 अथातो निर्वचनम्।। 1।।

- गायत्री- गायते स्स्तुति.कर्मणः।। 2।।
- गायतो मुखा.दुदपत.दिति हि ब्राह्मणम्।। 3।।
- उष्णि-गुत्स्नाना.त्स्निह्यते.र्वा- कान्ति.कर्मणो-ऽपि वोष्णीषिणी.त्यौपमिकम्।। 4।।
- ककु-प्ककुद.रूपिणी-त्यौपमिकम्।। 5।।
- ककुप्च.कुब्जश्च- कुजते.र्वोब्जतेर्वा।। 6।।
- अनुष्टु-बनु.स्तोभनात्।। 7।।
- अन्वस्तौदिति हि ब्राह्मणम्।। 8।।
- पिपीलिका- पेलते.र्गतिकर्मणः।। 9।।
- पिपीलिकमध्ये-त्यौपमिकम्।। 10।।
- बृहती- बृंहते.र्वृद्धिकर्मणः।। 11।।
- विरा-ड्विरमणा-द्विराजना-द्विराधना.द्वा।। 12।।
- पङ्क्तिः- पञ्चिनी पञ्चपदा।। 13।।
- त्रिष्टु-प्स्तोभ.त्युत्तरपदा।। 14।।
- का तु त्रिता स्या-त्तीर्णतम.ञ्छन्दो भवतीति।। 15।।
- त्रिवृ.द्वज्र- स्तस्य स्तोभिनीवे.त्यौपमिकम्।। 16।।
- जगती-गततम.ञ्छन्दो, जज्जगति.र्भवति क्षिप्रगतिः।
- जज्जला.वकुर्व.न्नसृजतेति हि ब्राह्मणम्।। 17।।
- अतिच्छन्दा-श्छदे.रर्थे।। 18।।
- छन्दांसि च्छन्दयतीति वा।। 19।।
- निचृ-न्निपूर्वस्य चृतेः।। 20।।
- भरणा-द्भुरि.गुच्यते।। 21।।
- अथातो गायत्र.माग्नेयं भक्त्या भवति। देवानाँ वर्षीणाँ वा- परमेष्ठिनो वा- प्राजापत्यस्य साम।
- सावित्री गेयम्। यत्रागीतम् ।
- तत्सवितुर्वरेणियोम्। भार्गो देवस्य धीमाहीऽ२।। धियो यो नः प्रचोऽ1212।। हिम्(स्थि) आऽ२।। दायो।। ओऽ345।।
- ऋषीणाँ विषयज्ञो य-स्स श्शरीरा.द्विमुच्यते।

Sri Satchidananda Avadhoota Datta Peetham • Mysore • SDS

अतीत्य तमस꞉ पारं- स्वर्गे लोके महीयते।।

सहस्रयुग.पर्यन्त- मह.र्ब्राह्म्यँ यदुच्यते।

नाकस्य पृष्ठे तङ्काल- न्दिवि सूर्य इव रोचते।

तत꞉ कृतयुगस्याऽऽदौ- ब्रह्मपूतो महायशाः।

सर्वज्ञो धृतिमा.नृषि꞉- पुन.राजायते स्मरन्निति- स्मरन्निति।।

चतुर्थ꞉ खण्डः

- ❃.,1.4 अथ सावित्र्यङ्गानि व्याख्यास्यामः। शिरो ब्रह्मा- ललाट.न्द्यौ-श्चन्द्राऽऽदित्यौ चक्षुषी- मुख.मग्नि-र्जिह्वा सरस्वती- त्वष्टा ग्रीवा- वसवश्च रुद्राश्च बाहू- उरो वायू- रोमाणि वायव꞉- पृष्ठ.मिन्द्रो- विष्णु.र्नाभि꞉- प्रजापति.र्जघन- मूरू मरुतो- वेदा꞉ पादौ- स्मितँ विद्यु-च्छ्वसितँ वायु- रस्थीनि पर्वता- स्समुद्रो वासांसि- नक्षत्रा.ण्यलङ्कारः।
- य एवँ वेद।
- दुष्टता-दुरुपयुक्ता-न्न्यूनाधिकाच्च सर्वस्मा.त्स्वस्ति।
- स्वस्ति देवऋषिभ्यश्च।
- ब्रह्म सत्यञ्च पातु मामिति- ब्रह्म सत्यञ्च पातु मा.मिति।। (इति देवताऽध्याय पञ्चमं ब्राह्मणं संपूर्णम्।।) ---

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham • Mysore •

# छान्दोग्यमन्त्र प्रकरणम् (ब्राह्मणम्)।।

## छान्दोग्यमन्त्रेषु प्रथम प्रपाठकः।।

### प्रथम खण्डः

- ❃/1.1 अदितेऽनु मन्यस्व।
- अनुमतेऽनु मन्यस्व।
- सरस्वतेऽनु मन्यस्व।
- देव सवित꞉ प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय। दिव्यो गन्धर्व꞉ केतपू꞉ केतन्न꞉ पुनातु वाचस्पति.र्वाचन्न स्स्वदतु।। 1।।

• काम वेद ते नाम- मदो नामासि- समानयामुं सुरा ते अभवत्। पर.मत्र जन्माग्ने तपसो निर्मितोऽसि स्वाहा।। 2।।

• इमन्त उपस्थं मधुना संसृजामि- प्रजापते.र्मुख.मेत.द्वितीयम्। तेन पुंसोऽभि भवासि सर्वा-नवशान् वशि.न्यसि राज्ञी स्वाहा।। 3।।

• अग्नि.ङ्क्रव्याद.मकृण्व.न्गुहाना- स्त्रीणा.मुपस्थ.मृषयः पुराणाः। तेनाऽऽज्य.मकृण्वं.स्त्रैशृङ्ग न्त्वाष्ट्र- न्त्वयि तद्दधातु स्वाहा।। 4।।

• या अकृन्त.न्नवयन् या अतन्वत- याश्च देव्यो अन्ता.नभितो? ततन्थ। तास्त्वा देव्यो जरसा सँव्यय-न्त्वायुष्मतीदं परिधत्स्व वासः।। 5।। (अभितः ततन्थ इत्यत्र, विसर्जनीयस्य उत्वादेशः छान्दसः)

• परिधत्त धत्त वाससैनां शतायुषी.ङ्कृणुत दीर्घ.मायुः। शतञ्च जीव शरद स्सुवर्च- वसूनि चार्ये बिभृजासि जीवन्।। 6।।

• सोमोऽदद.द्गन्धर्वाय गन्धर्वोऽदद.दग्नये। रयिञ्च पुत्रां.श्चादा-दग्नि.र्मह्य.मथो इमाम्।। 7।।

• प्र मे पति र्या नः पन्थाः कल्पताम्। शिवा अरिष्टा पतिलोक.ङ्गमेयम्।। 8।।

• प्रास्याः पति र्या नः पन्थाः कल्पताम्। शिवा अरिष्टा पतिलोक.ङ्गम्याः।। 9।।

• अग्नि.रेतु प्रथमो देवताभ्य- स्सोऽस्यै प्रजां मुञ्चतु मृत्यु.पाशात्। तदयं राजा वरुणोऽनु मन्यताँ - यथेयं स्त्री पौत्र.मघ.न्न रोदा.त्स्वाहा।। 10।।

• इमा.मग्नि.स्त्रायता.ङ्गार्हपत्यः- प्रजा.मस्यै जरदष्टि.ङ्कृणोतु। अशून्योपस्था जीवता.मस्तु माता- पौत्र.मानन्द.मभि विबुध्यता.मियं स्वाहा।। 11।।

• द्यौस्ते पृष्ठं रक्षतु- वायु.रूरू-अश्विनौ च स्तनन्धयां.स्ते पुत्रा.न्त्सविताऽभि रक्षतु। आ वाससः परिधाना.द्बृहस्पति-र्विश्वे देवा अभि रक्षन्तु पश्चा.त्स्वाहा।। 12।।

• मा ते गृहेषु निशि घोष उत्था-दन्यत्र त्वद्रुदत्य स्सँविशन्तु। मा त्वं रुद.त्युर आ वधिष्ठा-जीवपत्नी पतिलोके विराज- पश्यन्ती प्रजां सुमनस्यमानां स्वाहा।। 13।।

• अप्रजस्यं पौत्र.मर्त्यं पाप्मान.मुत वा अघम्। शीर्ष्ण.स्स्रज.मिवोन्मुच्य द्विषद्भ्यः प्रति मुञ्चामि पाशं स्वाहा।। 14।।

- परैतु मृत्यु.रमृतं म आऽगा- द्वैवस्वतो नो अभय.ङ्कृणोतु। परं मृत्यो अनु परेहि पन्थाँ- यत्र नो अन्य इतरो देवयानात्। चक्षुष्मते शृण्वते ते ब्रवीमि- मा नꣳ प्रजां रीरिषो मोत वीरा.न्त्स्वाहा।। 15।।

द्वितीयः खण्डः

- ❋/1.2 इम.मश्मान.मारोहा-ऽश्मेव त्वं स्थिरा भव। द्विषन्त.मप बाधस्व- मा च त्व न्द्विषता.मधः।। 1।।
- इय.न्नार्युपब्रूतेऽग्नौ लाजा.नावपन्ती। दीर्घाऽऽयु.रस्तु मे पति - श्शतँ वर्षाणि जीवतु। एधन्तां ज्ञातयो मम स्वाहा।। 2।।
- अर्यमण.न्नु देव.ङ्कन्या अग्नि.मयक्षत। स इमा.न्देवो अर्यमा- प्रेतो मुञ्चातु माऽमुत.स्स्वाहा।। 3।।
- पूषण.न्नु देव.ङ्कन्या अग्नि.मयक्षत। स इमा न्देवꣳ पूषा- प्रेतो मुञ्चातु माऽमुत.स्स्वाहा।। 4।।
- कन्यला पितृभ्यꣳ पतिलोकँ यतीय.मप दीक्षा.मयष्ट। कन्या उत त्वया वय- न्धारा उदन्या इवाति गाहेमहि द्विषः।। 5।।
- एकमिषे विष्णुस्त्वा नयतु।। 6।।
- द्वे ऊर्जे विष्णुस्त्वा नयतु।। 7।।
- त्रीणि व्रताय विष्णुस्त्वा नयतु।। 8।।
- चत्वारि मायोभवाय विष्णुस्त्वा नयतु।। 9।।
- पञ्च पशुभ्यो विष्णुस्त्वा नयतु।। 10।।
- षड्रायस्पोषाय विष्णुस्त्वा नयतु।। 11।।
- सप्त सप्तभ्यो होत्राभ्यो विष्णुस्त्वा नयतु।। 12।।
- सखा सप्तपदी भव सख्य.न्ते गमेयम्। सख्यन्ते मा योषा- स्सख्यन्ते मा योष्ठ्याः।। 13।।
- सुमङ्गली.रियँ वधू- रिमां समेत पश्यत। सौभाग्य.मस्यै दत्त्वायाथास्तँ विपरेतन।।14।।
- समञ्जन्तु विश्वे देवा- स्समापो हृदयानि नौ। सं मातरिश्वा सन्धाता- समु देष्ट्री दधातु नौ।। 15।।
- गृभ्णामि ते सौभगत्वाय हस्तं- मया पत्या जरदष्टि.र्यथाऽसः। भगो अर्यमा सविता पुरन्धि- र्मह्य.न्त्वाऽदु.र्गार्हपत्याय देवाः।। 16।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore • SGS

- अघोरचक्षु.रपतिघ्न्येधि- शिवा पशुभ्य स्सुमना स्सुवर्चाः। वीरसू.र्जीवसू.र्देवकामा- स्योना शन्नो भव द्विपदे श.ञ्चतुष्पदे।। 17।।
- आ नꣳ प्रजा.ञ्जनयतु प्रजापति- राजरसाय समन.क्त्वर्यमा। अदुर्मङ्गलीꣳ पतिलोक.मा विश- शन्नो भव द्विपदे श.ञ्चतुष्पदे।। 18।।
- इमा.न्त्वमिन्द्र मीढ्व स्सुपुत्रां सुभगा.ङ्कृधि। दशास्यां पुत्रा.नाधेहि- पति.मेकादश.ङ्कुरु।। 19।।
- सम्राज्ञी श्वशुरे भव- सम्राज्ञी श्वश्र्वां भव। ननान्दरि सम्राज्ञी भव- सम्राज्ञी अधि देवृषु।। 20।।
- मम व्रते ते हृदय.न्दधातु- मम चित्त.मनु चित्त.न्ते अस्तु। मम वाच.मेकमना जुषस्व- बृहस्पति.स्त्वा नियुनक्तु मह्यम्।।21।।

तृतीयः खण्डः

- ❃/1.3 लेखासन्धिषु पक्ष्म-स्वावर्तेषु च यानि ते। तानि ते पूर्णाऽऽहुत्या- सर्वाणि शमया.म्यहम्।। 1।।
- केशेषु यच्च पापक-मीक्षिते रुदिते च यत्। तानि ते पूर्णाऽऽहुत्या- सर्वाणि शमया.म्यहम्।। 2।।
- शीलेषु यच्च पापकं- भाषिते हसिते च यत्। तानि ते पूर्णाऽऽहुत्या- सर्वाणि शमया.म्यहम्।। 3।।
- आरोकेषु च दन्तेषु हस्तयोꣳ पादयोश्च यत्। तानि ते पूर्णाऽऽहुत्या- सर्वाणि शमया.म्यहम्।। 4।।
- ऊर्वो.रुपस्थे जङ्घयो - स्सन्धानेषु च यानि ते। तानि ते पूर्णाऽऽहुत्या- सर्वाणि शमया.म्यहम्।। 5।।
- यानि कानि च घोराणि- सर्वाङ्गेषु तवाभवन्। पूर्णाऽऽहुतिभि.राज्यस्य- सर्वाणि तान्यशीशमं स्वाहा।। 6।।
- ध्रुवा द्यौ.र्ध्रुवा पृथिवी- ध्रुवँ विश्व.मिद.ञ्जगत्। ध्रुवासꣳ पर्वता इमे- ध्रुवा स्त्री पतिकुले इयम्।। 7।।
- अन्नपाशेन मणिना- प्राणसूत्रेण पृश्निना। बध्नामि सत्यग्रन्थिना- मनश्च हृदयञ्च ते।। 8।।
- यदेत.द्धृदय न्तव- तदस्तु हृदयं मम। यदिदं हृदयं मम- तदस्तु हृदय.न्तव।। 9।।

- अन्नं प्राणस्य पड्विंश-स्तेन बध्नामि त्वाऽसौ।। 10।।
- सुकिंशुकं शल्मलिँ विश्वरूपं- सुवर्णवर्णं सुकृतं सुचक्रम्। आ रोह सूर्ये अमृतस्य नाभिं-स्योनं पत्ये वहतु.ङ्कृणुष्व।। 11।।
- मा विद.न्परिपन्थिनो- य आसीदन्ति दम्पती। सुगेभि.र्दुर्ग.मतीता- मप द्रान्त्वरातयः।। 12।।
- इह गाव꣫ प्रजायध्व-मिहाश्वा इह पूरुषाः। इहो सहस्रदक्षिणो-ऽपि पूषा निषीदतु।। 13।।
- इह धृति-रिह स्वधृति-रिह रन्ति-रिह रमस्व। मयि धृति-र्मयि स्वधृति-र्मयि रमो- मयि रमस्व।। 14।।

## चतुर्थः खण्डः

- ❃/1.4 अग्ने प्रायश्चित्ते- त्वन्देवानां प्रायश्चित्ति.रसि। ब्राह्मण.स्त्वा नाथकाम उप धावामि-याऽस्या꣫ पापी लक्ष्मी-स्तामस्या अप जहि।। 1।।
- वायो प्रायश्चित्ते त्व.न्देवानां प्रायश्चित्ति.रसि। ब्राह्मणस्त्वा नाथकाम उप धावामि-याऽस्या꣫ पतिघ्नी तनू-स्तामस्या अप जहि।। 2।।
- चन्द्र प्रायश्चित्ते त्व.न्देवानां प्रायश्चित्ति.रसि। ब्राह्मणस्त्वा नाथकाम उप धावामि- याऽस्या अपुत्र्या तनू-स्तामस्या अप जहि।। 3।।
- सूर्य प्रायश्चित्ते त्व.न्देवानां प्रायश्चित्ति.रसि। ब्राह्मणस्त्वा नाथकाम उप धावामि- याऽस्या अपशव्या तनू-स्तामस्या अप जहि।। 4।।
- अग्नि.वायु.चन्द्र.सूर्या꣫ प्रायश्चित्तयो- यूय.न्देवानां प्रायश्चित्तय.स्स्थ। ब्राह्मणो वो नाथकाम उप धावामि- याऽस्या꣫ पापी लक्ष्मी-र्या पतिघ्नी- याऽपुत्र्या- याऽपशव्या तनू-स्तामस्या अप हत।। 5 ।।
- विष्णु.र्योनि.ङ्कल्पयतु- त्वष्टा रूपाणि पिंशतु। आ सिञ्चतु प्रजापति-र्धाता गर्भ.न्दधातु ते।। 6।।
- गर्भ.न्धेहि सिनीवाली- गर्भ.न्धेहि सरस्वति। गर्भ.न्ते अश्विनौ देवा-वा धत्तां पुष्कर.स्रजौ।। 7।।
- पुमांसौ मित्रावरुणौ- पुमांसा.वश्विना.वुभौ। पुमा.नग्निश्च वायुश्च- पुमा.न्गर्भ.स्तवोदरे।। 8।।

Sri Ganapathy Sachchidananda Avadhoota Datta Peetham • Mysore •

• पुमा.नग्निः॰ पुमा.निन्द्रः॰- पुमा.न्देवो बृहस्पतिः। पुमांसं पुत्रँ विन्दस्व- तं पुमा.ननु जायताम्।। 9।।

**पञ्चमः खण्डः**

• ❀/1.5 अय.मूर्जावतो वृक्ष- ऊर्जीव फलिनी भव। पर्णँ वनस्पते नुत्त्वा- नुत्त्वा सूयतां रयिः।। 1।।

• येनादिते.स्सीमान. न्नयति- प्रजापति.र्महते सौभगाय। तेनाह.मस्यै सीमान न्नयामि- प्रजा.मस्यै जरदष्टि.ङ्कृणोमि।। 2।।

• राका.महं सुहवां सुष्टुती हुवे- शृणोतु न सुभगा बोधतु त्मना। सीव्य.त्वप स्सूच्याऽच्छिद्यमानया- ददातु वीरं शतदायु.मुख्यम्।। 3।।

• यास्ते राके सुमतय स्सुपेशसो- याभि.र्ददासि दाशुषे वसूनि। ताभिर्नो अद्य सुमना उपाऽऽगहि- सहस्रपोषं सुभगे रराणा।। 4।।

• किं पश्यसि प्रजां पशू.न्त्सौभाग्यं- मह्य न्दीर्घायुष्ट्वं पत्युः।। 5।।

• या तिरश्ची निपद्यते- अहँ विधरणी इति। तान्त्वा घृतस्य धारया- यजे संराधनी.महम्। संराधन्यै देव्यै देष्ट्र्यै स्वाहा।। 6।।

• विपश्चि.त्पुच्छ.मभर-त्तद्धाता पुन.राऽहरत्। परेहि त्वँ विपश्चि-त्पुमा.नयं जनिष्यतेऽसौ नाम।। 7।।

• इय.माज्ञेद.मन्न-मिद.मायु.रिद.ममृतम्।। 8।।

• मेधान्ते मित्रावरुणौ- मेधा.मग्नि.र्ददातु ते। मेधान्ते अश्विनौ देवा-वा धत्तां पुष्कर.स्रजौ।। 9।।

• यत्ते सुसीमे हृदयं- हित.मन्तः॰ प्रजापतौ। वेदाहं मन्ये तद्ब्रह्म- माऽहं पौत्र.मघं निगाम्।। 10।।

• यत्पृथिव्या अनामृत- न्दिवि चन्द्रमसि श्रितम्। वेदामृतस्याह.न्नाम- माऽहं पौत्र.मघं रिषम्।। 11।।

• इन्द्राग्नी शर्म यच्छतं- प्रजायै मे प्रजापती। यथाऽय.न्न प्रमीयेत- पुत्रो जनित्र्या अधि।। 12।।

• यदद.श्चन्द्रमसि कृष्णं- पृथिव्या हृदयं श्रितम्। तदहँ विद्वां.स्तत्पश्य-न्माऽहं पौत्र.मघं रुदम्।। 13।।

- कोऽसि कतमोऽ-स्येषोऽस्यमृतोऽसि। आहस्पत्यं मासं प्रविशासौ।। 14।।
- स त्वाऽह्वे परि.ददा-त्वह.स्त्वा रात्र्यै परि ददातु, रात्रि.स्त्वाऽहोरात्राभ्यां परि ददा,त्वहोरात्रौ त्वाऽर्धमासेभ्यः परि दत्ता,मर्धमासा.स्त्वा मासेभ्यः परि ददतु, मासा.स्त्वर्तुभ्यः परि दद,-त्वृतव.स्त्वा सँवत्सराय परि ददतु, सँवत्सर.स्त्वाऽऽयुषे जरायै परि ददा.त्वसौ।। 15।।
- अङ्गा.दङ्गा.त्सम्भवसि- हृदया.दधि जायसे। प्राणन्ते प्राणेन सन्दधामि-जीव मे याव.दायुषम्।। 16।।
- अङ्गा.दङ्गा.त्संस्रवसि- हृदया.दधि जायसे। वेदो वै पुत्र.नामाऽसि- स जीव शरद.श्शतम्।। 17।।
- अश्मा भव परशु.र्भव- हिरण्य.मस्तृतं भव। आत्माऽसि पुत्र मा मृथा- स्स जीव शरद.श्शतम्।। 18।।
- पशूनान्त्वा हिङ्कारेणाभि जिघ्रा.म्यसौ।। 19।।

**षष्ठः खण्डः**

- ❀/1.6 आऽय.मगा.त्सविता क्षुरेण।। 1।।
- उष्णेन वाय उदकेनैधि।। 2।।
- आप उन्दन्तु जीवसे।। 3।।
- विष्णो.र्दंष्ट्रोऽसि।। 4।।
- ओषधे त्रायस्वैनम्।। 5।।
- स्वधिते मैनं हिंसीः।। 6।।
- येन पूषा बृहस्पते.र्वायो.रिन्द्रस्य चावपत्। तेन ते वपामि ब्रह्मणा- जीवातवे जीवनाय दीर्घायुष्ट्वाय वर्चसे।। 7।।
- त्र्यायुष.ञ्जमदग्नेः- कश्यपस्य त्र्यायुष.मगस्त्यस्य त्र्यायुषम्। यद्देवाना.न्त्र्यायुष- न्तत्ते अस्तु त्र्यायुषम्।। 8।।
- अग्ने व्रतपते व्रत.ञ्चरिष्यामि- तत्ते प्रब्रवीमि तच्छकेयम्। तेनर्ध्यास-मिद.मह.मनृता.त्सत्य. मुपैमि स्वाहा।। 9।।
- वायो व्रतपते व्रत.ञ्चरिष्यामि- तत्ते प्रब्रवीमि तच्छकेयम्। तेनर्ध्यास-मिद.मह.मनृता.त्सत्य. मुपैमि स्वाहा।। 10।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

- सूर्य व्रतपते व्रत.ञ्चरिष्यामि- तत्ते प्रब्रवीमि तच्छकेयम्। तेनर्ध्यास-मिद.मह.मनृता.त्सत्य. मुपैमि स्वाहा।। 11।।
- चन्द्र व्रतपते व्रत.ञ्चरिष्यामि- तत्ते प्रब्रवीमि तच्छकेयम्। तेनर्ध्यास-मिद.मह.मनृता.त्सत्य. मुपैमि स्वाहा।। 12।।
- व्रतानाँ व्रतपते व्रत.ञ्चरिष्यामि- तत्ते प्रब्रवीमि तच्छकेयम्। तेनर्ध्यास-मिद.मह.मनृता.त्सत्य. मुपैमि स्वाहा।। 13।।
- आगन्त्रा समगन्महि प्र सुमर्त्यँ युयोतन। अरिष्टा स्सञ्चरेमहि- स्वस्ति चरता.दयम्।। 14।।
- अग्निष्टे हस्त.मग्रही-त्सविता हस्त.मग्रही-दर्यमा हस्त.मग्रही-न्मित्र.स्त्वमसि कर्मणा-ऽग्नि.राचार्य.स्तव।। 15।।
- ब्रह्मचर्य.माऽगा-मुप मा नयस्व।। 16।।
- को नामाऽसि।। 17।।
- असौ नामाऽस्मि।। 18।।
- देवस्य ते सवितुः प्रसवे-ऽश्विनो.र्बाहुभ्यां- पूष्णो हस्ताभ्यां- हस्त.ङ्गृह्णा.म्यसौ।। 19।।
- सूर्यस्याऽऽवृत.मन्वावर्तस्वाऽसौ।। 20।।
- प्राणाना.ङ्ग्रन्थि.रसि मा विस्रसः। अन्तक इदन्ते परि ददा.म्यमुम्।। 21।।
- अहुर इदन्ते परि ददा.म्यमुम्।। 22।।
- कृशन इदन्ते परि ददा.म्यमुम्।। 23।।
- प्रजापतये त्वा परि ददा.म्यसौ।। 24।।
- देवाय त्वा सवित्रे परि ददा.म्यसौ।। 25।।
- ब्रह्मचार्य.स्यसौ।। 26।।
- समिध.माधे-ह्यपोऽशान- कर्म कुरु- मा दिवा स्वाप्सीः।। 27।।
- इय.न्दुरुक्ता.त्परिबाधमाना- वर्णं पवित्रं पुनती न आगात्। प्राणापानाभ्यां बल.माहरन्ती-स्वसा देवी सुभगा मेखलेयम्।। 28।।
- ऋतस्य गोप्त्री तपसः परस्वी- घ्नती रक्ष.स्सहमाना अरातीः। सा मा समन्त.मभि पर्येहि भद्रे- धर्तारस्ते मेखले मा रिषाम।। 29।।
- त.त्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्।। 30।।

- भूर्भुव.स्स्वरोम्।। 31।।
- सुश्रव स्सुश्रवसं मा कुरु- यथा त्वं सुश्रव स्सुश्रवाः। देवेष्वेव.महं सुश्रव- स्सुश्रवा ब्राह्मणेषु भूयासम्।। 32।।
- अग्नये समिध.माऽहार्षं- बृहते जातवेदसे। यथा त्वमग्ने समिधा समिध्यस- एव.मह.मायुषा वर्चसा- सन्या मेधया प्रजया पशुभि-र्ब्रह्मवर्चसेन धनेनान्नाद्येन समेधिषीय स्वाहा।। 33।।
- पुन.र्मामै.त्विन्द्रियं- पुन.रायु꠳ पुन.र्भगः। पुन.र्द्रविण.मैतु मा- पुन.र्ब्राह्मण.मैतु मा।। 34।।
- पुन.र्मन꠳ पुन.रात्मा म आगा-त्पुन.श्चक्षु꠳ पुन.श्श्रोत्रं म आगात्। पुन꠳ प्राण꠳ पुन.राधीतं म अगात्। वैश्वानरो अदब्ध.स्तनूपा- अन्त.स्तिष्ठतु मे मनो-ऽमृतस्य केतु.स्स्वाहा।। 35।।

## सप्तमः खण्डः

- ❀/1.7 ये अप्स्वन्त.रग्नय꠳ प्रविष्टा- गोह्य उपगोह्यो मरूको मनोहाः। खलो विरुज. स्तनूदूषि.रिन्द्रियहा- अति ता.न्त्सृजामि।। 1।। (दुष्टाग्नयः अष्टौ)
- यद्पा.ङ्घोरँ- यद्पा.ङ्क्रूरँ- यद्पा.मशान्त-मति तत्सृजामि।। 2।।
- यो रोचन-स्त.मिह गृह्णामि, तेनाहं मामभि.षिञ्चामि।। 3।।
- यशसे तेजसे ब्रह्मवर्चसाय बलायेन्द्रियाय वीर्यायान्नाद्याय राय.स्पोषाय त्विष्या अपचित्यै।। 4।।
- येन स्त्रिय.मकृणुतँ- येनापामृशतं सुराम्। येनाक्षा.नभ्यषिञ्चतँ- येनेमां पृथिवीं महीम्। यद्वा.न्तदश्विना यश-स्तेन मामभि.षिञ्चतम्।। 5।। (अप-अमृशतम्)
- उद्य.न्भ्राजभृष्टिभि.रिन्द्रो मरुद्भि.रस्था-त्प्रातर्यावभि.रस्थात्। दशसनि.रसि- दशसनिं मा कु-र्वा त्वा विशा-म्या मा विश।। 6।।
- उद्य.न्भ्राजभृष्टिभि.रिन्द्रो मरुद्भि.रस्था-त्सान्तपनेभि.रस्थात्। शतसनि.रसि- शतसनिं मा कु-र्वा त्वा विशा-म्या मा विश।। 7।।
- उद्य.न्भ्रजभृष्टिभि.रिन्द्रो मरुद्भि.रस्था-त्सायँयावभि.रस्थात्। सहस्रसनि.रसि सहस्रसनिं मा कु-र्वा त्वा विशा-म्या मा विश।। 8।।
- चक्षु.रसि चक्षुष्ट्व.म-स्यव मे पाप्मान.ञ्जहि। सोम.स्त्वा राजाऽवतु- नमस्तेऽस्तु मा मा हिंसीः।। 9।।

- उदुत्तमँ वरुण पाश.मस्म-दवाधमँ वि मध्यमं श्रथाय। अथाऽऽदित्य व्रते वय-न्तवानागसो अदितये स्याम।। 10।।
- श्री.रसि मयि रमस्व।। 11।।
- नेत्र्यौ स्थो- नयतं माम्।। 12।।
- गन्धर्वोऽस्युपाव- उप मा.मव।। 13।।
- यक्ष.मिव चक्षुषꣳ प्रियो वो भूयासम्।। 14।।
- ओष्ठापिधाना नकुली दन्त.परिमितꣳ पविः। जिह्वे मा विह्वलो वाच-ञ्चारु माऽद्येह वादय।। 15।।
- वनस्पते वीड्वङ्गो हि भूया अस्मत्सखा प्रतरण स्सुवीरः। गोभि स्सन्नद्धो असि वीडयस्वा-ऽऽस्थाता ते जयतु जेत्वानि।। 16।।

अष्टमः खण्डः

- ❀/1.8 इमा मे विश्वतो.वीर्यो- भव इन्द्रश्च रक्षतम्। पूषंस्त्वं पर्यावर्तया-ऽनष्टा आयन्तु नो गृहान्।। 1।।
- इमा मधुमती.र्मह्य-मनष्टाꣳ पयसा सह। गाव आज्यस्य मातर- इहेमा स्सन्तु भूयसीः।। 2।।
- गवां श्लेष्माऽसि- गावो मयि श्लिष्यन्तु।। 3।।
- सङ्ग्रहण सङ्गृहाण- ये जाताꣳ पशवो मम। पूषैषां शर्म यच्छतु-यथा जीवन्तो अप्ययात्।। 4।।
- भुवन.मसि साहस्र-मिन्द्राय त्वा सृमोऽददा-दक्षत.मरिष्ट.मिलान्दम्। गोपोषण.मसि-गोपोषस्येशिषे- गोपोषाय त्वा, सहस्रपोषण.मसि- सहस्रपोषस्येशिषे- सहस्रपोषाय त्वा।। 5।।
- लोहितेन स्वधितिना मिथुन.ङ्कर्णयोꣳ कृतम्। यावतीनाँ यावतीनाँ व- ऐषमो लक्षण.मकारिषम्। भूयसीनां भूयसीनाँ व- उत्तरा.मुत्तरां समा.ङ्क्रियासम्।। 6।।
- इय न्तन्ती गवां माता- सवत्साना.न्निवेशनी। सा नꣳ पयस्वती दुहा- उत्तरा.मुत्तरां समाम्।। 7।। --

## छान्दोग्य मन्त्रेषु द्वितीयः प्रपाठकः।।

### प्रथमः खण्डः

- ❃/2.1 यꣳ प्राच्या.न्दिशि सर्पराज- एष ते बलिः।। 1।।
- यो दक्षिणस्या.न्दिशि सर्पराज- एष ते बलिः।। 2।।
- यꣳ प्रतीच्या.न्दिशि सर्पराज- एष ते बलिः।। 3।।
- य उदीच्या.न्दिशि सर्पराज- एष ते बलिः।। 4।।
- नमꣳ पृथिव्यै दंष्ट्राय- विश्वभृ.न्मा ते अन्ते रिषाम। संहतं मा वि वधी-र्विहतं माऽभि सँ वधीः।। 5।।
- सोमो राजा सोमस्तम्बो राजा- सोमोऽस्माकं राजा- सोमस्य वयं स्मः। अहिजम्भन.मसि सोमस्तम्बं- सोमस्तम्ब.महिजम्भन.मसि।। 6।।
- यां सन्धां समधत्त- यूयं सप्तऋषिभि स्सह। तां सर्पा माऽत्यक्रामिष्ट- नमो वो अस्तु मा नो हिंसिष्ट।। 7।।
- मा न.स्तोके तनये मा न आयौ- मा नो गोषु मा नो अश्वेषु रीरिषः। वीरा.न्मा नो रुद्र भामितो वधी-र्हविष्मन्त स्सद.मित्त्वा हवामहे।। 8।।
- शताऽऽयुधाय शतवीर्याय- शतोतयेऽभिमातिषाहे। शतँ यो न श्शरदो अजीजा- दिन्द्रो नेष.दति दुरितानि विश्वा स्वाहा।। 9।।
- ये चत्वारꣳ पथयो देवयाना- अन्तरा द्यावापृथिवी वियन्ति। तेषाँ यो अज्यानि.मजीजि.मावहा- स्तस्मै नो देवाꣳ परिदत्तेह सर्वे स्वाहा।। 10।।
- ग्रीष्मो हेमन्त उत नो वसन्त- श्शरद्वर्षा स्सुवित.न्नो अस्तु। तेषा.मृतूनां शतशारदाना- न्निवात एषा.मभये स्याम।। 11।।
- इद्वत्सराय परिवत्सराय- सँवत्सराय कृणुता बृह.न्नमः। तेषाँ वयं सुमतौ यज्ञियाना- ञ्ज्यो.गजीता अहता स्स्याम।। 12।।
- भद्रा.न्न श्श्रेय स्समनैष्ट देवा- स्त्वयाऽवसेन समशीमहि त्वा। स नो मयो भूꣳ पितेवाऽऽ विशस्व- श.न्तोकाय तन्वै स्योन स्स्वाहा।। 13।।
- अमोऽसि प्राण तदृतं ब्रवी-म्यमा ह्यसि सर्व.मनुप्रविष्टः। स मे जरां रोग.मपमृज्य शरीरा- दपाम एधि मा मृथा न इन्द्र।। 14।।
- अग्निꣳ प्राश्नातु प्रथम-स्स हि वेद यथा हविः। शिवा अस्मभ्य.मोषधीꣳ- कृणोतु विश्वचर्षणि स्स्वाहा।। 15।।

• एत.मुत्यं मधुना सँयुतँ यवं- सरस्वत्या अधिवना.वचर्कृधि। इन्द्र आसी.त्सीरपति श्शतक्रतुः- कीनाशा आस.न्मरुत स्सुदानव स्स्वाहा।। 16।।

## द्वितीयः खण्डः

• ❀/2.2 प्रथमा ह व्युवास- सा धेनु.रभव.द्यमे। सा नः पयस्वती दुहा- उत्तरा.मुत्तरां समाम्।। 1।।

• प्रति क्षत्रे प्रति तिष्ठामि राष्ट्रे- प्रत्यश्वेषु प्रति तिष्ठामि गोषु। प्रति प्राणे प्रति तिष्ठामि पुष्टौ- प्रत्यङ्गेषु प्रति तिष्ठा.म्यात्मनि।। 2।।

• प्रति द्यावापृथिव्योः- प्रति तिष्ठामि यज्ञे।। 3।।

• स्योना पृथिवि नो- भवानृक्षरा निवेशनी। यच्छा न श्शर्म सप्रथो- दैवा.न्मा भया.दिति।। 4।।

• यत्पशवः प्रध्यायत- मनसा हृदयेन च। वाचा सहस्रपाशया- मयि बध्नामि वो मनः।। 5।।

• अनु त्वा माता मन्यता-मनु पिता-ऽनु भ्राताऽनु सगर्भ्यो-ऽनु सखा सयूथ्यः।। 6।।

• आत्त.न्देवेभ्यो हविः।। 7।।

• यत्पशु.र्मायु.मकृतोरो वा पद्भि.राहत। अग्निर्मा तस्मा.देनसो- विश्वा.न्मुञ्च.त्वंहसः।। 8।।

• अग्ना.वग्नि.श्चरति प्रविष्ट- ऋषीणां पुत्रो अधिराज एषः। स न.स्स्योन स्सुयजा यजा च- यथा देवाना.ञ्जनिमानि वेद।। 9।।

• औलूखला.स्सं प्रवदन्ति ग्रावाणो- हवि.ष्कृण्वन्तः परिवत्सरीणाम्। एकाष्टके सुप्रजस.स्सुवीरा ज्यो.ग्जीवेम बलिहृतो वय.न्ते।। 10।।

• इडाया.स्पद.ङ्घृतव.त्सरीसृप-ञ्जातवेदः प्रति हव्या गृभाय। ये ग्राम्याः पशवो विश्वरूपा- स्तेषां सप्तानां मयि रन्ति.रस्तु स्वाहा।। 11।।

• एषैव सा या पूर्वा व्यौच्छ-त्सेय.मप्स्वन्त.श्चरति प्रविष्टा। वसू.र्जिगाय प्रथमा जनित्री- विश्वे ह्यस्यां महिमानो अन्तः।। 12।।

• एषैव सा या प्रथमा व्यौच्छ-त्सा धेनु.रभव.द्विश्वरूपा। सँवत्सरस्य या पत्नी- सा नो अस्तु सुमङ्गली।। 13।।

• या.न्देवाः प्रतिपश्यन्ति- रात्री.न्धेनु.मिवाऽऽयतीम्। सा नः पयस्वती दुहा- उत्तरा.मुत्तरां समाम्।। 14।।

- सँवत्सरस्य प्रतिमाँ या.न्त्वा रात्रि यजामहे। प्रजा.मजर्यान्नꣳ कुरु- राय.स्पोषेण संसृज।। 15।।
- अन्विम.न्नो अनुमति-र्यज्ञ.न्देवेषु मन्यताम्। अग्निश्च हव्यवाहन- स्स नो दा.द्दाशुषे मयः।। 16।।

तृतीयः खण्डः

- ❃/2.3 स्वाहा सोमाय पितृमते।। 1।।
- स्वाहाऽग्नये कव्यवाहनाय।। 2।।
- अपहता असुरा रक्षांसि वेदिषदः।। 3।।
- ये रूपाणि प्रतिमुञ्चमाना- असुरा स्सन्त स्स्वधया चरन्ति। परा पुरो नि पुरो ये भर-न्त्यग्निष्टा.न्लोका.त्प्रणुद.त्वस्मात्।। 4।।
- एत पितर स्सोम्यासो- गम्भीरेभिꣳ पथिभिꣳ पूर्विणेभिः। दत्तास्मभ्य.न्द्रविणेह भद्रं- रयिञ्च न स्सर्ववीर न्नियच्छत।। 5।।
- अत्र पितरो मादयध्वँ- यथाभाग.मावृषायध्वम्।। 6।।
- अमीमदन्त पितरो- यथाभाग.मावृषायिषत।। 7।।
- नमो वꣳ पितरो जीवाय- नमो वꣳ पितर श्शूषाय।। 8।।
- नमो वꣳ पितरो घोराय- नमो वꣳ पितरो रसाय।। 9।।
- नमो वꣳ पितर स्स्वधायै- नमो वꣳ पितरो मन्यवे।। 10।।
- नमो व पितरꣳ- पितरो नमो वः।। 11।।
- गृहान्नꣳ पितरो दत्त।। 12।।
- सदो वꣳ पितरो देष्म।। 13।।
- एतद्वꣳ पितरो वासः।। 14।।
- ऊर्जँ वहन्ती.रमृत.ङ्घृतं- पयꣳ कीलालं परिस्रुतम्। स्वधा स्थ तर्पयत मे पितॄन्।। 15।।
- आधत्त पितरो गर्भं- ङ्कुमारं पुष्कर.स्रजम्। यथेह पुरुष.स्स्यात्।। 16।।
- अभून्नो दूतो हविषो जातवेदा- अवा.ड्ढव्यानि सुरभीणि कृत्वा। प्रादा.त्पितृभ्य स्स्वधया ते अक्ष-न्प्रजान.न्नग्ने पुन.रेहि योनिम्।। 17।।
- वह वपा.ञ्जातवेदꣳ पितृभ्यो- यत्रैतान् वेत्थ निहिता.न्पराचः। मेदसꣳ कुल्या अभि ता.न्त्स्रवन्तु- सत्या एषा.माशिष स्सन्तु कामा.त्स्वाहा।। 18।।

- जातवेदो वपया गच्छ देवां-स्त्वं हि होता प्रथमो बभूव। सत्या वपा प्रगृहीता मे अस्तु- समृध्यतां मे यदिद.ङ्करोमि।। 19।।
- यत्कुसीद.मप्रदत्तं मयेह- येन यमस्य निधिना चराणि। इद.न्तदग्ने अनृणो भवामि- जीव.न्नेव प्रति तत्ते ददामि।। 20।।
- एकाष्टका तपसा तप्यमाना- जजान गर्भं महिमान.मिन्द्रम्। तेन देवा असहन्त शत्रू- न्हन्ताऽसुराणा.मभव.च्छचीभिः।। 21।।

चतुर्थः खण्डः

- ❃/2.4 इदं भूमे.र्भजामह- इदं भद्रं सुमङ्गलम्। परा सपत्ना.न्बाधस्वा-ऽन्येषाँ विन्दते व- स्वन्येषाँ विन्दते धनम्।। 1।।
- इमं स्तोम.मर्हते जातवेदसे- रथ.मिव सं महेमा मनीषया। भद्रा हि नᳲ प्रमति.रस्य- संसद्यग्ने सख्ये मा रिषामा वय.न्तव।। 2।।
- भरामेध्म.ङ्कृणवामा हवींषि ते- चितयन्तᳲ पर्वणा.पर्वणा वयम्। जीवातवे प्रतरां साधया धियो-ऽग्ने सख्ये मा रिषामा वय.न्तव।। 3।।
- शकेम त्वा समिधं साधया धिय-स्त्वे देवा हवि.रद.न्त्याहुतम्। त्व.मादित्याᳲ आवह तान् ह्युश्म-स्यग्ने सख्ये मा रिषामा वय.न्तव।। 4।।
- पवित्रे स्थो वैष्णव्यौ।
- विष्णो.र्मनसा पूते स्थः।
- देवस्त्वा सवितोत्पुना-त्वच्छिद्रेण पवित्रेण वसो-स्सूर्यस्य रश्मिभिः।
- तपश्च तेजश्च श्रद्धा च ह्रीश्च सत्य.ञ्चाक्रोधश्च त्यागश्च धृतिश्च धर्मश्च सत्त्वञ्च वाक्च मन.श्चाऽऽत्मा च ब्रह्म च- तानि प्रपद्ये- तानि मा.मवन्तु, भूर्भुव.स्स्वरो 3म्- महान्त.मात्मानं प्रपद्ये।। 5।।
- विरूपाक्षोऽसि- दन्ताञ्जि,स्तस्य ते शय्या- पर्णे गृहा- अन्तरिक्षे विमितं हिरण्मयम्।

तद्देवानां हृदया.न्ययस्मये- कुम्भेऽन्त स्सन्निहितानि।

तानि बलभृच्च बलसाच्च रक्षतोऽप्रमणी अनिमिषत स्सत्यम्।

यत्ते द्वादश पुत्रा-स्ते त्वा सँवत्सरे सँवत्सरे कामप्रेण यज्ञेन याजयित्वा- पुन.र्ब्रह्मचर्य. मुपयन्ति।

त्व.न्देवेषु ब्राह्मणोऽ-स्यहं मनुष्येषु।

ब्राह्मणो वै ब्राह्मण.मुपधाव-त्युप त्वा धावामि।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham • Mysore •

जपन्तं मा मा प्रति जापी-र्जुह्वन्तं मा मा प्रति हौषी४- कुर्वन्तं मा मा प्रति कार्षीः।

त्वां प्रपद्ये।

त्वया प्रसूत इद.ङ्कर्म करिष्यामि।

तन्मे राध्यता- न्तन्मे समृध्यता-न्तन्म उप पद्यताम्।

समुद्रो मा विश्वव्यचा- ब्रह्माऽनु जानातु, तुथो मा विश्ववेदा- ब्रह्मण४ पुत्रोऽनु जानातु, श्वात्रो मा प्रचेता- मैत्रावरुणोऽनु जानातु।

तस्मै विरूपाक्षाय दन्ताञ्जये- समुद्राय विश्वव्यचसे- तुथाय विश्ववेदसे- श्वात्राय प्रचेतसे- सहस्राक्षाय- ब्रह्मण४ पुत्राय नमः।। 6।।

- अकुं रिहाणा व्यन्तु वयः।
- य४ पशूना.मधिपती रुद्र.स्तन्तिचरो वृषा। पशू.नस्माकं मा हिंसी- रेत.दस्तु हुत.न्तव स्वाहा।।
- सहस्रबाहु.र्गौपत्य- स्स पशू.नभि रक्षतु। मयि पुष्टिं पुष्टिपति.र्दधातु- मयि प्रजां प्रजापति स्स्वाहा।। 7।।
- कौतोमतं सँवननं- सुभाग.ङ्करणं मम। नाकुली नाम ते माताऽथाहं पुरुषानयः। यन्नौ कामस्य विच्छिन्न- न्तन्नौ सन्धेह्योषधे।। 8।।
- वृक्ष इव पक्व.स्तिष्ठति- सर्वा.न्कामा.न्भुव.स्पते। यस्त्वैवँ वेद तस्मै मे- भोगा.न्धुक्ष्वा ऽक्षता.न्बृहन्।। 9।।
- ऋतं सत्ये प्रतिष्ठितं- भूतं भविष्यता सह। आकाश उप नि रज्जतु- मह्य.मन्न.मथो श्रियम्।। 10।।
- अभिभागोऽसि सर्वस्मिं-स्तदु सर्व.न्त्वयि श्रितम्। तेन सर्वेण सर्वो मा- विवासन वि वासय।। 11।।
- कोश इव पूर्णो वसुना- त्वं प्रीतो ददसे धनम्। अदृष्टो दृष्ट.मा भर- सर्वा.न्कामा.न्प्र यच्छ मे।। 12।।
- आकाशस्यैष आकाशो यदेत.द्भाति मण्डलम्। एवन्त्वा वेद यो वे-देशानेशा.न्प्र यच्छ मे।। 13।। (वेद, ईशान, ईशान्)

Sachchidananda Avadhoota Datta Peetham • Mysore •

• भूर्भुव.स्स्वरो 3म्। सूर्य इव दृशे भूयास-मग्नि.रिव तेजसा- वायु.रिव प्राणेन- सोम इव गन्धेन- बृहस्पति.रिव बुद्ध्या-ऽश्विना.विव रूपे-णेन्द्राग्नी इव बलेन- ब्रह्मभाग एवाहं भूयासं-पाप्मभागा मे द्विषन्तः।। 14।।

पञ्चमः खण्डः

• ❀/2.5 मूर्ध्नोऽधि मे वैश्रवणा- न्छिरसोऽनुप्रवेशिनः। ललाटा.द्धस्वरा.न्घोरान्- विघनान् वि बृहामि व.स्स्वाहा।। 1।। (घस्वरान्- घस्मरान्। वकारान्तता छान्दसत्वात्। घसॢ आदेशः)

• ग्रीवाभ्यो मे स्कन्धाभ्यां मे- नस्तो मेऽनुप्रवेशिनः। मुखान्मे बद्वदा-न्घोरान् विघनान् विबृहामि व.स्स्वाहा।। 2।।

• बाहुभ्यां मे यतो यत४- पार्श्वयो.रुत्तु ता.नधि। उरस्तो बद्वदा.न्घोरान्- विघनान् विबृहामि व.स्स्वाहा।। 3।।

• वङ्क्षाभ्यां मे लोहितादान्- योनिहा.न्पज्रिहा.नधि। ऊरुभ्यो निश्लिषो घोरान्- विघनान् विबृहामि व.स्स्वाहा।। 4।।

• जङ्घाभ्यां मे यतो यत४- पार्ष्ण्यो.रुत्तु तानधि। पादयो.र्विकिरा.न्घोरान्- विघनान् विबृहामि व.स्स्वाहा।। 5।।

• परिबाधं यजामहे-ऽणुजङ्घं शबलोदरम्। यो नोऽयं परिबाधते- दानाय भगाय च स्वाहा।। 6।।

• अपेहि त्वं परिबाध- मा विबाध विबाधथाः। सुगं पन्थानं मे कुरु- येन मा धन.मेष्यति स्वाहा।। 7।।

• प्रजापते न त्व.देता.न्यन्यो- विश्वा जातानि परि ता बभूव। यत्कामास्ते जुहुम.स्तन्नो अस्तु- वयं स्याम पतयो रयीणां स्वाहा।। 8।।

• यशोऽहं भवामि ब्राह्मणानां- यशो राज्ञाँ यशो विशाम्। यश स्सत्यस्य भवामि- भवामि यशसाँ यशः।। 9।।

• पुनर्मा यन्तु देवता- या म.दपचक्रमुः। महस्वन्तो महान्तो भवा-म्यस्मि.न्पात्रे हरिते सोमपृष्ठे।। 10।।

• रूप रुपं मे दिश- प्रातरह्नस्य तेजसः। अन्न.मुग्रस्य प्राशिष-मस्तु वै मयि त्वयीद-मस्तु त्वयि मयीदम्।। 11।।

- यदिदं पश्यामि चक्षुषा- त्वया दत्तं प्रभासया। तेन मा भुञ्ज तेन मा- भुक्षिषीय तेन मा विश।। 12।।
- अहर्नो अत्यपीपर- द्रात्रिर्नो अति पारयत्। रात्रिर्नो अत्यपीपर-दहर्नो अति पारयत्।। 13।।
- आदित्य.नाव.मारोक्षं- पूर्णा.मपरिवादिनीम्। अच्छिद्रां पारयिष्णीं-शतारित्रां स्वस्तये।। 14।।
- ओम्- नम आदित्याय नम आदित्याय नम आदित्याय।। 15।।
- उद्यन्त.न्त्वाऽऽदित्याऽनूदियासं- प्रतितिष्ठन्त न्त्वाऽऽदित्याऽनुप्रति.तिष्ठासम्।। 16।।
- भलाय स्वाहा।।17।।
- भल्लाय स्वाहा।।18।।

षष्ठः खण्डः

- ❃/2.6 वास्तोष्पते प्रतिजानी.ह्यस्मा-न्त्स्वावेशोऽनमीवो भवा नः। यत्ते महे प्रति तन्नो जुषस्व- शन्नो भव द्विपदे श.ञ्चतुष्पदे।। 1।।
- हये राके सिनीवालि- सिनीवालि पृथुष्टुके। सुभद्रे पथ्ये रेवति- पथा नो यश आ वह स्वाहा।। 2।।
- ये यन्ति प्राञ्चः पन्थानो- य उ चोत्तरत आययुः। ये चेमे सर्वे पन्थान-स्तेभिर्नो यश आ वह स्वाहा।। 3।।
- यथा यन्ति प्रपदो- यथा मासा अहर्जरम्। एवं मा श्रीधातार- स्समव यन्तु सर्वत स्स्वाहा।। 4।।
- यथा समुद्रं स्रवन्ती- स्समव.यन्ति दिशो दिशः। एवं मा सखायो ब्रह्मचारिण- स्समव.यन्तु दिशो दिश स्स्वाहा।। 5।।
- वसुवन एधि- वसुवन एधि- वसुवन एधि।। 6।।
- वश.ङ्गमौ देवयानौ- युवं स्थो यथा युवयोः। सर्वाणि भूतानि वश.माय-न्त्येवं ममासौ वश.मेतु स्वाहा।। 7।।
- शङ्खश्च मन आयुश्च- देवयानौ युवं स्थो यथा युवयोः। सर्वाणि भूतानि वश.माय-न्त्येवं ममासौ वश.मेतु स्वाहा।। 8।।

- आकूती.न्देवीं मनसा प्रपद्ये- यज्ञस्य मातरं सुहवा मे अस्तु। यस्यास्त एक.मक्षरं परं-सहस्रा अयुतञ्च शाखा-स्तस्यै वाचे निहवे जुहो-म्या मा वरो गच्छतु श्री.र्यशश्च स्वाहा।। 9।।
- इद्.मह.मिमँ विश्वकर्माणं- श्रीवत्स.मभि जुहोमि स्वाहा।। 10।।
- पूर्णहोमँ यशसे जुहोमि- योऽस्मै जुहोति वर.मस्मै ददाति। वरँ वृणे यशसा भामि लोके स्वाहा।। 11।।
- इन्द्रा.मवदा.त्तमो वः- परस्ता.दहँ वो ज्योति-र्मामभ्येत सर्वे स्वाहा।। 12।। (इन्द्रा-इन्द्राणां)
- अन्नँ वा एकच्छन्दस्य- मन्नं ह्येकं भूतेभ्य.श्छन्दयति स्वाहा।। 13।।
- श्रीर्वा एषा यत्सत्वानो- विरोचनो मयि सत्त्व.मव दधातु स्वाहा।। 14।।
- अन्नस्य घृत.मेव रस-स्तेज.स्सम्पत्कामो जुहोमि स्वाहा।। 15।।
- क्षुधे स्वाहा।। 16।।
- क्षुत्पिपासाभ्यां स्वाहा।। 17।।
- मा भैषी-र्न मरिष्यसि- जरदष्टि.र्भविष्यसि।। 18।।
- रसं विषस्य नाविद-मुग्रं फेन.मिवाऽऽस्यम्।। 19।।
- तुर गोपाय मा- नाथ गोपाय मा। अशस्तिभ्यो अरातिभ्य स्स्वस्त्ययन.मसि।। 20।।

Sri Ganapathy Sachchidananda Avadhoota Datta Peetham • Mysore •

### सप्तम खण्डः

- ❃/2.7 हतस्ते अत्रिणा क्रिमि-र्हतस्ते जमदग्निना। गोतमेन तिनीकृतो-ऽत्रैव त्वा क्रिमे ब्रह्मवद्य.मवद्यम्।। 1।। (तिनीकृतः- तनूकृतः)
- भरद्वाजस्य मन्त्रेण- स.न्तिनोमि क्रिमे त्वा।। 2।।
- क्रिमिं ह वक्रतोदिन- ङ्क्रिमि.मान्त्रानुचारिणम्। क्रिमि न्द्विशीर्ष.मर्जुन- न्द्विशीर्षं ह चतुर्हनुम्।। 3।। (क्रिमिम्, आन्त्रानुचरिणम्)
- हतꣳ क्रिमीणा.ङ्क्षुद्रको- हता माता हतꣳ पिता। अथैषां भिन्नकꣳ कुम्भो- य एषाँ विषधानकः।। 4।।
- क्रिमि.मिन्द्रस्य बाहुभ्या-मवाञ्चं पातयामसि।। 5।।
- हताꣳ क्रिमय स्साऽऽशातिका स्सनील.मक्षिकाः।। 6।।

### अष्टमः खण्डः (मधुपर्क प्रकरणम्)

- ❃/2.8 अर्हणा पुत्रवाससा- धेनु.रभव.द्यमे। सा नः॰ पयस्वती दुहा- उत्तरा.मुत्तरां समाम्।। 1।।
- इद्.मह्.मिमां पद्याँ- विराज.मन्नाद्यायाऽधितिष्ठामि।। 2।।
- या ओषधी स्सोमराज्ञी- र्बह्वी. श्शतविचक्षणाः। ता मह्य.मस्मि.न्नासने-ऽच्छिद्रा श्शर्म यच्छत।। 3।।
- या ओषधी स्सोमराज्ञी- र्विष्ठिताः॰ पृथिवी.मनु। ता मह्य.मस्मि.न्पादयो- रच्छिद्रा.श्शर्म यच्छत।। 4।।
- यतो देवीः॰ प्रतिपश्या.म्याप-स्ततो मा राद्धि.रागच्छतु।। 5।।
- सव्यं पाद्.मव नेनिजे-ऽस्मि.न्राष्ट्रे श्रिय.न्दधे।। 6।।
- दक्षिणं पाद्.मव नेनिजे-ऽस्मि.न्राष्ट्रे श्रिय.मा वेशयामि।। 7।।
- पूर्व.मन्य.मपर.मन्य-मुभौ पादा.वव नेनिजे- राष्ट्रस्यर्ध्या- अभयस्यावरुद्ध्यै।। 8।।
- अन्नस्य राष्ट्रि.रसि- राष्ट्रि.स्ते भूयासम्।। 9।।
- यशोऽसि- यशो मयि धेहि।। 10।।
- यशसो यशोऽसि।। 11।।
- यशसो भक्षोऽसि- महसो भक्षोऽसि- श्रीभक्षोऽसि- श्रियं मयि धेहि स्वाहा।। 12।।
- मुञ्च गाँ वरुण पाशा-द्विषन्तं मेऽभि धेहि। त.ञ्जह्यमुष्य चोभयो.रुत्सृज- गामत्तु तृणानि पिबतूदकम्।। 13।।
- माता रुद्राणा न्दुहिता वसूनां- स्वसाऽऽदित्याना.ममृतस्य नाभिः। प्र नु वोच. श्चिकितुषे जनाय- मा गा.मनागा.मदितिँ वधिष्ट।। 14।। समाप्तोऽयं छान्दोग्यमन्त्रप्रकरणम्।।

# छान्दोग्य उपनिषत्।

## छान्दोग्योपनिषदि प्रथमोऽध्यायः

- ॐ आप्यायन्तु ममाङ्गानि वाक्प्राण श्चक्षु श्श्रोत्र मथो बल मिन्द्रियाणि च सर्वाणि सर्वं ब्रह्मौपनिषदं माऽहं ब्रह्म निराकुर्यां मा मा ब्रह्म निराकरो दनिराकरण मस्त्वनिराकरणं मेऽस्तु तदात्मनिरते य उपनिषत्सु धर्मा स्ते मयि सन्तु ते मयि सन्तु।
- ॐ शान्ति श्शान्ति श्शान्तिः।।

Sri Ganapathy Sachchidananda Avadhoota Datta Peetham • Mysore • SGS

- ❃,1.1ओमि.त्येत.दक्षर.मुद्गीथ.मुपाऽऽसी-तोमिति ह्युद्गायति। तस्योपव्याख्यानम्॥ 1,1.1।
- एषां भूतानां पृथिवी रसः- पृथिव्या आपो रसो-ऽपा.मोषधयो रस- ओषधीनां पुरुषो रसः- पुरुषस्य वाग्रसो- वाच ऋग्रस- ऋच स्साम रस-स्साम्न उद्गीथो रसः। 1,1.2।
- स एष रसानां रसतमः परमः परार्ध्योऽष्टमो- यदुद्गीथः। 1,1.3।
- कतमा कतम.-र्क्तम.त्कतम.त्साम- कतमः कतम उद्गीथ- इति विमृष्टं भवति। 1,1.4।
- वागेव.र्क्प्राण.स्सा-मो.मित्येत.दक्षर.मुद्गीथ,स्तद्वा एत.न्मिथुनँ- यद्वाक्च प्राण-श्चर्क्च साम च। 1,1.5।
- तदेत.न्मिथुन-मोमि.त्येतस्मि.न्नक्षरे संसृज्यते। यदा वै मिथुनौ समागच्छत- आपयतो वै ता.वन्योऽन्यस्य कामम्। 1,1.6।
- आपयिता ह वै कामानां भवति- य एत.देवँ विद्वा.नक्षर.मुद्गीथ.मुपाऽऽस्ते। 1,1.7।
- तद्वा एत.दनुज्ञाऽक्षरँ- यद्धि किञ्चानुजाना-त्योमि.त्येव तदा.हैषो एव समृद्धि-र्य.दनुज्ञा, समर्धयिता ह वै कामानां भवति- य एत.देवँ विद्वा.नक्षर.मुद्गीथ.मुपाऽऽस्ते। 1,1.8।
- तेनेय.न्त्रयी विद्या वर्तत,-ओमित्या श्रावय-त्योमिति शंस-त्योमि.त्युद्गाय-त्येतस्यैवाक्षर.स्यापचित्यै- महिम्ना रसेन। 1,1.9।
- तेनोभौ कुरुतो- यश्चैत.देवँ वेद- यश्च न वेद, नाना तु विद्या चाविद्या च, यदेव विद्यया करोति श्रद्धयोपनिषदा- तदेव वीर्यवत्तरं भवती-ति खल्वेत.स्यैवाक्षरस्योप.व्याख्यानं भवति।। 1.1.10।।

द्वितीयः खण्डः।।

- ❃,1.2 देवासुरा ह वै यत्र सँयेतिरे- उभये प्राजापत्या,स्तद्ध देवा उद्गीथ माजह्रु-रनेनैना.नभि भविष्याम इति।। 1.2.1।।
- ते ह नासिक्यं प्राण.मुद्गीथ मुपाऽऽसा.ञ्चक्रिरे, त९ हासुराः पाप्मना विविधु,स्तस्मा.त्तेनोभय.ञ्जिघ्रति- सुरभि च- दुर्गन्धि च, पाप्मना ह्येष विद्धः।। 1.2.2।।
- अथ ह वाच.मुद्गीथ मुपाऽऽसा.ञ्चक्रिरे, ता९ हासुराः पाप्मना विविधु,स्तस्मा.त्तयोभयँ वदति- सत्य.ञ्चानृतञ्च, पाप्मना ह्येषा विद्धा।। 1.2.3।।

- अथ ह चक्षु.रुद्गीथ मुपाऽऽसा.ञ्चक्रिरे, तद्धासुराः पाप्मना विविधु,स्तस्मा.त्तेनोभयं पश्यति- दर्शनीय.ञ्चादर्शनीयञ्च, पाप्मना ह्येत.द्विद्धम्।। 1.2.4।।
- अथ ह श्रोत्र.मुद्गीथ मुपाऽऽसा.ञ्चक्रिरे, तद्धासुराः पाप्मना विविधु,स्तस्मा.त्तेनोभयꣳ श्रृणोति- श्रवणीय.ञ्चाश्रवणीयञ्च, पाप्मना ह्येत.द्विद्धम्।। 1.2.5।।
- अथ ह मन उद्गीथ मुपाऽऽसा.ञ्चक्रिरे, तद्धासुराः पाप्मना विविधु,स्तस्मा.त्तेनोभयꣳ सङ्कल्पते- सङ्कल्पनीय.ञ्चासङ्कल्पनीयञ्च, पाप्मना ह्येत.द्विद्धम्।। 1.2.6।।
- अथ ह य एवायं मुख्यः प्राण-स्तमुद्गीथ मुपाऽऽसा.ञ्चक्रिरे, तꣳ हासुरा ऋत्वा विदध्वꣳसु, र्यथाऽश्मान माखण.मृत्वा विध्वꣳसे.तैवम्।। 1.2.7।।
- यथाऽश्मान माखण मृत्वा विध्वꣳसत- एवꣳ हैव स विध्वꣳसते, य एवँविदि पाप.ङ्कामयते- यश्चैन मभिदासति- स एषोऽश्माऽऽखणः।। 1.2.8।।
- नैवैतेन सुरभि- न दुर्गन्धि विजाना,त्यपहत.पाप्मा ह्येष तेन, यदश्नाति यत्पिबति- तेनेतरा न्प्राणा.नव,त्येतमु एवान्ततोऽवि.त्त्वोत्क्रामति- व्याददा.त्येवान्तत इति।। 1.2.9।।
- तꣳ हाङ्गिरा उद्गीथ.मुपाऽऽसा.ञ्चक्र,-एतमु एवाऽङ्गिरसं मन्यन्ते-ऽङ्गानाँ यद्रसः।। 1.2.10।।
- तेन तꣳ ह बृहस्पति.रुद्गीथ.मुपाऽऽसा.ञ्चक्र, -एतमु एव बृहस्पतिं मन्यन्ते- वाग्घि बृहती- तस्या एष पतिः।। 1.2.11।।
- तेन तꣳ हाऽयास्य उद्गीथ.मुपाऽऽसा.ञ्चक्र, -एतमु एवायास्यं मन्यन्त- आस्या.द्य.दयते।। 1.2.12।।
- तेन तꣳ ह बको दाल्भ्यो विदा.ञ्चकार, स ह नैमिशीयाना मुद्गाता बभूव, स ह स्मैभ्यः कामा.ना गायति।। 1.2.13।।
- आगाता ह वै कामानां भवति- य एत.देवँ विद्वा.नक्षर मुद्गीथ.मुपाऽऽस्त- इ.त्यध्यात्मम्।। 1.2.14।।

तृतीयः खण्डः।।

- ❃,1.3 अथाधिदैवतँ, य एवासौ तपति- तमुद्गीथ मुपाऽऽसी,तोद्यन्वा एष प्रजाभ्य उद्गायति- उद्यꣳ.स्तमो भय.मपह,न्त्यपहन्ता ह वै भयस्य तमसो भवति- य एवँ वेद।। 1.3.1।।

- समान उ एवाय.ञ्चासौ चोष्णोऽय.मुष्णोऽसौ, स्वर इतीम.माचक्षते- स्वर इति प्रत्यास्वर इत्यमु,न्तस्माद्वा एत.मिम.ममु.ञ्चोद्गीथ.मुपाऽऽसीत।। 1.3.2।।

- अथ खलु व्यान मेवोद्गीथ.मुपाऽऽसीत, यद्वै प्राणिति- स प्राणो, यदपानिति- सोऽपानः। अथ यꣳ प्राणापानयो स्सन्धि- स्स व्यानो, यो व्यान-स्सा वाक्। तस्मा.दप्राण.न्ननपान न्वाच मभि.व्याहरति।। 1.3.3।।

- या वा-क्स,र्क्तस्मा.दप्राण.न्ननपान.न्नृच.मभि.व्याहरति, य.र्क्तत्साम- तस्मा.दप्राण.न्ननपान न्त्साम गायति, यत्साम- स उद्गीथ,स्तस्मा.दप्राण.न्ननपान न्नुद्गायति।। 1.3.4।।

- अतो या.न्यन्यानि वीर्यवन्ति कर्माणि, यथाऽग्ने.र्मन्थन-माजे स्सरण-न्दृढस्य धनुष आयमन-मप्राण.न्ननपानꣳ-स्तानि करो,त्येतस्य हेतो-र्व्यान मेवोद्गीथ.मुपाऽऽसीत।। 1.3.5।।

- अथ खलूद्गीथाक्षरा.ण्युपाऽऽसी.तोद्गीथ इति, प्राण एवोत्-प्राणेन ह्युत्तिष्ठति, वाग्गी-र्वाचो ह गिर इत्या चक्षते,ऽन्न.न्थ-मन्ने हीदꣳ सर्वꣳ स्थितम्।। 1.3.6।।

- द्यौरेवो.दन्तरिक्ष.ङ्गीꣳ पृथिवी थ,मादित्य एवो.द्वायुर्गी.रग्नि.स्थꣳ, सामवेद एवो.द्यजुर्वेदो गी.र्ऋग्वेदस्थ,न्दुग्धेऽस्मै वा.ग्दोहँ- यो वाचो दोहोऽन्नवा,नन्नादो भवति- य एता.न्येवँ विद्वा.नुद्गीथाक्षरा.ण्युपाऽऽस्त- उद्गीथ इति।। 1.3.7।।

- अथ खल्वाशी.स्समृद्धि,रुपसरणानी.त्युपाऽऽसीत, येन साम्ना स्तोष्य.न्त्स्या-त्तत्सामोप धावेत्।। 1.3.8।।

- यस्या.मृचि- ता.मृचँ, यदार्षेय- न्त.मृषिँ, या.न्देवता मभिष्टोष्य.न्त्स्या- त्ता.न्देवता.मुप धावेत्।। 1.3.9।।

- येन च्छन्दसा स्तोष्य.न्स्या- त्तच्छन्द उपधावे,द्येन स्तोमेन स्तोष्यमाण.स्स्या- त्तꣳ स्तोम मुप.धावेत्।। 1.3.10।।

- या.न्दिश.मभिष्टोष्य.न्स्या- त्ता.न्दिश.मुप धावेत्।। 1.3.11।।

- आत्मान.मन्तत उपसृत्य स्तुवीत, काम.न्ध्याय.न्नप्रमत्तो.ऽभ्याशो ह, यदस्मै स काम.स्समृध्येत- यत्काम.स्स्तुवीतेति- यत्काम.स्स्तुवीतेति।। 1.3.12।।

चतुर्थꣳ खण्डः।।

- ❃,1.4 ओमि.त्येत.दक्षर मुद्गीथ मुपाऽऽसी,तोमिति ह्युद्गायति- तस्योपव्याख्यानम्।। 1.4.1।।
- देवा वै मृत्यो.र्बिभ्यत.स्त्रयीँ विद्यां प्राविशꣳ,स्ते छन्दोभि.रच्छादयन्, यदेभि.रच्छादयꣳ-स्तच्छन्दसा.ञ्छन्दस्त्वम्।। 1.4.2।।
- तानु तत्र मृत्यु,र्यथा मत्स्य.मुदके परिपश्ये-देवं पर्यपश्य-दृचि साम्नि यजुषि, ते नु विदित्वोर्ध्वा ऋच.स्साम्नो यजुष.स्स्वर.मेव प्राविशन्।। 1.4.3।।
- यदा वा ऋच.माप्नो-त्योमि.त्येवाति.स्वर-त्येवꣳ सामैवँ यजु,रेष उ स्वरो- यदेत.दक्षर-मेत.दमृत.मभय,न्तत्प्रविश्य देवा अमृता अभया अभवन्।। 1.4.4।।
- स य एत.देवँ विद्वा.नक्षरं प्रणौ-त्येत.देवाक्षरꣳ स्वर.ममृत.मभयं प्रविशति, तत्प्रविश्य य.दमृता देवा-स्त.दमृतो भवति।। 1.4.5।।

पञ्चमꣳ खण्डः।।

- ❃,1.5 अथ खलु य उद्गीथ- स्स प्रणवो, यꣳ प्रणव- स्स उद्गीथ इ,त्यसौ वा आदित्य उद्गीथ- एष प्रणव- ओमिति ह्येष स्वर.न्नेति।। 1.5.1।।
- एतमु एवाह.मभ्यगासिष,न्तस्मा.न्मम त्वमेकोऽसीति ह कौषीतकिꣳ पुत्र.मुवाच, रश्मीꣳस्त्वं पर्यावर्तया-द्बहवो वै ते भविष्य.न्ती-त्यधि.दैवतम्।। 1.5.2।।
- अथाध्यात्मँ, य एवायं मुख्यꣳ प्राण- स्त.मुद्गीथ मुपाऽऽसी,तोमिति ह्येष स्वर.न्नेति।। 1.5.3।।
- एतमु एवाह.मभ्यगासिष-न्तस्मा.न्मम त्व.मेकोऽसीति ह कौषीतकिꣳ पुत्र.मुवाच, प्राणाꣳस्त्वं भूमान.मभिगायता-द्बहवो वै मे भविष्यन्तीति।। 1.5.4।।
- अथ खलु य उद्गीथ-स्स प्रणवो, यꣳ प्रणव-स्स उद्गीथ इति, होतृषदना.द्धैवापि दुरुद्गीथ.मनु समाहरती.त्यनुसमाहर.तीति।। 1.5.5।।

षष्ठꣳ खण्डः।।

- ❃,1.6 इय.मेव.र्गग्नि.स्साम, तदेत.देतस्या.मृच्यध्यूढꣳ साम, तस्मा.दृच्यध्यूढꣳ साम गीयत, इय.मेव साऽग्नि-रम.स्तत्साम।। 1.6.1।।

- अन्तरिक्ष.मेव.र्ग्वायु.स्साम, तदेत.देतस्या.मृच्यध्यूढ९ साम, तस्मा.दृच्यध्यूढ९ साम गीयते,ऽन्तरिक्ष.मेव सा वायु-रम.स्तत्साम।। 1.6.2।।

- द्यौरेव.र्गादित्य.स्साम, तदेत.देतस्या.मृच्यध्यूढ९ साम, तस्मा.दृच्यध्यूढ९ साम गीयते, द्यौरेव साऽऽदित्यो-ऽम.स्तत्साम।। 1.6.3।।

- नक्षत्राण्येव.श्चन्द्रमा.स्साम, तदेत.देतस्या.मृच्यध्यूढ९ साम, तस्मा.दृच्यध्यूढ९ साम गीयते, नक्षत्रा.ण्येव सा चन्द्रमा- अम.स्तत्साम।। 1.6.4।।

- अथ यदेत.दादित्यस्य शुक्लं भा- स्सैव,र्गथ यन्नीलं परः कृष्ण-न्तत्साम, तदेत.देतस्या.मृच्यध्यूढ९ साम, तस्मा.दृच्यध्यूढ९ साम गीयते।। 1.6.5।।

- अथ यदेवैत.दादित्यस्य शुक्लं भा- स्सैव सा,ऽथ यन्नीलं परः कृष्ण-न्तदम-स्तत्सामा,ऽथ य एषोऽन्त.रादित्ये हिरण्मयः पुरुषो दृश्यते- हिरण्य.श्मश्रु र्हिरण्य.केश- आप्रणखा.त्सर्व एव सुवर्णः।। 1.6.6।।

- तस्य यथा कप्यासं पुण्डरीक-मेव.मक्षिणी- तस्योदिति नाम, स एष सर्वेभ्यः पाप्मभ्य उदित, -उदेति ह वै सर्वेभ्यः पाप्मभ्यो- य एवँ वेद।। 1.6.7।।

- तस्यर्क्क साम च गेष्णौ, तस्मा.दुद्गीथ,स्तस्मात्त्वे.वोद्गातैतस्य हि गाता, स एष ये चामुष्मा.त्पराञ्चो लोका,स्तेषा.ञ्चेष्टे देवकामाना.ञ्चे-त्यधिदैवतम्।। 1.6.8।।

सप्तमः खण्डः।।

- ❃,1.7 अथाध्यात्मँ, वागेव.र्क्प्राण.स्साम, तदेत.देतस्या.मृच्यध्यूढ९ साम, तस्मा.दृच्यध्यूढ९ साम गीयते, वागेव सा प्राणो-ऽम.स्तत्साम।। 1.7.1।।

- चक्षु.रेव.र्गात्मा साम, तदेत.देतस्या.मृच्यध्यूढ९ साम, तस्मा.दृच्यध्यूढ९ साम गीयते, चक्षु.रेव साऽऽत्मा-ऽम.स्तत्साम।। 1.7.2।।

- श्रोत्र.मेव.र्म्मन.स्साम, तदेत.देतस्या.मृच्यध्यूढ९ साम, तस्मा.दृच्यध्यूढ९ साम गीयते, श्रोत्र.मेव सा- मनोऽम.स्तत्साम।। 1.7.3।।

- अथ यदेत.दक्ष्ण श्शुक्लं भा- स्सैव,र्गथ यन्नीलं परः कृष्ण-न्तत्साम, तदेत.देतस्या.मृच्यध्यूढ९ साम, तस्मा.दृच्यध्यूढ९ साम गीयते। अथ यदेवैत.दक्ष्ण श्शुक्लं भा- स्सैव सा,ऽथ यन्नीलं परः कृष्ण-न्तदम.स्तत्साम।। 1.7.4।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

- अथ य एषोऽन्त.रक्षिणि पुरुषो दृश्यते- सैव.र्क्तत्साम, तदुक्थ-न्तद्यजु.स्तद्ब्रह्म, तस्यैतस्य तदेव रूपँ- यदमुष्य रूपँ, या.वमुष्य गेष्णौ- तौ गेष्णौ, यन्नाम- तन्नाम।। 1.7.5।।
- स एष ये चैतस्मा.दर्वाञ्चो लोका-स्तेषा.ञ्चेष्टे मनुष्यकामाना.ञ्चेति, तद्य इमे वीणाया.ङ्गाय-न्त्येत.न्ते गायन्ति- तस्मा.त्ते धनसनयः।। 1.7.6।।
- अथ य एत.देवँ विद्वा.न्त्साम गाय-त्युभौ स गायति- सोऽमुनैव स एष, ये चामुष्मा.त्पराञ्चो लोका-स्ता९ श्चाऽऽप्नोति देवकामा९श्च।। 1.7.7।।
- अथाऽनेनैव ये चैतस्मा.दर्वाञ्चो लोका-स्ता९श्चाऽऽप्नोति मनुष्यकामा९श्च, तस्मादु हैवँवि.दुद्गाता ब्रूयात्।। 1.7.8।।
- कन्ते काम.मागायानी,त्येष ह्येव कामाऽऽगान.स्येष्टे- य एवँ विद्वा.न्त्साम गायति- साम गायति।। 1.7.9।।

अष्टम४ खण्डः।।

- ॐ,1.8 त्रयो होद्गीथे कुशला बभूवु- श्शिलक श्शालावत्य- श्चैकितायनो दाल्भ्य४-प्रवाहणो जैवलि.रिति, ते होचु.रुद्गीथे वै कुशला.स्स्मो- हन्तोद्गीथे कथाँ वदाम इति।। 1.8.1।।
- तथेति ह समुप.विविशु,स्स ह प्रवाहणो जैवलि.रुवाच- भगवन्ता.वग्रे वदतां-ब्राह्मणयो.र्वदतो- र्वाच९ श्रोष्या.मीति।। 1.8.2।।
- स ह शिलक श्शालावत्य.श्चैकितायन.न्दाल्भ्य.मुवाच- हन्त त्वा पृच्छानीति, पृच्छेति होवाच।। 1.8.3।।
- का साम्नो गतिरिति- स्वर इति होवाच, स्वरस्य का गतिरिति- प्राण इति होवाच, प्राणस्य का गति.रि-त्यन्न.मिति होवाचा,ऽन्नस्य का गति.रि-त्याप इति होवाच।। 1.8.4।।
- अपा.ङ्का गति.रि-त्यसौ लोक इति होवाचा,ऽमुष्य लोकस्य का गति.रिति- न स्वर्गँ लोक.मिति, नये.दिति होवाच- स्वर्गँ वयँ लोक९ सामाभि स९स्थापयाम, स्स्वर्ग.स९स्ताव९ हि सामेति।। 1.8.5।।
- त९ ह शिलक श्शालावत्य.श्चैकितायन न्दाल्भ्य मुवाचा-ऽप्रतिष्ठितँ वै किल ते दाल्भ्य साम- य.स्त्वेतर्हि ब्रूया-न्मूर्धा ते विपतिष्यतीति- मूर्धा ते विपते.दिति।। 1.8.6।।

Sri Sachidananda Avadhoota Datta Peetham

- हन्ताह.मेत.द्भगवत्तो वेदानीति- विद्धीति होवाचा,ऽमुष्य लोकस्य का गति.रि-त्ययँ लोक इति होवाचा,ऽस्य लोकस्य का गति.रिति- न प्रतिष्ठाँ लोक.मिति, नये.दिति होवाच- प्रतिष्ठाँ वयँ लोक९ सामाभि स९स्थापयाम८, प्रतिष्ठास९स्ताव९ हि सामेति।। 1.8.7।।

- त९ ह प्रवाहणो जैवलि.रुवाचा-ऽन्तवद्वै किल ते शालावत्य साम, य.स्त्वेतर्हि ब्रूया-न्मूर्धा ते विपतिष्यतीति- मूर्धा ते विपते.दिति, हन्ताह.मेत.द्भगवत्तो वेदानीति- विद्धीति होवाच।। 1.8.8।।

**नवम८ खण्डः।।**

- ❀,1.9 अस्य लोकस्य का गति-रित्याकाश इति होवाच, सर्वाणि ह वा इमानि भूता.न्याकाशा.देव समुत्पद्यन्त- आकाशं प्रत्यस्तँ य,न्त्याकाशो ह्येवैभ्यो ज्याया-नाकाश८ परायणम्।। 1.9.1।।

- स एष परोवरीया.नुद्गीथ-स्स एषोऽनन्त८, परोवरीयो हास्य भवति- परोवरीयसो ह लोका.न्जयति- य एत.देवँ विद्वा.न्परोवरीया९स.मुद्गीथ.मुपाꣳस्ते।। 1.9.2।।

- त९ हैत.मतिधन्वा शौनक उदरशाण्डिल्यायो.त्त्वोवाच- यावत्त एनं प्रजाया मुद्गीथँ वेदिष्यन्ते- परोवरीयो हैभ्य स्ताव.दस्मि.न्लोके जीवनं भविष्यति।। 1.9.3।।

- तथाऽमुष्मि.न्लोके लोक इति, स य एत.मेवँ विद्वा.नुपाꣳस्ते- परोवरीय एव हास्याऽस्मि.न्लोके जीवनं भवति, तथाऽमुष्मि.न्लोके लोक इति- लोके लोक इति।। 1.9.4।।

**दशम८ खण्डः।।**

- ❀,1.10 मटचीहतेषु कुरु.ष्वाटिक्या सह जाययोषस्ति.र्ह चाक्रायण- इभ्यग्रामे प्रद्राणक उवास।। 1.10.1।।

- स हेभ्य.ङ्कुल्माषा.न्खादन्तं बिभिक्षे, त९ होवाच- नेतोऽन्ये विद्यन्ते- यच्च ये म इम उपनिहिता इति।। 1.10.2।।

- एतेषां मे देहीति होवाच- ता.नस्मै प्रददौ, हन्ताऽनुपान.मि-त्युच्छिष्टँ वै मे पीत९ स्या.दिति होवाच।। 1.10.3।।

- न स्वि.देतेऽप्युच्छिष्टा इति, न वा अजीविष्य-मिमा.नखादयन्निति होवाच, कामो म उदपान.मिति।। 1.10.4।।

- स ह खादित्वाऽतिशेषा.न्जायाया आजहार, साऽग्र एव सुभिक्षा बभूव- तान्प्रतिगृह्य निदधौ।। 1.10.5।।

- स ह प्रात.स्सञ्जिहान उवाच- यद्बतान्नस्य लभेमहि- लभेमहि धनमात्रा৺, राजाऽसौ यक्ष्यते- स मा सर्वै.रार्त्विज्यै.र्वृणीतेति।। 1.10.6।।

- त.ञ्जायोवाच- हन्त पत- इम एव कुल्माषा इति, ता.न्खादित्वाऽमुँ यज्ञँ वितत मेयाय।। 1.10.7।।

- तत्रोद्गातृ.नास्तावे स्तोष्यमाणा.नुपोप विवेश, स ह प्रस्तोतार मुवाच।। 1.10.8।।

- प्रस्तोत-र्या देवता प्रस्ताव.मन्वायत्ता- ताञ्चे.दविद्वा.न्प्रस्तोष्यसि- मूर्धा ते विपतिष्यतीति।। 1.10.9।।

- एव.मेवोद्गातार.मुवा,चोद्गात-र्या देव.तोद्गीथ.मन्वायत्ता- ताञ्चे.दविद्वा.नुद्गास्यसि- मूर्धा ते विपतिष्यतीति।। 1.10.10।।

- एव.मेव प्रतिहर्तार.मुवाच, प्रतिहर्त-र्या देवता प्रतिहार मन्वायत्ता- ताञ्चे.दविद्वा. न्प्रति हरिष्यसि- मूर्धा ते विपतिष्यतीति- ते ह स.मारता.स्तूष्णी.मासा.ञ्चक्रिरे।। 1.10.11।।

एकादशः खण्डः।।

- ❀,1.11 अथ हैनँ यजमान उवाच- भगवन्तँ वा अहँ विविदिषाणी-त्युषस्ति.रस्मि चाक्रायण- इति होवाच।। 1.11.1।।

- स होवाच भगवन्तँ वा अह.मेभि स्सर्वै.रार्त्विज्यैः पर्यैषिषं- भगवतो वा अह.मवित्त्याऽन्या.नवृषि।। 1.11.2।।

- भगवा৺.स्त्वेव मे सर्वै.रार्त्विज्यै.रिति- तथे,त्यथ तर्ह्येत एव समतिसृष्टा स्स्तुवताँ- याव.त्त्वेभ्यो धन.न्दद्या-स्ताव.न्मम दद्या इति, तथेति ह यजमान उवाच।। 1.11.3।।

- अथ हैनं प्रस्तोतोप ससाद, प्रस्तोत-र्या देवता प्रस्ताव मन्वायत्ता- ताञ्चे.दविद्वा.न्प्रस्तोष्यसि- मूर्धा ते विपतिष्य-तीति मा भगवा.नवोच,त्कतमा सा देवतेति।। 1.11.4।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

- प्राण इति होवाच, सर्वाणि ह वा इमानि भूतानि प्राण.मेवाभि सँविशन्ति- प्राण.मभ्युज्जिहते, सैषा देवता प्रस्ताव मन्वायत्ता, ताञ्चे.दविद्वा.न्प्रास्तोष्यो- मूर्धा ते व्यपतिष्य-त्तथोक्तस्य मयेति।। 1.11.5।।
- अथ हैन.मुद्गातोप ससा,दोद्गात-र्या देवतोद्गीथ मन्वायत्ता- ताञ्चे.दविद्वा.नुद्गास्यसि- मूर्धा ते विपतिष्य-तीति मा भगवा.नवोच,त्कतमा सा देवतेति।। 1.11.6।।
- आदित्य इति होवाच, सर्वाणि ह वा इमानि भूता.न्यादित्य.मुच्चै.स्सन्त.ङ्गायन्ति, सैषा देवतोद्गीथ मन्वायत्ता, ताञ्चे.दविद्वा.नु.दगास्यो- मूर्धा ते व्यपतिष्य-त्तथोक्तस्य मयेति।। 1.11.7।।
- अथ हैनं प्रतिहर्तोप ससाद, प्रतिहर्त-र्या देवता प्रतिहार मन्वायत्ता- ताञ्चे.दविद्वा.न्प्रति हरिष्यसि- मूर्धा ते विपतिष्य-तीति मा भगवा.नवोच,त्कतमा सा देवतेति।। 1.11.8।।
- अन्न.मिति होवाच, सर्वाणि ह वा इमानि भूता.न्यन्न.मेव प्रतिहरमाणानि जीवन्ति, सैषा देवता प्रतिहार मन्वायत्ता- ताञ्चे.दविद्वा.न्प्रत्यहरिष्यो- मूर्धा ते व्यपतिष्य-त्तथोक्तस्य मयेति-तथोक्तस्य मयेति।। 1.11.9।।

द्वादशः खण्डः।।

- ※,1.12 अथात श्शौव उद्गीथ,स्तद्ध बको दाल्भ्यो ग्लावो वा मैत्रेय स्स्वाध्याय मुद्वव्राज।। 1.12.1।।
- तस्मै श्वा श्वेतः प्रादु.र्बभूव, तमन्ये श्वान उप समेत्योचु-रन्न.न्नो भगवा.नागाय-त्वशनाया.मवा इति।। 1.12.2।।
- तान्होवा-चेहैव मा प्रात.रुप.समीयातेति, तद्ध बको दाल्भ्यो ग्लावो वा मैत्रेयः प्रतिपालया.ञ्चकार।। 1.12.3।।
- ते ह यथैवेदं बहिष्पवमानेन स्तोष्यमाणा स्सꣳरब्धा स्सर्पन्ती-त्येव माससृपु,स्ते ह समुपविश्य हिङ्चक्रुः।। 1.12.4।।
- ओ१मदो२3माँ3 पिबो२3माँ3, दे२वो वरुणः प्रजापति स्सँ१वितो२3ऽन्न१.मिहा२2ऽऽह१र.दे२न्न१प३ते2 ऽन्न१.मिहा२2ऽऽहराह१रो3 मिति।। 1.12.5।।

त्रयोदशः खण्डः।।

- ❃,1.13 अयँ वाव लोको हाउकारो- वायु.र्हाइकार- श्चन्द्रमा अथकार- आत्मेहकारो-ऽग्नि.रीकारः।। 1.13.1।।

- आदित्य ऊकारो- निहव एकारो- विश्वे देवा औहोयिकारꣳ- प्रजपति.र्हिङ्कारꣳ- प्राण.स्स्वरो-ऽन्नँ या वा.ग्विराट्।। 1.13.2।।

- अनिरुक्त स्त्रयोदश.स्स्तोभ- स्सञ्चरो हुङ्कारः।। 1.13.3।।

- दुग्धेऽस्मै वा.ग्दोहँ- यो वाचो दोहो,ऽन्नवा.नन्नादो भवति- य एता.मेवꣳ साम्ना.मुपनिषदँ वेदोपनिषदँ वेदेति।। 1.13.4।।

इति प्रथमोऽध्यायः।।

## छान्दोग्योपनिषदि द्वितीयोऽध्यायः।।

प्रथमꣳ खण्डः।।

- ❃,2.1 समस्तस्य खलु साम्न उपाऽऽसनꣳ साधु, यत्खलु साधु- तत्सामेत्या चक्षते, य.दसाधु- तदसामेति।। 2.1.1।।

- तदुताप्याहु- स्साम्नैन.मुपागा.दिति- साधुनैन.मुपागा.दित्येव तदाहु,रसाम्नैन.मुपागादि-त्यसाधुनैन.मुपगा-दित्येव तदाहुः।। 2.1.2।।

- अथोताप्याहु,स्साम नो बतेति- यत्साधु भवति- साधु बतेत्येव तदाहु,रसाम नो बतेति-यदसाधु भव-त्यसाधु बतेत्येव तदाहुः।। 2.1.3।।

- स य एत.देवँ विद्वा.न्त्साधु सामेत्युपाऽऽस्ते,ऽभ्याशो ह यदेनꣳ साधवो धर्मा- आ च गच्छेयु-रुप च नमेयुः।। 2.1.4।।

द्वितीयꣳ खण्डः।।

- ❃,2.2 लोकेषु पञ्चविधꣳ सामोपाऽऽसीत, पृथिवी हिङ्कारो-ऽग्निꣳ प्रस्तावो-ऽन्तरिक्ष.मुद्गीथ- आदित्यꣳ प्रतिहारो- द्यौ.र्निधन-मित्यूर्ध्वेषु।। 2.2.1।।

- अथाऽऽवृत्तेषु, द्यौ.र्हिङ्कार- आदित्यꣳ प्रस्तावो-ऽन्तरिक्ष.मुद्गीथो-ऽग्निꣳ प्रतिहारꣳ- पृथिवी निधनम्।। 2.2.2।।

- कल्पन्ते हास्मै लोका ऊर्ध्वा.श्चाऽऽवृत्ताश्च- य एत.देवँ विद्वा.न्लोकेषु पञ्चविधꣳ सामोपाऽऽस्ते।। 2.2.3।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham • Mysore •

तृतीयः खण्डः।।

- ❃,2.3 वृष्टौ पञ्चविधꣳ सामोपाऽऽसीत, पुरोवातो हिङ्कारो- मेघो जायते स प्रस्तावो- वर्षति स उद्गीथो- वि द्योतते स्तनयति स प्रतिहार- उद्गृह्णाति तन्निधनम्।। 2.3.1।।
- वर्षति हास्मै- वर्षयति ह- य एत.देवँ विद्वा.न्वृष्टौ पञ्चविधँ सामोपाऽऽस्ते।। 2.3.2।।

चतुर्थः खण्डः।।

- ❃,2.4 सर्वा.स्वप्सु पञ्चविधꣳ सामोपाऽऽसीत, मेघो यत्सम्प्लवते स हिङ्कारो- यद्वर्षति स प्रस्तावो- याः प्राच्य.स्स्यन्दन्ते स उद्गीथो- याः प्रतीच्य स्स प्रतिहार-स्समुद्रो निधनम्।। 2.4.1।।
- न हाप्सु प्रै.त्यप्सुमा.न्भवति- य एत.देवँ विद्वा.न्त्सर्वा.स्वप्सु पञ्चविधꣳ सामोपाऽऽस्ते।। 2.4.2।।

पञ्चमः खण्डः।।

- ❃,2.5 ऋतुषु पञ्चविधꣳ सामोपाऽऽसीत, वसन्तो हिङ्कारो- ग्रीष्मः प्रस्तावो- वर्षा उद्गीथ-श्शर.त्प्रतिहारो- हेमन्तो निधनम्।। 2.5.1।।
- कल्पन्ते हास्मा ऋतव- ऋतुमा.न्भवति- य एत.देवँ विद्वा.नृतुषु पञ्चविधꣳ सामोपाऽऽस्ते।। 2.5.2।।

षष्ठः खण्डः।।

- ❃,2.6 पशुषु पञ्चविधꣳ सामोपाऽऽसीता,ऽजा हिङ्कारो-ऽवयः प्रस्तावो- गाव उद्गीथो-ऽश्वाः प्रतिहारः- पुरुषो निधनम्।। 2.6.1।।
- भवन्ति हास्य पशवः- पशुमा.न्भवति- य एत.देवँ विद्वा.न्पशुषु पञ्चविधꣳ सामोपाऽऽस्ते।। 2.6.2।।

सप्तमः खण्डः।।

- ❃,2.7 प्राणेषु पञ्चविधं परोवरीय स्सामोपाऽऽसीत, प्राणो हिङ्कारो- वाक्प्रस्ताव-श्चक्षु.रुद्गीथ- श्श्रोत्रं प्रतिहारो- मनो निधनं, परोवरीयाꣳसि वा एतानि।। 2.7.1।।
- परोवरीयो हास्य भवति- परोवरीयसो ह लोका.न्जयति- य एत.देवँ विद्वा.न्प्राणेषु पञ्चविधं परोवरीय स्सामोपाऽऽस्त इति तु पञ्चविधस्य।। 2.7.2।।

Sri Ganapati Sacchidananda Avadhoota Datta Peetham • Mysore •

अष्टमः खण्डः।।

- ❃,2.8 अथ सप्तविधस्य, वाचि सप्तविधꣳ सामोपाऽऽसीत, यत्किञ्च वाचो हुमिति- स हिङ्कारो, यत्प्रेति- स प्रस्तावो, यदेति- स आदिः।। 2.8.1।।

- यदुदिति- स उद्गीथो, यत्प्रतीति- स प्रतिहारो, यदुपेति- स उपद्रवो, यन्नीति- तन्निधनम्।। 2.8.2।।

- दुग्धेऽस्मै वा.ग्दोहँ- यो वाचो दोहो,ऽन्नवा.नन्नादो भवति- य एत.देवँ विद्वा.न्वाचि सप्तविधꣳ सामोपाऽऽस्ते।। 2.8.3।।

नवमः खण्डः।।

- ❃,2.9 अथ खल्वमु.मादित्यꣳ सप्तविधꣳ सामोपाऽऽसीत, सर्वदा समस्तेन साम- मां प्रति मां प्रतीति- सर्वेण समस्तेन साम।। 2.9.1।।

- तस्मि.न्निमानि सर्वाणि भूता.न्यन्वायत्तानीति विद्या,त्तस्य यत्पुरोदया-त्स हिङ्कार,स्तदस्य पशवोऽन्वायत्ता-स्तस्मात्ते हिङ्कुर्वन्ति, हिङ्कार.भाजिनो ह्येतस्य साम्नः।। 2.9.2।।

- अथ यत्प्रथमोदिते- स प्रस्ताव,स्तदस्य मनुष्या अन्वायत्ता-स्तस्मात्ते प्रस्तुतिकामाः प्रशꣳसाकामाः, प्रस्ताव.भाजिनो ह्येतस्य साम्नः।। 2.9.3।।

- अथ यत्सङ्गव.वेलायाꣳ स आदि,स्तदस्य वयाꣳ.स्यन्वायत्तानि, तस्मात्ता.न्यन्तरिक्षेऽनारम्भणा.न्यादायाऽऽत्मानं परिपत,न्त्यादि.भाजीनि ह्येतस्य साम्नः।। 2.9.4।।

- अथ यत्सम्प्रति मध्यन्दिने स उद्गीथ,स्तदस्य देवा अन्वायत्ता-स्तस्मात्ते सत्तमाः प्राजापत्याना,मुद्गीथ.भाजिनो ह्येतस्य साम्नः।। 2.9.5।।

- अथ यदूर्ध्वं मध्यन्दिना.त्प्रागपराह्णा-त्स प्रतिहार,स्तदस्य गर्भा अन्वायत्ता-स्तस्मात्ते प्रतिहृता नावपद्यन्ते- प्रतिहार.भाजिनो ह्येतस्य साम्नः।। 2.9.6।।

- अथ यदूर्ध्व.मपराह्णा.त्प्रा.गस्तमया-त्स उपद्रव,स्तदस्याऽऽरण्या अन्वायत्ता-स्तस्मात्ते पुरुष.न्दृष्ट्वा कक्षꣳ श्वभ्र.मित्युप द्रव,न्त्युपद्रव.भाजिनो ह्येतस्य साम्नः।। 2.9.7।।

- अथ यत्प्रथमास्त.मिते- तन्निधन,न्तदस्य पितरोऽन्वायत्ता-स्तस्मात्ता.न्निदधति, निधन.भाजिनो ह्येतस्य साम्न,एव.ङ्खल्वमु.मादित्यꣳ सप्तविधꣳ सामोपाऽऽस्ते।। 2.9.8।।

दशमः खण्डः।।

- ❃,2.10 अथ खल्वात्म.संमित.मतिमृत्यु सप्तविध९ सामोपाऽऽसीत, हिङ्कार इति त्र्यक्षरं- प्रस्ताव इति त्र्यक्षर-न्त.त्समम्।। 2.10.1।।
- आदि.रिति द्व्यक्षरं- प्रतिहार इति चतु.रक्षर-न्तत इहैक- न्त.त्समम्।। 2.10.2।।
- उद्गीथ इति त्र्यक्षर-मुपद्रव इति चतुरक्षर- न्त्रिभि.स्त्रिभि.स्समं भव,त्यक्षर मतिशिष्यते- त्र्यक्षर न्त.त्समम्।। 2.10.3।।
- निधन.मिति त्र्यक्षर-न्तत्सम.मेव भवति, तानि ह वा एतानि द्वावि९शति.रक्षराणि।। 2.10.4।।
- एकवि९श.त्यादित्य.माप्नो-त्येकवि९शो वा इतोऽसा.वादित्यो, द्वावि९शेन पर मादित्या.ज्जयति, तन्नाक.न्त.द्विशोकम्।। 2.10.5।।
- आप्नोति हाऽऽदित्यस्य जयं- परो हास्याऽऽदित्यजया.ज्जयो भवति- य एत.देवँ विद्वा.नात्मसंमित मतिमृत्यु- सप्तविध९ सामोपाऽऽस्ते- सामोपाऽऽस्ते।। 2.10.6।।

एकादश४ खण्डः।।

- ❃,2.11 मनो हिङ्कारो- वाक्प्रस्ताव-श्चक्षु.रुद्गीथ- श्श्रोत्रं प्रतिहार४- प्राणो निधन,- मेत.द्गायत्रं प्राणेषु प्रोतम्।। 2.11.1।।
- स एव.मेत.द्गायत्रं प्राणेषु प्रोतँ वेद- प्राणी भवति- सर्व.मायु.रेति- ज्योग्जीवति- महा.न्प्रजया पशुभि र्भवति- महा.न्कीर्त्या, महामना स्स्या-त्तद्व्रतम्।। 2.11.2।।

द्वादश४ खण्डः।।

- ❃,2.12 अभि मन्थति स हिङ्कारो- धूमो जायते स प्रस्तावो- ज्वलति स उद्गीथो-ऽङ्गारा भवन्ति स प्रतिहार- उपशाम्यति तन्निधन९- स९शाम्यति तन्निधन,मेत.द्रथन्तर.मग्नौ प्रोतम्।। 2.12.1।।
- स य एव.मेत.द्रथन्तर.मग्नौ प्रोतँ वेद- ब्रह्मवर्चस्यन्नादो भवति- सर्व.मायु.रेति- ज्योग्जीवति- महा.न्प्रजया पशुभि र्भवति- महा.न्कीर्त्या, न प्रत्य.ङ्ङग्नि.माचामे-न्न निष्ठीवे-त्तद्व्रतम्।। 2.12.2।।

त्रयोदश४ खण्डः।।

- ❃,2.13 उप मन्त्रयते स हिङ्कारो- ज्ञपयते स प्रस्ताव-स्स्त्रिया सह शेते स उद्गीथः- प्रति स्त्रीं सह शेते स प्रतिहारः- काल.ङ्गच्छति तन्निधनं- पार.ङ्गच्छति तन्निधन,मेत.द्वामदेव्यं मिथुने प्रोतम्।। 2.13.1।।
- स य एव.मेत.द्वामदेव्यं मिथुने प्रोतँ वेद- मिथुनीभवति- मिथुना.न्मिथुना.त्प्रजायते- सर्व.मायु.रेति- ज्योग्जीवति- महा.न्प्रजया पशुभि र्भवति- महा.न्कीर्त्या, न काञ्चन परिहरे-त्तद्व्रतम्।। 2.13.2।।

चतुर्दशः खण्डः।।

- ❃,2.14 उद्य.न्हिङ्कार- उदितः प्रस्तावो- मध्यन्दिन उद्गीथो-ऽपराह्णः प्रतिहारो-ऽस्तँ य.न्निधन,मेत.द्बृह.दादित्ये प्रोतम्।। 2.14.1।।
- स य एव.मेत.द्बृह.दादित्ये प्रोतँ वेद- तेजस्व्यन्नादो भवति- सर्व.मायु.रेति- ज्योग्जीवति- महा.न्प्रजया पशुभि र्भवति- महा.न्कीर्त्या, तपन्त.न्न निन्दे-त्तद्व्रतम्।। 2.14.2।।

पञ्चदशः खण्डः।।

- ❃,2.15 अभ्राणि संप्लवन्ते स हिङ्कारो- मेघो जायते स प्रस्तावो- वर्षति स उद्गीथो- वि द्योतते स्तनयति स प्रतिहार- उद्गृह्णाति तन्निधन,मेत.द्वैरूपं पर्जन्ये प्रोतम्।। 2.15.1।।
- स य एव.मेत.द्वैरूपं पर्जन्ये प्रोतँ वेद- विरूपाँश्च सुरूपाँश्च पशू.नव रुन्धे- सर्व.मायु.रेति- ज्योग्जीवति- महा.न्प्रजया पशुभि र्भवति- महा.न्कीर्त्या, वर्षन्त न्न निन्दे-त्तद्व्रतम्।। 2.15.2।।

षोडशः खण्डः।।

- ❃,2.16 वसन्तो हिङ्कारो- ग्रीष्मः प्रस्तावो- वर्षा उद्गीथ-श्शर.त्प्रतिहारो- हेमन्तो निधन,मेत.द्वैराज.मृतुषु प्रोतम्।। 2.16.1।।
- स य एव.मेत.द्वैराज.मृतुषु प्रोतँ वेद- विराजति प्रजया पशुभि र्ब्रह्मवर्चसेन- सर्व.मायु.रेति- ज्योग्जीवति- महा.न्प्रजया पशुभि र्भवति- महा.न्की,र्त्यर्तू.न्न निन्दे-त्तद्व्रतम्।। 2.16.2।।

सप्तदशः खण्डः।।

- ❃,2.18 पृथिवी हिङ्कारो-ऽन्तरिक्षं प्रस्तावो- द्यौ.रुद्गीथो- दिशः प्रतिहार-स्समुद्रो निधन,मेता श्शक्वर्यो लोकेषु प्रोताः।। 2.17.1।।

• स य एव.मेता श्शाक्वर्यो लोकेषु प्रोता वेद- लोकी भवति- सर्व.मायु.रेति- ज्योग्जीवति- महा.न्प्रजया पशुभि र्भवति- महा.न्कीर्त्या- लोकान्न निन्दे,त्तद्व्रतम्।। 2.17.2।।

अष्टादश॰ खण्डः।।

• ❃,2.18 अजा हिङ्कारो-ऽवय॰ प्रस्तावो- गाव उद्गीथो-ऽश्वा॰ प्रतिहार॰- पुरुषो निधन,मेता रेवत्य॰ पशुषु प्रोताः।। 2.18.1।।

• स य एव.मेता रेवत्य॰ पशुषु प्रोता वेद- पशुमा.न्भवति- सर्व.मायु.रेति- ज्योग्जीवति- महा.न्प्रजया पशुभि र्भवति- महा.न्कीर्त्या, पशून्न निन्दे-त्तद्व्रतम्।। 2.18.2।। (रेवत्यः इति शस्- पूर्वसवर्णाऽऽदेशाभाव.श्छान्दसः)

एकोनविꣳश॰ खण्डः।।

• ❃,2.19 लोम हिङ्कार-स्त्वक्प्रस्तावो- माꣳस.मुद्गीथो-ऽस्थि प्रतिहारो- मज्जा निधन,मेत द्यज्ञायज्ञीय.मङ्गेषु प्रोतम्।। 2.19.1।।

• स य एव.मेत.द्यज्ञायज्ञीय.मङ्गेषु प्रोतँ वे-दाङ्गी भवति- नाङ्गेन विहूर्छति- सर्व.मायु.रेति- ज्योग्जीवति- महा.न्प्रजया पशुभि र्भवति- महा.न्कीर्त्या, सँवत्सरं मज्ज्ञो नाश्नीया-त्तद्व्रतं, मज्ज्ञो नाश्नीया.दिति वा।। 2.19.2।।

विꣳश॰ खण्डः।।

• ❃,2.20 अग्नि.र्हिङ्कारो- वायु॰ प्रस्ताव- आदित्य उद्गीथो- नक्षत्राणि प्रतिहार-श्चन्द्रमा निधन,मेत.द्राजन.न्देवतासु प्रोतम्।। 2.20.1।।

• स य एव.मेत.द्राजन.न्देवतासु प्रोतँ वे.दैतासामेव देवतानाꣳ सलोकताꣳ सार्ष्टिताꣳ सायुज्य.ङ्गच्छति- सर्व.मायु.रेति- ज्योग्जीवति- महा.न्प्रजया पशुभि र्भवति- महा.न्कीर्त्या, ब्राह्मणा.न्न निन्दे-त्तद्व्रतम्।। 2.20.2।।

एकविꣳश॰ खण्डः।।

• ❃,2.21 त्रयी विद्या हिङ्कार- स्त्रय इमे लोका स्स प्रस्तावो-ऽग्नि.र्वायु.रादित्य स्स उद्गीथो- नक्षत्राणि वयाꣳसि मरीचय.स्स प्रतिहार- स्सर्पा गन्धर्वा॰ पितर.स्तन्निधन,मेतत्साम सर्वस्मि.न्प्रोतम्।। 2.21.1।।

• स य एव.मेत.त्साम सर्वस्मि.न्प्रोतँ वेद- सर्वꣳ ह भवति।। 2.21.2।।

- तदेष श्लोको, यानि पञ्चधा त्रीणि त्रीणि- तेभ्यो न ज्यायꣳ पर.मन्य.दस्ति। यस्त.द्वेद स वेद सर्वꣳ- सर्वा दिशो बलि.मस्मै हरन्ति।। 2.21.3।।
- सर्व.मस्मीत्युपाꣳसीत- तद्व्रत.न्तद्व्रतम्।। 2.21.4।।

द्वाविꣳशꣳ खण्डः।।

- ❃,2.22 विनर्दि साम्नो वृणे पशव्य.मि-त्यग्ने रुद्गीथो,ऽनिरुक्तꣳ प्रजापते- र्निरुक्त स्सोमस्य- मृदु श्लक्ष्णँ वायो-श्श्लक्ष्णं बलव.दिन्द्रस्य- क्रौञ्चं बृहस्पते- रपध्वान्तँ वरुणस्य, ता.न्त्सर्वा.नेवोप सेवेत- वारुण.न्त्वेव वर्जयेत्।। 2.22.1।।
- अमृतत्व.न्देवेभ्य आगाया.नी-त्यागाये-त्स्वधां पितृभ्य- आशां मनुष्येभ्य-स्तृणोदकं पशुभ्य- स्स्वर्गँ लोकँ यजमाना-यान्न.मात्मन- आगाया.नी,त्येतानि मनसा ध्याय.न्नप्रमत्त.स्स्तुवीत।। 2.22.2।।
- सर्वे स्वरा इन्द्रस्याꣳत्मान- स्सर्व ऊष्माणꣳ प्रजापते.रात्मान- स्सर्वे स्पर्शा मृत्यो.रात्मान,स्तँ यदि स्वरेषूपाꣳलभे.तेन्द्रꣳ शरणं प्रपन्नोऽभूवꣳ- स त्वा प्रति वक्ष्य.तीत्येनं ब्रूयात्।। 2.22.3।।
- अथ यद्येन.मूष्मसूपाꣳलभेत- प्रजापतिꣳ शरणं प्रपन्नोऽभूवꣳ- स त्वा प्रति पेक्ष्यती-त्येनं ब्रूया,दथ यद्येनꣳ स्पर्शेषूपाꣳलभेत- मृत्युꣳ शरणं प्रपन्नोऽभूवँ- स त्वा प्रति धक्ष्यती-त्येनं ब्रूयात्।। 2.22.4।।
- सर्वे स्वरा घोषवन्तो बलवन्तो वक्तव्या- इन्द्रे बल.न्ददानीति, सर्व ऊष्माणोऽग्रस्ता अनिरस्ता विवृता वक्तव्याꣳ- प्रजापते.रात्मानं परिददानीति, सर्वे स्पर्शा लेशे.नानभिनिहिता वक्तव्या- मृत्यो.रात्मानं परिहराणीति।। 2.22.5।।

त्रयोविꣳशꣳ खण्डः।।

- ❃,2.23 त्रयो धर्मस्कन्धा- यज्ञो.ऽध्ययन.न्दानमिति प्रथम,स्तप एव द्वितीयो, ब्रह्मचा.र्याचार्यकुल.वासी तृतीयो,ऽत्यन्त.मात्मान माचार्यकुलेऽवसादय-न्त्सर्व एते पुण्यलोका भवन्ति- ब्रह्मसꣳस्थोऽमृतत्व.मेति।। 2.23.1।।
- प्रजापति.र्लोका.नभ्यतप-त्तेभ्योऽभितप्तेभ्य स्त्रयी विद्या सम्प्रास्रव,त्तामभ्यतप-त्तस्या अभितप्ताया- एता.न्यक्षराणि सम्प्रास्रवन्त- भू.र्भुव.स्स्व.रिति।। 2.23.2।।

Sri Ganapati Sacchidananda Avadhoota Datta Peetham • Mysore

- तान्यभ्यतप-त्तेभ्योऽभितप्तेभ्य- ओङ्कार स्सम्प्रास्त्रव,त्तद्यथा शङ्कुना सर्वाणि पर्णानि सन्तृण्णा-न्येव मोङ्कारेण सर्वा वाक्सन्तृ,ण्णोङ्कार एवेद९ सर्व- मोङ्कार एवेद९ सर्वम्।। 2.23.3।।

चतुर्वि९श४ खण्डः।।

- ,2.24 ब्रह्मवादिनो वदन्ति, यद्वसूनां प्रातस्सवन९- रुद्राणां माध्यन्दिन९ सवन-मादित्यानाञ्च विश्वेषाञ्च देवाना न्तृतीयसवनम्।। 2.24.1।।
- क्व तर्हि यजमानस्य लोक इति, स य.स्तन्न विद्या-त्कथ.ङ्कुर्या,दथ विद्वा.न्कुर्यात्।। 2.24.2।।
- पुरा प्रात.रनुवाकस्योपाऽऽकरणा.ज्जघनेन गार्हपत्य.स्योदङ्मुख उपविश्य, स वासव९ सामाभि गायति।। 2.24.3।।
- लो१कद्वा२र मपा२वार्णू२३। प३श्ये५म त्वा१ वय९ रा२ऽ1212। हि१म्(स्थि)आ२३। ज्या१यो। आ२ऽ345 इति।। 2.24.4।।
- अथ जुहोति- नमोऽग्नये पृथिवीक्षिते लोकक्षिते- लोकं मे यजमानाय वि-न्दैष वै यजमानस्य लोक एतास्मि।। 2.24.5।।
- अत्र यजमान४- परस्ता.दायुष स्स्वाहाऽपजहि परिघ-मित्युक्त्वो.त्तिष्ठति, तस्मै वसव४ प्रातस्सवन९ संप्रयच्छन्ति।। 2.24.6।।
- पुरा माध्यन्दिनस्य सवनस्योपाऽऽकरणा.ज्जघनेना.ऽऽग्नीध्रीय.स्योदङ्मुख उपविश्य, स रौद्र९ सामाभिगायति।। 2.24.7।।
- लो१कद्वा२र मपा२वार्णू२३। प३श्ये५म त्वा१ वयँ वै१रा२ऽ1212। हि१म्(स्थि)आ२३। ज्या१यो। आ२ऽ345 इति।। 2.24.8।।
- अथ जुहोति- नमो वायवेऽन्तरिक्षक्षिते लोकक्षिते- लोकं मे यजमानाय वि-न्दैष वै यजमानस्य लोक एतास्मि।। 2.24.9।।
- अत्र यजमान४- परस्ता.दायुष स्स्वाहाऽपजहि परिघ-मित्युक्त्वो.त्तिष्ठति, तस्मै रुद्रा माध्यन्दिन९ सवन९ संप्रयच्छन्ति।। 2.24.10।।

- पुरा तृतीयसवन.स्योपाऽऽकरणा ज्जघनेना.ऽऽहवनीय.स्योदङ्मुख उपविश्य, स आदित्यꣳ स वैश्वदेवꣳ सामाभिगायति।। 2.24.11।।

- लोꣳकद्वाꣳरमपाꣳवार्णूꣳऽ३। पꣳश्येꣳम त्वाꣳ वयꣳ स्वाꣳराꣳऽ1212। हिꣳम्(स्थि)आऽ३। ज्याꣳयो। ओꣳऽ3ꣳ4ꣳ5ꣳ इ.त्यादित्यम्।। 2.24.12।।

- अथ वैश्वदेवम्- लोꣳकद्वाꣳरमपाꣳवार्णूꣳऽ३। पꣳश्येꣳम त्वाꣳ वयꣳ साम्राꣳऽ1212। हिꣳम्(स्थि)आऽ३। ज्याꣳयो। ओꣳऽ3ꣳ4ꣳ5ꣳ इति।। 2.24.13।।

- अथ जुहोति- नम आदित्येभ्यश्च विश्वेभ्यश्च देवेभ्यो दिविक्षिद्भ्यो लोकक्षिद्भ्यो- लोकं मे यजमानाय विन्दत।। 2.24.14।।

- एष वै यजमानस्य लोक एता,स्म्यत्र यजमानः- परस्ता.दायुष स्स्वाहाऽपहत परिघ-मित्यु.त्त्वोत्तिष्ठति।। 2.24.15।।

- तस्मा आदित्याश्च विश्वे च देवा स्तृतीयसवनꣳ संप्रयच्छ,न्त्येष ह वै यज्ञस्य मात्राँ वेद- य एवँ वेद- य एवँ वेद।। 2.24.16।।

इति द्वितीयोऽध्यायः।।

## छान्दोग्योपनिषदि तृतीयोऽध्यायः।।

प्रथमः खण्डः।।

- ❃,3.1 असौ वा आदित्यो देवमधु, तस्य द्यौ.रेव तिरश्चीन.वꣳशो-ऽन्तरिक्ष मपूपो-मरीचयः पुत्राः।। 3.1.1।।

- तस्य ये प्राञ्चो रश्मय-स्ता एवास्य प्राच्यो मधुनाड्यः। ऋच एव मधुकृत- ऋग्वेद एव पुष्प- न्ता अमृता आप- स्ता वा एता ऋचः।। 3.1.2।।

- एत.मृग्वेद मभ्यतप,ꣳस्तस्याभितप्तस्य यश.स्तेज इन्द्रियँ वीर्य.मन्नाद्यꣳ रसोऽजायत।। 3.1.3।।

- तद्व्यक्षर-त्तदादित्य.मभितोऽश्रय,त्तद्वा एत-द्यदेत.दादित्यस्य रोहितꣳ रूपम्।। 3.1.4।।

द्वितीयः खण्डः।।

- ❃,3.2 अथ येऽस्य दक्षिणा रश्मय-स्ता एवास्य दक्षिणा मधुनाड्यो, यजूꣳष्येव मधुकृतो-यजुर्वेद एव पुष्प- न्ता अमृता आपः।। 3.2.1।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

- तानि वा एतानि यजू९ष्येतँ यजुर्वेद मभ्यतप,९स्तस्याभितप्तस्य यश.स्तेज इन्द्रियँ वीर्य.मन्नाद्य९ रसोऽजायत।। 3.2.2।।
- तद्यक्षर-त्तदादित्य.मभितो ऽश्रय,त्तद्वा एत-द्यदेत.दादित्यस्य शुक्ल९ रूपम्।। 3.2.3।।

तृतीय४ खण्डः।।

- ,3.3 अथ येऽस्य प्रत्यञ्चो रश्मय-स्ता एवास्य प्रतीच्यो मधुनाड्य,स्सामान्येव मधुकृत-स्सामवेद एव पुष्प- न्ता अमृता आपः।। 3.3.1।।
- तानि वा एतानि सामा.न्येत९ सामवेद मभ्यतप९,स्तस्याभितप्तस्य यश.स्तेज इन्द्रियँ वीर्य.मन्नाद्य९ रसोऽजायत।। 3.3.2।।
- तद्यक्षर-त्तदादित्य.मभितो ऽश्रय,त्तद्वा एत-द्यदेत.दादित्यस्य कृष्ण९ रूपम्।। 3.3.3।।

चतुर्थ४ खण्डः।।

- ,3.4 अथ येऽस्योदञ्चो रश्मय-स्ता एवास्योदीच्यो मधुनाड्यो,ऽथर्वाङ्गिरस एव मधुकृत-इतिहास.पुराणं पुष्प- न्ता अमृता आपः।। 3.4.1।।
- ते वा एतेऽथर्वाङ्गिरस- एत.दितिहास.पुराण मभ्यतप९,स्तस्याभितप्तस्य यश.स्तेज इन्द्रियँ वीर्य.मन्नाद्यँ रसोऽजायत।। 3.4.2।।
- तद्यक्षर-त्तदादित्य.मभितोऽश्रय,त्तद्वा एत-द्यदेत.दादित्यस्य पर.ङ्कृष्ण९रूपम्।। 3.4.3।।

पञ्चम४ खण्डः।।

- अथ येऽस्योर्ध्वा रश्मय-स्ता एवास्योर्ध्वा मधुनाड्यो, गुह्या एवाऽऽदेशा मधुकृतो- ब्रह्मैव पुष्प- न्ता अमृता आपः।। 3.5.1।।
- ते वा एते गुह्या आदेशा- एत.द्ब्रह्माभ्यतप९,स्तस्याभितप्तस्य यश.स्तेज इन्द्रियँ वीर्य.मन्नाद्य९ रसोऽजायत।। 3.5.2।।
- तद्यक्षर-त्तदादित्य.मभितो ऽश्रय,त्तद्वा एत-द्यदेत.दादित्यस्य मध्ये क्षोभत इव।। 3.5.3।।
- ते वा एते रसाना९ रसा, वेदा हि रसा-स्तेषा मेते रसा-स्तानि वा एता.न्यमृताना ममृतानि, वेदा ह्यमृता-स्तेषा मेता.न्यमृतानि।। 3.5.4।।

षष्ठ४ खण्डः।।

- ❋,3.6 तद्यत्प्रथम.ममृत-न्तद्वसव उपजीव.न्त्यग्निना मुखेन, न वै देवा अश्नन्ति- न पिब,न्त्येत.देवामृत न्दृष्ट्वा तृप्यन्ति।। 3.6.1।।
- त एत.देव रूप.मभि सँविश-न्त्येतस्मा.द्रूपा.दुद्यन्ति।। 3.6.2।।
- स य एत.देव ममृतँ वेद- वसूना.मेवैको भूत्वाऽग्निनैव मुखेनैत.देवामृत न्दृष्ट्वा तृप्यति, स एत.देव रूप.मभि सँविश-त्येतस्मा.द्रूपा.दुदेति।। 3.6.3।।
- स याव.दादित्यः पुरस्ता.दुदेता- पश्चा.दस्त.मेता- वसूना.मेव ताव.दाधिपत्यँ स्वाराज्यं पर्येता।। 3.6.4।।

सप्तमः खण्डः।।

- ❋,3.7 अथ यद्द्वितीय.ममृत-न्तद्रुद्रा उपजीव.न्तीन्द्रेण मुखेन, न वै देवा अश्नन्ति- न पिब,न्त्येत.देवामृत न्दृष्ट्वा तृप्यन्ति।। 3.7.1।।
- त एत.देव रूप.मभि सँविश-न्त्येतस्मा.द्रूपा.दुद्यन्ति।। 3.7.2।।
- स य एत.देव ममृतँ वेद- रुद्राणा.मेवैको भूत्वेन्द्रेणैव मुखेनैत.देवामृत न्दृष्ट्वा तृप्यति, स एत.देव रूप.मभि सँविश-त्येतस्मा.द्रूपा.दुदेति।। 3.7.3।।
- स याव.दादित्यः पुरस्ता.दुदेता- पश्चा.दस्त.मेता, द्विस्ताव.द्दक्षिणत उदेतोत्तरतोऽस्त.मेता, रुद्राणा मेव ताव.दाधिपत्यँ स्वाराज्यं पर्येता।। 3.7.4।।

अष्टमः खण्डः।।

- अथ यत्तृतीय.ममृत- न्तदादित्या उपजीवन्ति वरुणेन मुखेन, न वै देवा अश्नन्ति- न पिब,न्त्येत.देवामृत न्दृष्ट्वा तृप्यन्ति।। 3.8.1।।
- त एत.देव रूप.मभि सँविश-न्त्येतस्मा.द्रूपा.दुद्यन्ति।। 3.8.2।।
- स य एत.देव ममृतँ वेदाऽऽदित्याना.मेवैको भूत्वा- वरुणेनैव मुखेनैत.देवामृत न्दृष्ट्वा तृप्यति, स एत.देव रूप.मभि सँविश-त्येतस्मा.द्रूपा.दुदेति।। 3.8.3।।
- स याव.दादित्यो दक्षिणत उदेतोत्तरतोऽस्त.मेता- द्विस्ताव.त्पश्चा.दुदेता- पुरस्ता.दस्त.मेता-ऽऽदित्याना.मेव ताव.दाधिपत्यँ स्वाराज्यं पर्येता।। 3.8.4।।

नवमः खण्डः।।

Sri Sachchidananda Avadhoota Datta Peetham

- ⁂,3.9 अथ यच्चतुर्थ.ममृत- न्तन्मरुत उपजीवन्ति सोमेन मुखेन, न वै देवा अश्नन्ति- न पिब-न्त्येत.देवामृत न्दृष्ट्वा तृप्यन्ति।। 3.9.1।।
- त एत.देव रूप.मभि सँविश-न्त्येतस्मा.द्रूपा.दुद्यन्ति।। 3.9.2।।
- स य एत.देव ममृतँ वेद- मरुता.मेवैको भूत्वा- सोमेनैव मुखेनैत.देवामृत न्दृष्ट्वा तृप्यति, स एत.देव रूप.मभि सँविश-त्येतस्मा.द्रूपा.दुदेति।। 3.9.3।।
- स याव.दादित्यꣳ पश्चा.दुदेता- पुरस्ता.दस्त.मेता- द्विस्ताव.दुत्तरत उदेता- दक्षिणतोऽस्त.मेता, मरुता मेव ताव.दाधिपत्यꣳ स्वाराज्यं पर्येता।। 3.9.4।।

**दशमꣳ खण्डः।।**

- ⁂,3.10 अथ यत्पञ्चम.ममृत- न्तत्साध्या उपजीवन्ति ब्रह्मणा मुखेन, न वै देवा अश्नन्ति- न पिब,न्त्येत.देवामृत न्दृष्ट्वा तृप्यन्ति।। 3.10.1।।
- त एत.देव रूप.मभि सँविश-न्त्येतस्मा.द्रूपा.दुद्यन्ति।। 3.10.2।।
- स य एत.देव ममृतँ वेद- साध्याना.मेवैको भूत्वा- ब्रह्मणैव मुखेनैत.देवामृत न्दृष्ट्वा तृप्यति, स एत.देव रूप.मभि सँविश-त्येतस्मा.द्रूपा.दुदेति।। 3.10.3।।
- स याव.दादित्य उत्तरत उदेता- दक्षिणतोऽस्त.मेता- द्विस्ताव.दूर्ध्व उदेता- ऽर्वा.गस्त.मेता, साध्याना मेव ताव.दाधिपत्यꣳ स्वाराज्यं पर्येता।। 3.10.4।।

**एकादशꣳ खण्डः।।**

- ⁂,3.11 अथ तत ऊर्ध्व उदेत्य- नैवोदेता नास्त.मेतैकल एव मध्ये स्थाता- तदेष श्लोकः।। 3.11.1।। (एता, एकलः)
- न वै तत्र न निम्लोच- नोदियाय कदाचन। देवा स्तेनाहꣳ सत्येन- मा विराधिषि ब्रह्मणेति।। 3.11.2।।
- न ह वा अस्मा उदेति- न निम्लोचति, सकृ.द्दिवा हैवास्मै भवति- य एता मेवं ब्रह्मोपनिषदँ वेद।। 3.11.3।।
- तद्धैत.द्ब्रह्मा प्रजापतय उवाच- प्रजापति र्मनवे- मनुꣳ प्रजाभ्य- स्तद्धैत.दुद्दालकायाऽऽरुणये ज्येष्ठाय पुत्राय पिता ब्रह्म प्रोवाच।। 3.11.4।।
- इदँ वाव तज्ज्येष्ठाय पुत्राय पिता ब्रह्म प्रब्रूया-त्प्रणाय्याय वाऽन्तेवासिने।। 3.11.5।।

• नान्यस्मै कस्मैचन, यद्यप्यस्मा इमा.मद्भिः परिगृहीता.न्धनस्य पूर्णा न्दद्या-देत.देव ततो भूय इ-त्येत.देव ततो भूय इति।। 3.11.6।।

द्वादशः खण्डः।।

• ❉,3.12 गायत्री वा इदꣳ सर्वं भूतँ- यदिद.ङ्किञ्च, वाग्वै गायत्री- वाग्वा इदꣳ सर्वं भूत-ङ्गायति च त्रायते च।। 3.12.1।।

• या वै सा गाय,त्रीयँ वाव सा- येयं पृथि,व्यस्याꣳ हीदꣳ सर्वं भूतं प्रतिष्ठित-मेता.मेव नातिशीयते।। 3.12.2।।

• या वै सा पृथि.वीयँ वाव सा, यदिद.मस्मि.न्पुरुषे शरीर-मस्मिन् हीमे प्राणाः प्रतिष्ठिता-एत.देव नातिशीयन्ते।। 3.12.3।।

• यद्वै तत्पुरुषे शरीर-मिदँ वाव त,द्यदिद.मस्मि.न्नन्तः पुरुषे हृदय-मस्मिन् हीमे प्राणाः प्रतिष्ठिता- एत.देव नातिशीयन्ते।। 3.12.4।।

• सैषा चतुष्पदा षड्विधा गायत्री- तदेत.दृचाऽभ्यनूक्तम्।। 3.12.5।।

• तावा.नस्य महिमा- ततो ज्यायाꣳश्च पूरुषः। पादोऽस्य सर्वा भूतानि- त्रिपा.दस्याऽमृत न्दिवीति।। 3.12.6।।

• यद्वै तद्ब्र.ह्मेतीदँ वाव त,द्योऽयं बहिर्धा पुरुषा.दाकाशो- यो वै स बहिर्धा पुरुषा.दाकाशः।। 3.12.7।।

• अयँ वाव स- योऽय.मन्तः पुरुष आकाशो, यो वै- सोऽन्तः पुरुष आकाशः।। 3.12.8।।

• अयँ वाव स- योऽय.मन्तर्हृदय आकाश-स्तदेत.त्पूर्ण.मप्रवर्ति, पूर्णा.मप्रवर्तिनीꣳ श्रियँ लभते- य एवँ वेद।। 3.12.9।।

त्रयोदशः खण्डः।।

• ❉,3.13 तस्य ह वा एतस्य हृदयस्य पञ्च देवसुषय,स्स योऽस्य प्राङ्सुषि- स्स प्राण-स्तच्चक्षु- स्स आदित्य,स्तदेत.त्तेजोऽन्नाद्य.मित्युपाऽऽसीत, तेजस्व्यन्नादो भवति- य एवँ वेद।। 3.13.1।।

- अथ योऽस्य दक्षिण.स्सुषि- स्स व्यान-स्तच्छ्रोत्रꣳ- स चन्द्रमा,स्तदेत.च्छ्रीश्च यश.श्चेत्युपाꣳसीत, श्रीमान् यशस्वी भवति- य एवँ वेद।। 3.13.2।।
- अथ योऽस्य प्रत्य.ङ्क्षुषि- स्सोऽपान-स्सा वा.क्सोऽग्नि,स्तदेत.द्ब्रह्मवर्चस.मन्नाद्य. मित्युपाꣳसीत, ब्रह्मवर्च.स्यन्नादो भवति- य एवँ वेद।। 3.13.3।।
- अथ योऽस्योद.ङ्क्षुषि- स्स समान-स्तन्मन- स्स पर्जन्य,स्तदेत.त्कीर्तिश्च व्युष्टिश्चे.त्युपाꣳसीत, कीर्तिमा.न्व्युष्टिमा.न्भवति- य एवँ वेद।। 3.13.4।।
- अथ योऽस्योर्ध्व.स्सुषि- स्स उदान- स्स वायु- स्स आकाश,स्तदेत.दोजश्च महश्चे.त्युपाꣳसी,तौजस्वी महस्वा.न्भवति- य एवँ वेद।। 3.13.5।।
- ते वा एते पञ्च ब्रह्मपुरुषा- स्स्वर्गस्य लोकस्य द्वारपा,स्स य एता.नेवं पञ्च ब्रह्मपुरुषा न्त्स्वर्गस्य लोकस्य द्वारपान् वेदा.ꣳस्य कुले वीरो जायते, प्रतिपद्यते स्वर्गँ लोकँ- य एता.नेवं पञ्च ब्रह्मपुरुषा न्त्स्वर्गस्य लोकस्य द्वारपान् वेद।। 3.13.6।।
- अथ य.दतꣳ परो दिवो ज्योति र्दीप्यते- विश्वतꣳ पृष्ठेषु- सर्वतꣳ पृष्ठे-ष्वनुत्तमे.षूत्तमेषु लोके,ष्विदँ वाव त-द्यदिद.मस्मि.न्नन्तꣳपुरुषे ज्योतिः।। 3.13.7।।
- तस्यैषा दृष्टि-र्यत्रैत.दस्मि.न्छरीरे सꣳस्पर्शेनोष्णिमानँ विजानाति, तस्यैषा श्रुति-र्यत्रैत.त्कर्णा.वपिगृह्य- निनद.मिव नदथु.रिवाग्नेरिव ज्वलत उपश्रृणोति, तदेत.द्दृष्टञ्च श्रुत.ञ्चेत्युपाꣳसीत, चक्षुष्य.श्श्रुतो भवति- य एवँ वेद- य एवँ वेद।। 3.13.8।।

चतुर्दशꣳ खण्डः।।

- ꣳ,3.14 सर्व.ङ्खल्विदं ब्रह्म- तज्जलानिति शान्त उपाꣳसीत। अथ खलु क्रतुमयꣳ पुरुषो, यथा क्रतु.रस्मि.न्लोके पुरुषो भवति- तथेतꣳ प्रेत्य भवति- स क्रतु.ङ्कुर्वीत।। 3.14.1।।
- मनोमयꣳ प्राणशरीरो भारूप स्सत्यसङ्कल्प आकाशाꣳत्मा सर्वकर्मा सर्वकाम स्सर्वगन्ध स्सर्वरस स्सर्व.मिद मभ्यत्तोऽवा.क्यनादरः।। 3.14.2।।
- एष म आत्माऽन्तर्हृदयेऽणीया.न्व्रीहेर्वा यवाद्वा सर्षपाद्वा श्यामाका.द्वा श्यामाक.तण्डुला.द्वैषम आत्माऽन्त.र्हृदये, ज्याया.न्पृथिव्या- ज्याया.नन्तरिक्षा- ज्ज्याया.न्दिवो- ज्याया.नेभ्यो लोकेभ्यः।। 3.14.3।। (तण्डुलात्, वा, ऐषमः)

• सर्वकर्मा सर्वकाम स्सर्वगन्ध स्सर्वरस- स्सर्व.मिद मभ्यत्तोऽवा.क्यनादर, एष म आत्माऽन्तर्हृदय- एत.द्ब्र,ह्मैत.मितः प्रेत्याऽभि संभवितास्मीति यस्य स्या,दद्धा न विचिकित्साऽस्तीति ह स्माऽऽह शाण्डिल्य श्शाण्डिल्यः।। 3.14.4।।

पञ्चदशः खण्डः।।

• ❃,3.15 अन्तरिक्षोदरः कोशो- भूमिबुध्नो न जीर्यति- दिशो ह्यस्य स्रक्तयो- द्यौ.रस्योत्तरं बिलꣳ, स एष कोशो वसुधान- स्तस्मि.न्विश्व.मिदꣳ श्रितम्।। 3.15.1।।

• तस्य प्राची दि.ग्जुहूर्नाम- सहमाना नाम दक्षिणा- राज्ञी नाम प्रतीची- सुभूता ना.मोदीची, तासाँ वायु.र्वत्स,स्स य एत.मेवँ वायु.न्दिशाँ वत्सँ वेद- न पुत्ररोदꣳ रोदिति, सोऽह.मेत मेवँ वायु.न्दिशाँ वत्सँ वेद- मा पुत्ररोदꣳ रुदम्।। 3.15.2।।

• अरिष्ट.ङ्कोशं प्रपद्येऽमुनाऽमुनाऽमुना, प्राणं प्रपद्येऽमुनाऽमुनाऽमुना, भूः प्रपद्येऽमुनाऽमुनाऽमुना, भुवः प्रपद्येऽमुनाऽमुनाऽमुना, स्वः प्रपद्येऽमुनाऽमुनाऽमुना।। 3.15.3।।

• स य.दवोचं प्राणं प्रपद्य इति- प्राणो वा इदꣳ सर्वं भूतँ- यदिद.ङ्किञ्च, तमेव तत्प्रापत्सि।। 3.15.4।।

• अथ य.दवोचं भूः प्रपद्य इति- पृथिवीं प्रपद्येऽन्तरिक्षं प्रपद्ये दिवं प्रपद्य- इत्येव त.दवोचम्।। 3.15.5।।

• अथ य.दवोचं भुवः प्रपद्य इ-त्यग्निं प्रपद्ये वायुं प्रपद्य आदित्यं प्रपद्य- इत्येव त.दवोचम्।। 3.15.6।।

• अथ य.दवोचꣳ स्वः प्रपद्य इ-त्यृग्वेदं प्रपद्ये यजुर्वेदं प्रपद्ये सामवेदं प्रपद्य- इत्येव त.दवोच न्त.दवोचम्।। 3.15.7।।

षोडशः खण्डः।।

• ❃,3.16 पुरुषो वाव यज्ञ,स्तस्य यानि चतुर्विꣳशति वर्षाणि- तत्प्रातस्सवन,- श्चतुर्विꣳशत्यक्षरा गायत्री- गायत्रं प्रातस्सवन- न्तदस्य वसवोऽन्वायत्ताः, प्राणा वाव वसव- एते हीदꣳ सर्वँ वासयन्ति।। 3.16.1।।

* तञ्चे.देतस्मि.न्वयसि किञ्चि.दुपतपे-त्स ब्रूया,त्प्राणा वसव- इदं मे प्रातस्सवनं माध्यन्दिन॰ सवन मनु सन्तनुतेति, माऽहं प्राणानाँ वसूनां मध्ये यज्ञो विलोप्सीये-त्युद्धैव तत ए.त्यगदो ह भवति।। 3.16.2।।
* अथ यानि चतुश्चत्वारि॰शं.द्वर्षाणि- त.न्माध्यन्दिन॰ सवन-ञ्चतुश्चत्वारि॰शं.दक्षरा त्रिष्टु-ब्त्रैष्टुभं माध्यन्दिन॰ सवन-न्तदस्य रुद्रा अन्वायत्ताः, प्राणा वाव रुद्रा- एते हीद॰ सर्व॰ रोदयन्ति।। 3.16.3।।
* तञ्चे.देतस्मि.न्वयसि किञ्चि.दुपतपे-त्स ब्रूया,त्प्राणा रुद्रा- इदं मे माध्यन्दिन॰ सवन न्तृतीयसवन मनु सन्तनुतेति, माऽहं प्राणाना॰ रुद्राणां मध्ये यज्ञो विलोप्सीये,त्युद्धैव तत ए.त्यगदो ह भवति।। 3.16.4।।
* अथ यान्यष्टाचत्वारि॰शं.द्वर्षाणि- तत्तृतीयसवन,मष्टाचत्वारि॰शं.दक्षरा जगती- जागत न्तृतीयसवन-न्तदस्याऽऽदित्या अन्वायत्ताः, प्राणा वावाऽऽदित्या- एते हीद॰ सर्वं.माददते।। 3.16.5।।
* तञ्चे.देतस्मि.न्वयसि किञ्चि.दुपतपे-त्स ब्रूया,त्प्राणा आदित्या- इदं मे तृतीयसवन मायु.रनु सन्तनुतेति, माऽहं प्राणाना मादित्यानां मध्ये यज्ञो विलोप्सीये,त्युद्धैव तत ए.त्यगदो हैव भवति।। 3.16.6।।
* एतद्ध स्म वै तद्विद्वा नाह महिदास ऐतरेय-स्स किं म एत.दुपतपसि- योऽह.मनेन न प्रेष्यामीति, स ह षोडशँ वर्षशत मजीव,त्प्र ह षोडशँ वर्षशत.ञ्जीवति- य एवँ वेद।। 3.16.7।।

सप्तदशः खण्डः।।

* ❃,3.17 स य.दशिशिषति- यत्पिपासति- यन्न रमते- ता अस्य दीक्षाः।। 3.17.1।।
* अथ यदश्नाति- यत्पिबति- यद्रमते- त.दुपसदै.रेति।। 3.17.2।।
* अथ यद्धसति- यज्जक्षति- यन्मैथुन ञ्चरति- स्तुतशस्त्रैरेव त.देति।। 3.17.3।।
* अथ यत्तपो दान.मार्जव.महि॰सा सत्यवचन.मिति- ता अस्य दक्षिणाः।। 3.17.4।।
* तस्मा.दाहु स्सोष्य.त्यसोष्टेति- पुन.रुत्पादन मेवास्य त,न्मरण मेवावभृथः।। 3.17.5।।

- तद्धैत.द्घोर आङ्गिरसः- कृष्णाय देवकीपुत्रायो.त्त्वोवाचा-ऽपिपास एव स बभूव, सोऽन्त.वेलाया मेतत्त्रयं प्रतिपद्येता,ऽक्षित म-स्यच्युत.मसि- प्राणसꣳशित.मसीति, तत्रैते द्वे ऋचौ भवतः।। 3.17.6।।

- आदि.त्प्रत्नस्य रेतसः। उद्वय.न्तमस.स्परि ज्योतिः- पश्यन्त उत्तरꣳ- स्वः पश्यन्त उत्तर-न्देव.न्देवत्रा सूर्य-मगन्म ज्योति.रुत्तम.मिति- ज्योति.रुत्तम.मिति।। 3.17.7।।

अष्टादशः खण्डः।।

- ❃,3.18 मनो ब्रह्मेत्युपाऽऽसीते.त्यध्यात्म,मथाधिदैवत माकाशो ब्रह्मे,त्युभय.मादिष्टं भव-त्यध्यात्म.ञ्चाधिदैवतञ्च।। 3.18.1।।

- तदेत.च्चतुष्पा.द्ब्रह्म- वाक्पादः- प्राणः पाद-श्चक्षुः पाद-श्श्रोत्रं पाद इ.त्यध्यात्म, मथाधिदैवत- मग्निः पादो- वायुः पाद- आदित्यः पादो- दिशः पाद- इत्युभय मेवाऽऽदिष्टं भव-त्यध्यात्म.ञ्चैवाधिदैवतञ्च।। 3.18.2।।

- वागेव ब्रह्मण.श्चतुर्थः पाद- स्सोऽग्निना ज्योतिषा भाति च तपति च, भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन- य एवँ वेद।। 3.18.3।।

- प्राण एव ब्रह्मण.श्चतुर्थः पाद- स्स वायुना ज्योतिषा भाति च तपति च, भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन- य एवँ वेद।। 3.18.4।।

- चक्षु.रेव ब्रह्मण.श्चतुर्थः पाद- स्स आदित्येन ज्योतिषा भाति च तपति च, भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन- य एवँ वेद।। 3.18.5।।

- श्रोत्र.मेव ब्रह्मण.श्चतुर्थः पाद- स्स दिग्भि र्ज्योतिषा भाति च तपति च, भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन- य एवँ वेद- य एवँ वेद।। 3.18.6।।

एकोनविꣳशः खण्डः।।

- ❃,3.19 आदित्यो ब्रह्मे.त्यादेश-स्तस्योपव्याख्यान, मस.देवेद मग्र आसीत्। तत्स.दासी-त्तत्समभव- त्तदाण्ड न्निरवर्तत- तत्सँवत्सरस्य मात्रा मशयत, तन्नि.रभिद्यत- ते आण्डकपाले रजतञ्च सुवर्ण.ञ्चाभवताम्।। 3.19.1।।

- तद्य.द्रजतꣳ- सेयं पृथिवी, यत्सुवर्णꣳ- सा द्यौ,र्यज्जरायु- ते पर्वता, यदुल्बꣳ- स मेघो नीहारो, या धमनय- स्ता नद्यो, य.द्वास्तेय मुदकꣳ- स समुद्रः।। 3.19.2।।

• अथ यत्त.दजायत- सोऽसावादित्य,स्त.ञ्जायमान.ङ्घोषा उलूलवोऽनूदतिष्ठ-न्त्सर्वाणि च भूतानि- सर्वे च कामा,स्तस्मा.त्तस्योदयं प्रति प्रत्यायनं प्रति- घोषा उलूलवोऽनूत्तिष्ठन्ति- सर्वाणि च भूतानि- सर्वे च कामाः।। 3.19.3।।

• स य एत.मेवँ विद्वा.नादित्यं ब्रह्मेत्युपाऽऽस्ते-ऽभ्याशो ह यदेन९ साधवो घोषा आ च गच्छेयु-रुप च निम्रेडेर.न्निम्रेडेरन्।। 3.19.4।। इति तृतीयोऽध्यायः।।

## छान्दोग्योपनिषदि चतुर्थोऽध्यायः।।

### प्रथम॰ खण्डः।।

• ❀,4.1 जानश्रुति.र्ह पौत्रायण श्श्रद्धादेयो बहुदायी बहुपाक्य आस, स ह सर्वत आवसथा.न्मापयाञ्चक्रे- सर्वत एव मेऽन्न.मत्स्यन्तीति।। 4.1.1।।

• अथ ह- ह९सा निशाया मतिपेतु,स्तद्धैव९ ह९सो ह९स मभ्युवाद- हो होयि भल्लाक्ष भल्लाक्ष- जानश्रुते॰ पौत्रायणस्य सम.न्दिवा ज्योति.राततं,न्तन्मा प्रसाङ्क्षी-स्तत्त्वा मा प्रधाक्षी.रिति।। 4.1.2।।

• तमु ह पर॰ प्रत्युवाच- कम्वर एन.मेत.त्सन्त९ सयुग्वान.मिव रैक्क.मात्थेति, यो नु कथ९ सयुग्वा रैक्क इति।। 4.1.3।।

• यथा कृताय विजितायाऽधरेया स्सँय-न्त्येव मेन९ सर्व न्तदभि.समेति, यत्किञ्च प्रजा स्साधु कुर्वन्ति- यस्त.द्वेद- यत्स वेद- स मयैत.दुक्त इति।। 4.1.4।।

• तदु ह जानश्रुति॰ पौत्रायण उप शुश्राव, स ह सञ्जिहान एव क्षत्तार मुवाचा-ऽङ्गारे ह सयुग्वान मिव रैक्क.मात्थेति, यो नु कथ९ सयुग्वा रैक्क इति।। 4.1.5।।

• यथा कृताय विजितायाऽधरेया स्सँय-न्त्येव मेन९ सर्व न्तदभि समेति, यत्किञ्च प्रजा स्साधु कुर्वन्ति- यस्त.द्वेद- यत्स वेद- स मयैत.दुक्त इति।। 4.1.6।।

• स ह क्षत्ताऽन्विष्य नाऽविद.मिति प्रत्येयाय, त९ होवाच- यत्राऽरे ब्राह्मणस्यान्वेषणा- तदेन.मर्च्छेति।। 4.1.7।।

• सोऽधस्ता.च्छकटस्य पामान.ङ्कषमाण मुपोप विवेश, त९ हाभ्युवाद- त्वन्नु भगव स्सयुग्वा रैक्क इ,त्यह९ ह्यरा3 इति ह प्रतिजज्ञे, स ह क्षत्ताऽविदमिति प्रत्येयाय।। 4.1.8।।

### द्वितीय॰ खण्डः।।

• ❀,4.2 तदु ह जानश्रुतिः पौत्रायण ष्षट्शतानि गवा.न्निष्क.मश्वतरीरथ- न्तदादाय प्रति चक्रमे, तꣳ हाभ्युवाद।। 4.2.1।।

• रैक्वेमानि षट्शतानि गवा-मय न्निष्को-ऽय.मश्वतरीरथो,ऽनु म एतां भगवो देवताꣳ शाधि-यान्देवता मुपाऽऽस्स इति।। 4.2.2।।

• तमु ह परः प्रत्युवाचा-ऽह हाऽरे त्वा शूद्र- तवैव सह गोभि.रस्त्विति, तदु ह पुन.रेव जानश्रुतिः पौत्रायण स्सहस्र.ङ्गवा न्निष्क.मश्वतरीरथ न्दुहितर न्त.दादाय प्रति चक्रमे।। 4.2.3।।

• तꣳ हाभ्युवाद- रैक्वेदꣳ सहस्र.ङ्गवा- मय न्निष्को-ऽय.मश्वतरीरथ- इय ञ्जाया-ऽय ङ्ग्रामो-यस्मि.न्नास्से,ऽन्वेव मा भगव श्शाधीति।। 4.2.4।।

• तस्या ह मुख मुपोद्गृह्ण.न्नुवाचाऽऽजहारेमा श्शूद्रा-ऽनेनैव मुखेनाऽऽलापयिष्यथा इति, ते हैते रैक्वपर्णा नाम महावृषेषु, यत्रास्मा उवास- स तस्मै होवाच।। 4.2.5।।

तृतीयः खण्डः।।

• ❀,4.3 वायु.र्वाव सँवर्गो, यदा वा अग्नि.रुद्वायति- वायु.मेवाप्येति, यदा सूर्योऽस्त.मेति-वायु.मेवाप्येति, यदा चन्द्रोऽस्त.मेति- वायु.मेवाप्येति।। 4.3.1।।

• यदाऽऽप उच्छुष्यन्ति- वायु.मेवापि.यन्ति, वायु र्ह्येवैता न्त्सर्वा न्त्सँवृङ्क्ते- इत्यधिदैवतम्।। 4.3.2।।

• अथाध्यात्मं, प्राणो वाव सँवर्ग,स्स यदा स्वपिति- प्राण.मेव वागप्येति, प्राण ञ्चक्षुः- प्राणꣳ श्रोत्रं- प्राणं मनः, प्राणो ह्येवैता न्त्सर्वा न्त्सँवृङ्क्त इति।। 4.3.3।।

• तौ वा एतौ द्वौ सँवर्गौ- वायु.रेव देवेषु- प्राणः प्राणेषु।। 4.3.4।।

• अथ ह शौनकञ्च कापेय-मभिप्रतारिणञ्च काक्षसेनिं परिविष्यमाणौ ब्रह्मचारी बिभिक्षे, तस्मा उ ह न ददतुः।। 4.3.5।।

• स होवाच,महाऽऽत्मन श्चतुरो देव एकः- क.स्स जगार भुवनस्य गोपा-स्तङ्कापेय नाभिपश्यन्ति मर्त्या- अभि.प्रतारि न्बहुधा वसन्तँ, यस्मै वा एत.दन्न- न्तस्मा एत.न्न दत्त.मिति।। 4.3.6।।

• तदु ह शौनकঃ कापेयঃ प्रतिमन्वानঃ प्रत्येयाया,ऽत्मा देवाना ञ्जनिता प्रजानाᳲ-हिरण्यदᳲष्ट्रो बभसोऽनसूरि-र्महान्त मस्य महिमान माहु- रनद्यमानो य.दनन्न मत्ती,ति वै वयं ब्रह्मचारि.न्नेद मुपाऽस्महे- दत्तास्मै भिक्षा.मिति।। 4.3.7।।

• तस्मा उ ह ददु,स्ते वा एते पञ्चान्ये पञ्चान्ये दश सन्त-स्तत्कृत,न्तस्मा त्सर्वासु दिक्ष्वन्न.मेव दश कृतᳲ, सैषा विरा.डन्नादी- तयेदᳲ सर्व.न्दृष्टᳲ, सर्व मस्येद न्दृष्टं भव-त्यन्नादो भवति- य एवँ वेद- य एवँ वेद।। 4.3.8।।

चतुर्थঃ खण्डः।।

• ❋,4.4 सत्यकामो ह जाबालो, जबालां मातर.मामन्त्रया.ञ्चक्रे, ब्रह्मचर्यं भवति विवत्स्यामि- किङ्गोत्रोऽन्वह.मस्मीति।। 4.4.1।।

• सा हैन मुवाच- नाह मेत.द्वेद तात- यद्गोत्र.स्त्वमसि, बह्वह.ञ्चरन्ती परिचारिणी यौवने त्वा.मलभे, साऽह मेत न्न वेद- यद्गोत्र.स्त्वमसि, जबाला तु नामाह.मस्मि- सत्यकामो नाम त्व.मसि, स सत्यकाम एव जाबालो ब्रुवीथा इति।। 4.4.2।।

• स ह हारिद्रुमत.ङ्गौतम.मेत्योवाच, ब्रह्मचर्यं भगवति वत्स्या-म्युपेयां भगवन्त.मिति।। 4.4.3।।

• तᳲ होवाच- किङ्गोत्रो नु सोम्यासीति, स होवाच- नाह मेत.द्वेद, भो यद्गोत्रोऽह.मस्म्यपृच्छं मातरᳲ, सा मा प्रत्यब्रवी-द्बह्वह.ञ्चरन्ती परिचरिणी यौवने त्वा.मलभे, साऽह मेत न्न वेद- यद्गोत्र.स्त्वमसि, जबाला तु नामाह.मस्मि- सत्यकामो नाम त्व.मसीति, सोऽहᳲ सत्यकामो जाबालोऽस्मि भो इति।। 4.4.4।।

• तᳲ होवाच नैत.दब्राह्मणो विवक्तु मर्हति, समिधᳲ सोम्याऽहरोप त्वा नेष्ये, न सत्या.दगा इति, त.मुपनीय कृशाना.मबलाना.ञ्चतुश्शता गा निराकृत्योवा.चेमा स्सोम्यानु सँव्रजेति, ता अभिप्रस्थापय न्नुवाच- नासहस्रेणाऽवर्तेयेति, स ह वर्षगणं प्रोवास- ता यदा सहस्रᳲ सम्पेदुः।। 4.4.5।।

पञ्चमঃ खण्डः।।

• ❋,4.5 अथ हैन मृषभोऽभ्युवाद- सत्यकाम 3 इति- भगव इति ह प्रति शुश्राव, प्राऽप्ता स्सोम्य सहस्रᳲ स्मঃ- प्रापय न आचार्य.कुलम्।। 4.5.1।।

- ब्रह्मणश्च ते पादं ब्रवाणीति- ब्रवीतु मे भगवा.निति, तस्मै होवाच- प्राची दिक्कला- प्रतीची दिक्कला- दक्षिणा दिक्क.लोदीची दिक्क,लैष वै सोम्य चतुष्कलः पादो ब्रह्मणः प्रकाशवा.न्नाम।। 4.5.2।।
- स य एत.मेवँ विद्वाꣳश्चतुष्कलं पादं- ब्रह्मणः प्रकाशवा नित्युपाꣳस्ते- प्रकाशवा.नस्मि.न्लोके भवति, प्रकाशवतो ह लोका.न्जयति- य एत.मेवँ विद्वाꣳश्चतुष्कलं पादं ब्रह्मणः प्रकाशवा.नित्युपाꣳस्ते।। 4.5.3।।

षष्ठः खण्डः।।

- ❀,4.6 अग्निष्टे पादँ वक्तेति, स ह श्वोभूते गा अभि प्रस्थापया.ञ्चकार, ता यत्राभि सायं बभूवु-स्तत्राग्नि मुपसमाधाय- गा उपरुध्य- समिध माधाय- पश्चा.दग्नेः प्राङुपोप विवेश।। 4.6.1।।
- त.मग्नि रभ्युवाद- सत्यकाम 3 इति, भगव इति ह प्रति शुश्राव।। 4.6.2।।
- ब्रह्मण स्सोम्य ते पादं ब्रवाणीति- ब्रवीतु मे भगवा.निति, तस्मै होवाच पृथिवी कला-ऽन्तरिक्ष.ङ्कला- द्यौः कला- समुद्रः क,लैष वै सोम्य चतुष्कलः पादो ब्रह्मणोऽनन्तवा. न्नाम।। 4.6.3।।
- स य एत.मेवँ विद्वाꣳश्चतुष्कलं पादं- ब्रह्मणोऽनन्तवा नित्युपाꣳस्ते-ऽनन्तवा.नस्मि न्लोके भव,त्यनन्तवतो ह लोका न्जयति- य एत.मेवँ विद्वाꣳश्चतुष्कलं पादं ब्रह्मणोऽनन्तवा नित्युपाꣳस्ते।। 4.6.4।।

सप्तमः खण्डः।।

- ❀,4.7 हꣳस.स्ते पादँ वक्तेति, स ह श्वोभूते गा अभि प्रस्थापया.ञ्चकार, ता यत्राभि सायं बभूवु-स्तत्राग्नि मुपसमाधाय- गा उपरुध्य- समिध माधाय- पश्चा.दग्नेः प्राङुपोप विवेश।। 4.7.1।।
- तꣳ हꣳस उपनिपत्याऽभ्युवाद- सत्यकाम 3 इति- भगव इति ह प्रति शुश्राव।। 4.7.2।।
- ब्रह्मण स्सोम्य ते पादं ब्रवाणीति- ब्रवीतु मे भगवा.निति, तस्मै होवाचा-ऽग्निः कला- सूर्यः कला- चन्द्रः कला- विद्युत्क,लैष वै सोम्य चतुष्कलः पादो ब्रह्मणो- ज्योतिष्मा.न्नाम।। 4.7.3।।

• स य एत.मेवँ विद्वा॰श्चतुष्कलं पादं ब्रह्मणो ज्योतिष्मा नित्युपाऽऽस्ते- ज्योतिष्मा.नस्मि. न्लोके भवति, ज्योतिष्मतो ह लोका न्जयति- य एत.मेवँ विद्वा॰श्चतुष्कलं पादं ब्रह्मणो ज्योतिष्मा.नित्युपाऽऽस्ते।। 4.7.4।।

अष्टम॰ खण्डः।।

• ※,4.8 मद्गुष्टे पादँ वक्तेति, स ह श्वोभूते गा अभिप्रस्थापया.ञ्चकार, ता यत्राभि सायं बभूवु-स्तत्राग्नि मुपसमाधाय- गा उपरुध्य- समिध माधाय- पश्चा.दग्ने॰ प्राङुपोप विवेश।। 4.8.1।।

• तं मद्गु रुपनिपत्याऽभ्युवाद- सत्यकाम 3 इति- भगव इति ह प्रति शुश्राव।। 4.8.2।।

• ब्रह्मण स्सोम्य ते पादं ब्रवाणीति- ब्रवीतु मे भगवा.निति, तस्मै होवाच- प्राण॰ कला- चक्षु॰ कला- श्रोत्र.ङ्कला- मन॰ क,लैष वै सोम्य चतुष्कल॰ पादो ब्रह्मण- आयतनवा.न्नाम।। 4.8.3।।

• स य एत.मेवँ विद्वा॰श्चतुष्कलं पादं ब्रह्मण- आयतनवा नित्युपाऽऽस्त- आयतनवा.नस्मि न्लोके भव-त्यायतनवतो ह लोका.न्जयति- य एत.मेवँ विद्वा॰श्चतुष्कलं पादं ब्रह्मण आयतनवा.नित्युपाऽऽस्ते।। 4.8.4।।

नवम॰ खण्डः।।

• ※,4.9 प्राऽऽप हाऽऽचार्यकुल,न्तमाचार्योऽभ्युवाद- सत्यकाम 3 इति- भगव इति ह प्रति शुश्राव।। 4.9.1।।

• ब्रह्मवि.दिव वै सोम्य भासि- को नु त्वाऽनुशशासे,त्यन्ये मनुष्येभ्य इति ह प्रति जज्ञे- भगवा॰स्त्वेव मे कामे ब्रूयात्।। 4.9.2।।

• श्रुत॰ ह्येव मे भगव.द्दृशेभ्य, आचार्या.द्धैव विद्या विदिता साधिष्ठं प्रापतीति, तस्मै हैत.देवोवाचा-ऽत्र ह न किञ्चन वीयायेति- वीयायेति।। 4.9.3।।

दशम॰ खण्डः।।

• ※,4.10 उपकोसलो ह वै कामलायन स्सत्यकामे जाबाले ब्रह्मचार्य मुवास, तस्य ह द्वादश वर्षाण्यग्नी.न्परि चचार, स ह स्माऽन्या.नन्तेवासिन स्समावर्तय॰,स्त॰ ह स्मैव न समावर्तयति।। 4.10.1।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham SGS Mysore

• त.ञ्जायोवाच- तप्तो ब्रह्मचारी कुशल.मग्नी न्परिचचारी-न्मा त्वाऽग्नयः परिप्रवोच. न्प्रब्रूह्यस्मा इति- तस्मै हाप्रोच्यैव प्रवासा.ञ्चक्रे।। 4.10.2।।

• स ह व्याधिनाऽनशितु.न्दध्रे, त.माचार्यजायोवाच- ब्रह्मचारि न्नशान- किन्नु नाश्नासीति, स होवाच- बहव इमेऽस्मि.न्पुरुषे कामा नानाऽत्यया- व्याधिभिः प्रतिपूर्णोऽस्मि- नाशिष्यामीति।। 4.10.3।।

• अथ हाग्नय स्समूदिरे- तप्तो ब्रह्मचारी कुशल.न्नः पर्यचारी-द्धन्तास्मै प्रब्रवामेति, तस्मै होचुः- प्राणो ब्रह्म- कं ब्रह्म- खं ब्रह्मेति।। 4.10.4।।

• स होवाच विजाना.म्यहँ- यत्प्राणो ब्रह्म, कञ्च तु खञ्च न विजानामीति, ते होचु- र्यद्वाव क-न्तदेव खँ, यदेव ख-न्तदेव कमिति, प्राणञ्च हास्मै तदाकाश.ञ्चोचुः।। 4.10.5।।

एकादशः खण्डः।।

• ❀,4.11 अथ हैन.ङ्गार्हपत्योऽनु शशास, पृथि.व्यग्नि- रन्न.मादित्य इति, य एष आदित्ये पुरुषो दृश्यते- सोऽह.मस्मि- स एवाह.मस्मीति।। 4.11.1।।

• स य एत.मेवँ विद्वा.नुपाऽऽस्ते-ऽपहते पापकृत्याँ- लोकी भवति- सर्व.मायु.रेति- ज्योग्जीवति- नास्यावर.पुरुषाः~ क्षीयन्त, -उप वय न्तं भुञ्जामो-ऽस्मिᳪश्च लोके ऽमुष्मिᳪश्च- य एत.मेवँ विद्वा.नुपाऽऽस्ते।। 4.11.2।।

द्वादशः खण्डः।।

• ❀,4.12 अथ हैन मन्वाहार्यपचनोऽनु शशासा-ऽऽपो दिशो नक्षत्राणि चन्द्रमा इति, य एष चन्द्रमसि पुरुषो दृश्यते- सोऽह.मस्मि स एवाह मस्मीति।। 4.12.1।।

• स य एत.मेवँ विद्वा.नुपाऽऽस्ते-ऽपहते पापकृत्याँ- लोकी भवति- सर्व.मायु.रेति- ज्योग्जीवति- नास्यावर.पुरुषाः~ क्षीयन्त,- उप वय न्तं भुञ्जामोऽस्मिᳪश्च लोके ऽमुष्मिᳪश्च- य एत.मेवँ विद्वा.नुपाऽऽस्ते।। 4.12.2।।

त्रयोदशः खण्डः।।

• ❀,4.13 अथ हैन माहवनीयोऽनु शशास- प्राण आकाशो- द्यौ र्विद्यु.दिति, य एष विद्युति पुरुषो दृश्यते- सोऽह.मस्मि- स एवाह मस्मीति।। 4.13.1।।

• स य एत.मेवँ विद्वा.नुपाऽऽस्ते-ऽपहते पापकृत्याँ- लोकी भवति- सर्व.मायु.रेति- ज्योग्जीवति- नास्यावर.पुरुषाः~ क्षीयन्त,-उप वय न्तं भुञ्जामो-ऽस्मिँश्च लोके ऽमुष्मिँश्च- य एत.मेवँ विद्वा.नुपाऽऽस्ते।। 4.13.2।।

चतुर्दशः खण्डः।।

• ते होचु-रुपकोस.लैषा सोम्य तेऽस्मद्विद्याऽऽत्मविद्या चा,ऽऽचार्यस्तु ते गतिँ वक्ते,त्याजगाम हास्याऽऽचार्य-स्तमाचार्यो ऽभ्युवादोपकोसल 3 इति।। 4.14.1।।

• भगव इति ह प्रति शुश्राव, ब्रह्म.विद इव सोम्य ते मुखं भाति- को नु त्वाऽनुशशासेति, को नु माऽनुशिष्या-द्भो इ-तीहापेव निह्नुत इमे- नून.मीदृशा अन्यादृशा इ-तीहाग्नी.नभ्यूदे, किन्नु सोम्य किल तेऽवोचन्निति।। 4.14.2।।

• इद.मिति ह प्रति जज्ञे, लोकान् वाव किल सोम्य तेऽवोच-न्नह.न्तु ते त.द्वक्ष्यामि- यथा पुष्कर.पलाश आपो न श्लिष्यन्त- एव.मेवँविदि पाप.ङ्कर्म न श्लिष्यत इति, ब्रवीतु मे भगवा.निति- तस्मै होवाच।। 4.14.3।।

पञ्चदशः खण्डः।।

• ❃,4.15 य एषोऽक्षिणि पुरुषो दृश्यत- एष आत्मेति होवा,चैत.दमृत मभय-मेत.द्ब्रह्मेति, तद्यद्य.प्यस्मि.न्त्सर्पि.र्वोदकँ वा सिञ्चति- वर्त्मनी एव गच्छति।। 4.15.1।।

• एतँ सँयद्वाम इत्याचक्षत, -एतँ हि सर्वाणि वामा.न्यभिसँयन्ति- सर्वाण्येनँ वामा.न्यभि सँयन्ति- य एवँ वेद।। 4.15.2।।

• एष उ एव वाम.नी-रेष हि सर्वाणि वामानि नयति, सर्वाणि वामानि नयति- य एवँ वेद।। 4.15.3।।

• एष उ एव भाम.नी-रेष हि सर्वेषु लोकेषु भाति, सर्वेषु लोकेषु भाति- य एवँ वेद।। 4.15.4।।

• अथ यदु चैवास्मि.न्छव्य.ङ्कुर्वन्ति, यदि च नार्चिष मेवाभि सम्भव-न्त्यर्चिषोऽह-रह्न आपूर्यमाणपक्ष- मापूर्यमाण.पक्षा-द्या.न्षडुद.ङ्केति मासाँस्ता- न्मासेभ्य स्सँवत्सरँ- सँवत्सरा.दादित्य- मादित्या चन्द्रमस-श्चन्द्रमसो विद्युत,न्तत्पुरुषोऽमानव- स्स एना.न्ब्रह्म गमय-

त्येष देवपथो ब्रह्मपथ- एतेन प्रतिपद्यमाना इमं मानव.मावर्त न्नाऽवर्तन्ते नाऽवर्तन्ते।। 4.15.5।।

षोडशः खण्डः।।

- ❃,4.16 एष ह वै यज्ञो- योऽयं पवत,- एष ह य.न्निदं सर्वं पुनाति, यदेष य.न्निदं सर्वं पुनाति- तस्मा.देष एव यज्ञ,स्तस्य मनश्च वाक्च वर्तनी।। 4.16.1।।
- तयो रन्यतरां मनसा संस्करोति- ब्रह्मा वाचा- होताऽध्वर्यु-रुद्गाताऽन्यतरां- स यत्रोपाऽकृते प्रात.रनुवाके पुरा परिधानीयाया ब्रह्मा व्यव.वदति।। 4.16.2।।
- अन्यतरा मेव वर्तनीं संस्करोति- हीयतेऽन्यतरा, स यथैकपा.द्व्रज.न्रथो -वैकेन चक्रेण वर्तमानो रिष्य-त्येव.मस्य यज्ञो रिष्यति, यज्ञं रिष्यन्तँ यजमानोऽनु रिष्यति- स इष्ट्वा पापीया.न्भवति।। 4.16.3।।
- अथ यत्रोपाऽकृते प्रातरनुवाके न पुरा परिधानीयाया ब्रह्मा व्यव.वद-त्युभे एव वर्तनी संस्कुर्वन्ति- न हीयतेऽन्यतरा।। 4.16.4।।
- स यथोभयपा.द्व्रज.न्रथो वोभाभ्या.ञ्चक्राभ्याँ वर्तमानः प्रति तिष्ठ-त्येव मस्य यज्ञः प्रति तिष्ठति, यज्ञं प्रतितिष्ठन्तँ यजमानोऽनु प्रति तिष्ठति- स इष्ट्वा श्रेया.न्भवति।। 4.16.5।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

सप्तदशः खण्डः।।

- ❃,4.17 प्रजापति र्लोका नभ्यतप- त्तेषा न्तप्यमानानां रसा न्प्रावृह-दग्निं पृथिव्या- वायु मन्तरिक्षा-दादित्य.न्दिवः।। 4.17.1।।
- स एता स्तिस्रो देवता अभ्यतप,त्तासा न्तप्यमानानां रसा न्प्रावृह-दग्ने र्ऋचो- वायो र्यजूंषि- सामा.न्यादित्यात्।। 4.17.2।।
- स एता.न्त्रयीँ विद्या मभ्यतप-त्तस्या स्तप्यमानाया रसा न्प्रावृह-द्भू.रित्यृग्भ्यो- भुव इति यजुर्भ्य- स्स्व.रिति सामभ्यः।। 4.17.3।। (भुवः इति रेफान्त पाठः सकृत् कोशेषु)
- तद्य.दृक्तो रिष्ये-द्भू.स्स्वाहेति गार्हपत्ये जुहुया,दृचा.मेव तद्रसे.नर्चाँ वीर्ये.णर्चाँ यज्ञस्य विरिष्टं सन्दधाति।। 4.17.4।।
- स यदि यजुष्टो रिष्ये- द्भुव स्स्वाहेति दक्षिणाग्नौ जुहुया,द्यजुषा मेव तद्रसेन यजुषाँ वीर्येण यजुषाँ यज्ञस्य विरिष्टं सन्दधाति।। 4.17.5।।

- अथ यदि सामतो रिष्ये-त्स्व स्स्वाहे.त्याहवनीये जुहुया,त्साम्ना मेव तद्रसेन साम्नाँ वीर्येण साम्नाँ यज्ञस्य विरिष्टꣳ सन्दधाति।। 4.17.6।।
- तद्यथा लवणेन सुवर्णꣳ सन्दध्या-त्सुवर्णेन रजतꣳ- रजतेन त्रपु- त्रपुणा सीसꣳ- सीसेन लोहँ- लोहेन दारु- दारु चर्मणा।। 4.17.7।।
- एव.मेषाँ लोकाना-मासा न्देवताना-मस्या स्त्रय्या विद्याया- वीर्येण यज्ञस्य विरिष्टꣳ सन्दधाति, भेषजकृतो ह वा एष यज्ञो- यत्रैवँवि.द्ब्रह्मा भवति।। 4.17.8।।
- एष ह वा उदक्प्रवणो यज्ञो- यत्रैवँवि.द्ब्रह्मा भव-त्येवँविदꣳ ह वा एषा ब्रह्माण मनुगाथा- यतो यत आवर्तते- तत्त.द्गच्छति।। 4.17.9।।
- मानवो ब्रह्मैवैक ऋत्वि.क्कुरू नश्वाऽभिरक्ष,त्येवँवि.द्ध वै ब्रह्मा यज्ञँ यजमानꣳ सर्वाꣳश्चर्त्विजोऽभि रक्षति, तस्मा.देवँ.विद.मेव ब्रह्माण.ङ्कुर्वीत- नानेवँविद न्नानेवँविदम्।। 4.17.10।।

इति चतुर्थोऽध्यायः।।

## छान्दोग्योपनिषदि पञ्चमोऽध्यायः।।

### प्रथमꣳ खण्डः।।

- 卐 5.1 यो ह वै ज्येष्ठञ्च श्रेष्ठञ्च वेद- ज्येष्ठश्च ह वै श्रेष्ठश्च भवति, प्राणो वाव ज्येष्ठश्च श्रेष्ठश्च।। 5.1.1।।
- यो ह वै वसिष्ठँ वेद- वसिष्ठो ह स्वानां भवति, वा.ग्वाव वसिष्ठः।। 5.1.2।।
- यो ह वै प्रतिष्ठाँ वेद- प्रति ह तिष्ठ.त्यस्मिꣳश्च लोकेऽमुष्मिꣳश्च, चक्षु.र्वाव प्रतिष्ठा।। 5.1.3।।
- यो ह वै संपदँ वेद- सꣳ हास्मै कामाꣳ पद्यन्ते दैवाश्च मानुषाश्च, श्रोत्रँ वाव संपत्।। 5.1.4।।
- यो ह वा आयतनँ वेदा-ऽऽयतनꣳ ह स्वानां भवति, मनो ह वा आयतनम्।। 5.1.5।।
- अथ ह प्राणा अहꣳ श्रेयसि व्यूदिरे-ऽहꣳ श्रेया.नस्म्यहꣳ श्रेया.नस्मीति।। 5.1.6।।
- ते ह प्राणाꣳ प्रजापतिं पितर.मेत्योचु-र्भगव न्को न.श्श्रेष्ठ इति, तान्होवाच- यस्मिन्व उत्क्रान्ते- शरीरं पापिष्ठतर.मिव दृश्येत- स व.श्श्रेष्ठ इति।। 5.1.7।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

• सा ह वा.गुच्चक्राम, सा सँवत्सरं प्रोष्य पर्यैत्योवाच- कथ.मशक.तर्ते मज्जीवितु.मिति, यथा कला अवदन्तꣳ- प्राणन्तꣳ प्राणेन- पश्यन्त श्चक्षुषा- शृण्वन्त श्श्रोत्रेण- ध्यायन्तो मनसैव.मिति- प्रविवेश ह वाक्।। 5.1.8।।

• चक्षु.र्होच्चक्राम, तत्सँवत्सरं प्रोष्य पर्यैत्योवाच- कथ.मशक.तर्ते मज्जीवितु.मिति, यथाऽन्धा अपश्यन्तꣳ- प्राणन्तꣳ प्राणेन- वदन्तो वाचा- शृण्वन्त श्श्रोत्रेण- ध्यायन्तो मनसैव.मिति- प्रविवेश ह चक्षुः।। 5.1.9।।

• श्रोत्रꣳ होच्चक्राम, तत्सँवत्सरं प्रोष्य पर्यैत्योवाच- कथ.मशक.तर्ते मज्जीवितु.मिति, यथा बधिरा अशृण्वन्तꣳ- प्राणन्तꣳ प्राणेन- वदन्तो वाचा- पश्यन्त श्चक्षुषा- ध्यायन्तो मनसैव.मिति, प्रविवेश ह श्रोत्रम्।। 5.1.10।।

• मनो होच्चक्राम, तत्सँवत्सरं प्रोष्य पर्यैत्योवाच- कथ.मशक.तर्ते मज्जीवितु.मिति, यथा बाला अमनसꣳ- प्राणन्तꣳ प्राणेन- वदन्तो वाचा- पश्यन्त श्चक्षुषा- शृण्वन्त श्श्रोत्रेणैव.मिति, प्रविवेश ह मनः।। 5.1.11।।

• अथ ह प्राण उच्चिक्रमिष-न्त्स यथा सुहयꣳ पड्वीश.शङ्कू.न्त्सङ्खिदे-देव.मितरा.न्प्राणा.-न्त्समखिद,त्तꣳ हाभि समेत्योचु- र्भगव.न्नेधि- त्वन्न श्श्रेष्ठोऽसि- मोत्क्रमी.रिति।। 5.1.12।।

• अथ हैनँ वा.गुवाच- यदहँ वसिष्ठोऽस्मि- त्वन्त.द्वसिष्ठोऽसी,त्यथ हैन.ञ्चक्षु रुवाच- यदहं प्रतिष्ठाऽस्मि- त्व.न्तत्प्रतिष्ठाऽसीति।। 5.1.13।।

• अथ हैनꣳ श्रोत्र मुवाच- यदहꣳ संप.दस्मि- त्वन्त.त्संपदसी,त्यथ हैनं मन उवाच- यदह मायतन.मस्मि- त्व.न्तदायतन मसीति।। 5.1.14।।

• न वै वाचो- न चक्षूꣳषि- न श्रोत्राणि- न मनाꣳसी.त्याचक्षते- प्राणा इत्येवाऽऽचक्षते, प्राणो ह्येवैतानि सर्वाणि भवति।। 5.1.15।।

द्वितीयꣳ खण्डः।।

• 卐 5.2 स होवाच, किं मेऽन्नं भविष्यतीति- यत्किञ्चि.दिद.मा श्वभ्य- आ शकुनिभ्य इति होचु,स्तद्वा एत.दनस्यान्न-मनो ह वै नाम प्रत्यक्ष-न्न ह वा एवँ.विदि किञ्च.नानन्नं भवतीति।। 5.2.1।। (अनः प्राण एव। प्र, अनः)

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

- स होवाच, किं मे वासो भविष्यती-त्याप इति होचु,स्तस्मा.द्वा एत.दशिष्यन्तঃ पुरस्ता.च्चोपरिष्टा.च्चाद्भिঃ परि दधति, लम्भुको ह वासो भव-त्यनग्नो ह भवति।। 5.2.2।।
- तद्धैत.त्सत्यकामो जाबालो गोश्रुतये वैयाघ्रपद्या.योक्त्वोवाच, यद्यप्येन.च्छुष्काय स्थाणवे ब्रूया-ज्जायेर.न्नेवास्मि.न्छाखाঃ- प्ररोहेयुঃ पलाशानीति।। 5.2.3।।
- अथ यदि मह.ज्जिगमिषे-दमावास्याया.न्दीक्षित्वा- पौर्णमास्याঁ रात्रौ सर्वौषधस्य मन्थ. न्दधिमधुनो रुपमथ्य, ज्येष्ठाय श्रेष्ठाय स्वाहे.त्यग्ना.वाज्यस्य हुत्वा- मन्थे सम्पात मव नयेत्।। 5.2.4।।
- वसिष्ठाय स्वाहे.त्यग्ना.वाज्यस्य हुत्वा- मन्थे सम्पात मवनये,त्प्रतिष्ठायै स्वाहे.त्यग्ना.वाज्यस्य हुत्वा- मन्थे सम्पात मवनये,त्सम्पदे स्वाहे.त्यग्ना.वाज्यस्य हुत्वा- मन्थे सम्पात मवनये,-दायतनाय स्वाहे.त्यग्ना.वाज्यस्य हुत्वा- मन्थे सम्पात मव नयेत्।। 5.2.5।।
- अथ प्रतिसृप्याऽञ्जलौ- मन्थ माधाय जप,त्यमो नामाऽ-स्यमा हि ते सर्व.मिदঁ, स हि ज्येष्ठ श्श्रेष्ठो राजाऽधिपति,स्स मा ज्यैष्ठ्यঁ श्रैष्ठ्यঁ राज्य.माधिपत्य.ङ्गमय-त्वह मेवेदঁ सर्व.मसानीति।। 5.2.6।।
- अथ खल्वेतयर्चा पच्छ आचामति, तत्सवितु.र्वृणीमह इ.त्याचामति, वय.न्देवस्य भोजन.मित्याचामति, श्रेष्ठঁ सर्वधातम.मित्याचामति, तुरं भगस्य धीमहीति सर्वं पिबति, निर्णिज्य कঁस.ञ्चमसँ वा- पश्चा.दग्ने स्सँविशति चर्मणि वा स्थण्डिले वा- वाचँयमोऽप्रसाह, स्स यदि स्त्रियं पश्ये.त्समृद्ध.ङ्कर्मेति विद्यात्।। 5.2.7।।
- तदेष श्लोको, यदा कर्मसु काम्येषु- स्त्रियঁ स्वप्नेषु पश्यति- समृद्धि न्तत्र जानीया-त्तस्मि.न्त्स्वप्न.निदर्शने- तस्मि.न्त्स्वप्न.निदर्शने।। 5.2.8।।

तृतीयঃ खण्डः।।

- 卐 5.3 श्वेतकेतु र्हाऽऽरुणेयঃ पञ्चालानাঁ समिति.मेयाय, तঁ ह प्रवाहणो जैवलि रुवाच- कुमाराऽनु त्वाऽशिष.त्पिते-त्यनु हि भगव इति।। 5.3.1।।
- वेत्थ यदितोऽधि प्रजाঃ प्रयन्तीति- न भगव इति, वेत्थ यथा पुन.रावर्तन्त 3 इति- न भगव इति, वेत्थ पथो.र्देवयानस्य पितृयाणस्य च व्यावर्तन 3 इति- न भगव इति।। 5.3.2।।

- वेत्थ यथाऽसौ लोको न सम्पूर्यत 3 इति- न भगव इति, वेत्थ यथा पञ्चम्या.माहुता.वापः पुरुषवचसो भवन्तीति- नैव भगव इति।। 5.3.3।।

- अथानु कि.मनुशिष्टोऽवोचथा- यो हीमानि न विद्या-त्कथꣳ सोऽनुशिष्टो ब्रुवीतेति, स हायस्तः पितु.रर्ध.मेयाय, तꣳ होवाचा-ऽननु.शिष्य वाव किल मा भगवा.नब्रवी-दनु त्वाऽशिष मिति।। 5.3.4।।

- पञ्च मा राजन्य.बन्धुः प्रश्ना.नप्राक्षी-त्तेषा.न्नैक.ञ्चनाशकँ विवक्तु.मिति, स होवाच- यथा मा त्व.न्तदेता.नवदो- यथाऽह मेषा.न्नैक.ञ्चन वेद, यद्यह.मिमा.नवेदिष्य-ङ्कथन्ते नावक्ष्य.मिति।। 5.3.5।।

- स ह गौतमो राज्ञोऽर्ध.मेयाय, तस्मै ह प्राप्तायाऽर्हा.ञ्चकार, स ह प्रात.स्सभाग उदेयाय, तꣳ होवाच- मानुषस्य भगव.न्गौतम वित्तस्य वरँ वृणीथा इति, स होवाच- तवैव राज.न्मानुषँ वित्तँ- या.मेव कुमारस्यान्ते वाच.मभाषथा-स्तामेव मे ब्रूहीति, स ह कृच्छ्री.बभूव।। 5.3.6।।

- तꣳ ह चिरँ वसे.त्याज्ञापया.ञ्चकार, तꣳ होवाच- यथा मा त्व.ङ्गौतमावदो- यथेय.न्न प्रा.क्त्वत्तः पुरा विद्या ब्राह्मणा.न्गच्छति, तस्मादु सर्वेषु लोकेषु क्षत्रस्यैव प्रशासन मभू.दिति- तस्मै होवाच।। 5.3.7।।

**चतुर्थः खण्डः।।**

- 卐 5.4 असौ वाव लोको गौतमाग्नि-स्तस्याऽऽदित्य एव समि-द्रश्मयो धूमो-ऽह.रर्चि-श्चन्द्रमा अङ्गारा- नक्षत्राणि विस्फुलिङ्गाः।। 5.4.1।।

- तस्मि.न्नेतस्मि.न्नग्नौ देवा श्श्रद्धा.ञ्जुह्वति, तस्या आहुते.स्सोमो राजा संभवति।। 5.4.2।।

**पञ्चमः खण्डः।।**

- 卐 5.5 पर्जन्यो वाव गौतमाग्नि-स्तस्य वायु.रेव समि-दभ्र.न्धूमो- विद्यु.दर्चि-रशनि.रङ्गारा- ह्रादनयो विस्फुलिङ्गाः।। 5.5.1।।

- तस्मि.न्नेतस्मि.न्नग्नौ देवा स्सोमꣳ राजान.ञ्जुह्वति, तस्या आहुते वर्षꣳ संभवति।। 5.5.2।।

**षष्ठः खण्डः।।**

Sri Ganapati Sachchidananda Avadhoota Peetham

- 卐 5.6 पृथिवी वाव गौतमाग्नि-स्तस्या स्सँवत्सर एव समि-दाकाशो धूमो- रात्रि.रर्चि-र्दिशोऽङ्गारा- अवान्तर.दिशो विस्फुलिङ्गाः।। 5.6.1।।
- तस्मि.न्नेतस्मि.न्नग्नौ देवा वर्ष.ञ्जुह्वति, तस्या आहुते रन्न॰ संभवति।। 5.6.2।।

सप्तम॰ खण्डः।।

- पुरुषो वाव गौतमाग्नि- स्तस्य वागेव समि-त्प्राणो धूमो- जिह्वाऽर्चि-श्चक्षु.रङ्गारा- श्श्रोत्रँ विस्फुलिङ्गाः।। 5.7.1।।
- तस्मि.न्नेतस्मि.न्नग्नौ देवा अन्न.ञ्जुह्वति, तस्या आहुते रेत स्संभवति।। 5.7.2।।

अष्टम॰ खण्डः।।

- योषा वाव गौतमाग्नि,स्तस्या उपस्थ एव समि-द्यदुप.मन्त्रयते स धूमो- योनि.रर्चि-र्यदन्त॰ करोति तेऽङ्गारा- अभिनन्दा विस्फुलिङ्गाः।। 5.8.1।।
- तस्मि.न्नेतस्मि.न्नग्नौ देवा रेतो जुह्वति, तस्या आहुते गर्भ स्संभवति।। 5.8.2।।

नवम॰ खण्डः।।

- इति तु पञ्चम्या.माहुता.वाप॰ पुरुषवचसो भवन्तीति, स उल्बाऽऽवृतो गर्भो- दश वा नव वा मासा.नन्त.श्शयित्वा- यावद्वाऽथ जायते।। 5.9.1।।
- स जातो याव.दायुष ञ्जीवति- तं प्रेत.न्दिष्ट.मितोऽग्नय एव हरन्ति, यत एवेतो यत स्संभूतो भवति।। 5.9.2।।

दशम॰ खण्डः।।

- 卐 5.10 तद्य इत्थँ विदु,र्ये चेमेऽरण्ये श्रद्धा तप इत्युपाऽऽसते- तेऽर्चिष.मभि संभव-न्त्यर्चिषोऽह-रह्न आपूर्यमाणपक्ष-मापूर्यमाणपक्षा.द्या.न्त्षडुद.ङ्केति मासा॰-स्तान्।। 5.10.1।।
- मासेभ्य स्सँवत्सर॰- सँवत्सरा.दादित्य-मादित्या च्चन्द्रमस-श्चन्द्रमसो विद्युत,-न्त.त्पुरुषोऽमानव,स्स एना.न्ब्रह्म गमय-त्येष देवयान॰ पन्था इति।। 5.10.2।।
- अथ य इमे ग्राम इष्टापूर्ते दत्त.मित्युपाऽऽसते, ते धूम मभि संभवन्ति- धूमा.द्रात्रि॰-रात्रे.रपरपक्ष-मपरपक्षा-द्यान्त्षड्दक्षिणैति मासा॰-स्ता,न्नैते सँवत्सर मभि प्राऽऽप्नुवन्ति।। 5.10.3।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

• मासेभ्यः पितृलोकं- पितृलोका.दाकाश-माकाशा.च्चन्द्रमस,मेष सोमो राजा- तद्देवाना मन्न, न्त.न्देवा भक्षयन्ति।। 5.10.4।।

• तस्मिन् याव.त्संपात मुषित्वा,ऽथैत मेवाध्वानं पुन र्निवर्तन्ते- यथेत.माकाश-माकाशा.द्वायुँ- वायु.र्भूत्वा धूमो भवति- धूमो भूत्वाऽभ्रं भवति।। 5.10.5।।

• अभ्रं भूत्वा मेघो भवति- मेघो भूत्वा प्र वर्षति, त इह व्रीहि.यवा- ओषधि.वनस्पतय-स्तिल.माषा इति जायन्ते,ऽतो वै खलु दुर्निष्प्रपतरँ यो यो ह्यन्न.मत्ति- यो रेत.स्सिञ्चति- तद्भूय एव भवति।। 5.10.6।।

• तद्य इह रमणीय.चरणा- अभ्याशो ह यत्ते रमणीयाँ योनि.मापद्येर-न्ब्राह्मण.योनिँ वा क्षत्रिय.योनिँ वा- वैश्ययोनिँ वा,ऽथ य इह कपूय.चरणा अभ्याशो ह- यत्ते कपूयाँ योनि.मापद्येर न्छ्वयोनिँ वा- सूकर.योनिँ वा- चण्डाल.योनिँ वा।। 5.10.7।।

• अथैतयोः पथो.र्न कतरेण च- ता.नीमानि क्षुद्रा.ण्यसकृ.दावर्तीनि भूतानि भवन्ति, जायस्व म्रियस्वे.त्येत.त्तृतीयं स्थान,न्तेनासौ लोको न संपूर्यते- तस्मा.ज्जुगुप्सेत, तदेष श्लोकः।। 5.10.8।।

• स्तेनो हिरण्यस्य सुरां पिबंश्च- गुरो.स्तल्प.मावस.न्ब्रह्महा- चैते पतन्ति चत्वारः पञ्चम-श्चाऽऽचरं स्तै.रिति।। 5.10.9।।

• अथ ह य एता.नेवं पञ्चाग्नी.न्वेद- न सह तै.रप्याचर-न्पाप्मना लिप्यते, शुद्धः पूतः पुण्य.लोको भवति- य एवँ वेद- य एवँ वेद।। 5.10.10।।

एकादशः खण्डः।।

• प्राचीनशाल औपमन्यव- स्सत्य.यज्ञः पौलुषि- रिन्द्रद्युम्नो भाल्लवेयो- जन श्शार्कराक्ष्यो-बुडिल आश्वतराश्वि,स्ते हैते महाशाला महाश्रोत्रिया स्समेत्य मीमांसा.ञ्चक्रुः- को न आत्मा-किं ब्रह्मेति।। 5.11.1।।

• ते ह सम्पादया.ञ्चक्रु- रुद्दालको वै भगवन्तोऽय.मारुणि स्संप्रतीम.मात्मानँ वैश्वानर.मध्येति, तं हन्ताऽभ्यागच्छामेति- तं हाभ्याजग्मुः।। 5.11.2।।

• स ह संपादया.ञ्चकार, प्रक्ष्यन्ति मा.मिमे महाशाला महाश्रोत्रिया-स्तेभ्यो न सर्व.मिव प्रतिपत्स्ये- हन्ताऽह मन्य.मभ्यनु.शासानीति।। 5.11.3।।

• तान् होवाचाऽश्वपति र्वै भगवन्तोऽय.ङ्कैकेय.स्संप्रतीम.मात्मानँ वैश्वानर.मध्येति- त९ हन्ताऽभ्यागच्छामेति- त९हाऽभ्याजग्मुः।। 5.11.4।।

• तेभ्यो ह प्राप्तेभ्य४ पृथ.गर्हाणि कारया.ञ्चकार, स ह प्रात.स्सञ्जिहान उवाच, न मे स्तेनो जनपदे- न कदर्यो- न मद्यपो, नाऽनाहिताग्नि- र्नाऽविद्वा-न्न स्वैरी स्वैरिणी, कुतो यक्ष्यमाणो वै भगवन्तोऽह.मस्मि- याव.देकैकस्मा ऋत्विजे धन.न्दास्यामि- ताव.द्भगवद्भ्यो दास्यामि, वसन्तु भगवन्त इति।। 5.11.5।।

• ते होचु,र्येन हैवार्थेन पुरुष.श्चरे-त्त९ हैव वदे,दात्मान.मेवेमँ वैश्वानर९ संप्र.त्यध्येषि- तमेव नो ब्रूहीति।। 5.11.6।।

• तान् होवाच, प्रात.र्व४ प्रतिवक्ताऽस्मीति, ते ह समित्पाणय४ पूर्वाह्णे प्रति चक्रमिरे- तान् हानुपनीयै.वैत.दुवाच।। 5.11.7।।

द्वादश४ खण्डः।।

• औपमन्यव कन्त्व.मात्मान मुपाऽऽस्स इति- दिव.मेव भगवो राज.न्निति होवा,चैष वै सुतेजा आत्मा वैश्वानरो- यन्त्व.मात्मान मुपाऽऽस्से- तस्मा.त्तव सुतं प्रसुत- मासुत.ङ्कुले दृश्यते।। 5.12.1।।

• अत्स्यन्नं- पश्यसि प्रिय,मत्त्यन्नं- पश्यति प्रियं- भव.त्यस्य ब्रह्मवर्चस.ङ्कुले- य एत.मेव मात्मानँ वैश्वानर.मुपाऽऽस्ते, मूर्धा त्वेष आत्मन इति होवाच, मूर्धा ते व्यपतिष्य- द्यन्मा.न्नागमिष्य इति।। 5.12.2।।

त्रयोदश४ खण्डः।।

•卐 5.13 अथ होवाच सत्ययज्ञं पौलुषिं- प्राचीन.योग्य कन्त्व.मात्मान मुपाऽऽस्स इ-त्यादित्य.मेव भगवो राज.न्निति होवा,चैष वै विश्वरूप आत्मा वैश्वानरो- यन्त्व.मात्मान मुपाऽऽस्से- तस्मा.त्तव बहु विश्वरूप.ङ्कुले दृश्यते।। 5.13.1।।

• प्रवृत्तोऽश्वतरीरथो दासीनिष्को,ऽत्स्यन्नं- पश्यसि प्रिय,मत्त्यन्नं- पश्यति प्रियं- भव.त्यस्य ब्रह्मवर्चस.ङ्कुले- य एत.मेव.मात्मानँ वैश्वानर.मुपाऽऽस्ते, चक्षु.ष्ट्वेत.दात्मन इति होवाचा,-ऽन्धोऽभविष्यो- यन्मा.न्नागमिष्य इति।। 5.13.2।।

चतुर्दश४ खण्डः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

• 卐 5.14 अथ होवा.चेन्द्रद्युम्नं भाल्लवेयँ- वैयाघ्रपद्य कन्त्व.मात्मान मुपाऽऽस्स इति, वायु.मेव भगवो राज.न्निति होवा,चैष वै पृथ.ग्वर्त्माऽऽत्मा वैश्वानरो- यन्त्व.मात्मान मुपाऽऽस्से- तस्मा.त्त्वां पृथ.ग्बलय आयन्ति, पृथ.ग्रथ.श्रेणयोऽनु यन्ति।। 5.14.1।।

• अत्स्यन्नं- पश्यसि प्रिय,मत्त्यन्नं- पश्यति प्रियं- भव.त्यस्य ब्रह्मवर्चस.ङ्कुले- य एत.मेव मात्मानँ वैश्वानर.मुपाऽऽस्ते, प्राण.स्त्वेष आत्मन इति होवाच, प्राणस्त उदक्रमिष्य-द्यन्मा.न्नागमिष्य इति।। 5.14.2।।

पञ्चदशः खण्डः।।

• 卐 5.15 अथ होवाच, जनः शार्कराक्ष्य-ङ्कन्त्व.मात्मान मुपाऽऽस्स इ-त्याकाश.मेव भगवो राज.न्निति होवा,चैष वै बहुल आत्मा वैश्वानरो- यन्त्व.मात्मान मुपाऽऽस्से- तस्मा.त्त्वं बहुलोऽसि प्रजया च धनेन च।। 5.15.1।।

• अत्स्यन्नं- पश्यसि प्रिय,मत्त्यन्नं- पश्यति प्रियं- भव.त्यस्य ब्रह्मवर्चस.ङ्कुले- य एत.मेव मात्मानँ वैश्वानर.मुपाऽऽस्ते, सन्देह.स्त्वेष आत्मन इति होवाच- सन्देह.स्ते व्यशीर्य-द्यन्मा.न्नागमिष्य इति।। 5.15.2।।

षोडशः खण्डः।।

• 卐 5.16 अथ होवाच, बुडिल माश्वतराश्विँ- वैयाघ्रपद्य कन्त्व.मात्मान मुपाऽऽस्स इ,त्यप एव भगवो राज.न्निति होवा,चैष वै रयि.रात्मा वैश्वानरो- यन्त्व.मात्मान मुपाऽऽस्से- तस्मा त्त्वः रयिमा न्पुष्टिमा.नसि।। 5.16.1।।

• अत्स्यन्नं- पश्यसि प्रिय,मत्त्यन्नं- पश्यति प्रियं- भव.त्यस्य ब्रह्मवर्चस.ङ्कुले- य एत.मेव मात्मानँ वैश्वानरमुपाऽऽस्ते, बस्ति.स्त्वेष आत्मन इति होवाच, बस्ति.स्ते व्यभेत्स्य.द्य न्मा.न्नागमिष्य इति।। 5.16.2।।

सप्तदशः खण्डः।।

• 卐 5.17 अथ होवाचोद्दालक.मारुणि,ङ्गौतम कन्त्व.मात्मान मुपाऽऽस्स इति, पृथिवी.मेव भगवो राज.न्निति होवा,चैष वै प्रतिष्ठाऽऽत्मा वैश्वानरो- यन्त्व.मात्मान मुपाऽऽस्से- तस्मात्त्वं प्रतिष्ठितोऽसि- प्रजया च पशुभिश्च।। 5.17.1।।

• अत्स्यन्नं- पश्यसि प्रिय,मत्त्यन्नं- पश्यति प्रियं- भव.त्यस्य ब्रह्मवर्चस.ङ्कुले- य एत.मेव मात्मानँ वैश्वानर.मुपाऽऽस्ते, पादौ त्वेता.वात्मन इति होवाच, पादौ ते व्यम्लास्येताँ- यन्मा.न्नागमिष्य इति।। 5.17.2।।

अष्टादश॰ खण्डः।।

• 卐 5.18 तान्होवा,चैते वै खलु यूयं पृथ.गिवेम.मात्मानँ वैश्वानरँ विद्वा॰सो ऽन्न.मत्थ, यस्त्वेत.मेवं प्रादेशमात्र.मभिविमान मात्मानँ वैश्वानर.मुपाऽऽस्ते- स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वे.ष्वात्म.स्वन्न.मत्ति।। 5.18.1।।

• तस्य ह वा एतस्याऽऽत्मनो वैश्वानरस्य मूर्धैव सुतेजा- श्चक्षु.र्विश्वरूप॰- प्राण॰ पृथग्वर्त्मा- ऽऽत्मा सन्देहो बहुलो- बस्ति.रेव रयि॰- पृथिव्येव पादा-वुर एव वेदि-र्लोमानि बर्हि- र्हृदय.ङ्गार्हपत्यो- मनोऽन्वाहार्यपचन- आस्य.माहवनीयः।। 5.18.2।।

एकोनवि॰श॰ खण्डः।।

• 卐 5.19 तद्य.द्भक्तं प्रथम.मागच्छे-त्तद्धोमीय॰, स यां प्रथमा माहुति.ञ्जुहुया- त्ता.ञ्जुहुया- त्प्राणाय स्वाहेति, प्राण.स्तृप्यति।। 5.19.1।।

• प्राणे तृप्यति- चक्षु.स्तृप्यति, चक्षुषि तृप्य-त्यादित्य स्तृप्य,त्यादित्ये तृप्यति- द्यौ.स्तृप्यति, दिवि तृप्यन्त्याँ- यत्किञ्च द्यौश्चाऽऽदित्य.श्चाधितिष्ठत-स्तत्तृप्यति, तस्यानु तृप्ति-न्तृप्यति प्रजया पशुभि.रन्नाद्येन तेजसा ब्रह्मवर्चसेनेति।। 5.19.2।।

वि॰श॰ खण्डः।।

• 卐 5.20 अथ या.न्द्वितीया.ञ्जुहुया- त्ता.ञ्जुहुया-द्व्यानाय स्वाहेति, व्यान.स्तृप्यति।। 5.20.1।।

• व्याने तृप्यति- श्रोत्र.न्तृप्यति, श्रोत्रे तृप्यति- चन्द्रमा.स्तृप्यति, चन्द्रमसि तृप्यति- दिश.स्तृप्यन्ति, दिक्षु तृप्यन्तीषु- यत्किञ्च दिशश्च चन्द्रमा.श्चाधितिष्ठन्ति- त.त्तृप्यति, तस्यानु तृप्ति-न्तृप्यति प्रजया पशुभि.रन्नाद्येन तेजसा ब्रह्मवर्चसेनेति।। 5.20.2।।

एकवि॰श॰ खण्डः।।

• 卐 5.21 अथ या.न्तृतीया.ञ्जुहुया- त्ता.ञ्जुहुया-दपानाय स्वाहे,त्यपान.स्तृप्यति।। 5.21.1।।

- अपाने तृप्यति- वा.क्तृप्यति, वाचि तृप्यन्त्या- मग्नि स्तृप्य,त्यग्नौ तृप्यति- पृथिवी तृप्यति, पृथिव्या.न्तृप्यन्त्याँ- यत्किञ्च पृथिवी चाग्नि श्चाधितिष्ठत-स्तत्तृप्यति, तस्यानु तृप्ति-न्तृप्यति प्रजया पशुभि.रन्नाद्येन तेजसा ब्रह्मवर्चसेनेति।। 5.21.2।।

द्वावि९शः खण्डः।।

- अथ या.ञ्चतुर्थी.ञ्जुहुया- त्ता.ञ्जुहुया-त्समानाय स्वाहेति, समान.स्तृप्यति।। 5.22.1।।
- समाने तृप्यति- मन.स्तृप्यति, मनसि तृप्यति- पर्जन्य.स्तृप्यति, पर्जन्ये तृप्यति- विद्यु.त्तृप्यति, विद्युति तृप्यन्त्याँ- यत्किञ्च विद्युच्च पर्जन्य.श्चाधितिष्ठत-स्तत्तृप्यति, तस्यानु तृप्ति-न्तृप्यति प्रजया पशुभि.रन्नाद्येन तेजसा ब्रह्मवर्चसेनेति।। 5.22.2।।

त्रयोवि९शः खण्डः।।

- 卐 5.23 अथ यां पञ्चमी.ञ्जुहुया- त्ता.ञ्जुहुया-दुदानाय स्वाहे,त्युदान.स्तृप्यति।। 5.23.1।।
- उदाने तृप्यति- त्व.क्तृप्यति, त्वचि तृप्यन्त्याँ- वायु.स्तृप्यति, वायौ तृप्य-त्याकाश स्तृप्य,त्याकाशे तृप्यति- यत्किञ्च वायु.श्चाऽऽकाश.श्चाधितिष्ठत-स्तत्तृप्यति, तस्यानु तृप्ति- न्तृप्यति प्रजया पशुभि.रन्नाद्येन तेजसा ब्रह्मवर्चसेनेति।। 5.23.2।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

चतुर्वि९शः खण्डः।।

- स य इद.मविद्वा.नग्निहोत्र.ञ्जुहोति- यथाऽङ्गारा.नपोह्य भस्मनि जुहुया- त्तादृक्त.स्यात्।। 5.24.1।।
- अथ य एत.देवँ विद्वा-नग्निहोत्र ञ्जुहोति, तस्य सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वे.ष्वात्मसु हुतं भवति।। 5.24.2।।
- तद्य.थेषीका.तूल.मग्नौ प्रोतं प्रदूये-तैव९ हास्य सर्वे पाप्मानः प्रदूयन्ते- य एत.देवँ विद्वा.नग्निहोत्र.ञ्जुहोति।। 5.24.3।।
- तस्मादु हैवँ.वि-द्यद्यपि चण्डालायोच्छिष्टं प्रयच्छे-दात्मनि हैवास्य तद्वैश्वानरे हुत९ स्या.दिति- तदेष श्लोकः।। 5.24.4।।
- यथेह क्षुधिता बाला- मातरं पर्युपाऽऽसत,-एव९ सर्वाणि भूता.न्यग्निहोत्र मुपाऽऽसत इ-त्यग्निहोत्र मुपाऽऽसत इति।। 5.24.5।। इति पञ्चमोऽध्यायः।।

# छान्दोग्योपनिषदि षष्ठोऽध्यायः।।

## प्रथमः खण्डः।।

- 卐 6.1 श्वेतकेतु र्हाऽऽरुणेय आस, तꣳ ह पितोवाच श्वेतकेतो- वस ब्रह्मचर्य,न्न वै सोम्याऽस्मत्कुलीनोऽननूच्य ब्रह्मबन्धु.रिव भवतीति।। 6.1.1।।
- स ह द्वादशवर्ष उपेत्य चतुर्विꣳशतिवर्ष- स्सर्वा.न्वेदा.नधीत्य- महामना अनूचानमानी स्तब्ध एयाय, तꣳ ह पितोवाच।। 6.1.2
- श्वेतकेतो- यन्नु सोम्येदं महामना अनूचानमानी स्तब्धोऽ-स्युत त.मादेश.मप्राक्ष्यो- येनाश्रुतꣳ श्रुतं भव-त्यमतं मत-मविज्ञातँ विज्ञातमिति, कथन्नु भगव- स्स आदेशो भवतीति।। 6.1.3।।
- यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयँ विज्ञातꣳ स्या-द्वाचाऽऽरम्भणँ विकारो नामधेयं- मृत्तिकेत्येव सत्यम्।। 6.1.4।।
- यथा सोम्यैकेन लोहमणिना सर्वँ लोहमयँ विज्ञातꣳ स्या-द्वाचाऽऽरम्भणँ विकारो नामधेयँ- लोह.मित्येव सत्यम्।। 6.1.5।।
- यथा सोम्यैकेन नखनिकृन्तनेन सर्व.ङ्कार्ष्णायसँ विज्ञातꣳ स्या-द्वाचाऽऽरम्भणँ विकारो नामधेय-ङ्कृष्णायस मित्येव सत्य,मेवꣳ सोम्य स आदेशो भवतीति।। 6.1.6।।
- न वै नूनं भगवन्त.स्त एत.दवेदिषु,र्यद्ध्येत.दवेदिष्य- न्कथं मे नावक्ष्य.न्निति, भगवाꣳस्त्वेव मे तद्ब्रवी-त्विति, तथा सोम्येति होवाच।। 6.1.7।।

## द्वितीयः खण्डः।।

- 卐 6.2 सदेव सोम्येद.मग्र आसी-देक.मेवाद्वितीय,न्तद्धैक आहु-रस.देवेद.मग्र आसी-देक.मेवाद्वितीय,न्तस्मा.दसत.स्स.ज्जायत।। 6.2.1।।
- कुतस्तु खलु सोम्यैवꣳ स्यादिति होवाच- कथ.मसत स्सज्जायेतेति, सत्त्वेव सोम्येद.मग्र आसी-देक.मेवाद्वितीयम्।। 6.2.2।।
- तदैक्षत- बहु स्यां प्रजायेयेति- तत्तेजोऽसृजत, तत्तेज ऐक्षत- बहु स्यां प्रजायेयेति- तदपोऽसृजत, तस्मा.द्यत्र क्वच शोचति स्वेदते वा पुरुष-स्तेजस एव तदध्यापो जायन्ते।। 6.2.3।।

- ता आप ऐक्षन्त- बह्व्य स्स्याम प्रजायेमहीति- ता अन्न.मसृजन्त- तस्मा.द्यत्र क्व च वर्षति- तदेव भूयिष्ठ.मन्नं भव-त्यद्भ्य एव तदध्यन्नाद्य.ञ्जायते।। 6.2.4।।

तृतीयः खण्डः।।

- 卐 6.3 तेषा.ङ्खल्वेषां भूताना.न्त्रीण्येव बीजानि भव-न्त्याण्डज.ञ्जीवज.मुद्भिज्जमिति।। 6.3.1।।
- सेय न्देवतैक्षत- हन्ताह.मिमा.स्तिस्रो देवता- अनेन जीवेनाऽऽत्मनाऽनुप्रविश्य- नामरूपे व्याकरवाणीति।। 6.3.2।।
- तासा न्त्रिवृत.न्त्रिवृत.मेकैका.ङ्करवाणीति, सेय न्देवतेमा.स्तिस्रो देवता अनेनैव जीवेनाऽऽत्मनाऽनुप्रविश्य नामरूपे व्याकरोत्।। 6.3.3।।
- तासा न्त्रिवृत.न्त्रिवृत.मेकैका.मकरो,द्यथा तु खलु सोम्येमा.स्तिस्रो देवता.स्त्रिवृ.त्त्रिवृदेकैका भवति- तन्मे विजानीहीति।। 6.3.4।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

चतुर्थः खण्डः।।

- 卐 6.4 यदग्ने रोहितꣳ रूप-न्तेजस.स्तद्रूपँ, यच्छुक्ल-न्तदपाँ, यत्कृष्ण-न्तदन्नस्या,ऽपागा दग्ने.रग्नित्वँ, वाचाऽऽरम्भणँ विकारो नामधेय,न्त्रीणि रूपाणीत्येव सत्यम्।। 6.4.1।।
- यदादित्यस्य रोहितꣳ रूप-न्तेजस.स्तद्रूपँ, यच्छुक्ल-न्तदपाँ, यत्कृष्ण-न्तदन्नस्या,ऽपागा दादित्या.दादित्यत्वँ, वाचाऽऽरम्भणँ विकारो नामधेय,न्त्रीणि रूपाणीत्येव सत्यम्।। 6.4.2।।
- यच्चन्द्रमसो रोहितꣳ रूप-न्तेजस.स्तद्रूपँ, यच्छुक्ल-न्तदपाँ, यत्कृष्ण-न्तदन्नस्या,ऽपागा च्चन्द्रा.च्चन्द्रत्वँ, वाचाऽऽरम्भणँ विकारो नामधेय,न्त्रीणि रूपाणीत्येव सत्यम्।। 6.4.3।।
- यद्विद्युतो रोहितꣳ रूप-न्तेजस.स्तद्रूपँ, यच्छुक्ल-न्तदपाँ, यत्कृष्ण-न्तदन्नस्या,ऽपागा द्विद्युतो विद्युत्त्वँ- वाचाऽऽरम्भणँ विकारो नामधेय,न्त्रीणि रूपाणीत्येव सत्यम्।। 6.4.4।।
- एतद्ध स्म वै तद्विद्वाꣳस आहुः पूर्वे महाशाला महाश्रोत्रिया- न नोऽद्य कश्चनाश्रुत.ममत. मविज्ञात.मुदाहरिष्यतीति- ह्येभ्यो विदा.ञ्चक्रुः।। 6.4.5।।
- यदु रोहित.मिवाभूदिति- तेजस.स्तद्रूप.मिति तद्विदा.ञ्चक्रु,र्यदु शुक्ल.मिवाभूदि-त्यपाꣳ रूप.मिति तद्विदा.ञ्चक्रु,र्यदु कृष्ण.मिवाभू-दित्यन्नस्य रूप.मिति तद्विदा.ञ्चक्रुः।। 6.4.6।।

• यद्वविज्ञात.मिवाभूदि-त्येतासा.मेव देवताना९ समास इति तद्विदा.श्चक्रु,र्यथा तु खलु सो.म्येमा स्तिस्रो देवता ४ पुरुषं प्रा ऽऽप्य त्रिवृ.त्त्रिवृ.देकैका भवति- तन्मे विजानीहीति।। 6.4.7।।

पञ्चम ४ खण्डः।।

• 卐 6.5 अन्न.मशित न्त्रेधा विधीयते, तस्य यस्स्थविष्ठो धातु- स्तत्पुरीषं भवति, यो मध्यम- स्तन्मा९सँ, योऽणिष्ठ- स्तन्मनः।। 6.5.1।।

• आप ४ पीता स्त्रेधा विधीयन्ते, तासाँ यस्स्थविष्ठो धातु- स्त.न्मूत्रं भवति, यो मध्यम- स्तल्लोहितँ, योऽणिष्ठ- स्स प्राणः।। 6.5.2।।

• तेजोऽशित न्त्रेधा विधीयते, तस्य यस्स्थविष्ठो धातु- स्तदस्थि भवति, यो मध्यम- स्स मज्जा, योऽणिष्ठ- स्सा वाक्।। 6.5.3।।

• अन्नमय९ हि सोम्य मन- आपोमय ४ प्राण- स्तेजोमयी वागिति, भूय एव मा भगवान् विज्ञापय.त्विति- तथा सोम्येति होवाच।। 6.5.4।।

षष्ठ ४ खण्डः।।

• 卐 6.6 दध्न स्सोम्य मथ्यमानस्य योऽणिमा- स ऊर्ध्व स्समुदीषति, तत्सर्पि.र्भवति।। 6.6.1।।

• एव.मेव खलु सो.म्यान्न.स्याश्यमानस्य योऽणिमा- स ऊर्ध्व स्समुदीषति, तन्मनो भवति।। 6.6.2।।

• अपा९ सोम्य पीयमानानाँ योऽणिमा- स ऊर्ध्व स्समुदीषति, सा प्राणो भवति।। 6.6.3।।

• तेजस स्सो.म्याश्यमानस्य योऽणिमा- स ऊर्ध्व स्समुदीषति, सा वाग्भवति।। 6.6.4।।

• अन्नमय९ हि सोम्य मन- आपोमय ४ प्राण- स्तेजोमयी वागिति, भूय एव मा भगवान् विज्ञापयत्विति- तथा सोम्येति होवाच।। 6.6.6।।

सप्तम ४ खण्डः।।

• 卐 6.7 षोडशकल स्सोम्य पुरुष ४, पञ्चदशाहानि मा ऽऽशी ४- काम.मप ४ पिबा, ऽऽपोमय ४ प्राणो- न पिबतो विच्छेत्स्यत इति।। 6.7.1।।

- स ह पञ्चदशाहानि नाऽऽशा,ऽथ हैन मुप ससाद- किं ब्रवीमि भो इ,त्यृच स्सोम्य यजू॰षि सामानीति, स होवाच- न वै मा प्रतिभान्ति भो इति।। 6.7.2।।

- त॰ होवाच, यथा सोम्य महतोऽभ्याहित.स्यैकोऽङ्गारः खद्योतमात्रः परिशिष्ट.स्स्या-त्तेन ततोऽपि न बहु दहे-देव॰ सोम्य ते षोडशाना.ङ्कलाना मेका कलाऽतिशिष्टा स्या-त्तयैतर्हि वेदा न्नानुभव,स्यशानाऽथ मे विज्ञास्यसीति।। 6.7.3।।

- स हाऽऽशा,ऽथ हैन मुप ससाद, त॰ ह यत्किञ्च पप्रच्छ- सर्व॰ ह प्रति पेदे।। 6.7.4।।

- त॰ होवाच, यथा सोम्य महतोऽभ्याहित.स्यैक.मङ्गार.ङ्खद्योतमात्रं परिशिष्ट-न्तन्तृणै रुपसमाधाय प्राज्वलये-त्तेन ततोऽपि बहु दहेत्।। 6.7.5।।

- एव॰ सोम्य ते षोडशाना.ङ्कलाना मेका कलाऽतिशिष्टाऽभू.त्साऽन्नेनोपसमाहिता प्राज्वाली- त्तयैतर्हि वेदा.ननुभव,स्यन्नमय॰ हि सोम्य मन- आपोमयः प्राण-स्तेजोमयी वागिति, तद्धास्य विजज्ञा.विति विजज्ञाविति।। 6.7.6।।

अष्टमः खण्डः।।

- 卐 6.8 उद्दालको हाऽऽरुणि श्श्वेतकेतुं पुत्र.मुवाच- स्वप्नान्तं मे सोम्य विजानीहीति, यत्रैत.त्पुरुष.स्स्वपिति नाम- सता सोम्य तदा सम्पन्नो भवति, स्व.मपीतो भवति- तस्मा.देन॰ स्वपिती.त्याचक्षते, स्व॰ ह्यपीतो भवति।। 6.8.1।।

- स यथा शकुनि स्सूत्रेण प्रबद्धो दिश.न्दिशं पतित्वाऽन्यत्राऽऽयतन मलब्ध्वा- बन्धन मेवोप श्रयत- एव.मेव खलु सोम्य- तन्मनो दिश.न्दिशं पतित्वाऽन्यत्राऽऽयतन मलब्ध्वा- प्राण मेवोप श्रयते, प्राणबन्धन॰ हि सोम्य मन इति।। 6.8.2।।

- अशना.पिपासे मे सोम्य विजानीहीति, यत्रैत.त्पुरुषो ऽशि.शिषति नामाऽप एव तदशित.न्नयन्ते, तद्यथा गोनायोऽश्वनायः पुरुषनाय इ-त्येव.न्तदप आचक्षतेऽशनायेति, तत्रैत.च्छुङ्ग.मुत्पतित॰ सोम्य विजानीहि- नेद.ममूलं भविष्यतीति।। 6.8.3।।

- तस्य क्व मूल॰ स्या.दन्यत्राऽन्ना-देव.मेव खलु सोम्याऽन्नेन शुङ्गेनाऽपो मूल.मन्विच्छा,ऽद्भि स्सोम्य शुङ्गेन तेजो मूल मन्विच्छ, तेजसा सोम्य शुङ्गेन सन्मूल मन्विच्छ, सन्मूला स्सोम्येमा स्सर्वाः प्रजा स्सदायतना स्सत्प्रतिष्ठाः।। 6.8.4।।

• अथ यत्रैत.त्पुरुषः पिपासति नाम- तेज एव तत्पीत.न्नयते, तद्यथा गोनायोऽश्वनायः पुरुषनाय इ-त्येव.न्तत्तेज आचष्ट -उदन्येति, तत्रैत.देव शुङ्ग.मुत्पतित९ सोम्य विजानीहि- नेद.ममूलं भविष्यतीति।। 6.8.5।।

• तस्य क्व मूल९ स्या-दन्यत्राद्भ्यो,ऽद्भि स्सोम्य शुङ्गेन तेजो मूल मन्विच्छ, तेजसा सोम्य शुङ्गेन सन्मूल मन्विच्छ, सन्मूला स्सोम्येमा स्सर्वाः प्रजा स्सदायतना स्सत्प्रतिष्ठा, यथा तु खलु सोम्येमा.स्तिस्रो देवताः पुरुषं प्राऽप्य- त्रिवृ.त्त्रिवृ.देकैका भवति- तदुक्तं, पुरस्ता.देव भव,त्यस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि संपद्यते- मनः प्राणे- प्राण स्तेजसि- तेजः परस्या.न्देवतायाम्।। 6.8.6।।

• स य एषोऽणि.मैत.दात्म्य.मिद९ सर्व-न्तत्सत्य९- स आत्मा- तत्त्व.मसि श्वेतकेतो इति, भूय एव मा भगवान् विज्ञापय.त्विति- तथा सोम्येति होवाच।। 6.8.7।।

नवमः खण्डः।।

• 卐 6.9 यथा सोम्य मधु मधुकृतो निस्तिष्ठन्ति- नानात्ययानाँ वृक्षाणा९ रसा.न्त्समवहार- मेकता९ रस.ङ्गमयन्ति।। 6.9.1।।

• ते यथा तत्र न विवेकँ लभन्ते-ऽमुष्याहँ वृक्षस्य रसोऽ-स्म्यमुष्याहँ वृक्षस्य रसोऽस्मी,त्येव.मेव खलु सोम्येमा स्सर्वाः प्रजा स्सति संपद्य- न विदु स्सति संपद्यामह इति।। 6.9.2।।

• त इह व्याघ्रो वा- सि९हो वा- वृको वा- वराहो वा- कीटो वा- पतङ्गो वा- द९शो वा- मशको वा, यद्य.द्भवन्ति- त.दाभवन्ति।। 6.9.3।।

• स य एषोऽणि.मैत.दात्म्य.मिद९ सर्व-न्तत्सत्य९- स आत्मा- तत्त्व.मसि श्वेतकेतो इति, भूय एव मा भगवान् विज्ञापय.त्विति- तथा सोम्येति होवाच।।।। 6.9.4।।

दशमः खण्डः।।

• 卐 6.10 इमा स्सोम्य नद्यः पुरस्ता.त्प्राच्य.स्स्यन्दन्ते- पश्चा.त्प्रतीच्य,स्ता स्समुद्रा.त्समुद्र.मेवापि यन्ति, स समुद्र एव भवति, ता यथा तत्र न विदु- रिय.मह.मस्मीय.मह.मस्मीति।। 6.10.1।।

Srimatsachidananda Avadhoota Dattapeetham SGS Mysore

- एव.मेव खलु, सोम्येमा स्सर्वाः प्रजा स्सत आगम्य न विदु-स्सत आगच्छामह इति, त इह व्याघ्रो वा- सिꣳहो वा- वृको वा- वराहो वा- कीटो वा- पतङ्गो वा- दꣳशो वा- मशको वा- यद्य.द्भवन्ति- तदाभवन्ति।। 6.10.2।।
- स य एषोऽणि.मैत.दात्म्य.मिदꣳ सर्व-न्तत्सत्यꣳ- स आत्मा- तत्त्व.मसि श्वेतकेतो इति, भूय एव मा भगवान् विज्ञापय.त्विति- तथा सोम्येति होवाच।।।। 6.10.3।।

एकादशः खण्डः।।

- अस्य सोम्य महतो वृक्षस्य, यो मूले ऽभ्याहन्या.ज्जीव.न्स्त्रवे,द्यो मध्येऽभ्याहन्या. ज्जीव.न्स्त्रवे,-द्योऽग्रे ऽभ्याहन्या-ज्जीव.न्स्त्रवे,त्स एष जीवेनाऽऽत्मनाऽनुप्रभूतः पेपीयमानो मोदमान.स्तिष्ठति।। 6.11.1।।
- अस्य यदेकाꣳ शाखा.ञ्जीवो जहा-त्यथ सा शुष्यति, द्वितीया.ञ्जहा-त्यथ सा शुष्यति, तृतीया.ञ्जहा-त्यथ सा शुष्यति, सर्व.ञ्जहाति- सर्व.श्शुष्यति।। 6.11.2।।
- एव.मेव खलु सोम्य विद्धीति होवाच, जीवापेतँ वाव किलेदं म्रियते- न जीवो म्रियत इति, स य एषोऽणि.मैत.दात्म्य.मिदꣳ सर्व-न्तत्सत्यꣳ- स आत्मा- तत्त्व.मसि श्वेतकेतो इति, भूय एव मा भगवान् विज्ञापय.त्विति- तथा सोम्येति होवाच।।।। 6.11.3।।

द्वादशः खण्डः।।

- 卐 6.12 न्यग्रोधफल.मत आहरे-तीदं भगव इति, भिन्द्धीति- भिन्नं भगव इति, किमत्र पश्यसी-त्यण्व्य इवेमा धाना भगव इ,त्यासा.मङ्गैकां भिन्द्धीति- भिन्ना भगव इति, किमत्र पश्यसीति- न किञ्चन भगव इति।। 6.12.1।।
- तꣳ होवाच, यँ वै सोम्यैतमणिमान.न्न निभालयस- एतस्य वै सो.म्यैषोऽणिम्न एवं महान्यग्रोध.स्तिष्ठति, श्रद्धत्स्व सोम्येति।। 6.12.2।।
- स य एषोऽणि.मैत.दात्म्य.मिदꣳ सर्व-न्तत्सत्यꣳ- स आत्मा- तत्त्व.मसि श्वेतकेतो इति, भूय एव मा भगवान् विज्ञापय.त्विति- तथा सोम्येति होवाच।।।। 6.12.3।।

त्रयोदशः खण्डः।।

- 卐 6.13 लवण.मेत.दुदकेऽवधायाऽथ मा प्रात.रुपसीदथा इति- स ह तथा चकार, तꣳ होवाच- यद्दोषा लवण.मुदकेऽवाधा- अङ्ग तदाहरेति, तद्धावमृश्य न विवेद।। 6.13.1।।

- यथा विलीन.मेवाङ्गा.ऽस्यान्ता.दाचामेति- कथ.मिति- लवण.मिति, मध्या.दाचामेति- कथ.मिति- लवण.मि,त्यन्ता दाचामेति- कथ.मिति लवण.मि,त्यभिप्रास्यैत.दथ मोपसीदथा इति- तद्ध तथा चकार, तच्छश्व.त्सँवर्तते- त९ होवाचा-ऽत्र वाव किल सत्सोम्य न निभालयसेऽत्रैव किलेति।। 6.13.2।।
- स य एषोऽणि.मैत.दात्म्य.मिद९ सर्व-न्तत्सत्य९- स आत्मा- तत्त्व.मसि श्वेतकेतो इति, भूय एव मा भगवान् विज्ञापय.त्विति- तथा सोम्येति होवाच।।।। 6.13.3।।

चतुर्दशः खण्डः।।

-卐 6.14 यथा सोम्य पुरुष.ङ्गन्धारेभ्योऽभिनद्धाक्ष.मानीय- तन्ततोऽतिजने विसृजे,त्स यथा तत्र प्राङ्वोदङ्वाऽधराङ्वा प्रत्यङ्वा प्रध्मायीताऽभिनद्धाक्ष आनीतोऽभिनद्धाक्षो विसृष्टः।। 6.14.1।।
- तस्य यथाऽभिनहनं प्रमुच्य प्रब्रूया-देता.न्दिश.ङ्गन्धारा- एता.न्दिशँ व्रजेति, स ग्रामा.द्ग्रामं पृच्छ-न्पण्डितो मेधावी गन्धारा.नेवोप संपद्ये,तैव.मेवेहाऽऽचार्यवा.न्पुरुषो वेद, तस्य ताव.देव चिरँ- यावन्न विमोक्ष्ये-ऽथ संपत्स्य इति।। 6.14.2।।
- स य एषोऽणि.मैत.दात्म्य.मिद९ सर्व-न्तत्सत्य९- स आत्मा- तत्त्व.मसि श्वेतकेतो इति, भूय एव मा भगवान् विज्ञापय.त्विति- तथा सोम्येति होवाच।।।। 6.14.3।।

पञ्चदशः खण्डः।।

- 卐 6.15 पुरुष९ सोम्योतोप.तापिन.ञ्ज्ञातयः पर्युपाऽऽसते- जानासि मा.ञ्जानासि मामिति, तस्य यावन्न वा.ङ्मनसि संपद्यते- मनः प्राणे- प्राण स्तेजसि- तेजः परस्या.न्देवताया- न्ताव.ज्जानाति।। 6.15.1।।
- अथ यदाऽस्य वाङ्मनसि संपद्यते- मनः प्राणे- प्राण.स्तेजसि- तेजः परस्या.न्देवताया,मथ न जानाति।। 6.15.2।।
- स य एषोऽणि.मैत.दात्म्य.मिद९ सर्व-न्तत्सत्य९- स आत्मा- तत्त्व.मसि श्वेतकेतो इति, भूय एव मा भगवान् विज्ञापय.त्विति- तथा सोम्येति होवाच।।।। 6.15.3।।

षोडशः खण्डः।।

- 卐 6.16 पुरुषꣳ सोम्योत हस्तगृहीत.मानय,न्त्यपहार्षी.त्स्तेय.मकार्षी-त्परशु.मस्मै तपतेति, स यदि तस्य कर्ता भवति- तत एवानृत.मात्मान.ङ्कुरुते, सोऽनृताभिसन्धो ऽनृतेनाऽऽत्मान मन्तर्धाय- परशु.न्तप्तं प्रतिगृह्णाति, स दह्यतेऽथ हन्यते।। 6.16.1।।
- अथ यदि तस्याऽकर्ता भवति- तत एव सत्य.मात्मान.ङ्कुरुते, स सत्याभिसन्ध-स्सत्येनाऽऽत्मान मन्तर्धाय- परशु.न्तप्तं प्रति गृह्णाति, स न दह्यतेऽथ मुच्यते।। 6.16.2।।
- स यथा तत्र नाऽदाह्ये,तैत.दात्म्य.मिदꣳ सर्व-न्तत्सत्यꣳ- स आत्मा- तत्त्व.मसि श्वेतकेतो इति, तद्धास्य विजज्ञा.विति- विजज्ञा.विति।। 6.16.3।। इति षष्ठोऽध्यायः।।

## छान्दोग्योपनिषदि सप्तमोऽध्यायः।।

### प्रथमᳵ खण्डः।।

- 卐 7.1 अधीहि भगव इति होप.ससाद सनत्कुमार.न्नारद,स्तꣳ होवाच, यद्वेत्थ- तेन मोपसीद- तत.स्त ऊर्ध्वँ वक्ष्यामीति- स होवाच।। 7.1.1।।
- ऋग्वेदं भगवोऽध्येमि- यजुर्वेदꣳ सामवेद माथर्वण.ञ्चतुर्थ-मितिहास.पुराणं पञ्चमँ वेदानाँ वेदं, पित्र्यꣳ राशि-न्दैव.न्निधिँ- वाकोवाक्य.मेकायन,न्देवविद्यां ब्रह्मविद्यां भूतविद्या.ङ्क्षत्रविद्या.न्नक्षत्रविद्याꣳ सर्पदेवजन.विद्या- मेत.द्भगवोऽध्येमि।। 7.1.2।।
- सोऽहं भगवो मन्त्रवि.देवास्मि- नाऽऽत्मवि,च्छ्रुतꣳ ह्येव मे भगव.द्दृशेभ्य-स्तरति शोक.मात्मवि.दिति, सोऽहं भगव श्शोचामि, तं मा भगवा.न्छोकस्य पार.न्तारयत्विति, तꣳ होवाच, यद्वै किञ्चैत-दध्यगीष्ठा नामै.वैतत्।। 7.1.3।।
- नाम वा ऋग्वेदो यजुर्वेद स्सामवेद आथर्वण.श्चतुर्थ- इतिहास.पुराणᳶ पञ्चमो वेदानाँ वेदᳶ-पित्र्यो राशि-र्दैवो निधि-र्वाकोवाक्य.मेकायन-न्देवविद्या ब्रह्मविद्या भूतविद्या क्षत्रविद्या नक्षत्रविद्या सर्पदेवजन.विद्या- नामै.वैत,न्नामोपाऽऽस्वेति।। 7.1.4।।
- स यो नाम ब्रह्मे.त्युपाऽऽस्ते- याव.न्नाम्नो गत-न्तत्रास्य यथाकामचारो भवति- यो नाम ब्रह्मे.त्युपास्ते,ऽस्ति भगवो नाम्नो भूय इति- नाम्नो वाव भूयोऽस्तीति, तन्मे भगवा. न्ब्रवीत्विति।। 7.1.5।।

### द्वितीयᳵ खण्डः।।

• 卐 7.2 वाग्वाव नाम्नो भूयसी, वाग्वा ऋग्वेदँ विज्ञापयति- यजुर्वेद॰ सामवेद माथर्वण श्चतुर्थ-मितिहासपुराणं पञ्चमँ वेदानाँ वेदं- पित्र्य॰ राशि-न्दैव.न्निधिँ- वाकोवाक्य.मेकायन-न्देवविद्यां ब्रह्मविद्यां भूतविद्या.ङ्क्षत्रविद्या.न्नक्षत्रविद्यां सर्पदेवजनविद्या-न्दिवञ्च पृथिवीञ्च वायु.ञ्चाकाशञ्चाऽपश्च तेजश्च- देवा॰श्च मनुष्या॰श्च पशू॰श्च वया॰सि च तृण.वनस्पती न्छ्वापदा-न्याकीट.पतङ्ग.पिपीलक-न्धर्म.ञ्चाधर्मञ्च- सत्य.ञ्चानृतञ्च- साधु चासाधु च-हृदयज्ञ.ञ्चाहृदयज्ञञ्च, यद्वै वा.ङ्नाभविष्य-न्न धर्मो नाधर्मो व्यज्ञापयिष्य-न्न सत्य न्नानृत-न्न साधु नासाधु- न हृदयज्ञो नाहृदयज्ञो, वागे.वैत त्सर्वँ विज्ञापयति, वाच.मुपाऽऽस्वेति।। 7.2.1।।

• स यो वाचं ब्रह्मे.त्युपाऽऽस्ते- याव.द्वाचो गत-न्तत्रास्य यथाकामचारो भवति- यो वाचं ब्रह्मे.त्युपाऽऽस्ते,-ऽस्ति भगवो वाचो भूय इति- वाचो वाव भूयोऽस्तीति- तन्मे भगवा.न्ब्रवी.त्विति।। 7.2.2।।

तृतीय॰ खण्डः।।

• 卐 7.3 मनो वाव वाचो भूयो, यथा वै द्वे वाऽऽमलके- द्वे वा कोले- द्वौ वाऽक्षौ मुष्टि.रनुभव-त्येवँ वाचञ्च नाम च मनोऽनु भवति, स यदा मनसा मनस्यति- मन्त्रा.नधीयीये-त्यथाऽधीते, कर्माणि कुर्वीये-त्यथ कुरुते, पुत्रा॰श्च पशू॰ श्चेच्छेये-त्यथेच्छत,-इमञ्च लोक.ममु.ञ्चेच्छेये-त्यथेच्छते, मनो ह्यात्मा- मनो हि लोको- मनो हि ब्रह्म, मन उपाऽऽस्वेति।। 7.3.1।। (अमुम्, च, इच्छेय, इति)

• स यो मनो ब्रह्मे.त्युपाऽऽस्ते, याव.न्मनसो गत-न्तत्रास्य यथाकामचारो भवति- यो मनो ब्रह्मे.त्युपास्ते,ऽस्ति भगवो मनसो भूय इति- मनसो वाव भूयोऽस्तीति- तन्मे भगवा.न्ब्रवी.त्विति।। 7.3.2।।

चतुर्थ॰ खण्डः।।

• 卐 7.4 सङ्कल्पो वाव मनसो भूयान्,यदा वै सङ्कल्पयते-ऽथ मनस्य-त्यथ वाच.मीरयति, तामु नाम्नीरयति- नाम्नि मन्त्रा एकं भवन्ति- मन्त्रेषु कर्माणि।। 7.4.1।। (नाम्नि, ईरयति)

• तानि ह वा एतानि सङ्कल्पैकायनानि- सङ्कल्पाऽऽत्मकानि- सङ्कल्पे प्रतिष्ठितानि, समक्लृपता न्द्यावापृथिवी- समकल्पेताँ वायु.श्चाऽऽकाशञ्च- समकल्पन्ताऽऽपश्च तेजश्च, तेषा॰ सङ्क्लृप्त्यै- वर्ष॰ सङ्कल्पते, वर्षस्य सङ्क्लृप्त्या- अन्न॰ सङ्कल्पते,ऽन्नस्य सङ्क्लृप्त्यै- प्राणा स्सङ्कल्पन्ते, प्राणाना॰

सङ्क्लृप्त्यै- मन्त्रा.स्सङ्कल्पन्ते, मन्त्राणाꣳ सङ्क्लृप्त्यै- कर्माणि सङ्कल्पन्ते, कर्मणाꣳ सङ्क्लृप्त्यै- लोक.स्सङ्कल्पते, लोकस्य सङ्क्लृप्त्यै- सर्वं सङ्कल्पते, स एष सङ्कल्प, स्सङ्कल्प. मुपाऽऽस्वेति।। 7.4.2।।

- स य.स्सङ्कल्पं ब्रह्मे.त्युपाऽऽस्ते- सङ्क्लृप्तान् वै स लोका न्ध्रुवा.न्ध्रुवꣳ- प्रतिष्ठिता न्प्रतिष्ठितो-ऽव्यथमाना.नव्यथमानो-ऽभि सिध्यति,यावत्सङ्कल्पस्य गत-न्तत्रास्य यथाकामचारो भवति- यस्सङ्कल्पं ब्रह्मे.त्युपाऽऽस्ते,ऽस्ति भगव स्सङ्कल्पा.द्भूय इति- सङ्कल्पा.द्वाव भूयोऽस्तीति- तन्मे भगवा.न्ब्रवी.त्विति।। 7.4.3।।

**पञ्चमꣳ खण्डः।।**

- 卐 7.5 चित्तँ वाव सङ्कल्पा.द्भूयो, यदा वै चेतयते-ऽथ सङ्कल्पयते-ऽथ मनस्य-त्यथ वाच.मीरयति, तामु नाम्नीरयति- नाम्नि मन्त्रा एकं भवन्ति- मन्त्रेषु कर्माणि।। 7.5.1।।
- तानि ह वा एतानि चित्तैकायनानि- चित्ताऽऽत्मानि- चित्ते प्रतिष्ठितानि, तस्मा.द्यद्यपि बहुवि.दचित्तो भवति- नाय मस्ती.त्येवैन माहु,र्यदयँ वेद- यद्वा अयँ विद्वा.न्नेत्थ.मचित्तस्स्या.दि,त्यथ यद्यल्पवि.च्चित्तवा.न्भवति- तस्मा एवोत शुश्रूषन्ते, चित्तꣳ ह्येवैषा.मेकायन-श्चित्त.मात्मा- चित्तं प्रतिष्ठा, चित्त.मुपाऽऽस्वेति।। 7.5.2।।
- स य.श्चित्तं ब्रह्मे.त्युपाऽऽस्ते- चित्तान् वै स लोका न्ध्रुवा.न्ध्रुवꣳ- प्रतिष्ठिता न्प्रतिष्ठितो-ऽव्यथमाना नव्यथमानो-ऽभि सिध्यति, याव.च्चित्तस्य गत-न्तत्रास्य यथाकामचारो भवति- यश्चित्तं ब्रह्मे.त्युपाऽऽस्ते,ऽस्ति भगव.श्चित्ता.द्भूय इति- चित्ता.द्वाव भूयोऽस्तीति- तन्मे भगवा.न्ब्रवी.त्विति।। 7.5.3।।

**षष्ठꣳ खण्डः।।**

- 卐 7.6 ध्यानँ वाव चित्ता.द्भूयो, ध्यायतीव पृथिवी- ध्यायती.वान्तरिक्ष-न्ध्यायतीव द्यौ-र्ध्यायन्तीवाऽऽपो- ध्यायन्तीव पर्वता- ध्यायन्तीव देवमनुष्या,स्तस्मा.द्य इह मनुष्याणां महत्तां प्राऽऽप्नुवन्ति- ध्यानाऽपादाꣳशा इवैव ते भव,न्त्यथ येऽल्पाꣳ कलहिनꣳ पिशुना-उपवादिन.स्ते,ऽथ ये प्रभवो- ध्यानापादाꣳशा इवैव ते भवन्ति, ध्यान.मुपाऽऽस्वेति।। 7.6.1।।

- स यो ध्यानं ब्रह्मे.त्युपाऽस्ते- याव.द्ध्यानस्य गत-न्तत्रास्य यथाकामचारो भवति- यो ध्यानं ब्रह्मे.त्युपाऽस्ते,ऽस्ति भगवो ध्याना.द्भूय इति- ध्याना.द्वाव भूयोऽस्तीति- तन्मे भगवा.न्ब्रवी.त्विति।। 7.6.2।।

सप्तमः खण्डः।।

- 卐 7.7 विज्ञानँ वाव ध्याना.द्भूयो, विज्ञानेन वा ऋग्वेदँ विजानाति- यजुर्वेदꣳ सामवेद माथर्वण ञ्चतुर्थ-मितिहास.पुराणं पञ्चमँ वेदानाँ वेदं- पित्र्यꣳ राशि-न्दैव.न्निधिँ-वाकोवाक्य.मेकायन- न्देवविद्यां ब्रह्मविद्यां भूतविद्या.ङ्क्षत्रविद्या.न्नक्षत्रविद्याꣳ सर्पदेवजन.विद्या-न्दिवञ्च पृथिवीञ्च वायु.ञ्चाऽऽकाश.ञ्चापश्च तेजश्च- देवाꣳश्च मनुष्याꣳश्च पशूꣳश्च वयाꣳसि च तृणवनस्पती न्छ्वापदा-न्याकीट.पतङ्ग.पिपीलक- न्धर्म ञ्चाधर्मञ्च- सत्य.ञ्चानृतञ्च- साधु चासाधु च- हृदयज्ञ.ञ्चाहृदयज्ञ-ञ्चान्नञ्च रस-ञ्चेमञ्च लोक.ममुञ्च- विज्ञानेनैव विजानाति, विज्ञान. मुपाऽऽस्वेति।। 7.7.1।।
- स यो विज्ञानं ब्रह्मे.त्युपाऽस्ते- विज्ञानवतो वै स लोका.न्ज्ञानवतो.ऽभि सिध्यति, याव.द्विज्ञानस्य गत-न्तत्रास्य यथाकामचारो भवति- यो विज्ञानं ब्रह्मे.त्युपाऽस्ते,ऽस्ति भगवो विज्ञाना.द्भूय इति- विज्ञाना.द्वाव भूयोऽस्तीति- तन्मे भगवा.न्ब्रवी.त्विति।। 7.7.2।।

अष्टमः खण्डः।।

- बलँ वाव विज्ञाना.द्भूयो,ऽपि ह शतँ विज्ञानवता.मेको बलवा.नाकम्पयते, स यदा बली भव-त्यथोत्थाता भव-त्युत्तिष्ठ न्परिचरिता भवति- परिचर.न्नुपसत्ता भव-त्युपसीद न्द्रष्टा भवति- श्रोता भवति मन्ता भवति बोद्धा भवति कर्ता भवति विज्ञाता भवति, बलेन वै पृथिवी तिष्ठति- बलेनान्तरिक्षं- बलेन द्यौ-र्बलेन पर्वता- बलेन देवमनुष्या- बलेन पशवश्च वयाꣳसि च तृणवनस्पतय श्श्वापदा.न्याकीट.पतङ्ग.पिपीलकं, बलेन लोक.स्तिष्ठति, बल.मुपाऽऽस्वेति।। 7.8.1।।
- स यो बलं ब्रह्मे.त्युपाऽस्ते- याव.द्बलस्य गत-न्तत्रास्य यथाकामचारो भवति- यो बलं ब्रह्मे.त्युपाऽस्ते,ऽस्ति भगवो बला.द्भूय इति- बला.द्वाव भूयोऽस्तीति- तन्मे भगवा.न्ब्रवी.त्विति।। 7.8.2।।

नवमः खण्डः।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham

• 卐 7.9 अन्नँ वाव बला.द्भूय,स्तस्मा.द्यद्यपि दश रात्री.र्नाश्नीया- द्यद्यु ह जीवे-दथवा द्रष्टा श्रोता मन्ता बोद्धा कर्ता विज्ञाता भव,त्यथान्नस्याऽऽयी द्रष्टा भवति- श्रोता भवति मन्ता भवति बोद्धा भवति कर्ता भवति विज्ञाता भव,त्यन्न.मुपाऽऽस्वेति।। 7.9.1।। (अन्नस्य आयः- अन्नस्याऽऽयः, सोऽस्यास्तीति इनिः अन्नस्याऽऽयी, अन्नस्याऽऽयै इति ऐकारन्तपाठः चिन्त्यः)

• स योऽन्नं ब्रह्मे.त्युपाऽऽस्ते-ऽन्नवतो वै स लोका.न्पानवतोऽभि सिध्यति, याव.दन्नस्य गत-न्तत्रास्य यथाकामचारो भवति- योऽन्नं ब्रह्मे.त्युपाऽऽस्ते,ऽस्ति भगवोऽन्ना.द्भूय इ-त्यन्ना.द्वाव भूयोऽस्तीति- तन्मे भगवा.न्ब्रवी.त्विति।। 7.9.2।।

दशमः खण्डः।।

• 卐 7.10 आपो वावाऽन्ना.द्भूयस्य,स्तस्मा.द्यदा सुवृष्टि.र्न भवति- व्याधीयन्ते प्राणा- अन्न.ङ्कनीयो भविष्यती,त्यथ यदा सुवृष्टि र्भव-त्यानन्दिनः प्राणा भव-न्त्यन्नं बहु भविष्यती,त्याप एवेमा मूर्ता- येयं पृथिवी यदन्तरिक्षँ यद्द्यौ.र्यत्पर्वता यद्देवमनुष्या यत्पशवश्च वयाꣳसि च तृणवनस्पतय श्श्वापदा.न्याकीट.पतङ्ग.पिपीलक,माप एवेमा मूर्ता, अप उपाऽऽस्वेति।। 7.10.1।।

• स योऽपो ब्रह्मे.त्युपाऽऽस्त- आप्नोति सर्वा.न्कामां.स्तृप्तिमा.न्भवति, याव.दपा.ङ्गत-न्तत्रास्य यथाकामचारो भवति- योऽपो ब्रह्मे.त्युपाऽऽस्ते,ऽस्ति भगवोऽद्भ्यो भूय इ-त्यद्भ्यो वाव भूयोऽस्तीति- तन्मे भगवा.न्ब्रवी.त्विति।। 7.10.2।।

एकादशः खण्डः।।

• 卐 7.11 तेजो वावाऽद्भ्यो भूय,स्तद्वा एत.द्वायु.मागृह्याऽऽकाश मभितपति, तदाहु- र्निशोचति नितपति वर्षिष्यति वा इति, तेज एव तत्पूर्व.न्दर्शयित्वाऽथाऽप स्सृजते- तदेत.दूर्ध्वाभिश्च तिरश्चीभिश्च विद्युद्भि राह्रादा.श्चरन्ति, तस्मा.दाहु- र्विद्योतते स्तनयति वर्षिष्यति वा इति- तेज एव तत्पूर्व.न्दर्शयित्वाऽथाऽप स्सृजते, तेज उपाऽऽस्वेति।। 7.1.1।।

• स य.स्तेजो ब्रह्मे.त्युपाऽऽस्ते- तेजस्वी वै स तेजस्वतो लोका.न्भास्वतो.ऽपहत.तमस्का. नभि सिध्यति, याव.त्तेजसो गत-न्तत्रास्य यथाकामचारो भवति- यस्तेजो ब्रह्मे.त्युपाऽऽस्ते-ऽस्ति भगव स्तेजसो भूय इति- तेजसो वाव भूयोऽस्तीति- तन्मे भगवा.न्ब्रवी.त्विति।। 7.11.2।।

द्वादशः खण्डः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore • SGS

• 卐 7.12 आकाशो वाव तेजसो भूया,नाकाशे वै सूर्याचन्द्रमसा.वुभौ- विद्यु.न्नक्षत्रा,ण्यग्नि राकाशेनाऽऽह्वय-त्याकाशेन शृणो-त्याकाशेन प्रतिशृणो-त्याकाशे रमत- आकाशे न रमत- आकाशे जायत- आकाश मभि.जायत, -आकाश.मुपाऽऽस्वेति।। 7.12.1।।

• स य आकाशं ब्रह्मे.त्युपाऽऽस्त- आकाशवतो वै स लोका.न्प्रकाशवतोऽसम्बाधा. नुरुगायवतो ऽभि सिध्यति, याव.दाकाशस्य गत-न्तत्रास्य यथाकामचारो भवति- य आकाशं ब्रह्मे.त्युपाऽऽस्ते,ऽस्ति भगव आकाशा.द्भूय इ-त्याकाशा.द्वाव भूयोऽस्तीति- तन्मे भगवा.न्ब्रवी.त्विति।। 7.12.2।।

त्रयोदशः खण्डः।।

• 卐 7.13 स्मरो वावाऽऽकाशा.द्भूय,स्तस्मा.द्यद्यपि बहव आसीर.न्न स्मरन्तो- नैव ते कञ्चन शृणुयु- र्न मन्वीर-न्न विजानीरन्,यदा वाव ते स्मरेयु-रथ शृणुयु-रथ मन्वीर-न्नथ विजानीर,न्त्स्मरेण वै पुत्रान् विजानाति- स्मरेण पशू,न्त्स्मर.मुपाऽऽस्वेति।। 7.13.1।।

• स य.स्स्मरं ब्रह्मे.त्युपाऽऽस्ते- याव.त्स्मरस्य गत-न्तत्रास्य यथाकामचारो भवति- यस्स्मरं ब्रह्मे.त्युपाऽऽस्ते,-ऽस्ति भगव स्स्मरा.द्भूय इति- स्मरा.द्वाव भूयोऽस्तीति- तन्मे भगवा.न्ब्रवी.त्विति।। 7.13.2।।

चतुर्दशः खण्डः।।

• 卐 7.14 आशा वाव स्मरा.द्भूय,स्याशेद्धो वै स्मरो मन्त्रा.नधीते- कर्माणि कुरुते- पुत्रांश्च पशूंश्चेच्छत- इमञ्च लोक.ममु.ञ्चेच्छत, -आशा.मुपाऽऽस्वेति।। 7.14.1।।

• स य आशां ब्रह्मे.त्युपाऽऽस्त- आशयाऽस्य सर्वे कामा स्समृध्य-न्त्यमोघा हास्याऽऽशिषो भवन्ति, याव.दाशाया गत- न्तत्रास्य यथाकामचारो भवति- य आशां ब्रह्मे.त्युपाऽऽस्ते,-ऽस्ति भगव आशाया भूय इ-त्याशाया वाव भूयोऽस्तीति- तन्मे भगवा.न्ब्रवी.त्विति।। 7.14.2।।

पञ्चदशः खण्डः।।

• 卐 7.15 प्राणो वा आशाया भूयान्,यथा वा अरा नाभौ समर्पिता- एव.मस्मि.न्प्राणे सर्वं समर्पितं, प्राणः प्राणेन याति- प्राणः प्राण.न्ददाति- प्राणाय ददाति- प्राणो ह पिता- प्राणो माता- प्राणो भ्राता- प्राण स्स्वसा- प्राण आचार्यः- प्राणो ब्राह्मणः।। 7.15.1।।

• स यदि पितरँ वा मातरँ वा भ्रातरँ वा स्वसारँ वाऽऽचार्यँ वा ब्राह्मणँ वा किञ्चि.द्भृश.मिव प्रत्याह- धिक्त्वाऽस्त्वि.त्येवैन माहु४, पितृहा वै त्वमसि- मातृहा वै त्वमसि- भ्रातृहा वै त्वमसि- स्वसृहा वै त्वम-स्याचार्यहा वै त्वमसि- ब्राह्मणहा वै त्वमसीति।। 7.15.2।।

• अथ यद्य.प्येना.नुत्क्रान्त.प्राणा-न्छूलेन समासँ व्यतिषन्दहे.न्नैवैनं ब्रूयु४- पितृहाऽसीति- न मातृहाऽसीति- न भ्रातृहाऽसीति- न स्वसृहाऽसीति- नाऽऽचार्यहाऽसीति- न ब्राह्मणहाऽसीति।। 7.15.3।। (वि-अति-सं-दहेत्)

• प्राणो ह्येवैतानि सर्वाणि भवति, स वा एष एवं पश्य-न्नेवं मन्वान- एवँ विजान-न्नतिवादी भवति, तञ्चे.द्ब्रूयु.रतिवा.द्यसी-त्यतिवा.द्यस्मीति ब्रूया.न्नापह्नुवीत।। 7.15.4।।

षोडश४ खण्डः।।

• 卐 7.16 एष तु वा अतिवदति- यस्सत्ये.नातिवदति, सोऽहं भगव स्सत्येनाऽतिवदानीति, सत्य.न्त्वेव विजिज्ञासितव्य.मिति, सत्यं भगवो विजिज्ञास इति।। 7.1.1।।

सप्तदश४ खण्डः।।

• 卐 7.17 यदा वै विजाना-त्यथ सत्यँ वदति, नाविजान.न्त्सत्यँ वदति- विजान.न्नेव सत्यँ वदति, विज्ञान.न्त्वेव विजिज्ञासितव्य.मिति, विज्ञानं भगवो विजिज्ञास इति।। 7.17.1।।

अष्टादश४ खण्डः।।

• 卐 7.18 यदा वै मनुते-ऽथ विजानाति- नाम त्वा विजानाति- मत्वैव विजानाति- मति.स्त्वेव विजिज्ञासितव्येति, मतिं भगवो विजिज्ञास इति।। 7.18.1।।

एकोनवि९श४ खण्डः।।

• 卐 7.19 यदा वै श्रद्दधा-त्यथ मनुते, नाश्रद्दध.न्मनुते- श्रद्दध.देव मनुते, श्रद्धा त्वेव विजिज्ञासितव्येति, श्रद्धां भगवो विजिज्ञास इति।। 7.19.1।।

वि९श४ खण्डः।।

• 卐 7.20 यदा वै निस्तिष्ठ-त्यथ श्रद्दधाति, नाऽनि.स्तिष्ठ.न्छ्रद्दधाति- नि.स्तिष्ठ.न्नेव श्रद्दधाति, निष्ठा त्वेव विजिज्ञासितव्येति, निष्ठां भगवो विजिज्ञास इति।। 7.20.1।।

एकवि९श४ खण्डः।।

- 卐 7.21 यदा वै करो-त्यथ नि.स्तिष्ठति, नाकृत्वा नि.स्तिष्ठति- कृत्वैव नि.स्तिष्ठति- कृति.स्त्वेव विजिज्ञासितव्येति- कृतिं भगवो विजिज्ञास इति।। 7.21.1।।

द्वाविꣳशः खण्डः।।

- 卐 7.22 यदा वै सुखँ लभते-ऽथ करोति, नासुखँ लब्ध्वा करोति- सुख.मेव लब्ध्वा करोति, सुख न्त्वेव विजिज्ञासितव्य.मिति- सुखं भगवो विजिज्ञास इति।। 7.22.1।।

त्रयोविꣳशः खण्डः।।

- 卐 7.23 यो वै भूमा- त.त्सुख,-न्नाल्पे सुख.मस्ति- भूमैव सुखं, भूमा त्वेव विजिज्ञासितव्य इति, भूमानं भगवो विजिज्ञास इति।। 7.23.1।।

चतुर्विꣳशः खण्डः।।

- 卐 7.24 यत्र नान्य.त्पश्यति- नान्य.च्छृणोति- नान्य.द्विजानाति- स भूमा,ऽथ यत्रान्य.त्पश्य-त्यन्य.च्छृणो-त्यन्य.द्विजानाति- तदल्पँ, यो वै भूमा- तदमृत,मथ यदल्प-न्तन्मर्त्यꣳ, स भगवः कस्मि.न्प्रतिष्ठित इति- स्वे महिम्नि, यदि वा न महिम्नीति।। 7.24.1।।
- गो अश्व.मिह महिमे.त्याचक्षते- हस्ति.हिरण्य.न्दास.भार्य.ङ्क्षेत्रा.ण्यायतनानीति, नाह.मेवं ब्रवीमि, ब्रवी.मीति होवाचा,ऽन्यो ह्यन्यस्मि.न्प्रतिष्ठित इति।। 7.24.2।।

पञ्चविꣳशः खण्डः।।

- 卐 7.25 स एवाधस्ता-त्स उपरिष्टा-त्स पश्चा-त्स पुरस्ता-त्स दक्षिणत-स्स उत्तरत-स्स एवेदꣳ सर्व.मि,त्यथातोऽहङ्कारा ऽऽदेश एवा-ऽह मेवाधस्ता-दह.मुपरिष्टा-दहं पश्चा-दहं पुरस्ता-दह.न्दक्षिणतो-ऽह.मुत्तरतो-ऽह.मेवेदꣳ सर्वमिति।। 7.25.1।।
- अथाऽत आत्मा ऽऽदेश एवा,ऽऽत्मैवाधस्ता-दात्मोपरिष्टा-दात्मा पश्चा-दात्मा पुरस्ता-दात्मा दक्षिणत- आत्मोत्तरत- आत्मैवेदꣳ सर्व.मिति, स वा एष एवं पश्य-न्नेवं मन्वान- एवँ विजान-न्नात्मरति.रात्मक्रीड आत्ममिथुन आत्मा ऽऽनन्द- स्स स्वरा.ड्भवति, तस्य सर्वेषु लोकेषु कामचारो भव,त्यथ येऽन्यथाऽतो विदु.रन्यराजान-स्ते क्षय्यलोका भवन्ति- तेषाꣳ सर्वेषु लोके.ष्वकामचारो भवति।। 7.25.2।।

षड्विꣳशः खण्डः।।

• 卐 7.26 तस्य ह वा एतस्यैवं पश्यत एवं मन्वानस्यैवँ विजानत- आत्मतः प्राण- आत्मत आशा-ऽऽत्मत स्स्मर- आत्मत आकाश- आत्मत स्तेज- आत्मत आप- आत्मत आविर्भाव.तिरोभावा-वात्मतोऽन्न-मात्मतो बल-मात्मतो विज्ञान-मात्मतो ध्यान-मात्मत श्चित्त-मात्मत स्सङ्कल्प- आत्मतो मन- आत्मतो वा-गात्मतो नामा-ऽऽत्मतो मन्त्रा- आत्मतः कर्मा-ण्यात्मत एवेदꣳ सर्वमिति।। 7.26.1।।

• तदेष श्लोको, न पश्यो मृत्युं पश्यति- न रोग.न्नोत दुःखताꣳ- सर्वꣳ ह पश्यः पश्यति- सर्व.माप्नोति सर्वश इति, स एकधा भवति- त्रिधा भवति- पञ्चधा सप्तधा नवधा चैव पुन.श्चैकादश स्स्मृत- श्शतञ्च दश चैकश्च सहस्राणि च विꣳशति,राहारशुद्धौ सत्त्वशुद्धि- स्सत्त्व.शुद्धौ ध्रुवा स्मृति- स्स्मृति.लम्भे सर्वग्रन्थीनाँ विप्रमोक्ष,स्तस्मै मृदित.कषायाय तमस.स्पार.न्दर्शयति भगवा.न्त्सनत्कुमार,स्तꣳ स्कन्द इत्याचक्षते- तꣳ स्कन्द इत्याचक्षते।। 7.26.2।। इति सप्तमोऽध्यायः।।

## छान्दोग्योपनिषदि अष्टमोऽध्यायः।।

### प्रथमः खण्डः।।

• 卐 8.1 अथ यदिद.मस्मि.न्ब्रह्मपुरे दहरं पुण्डरीकँ वेश्म- दहरोऽस्मि.न्नन्त.राकाश,-स्तस्मिन् यदन्त-स्तदन्वेष्टव्य- न्तद्वाव विजिज्ञासितव्य.मिति।। 8.1.1।।

• तञ्चे.द्ब्रूयु, र्यदिद.मस्मि.न्ब्रह्मपुरे दहरं पुण्डरीकँ वेश्म- दहरोऽस्मि.न्नन्त.राकाशः-किन्त.दत्र विद्यते- यदन्वेष्टव्यँ- यद्वाव विजिज्ञासितव्य.मिति, स ब्रूयात्।। 8.1.2।।

• यावान् वा अय.माकाश-स्तावा.नेषोऽन्त.र्हृदय आकाश, -उभे अस्मि.न्द्यावापृथिवी अन्त.रेव समाहिते, उभा.वग्निश्च वायुश्च सूर्याचन्द्रमसा.वुभौ- विद्यु.न्नक्षत्राणि यच्चास्येहास्ति यच्च नास्ति- सर्व.न्तदस्मि.न्त्समाहित.मिति।। 8.1.3।।

• तञ्चे.द्ब्रूयु,रस्मिꣳश्चे.दिदं ब्रह्मपुरे सर्वꣳ समाहितꣳ- सर्वाणि च भूतानि- सर्वे च कामा, यदैत.ज्जरा वाऽऽप्नोति- प्रध्वꣳसते वा- किन्ततोऽतिशिष्यत इति।। 8.1.4।।

• स ब्रूया-न्नास्य जरयैत.ज्जीर्यति- न वधेनास्य हन्यत, -एत.त्सत्यं.ब्रह्मपुर-मस्मि.न्कामा स्समाहिता, एष आत्माऽपहत.पाप्मा- विजरो विमृत्यु र्विशोको विजिघत्सोऽपिपास स्सत्यकाम

स्सत्यसङ्कल्पो, यथा ह्येवेह प्रजा अन्वा.विशन्ति- यथाऽनुशासनँ, यँय.मन्त मभिकामा भवन्ति- यञ्जनपदँ- यङ्क्षेत्रभाग- न्तन्त.मेवोप जीवन्ति।। 8.1.5।।

- तद्यथेह कर्मजितो लोकः~ क्षीयत- एव.मेवामुत्र पुण्यजितो लोकः~ क्षीयते, तद्य इहाऽऽत्मान मननुविद्य व्रज-न्त्येता१श्च सत्या.न्कामा१-स्तेषा१ सर्वेषु लोके.ष्वकामचारो भव,त्यथ य इहाऽऽत्मान.मनुविद्य व्रज-न्त्येता१श्च सत्या.न्कामा१-स्तेषा१ सर्वेषु लोकेषु कामचारो भवति।। 8.1.6।।

द्वितीय॰ खण्डः।।

- 卐 8.2 स यदि पितृलोक.कामो भवति- सङ्कल्पा.देवास्य पितर स्समुत्तिष्ठन्ति, तेन पितृलोकेन सम्पन्नो महीयते।। 8.2.1।।
- अथ यदि मातृलोक.कामो भवति- सङ्कल्पा.देवास्य मातर स्समुत्तिष्ठन्ति- तेन मातृलोकेन सम्पन्नो महीयते।। 8.2.2।।
- अथ यदि भ्रातृलोक.कामो भवति- सङ्कल्पा.देवास्य भ्रातर स्समुत्तिष्ठन्ति, तेन भ्रातृलोकेन सम्पन्नो महीयते।। 8.2.3।।
- अथ यदि स्वसृलोक.कामो भवति- सङ्कल्पा.देवास्य स्वसार स्समुत्तिष्ठन्ति, तेन स्वसृलोकेन सम्पन्नो महीयते।। 8.2.4।।
- अथ यदि सखिलोक.कामो भवति- सङ्कल्पा.देवास्य सखाय स्समुत्तिष्ठन्ति, तेन सखिलोकेन सम्पन्नो महीयते।। 8.2.5।।
- अथ यदि गन्धमाल्यलोक.कामो भवति- सङ्कल्पा.देवास्य गन्धमाल्ये समुत्तिष्ठत,स्तेन गन्धमाल्य.लोकेन सम्पन्नो महीयते।। 8.2.6।।
- अथ यद्यन्नपानलोक.कामो भवति- सङ्कल्पा.देवास्यान्नपाने समुत्तिष्ठत,स्तेनान्नपान.लोकेन सम्पन्नो महीयते।। 8.2.7।।
- अथ यदि गीतवादित्रलोक.कामो भवति- सङ्कल्पा.देवास्य गीतवादित्रे समुत्तिष्ठत,स्तेन गीतवादित्र.लोकेन सम्पन्नो महीयते।। 8.2.8।।
- अथ यदि स्त्रीलोक.कामो भवति- सङ्कल्पा.देवास्य स्त्रिय स्समुत्तिष्ठन्ति- तेन स्त्रीलोकेन सम्पन्नो महीयते।। 8.2.9।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

• यँ यमन्त.मभिकामो भवति- यङ्काम.ङ्कामयते- सोऽस्य सङ्कल्पा.देव समुत्तिष्ठति- तेन सम्पन्नो महीयते।। 8.2.10।।

तृतीय॰ खण्डः।।

• 卐 8.3 त इमे सत्या॰ कामा अनृतापिधाना-स्तेषा॰ सत्याना॰ सता-मनृत.मपिधानँ, यो यो ह्यस्येत॰ प्रैति- न तमिह दर्शनाय लभते।। 8.3.1।।

• अथ ये चास्येह जीवा- ये च प्रेता- यच्चान्य.दिच्छ न्न लभते- सर्व.न्तदत्र गत्वा विन्दते,ऽत्र ह्यस्यैते सत्या॰ कामा अनृतापिधाना,स्तद्यथाऽपि हिरण्यनिधि.न्निहित- मक्षेत्रज्ञा उपर्युपरि सञ्चरन्तो विन्देयु-रेव.मेवेमा स्सर्वा॰ प्रजा अह.रह.र्गच्छन्त्य- एतं ब्रह्मलोक न्न विन्द-न्त्यनृतेन हि प्रत्यूढाः।। 8.3.2।।

• स वा एष आत्मा हृदि- तस्यैत.देव निरुक्त॰, हृ.द्यय.मिति- तस्मा.द्धृदय,मह.रह र्वा एवँवि.त्स्वर्गँ लोक.मेति।। 8.3.3।।

• अथ य एष संप्रसादो-ऽस्मा.च्छरीरा.त्समुत्थाय- परञ्ज्योति.रुपसंपद्य- स्वेन रूपेणाऽभिनिष्पद्यत- एष आत्मेति होवा,चैत.दमृत.मभय-मेत.द्ब्रह्मेति, तस्य ह वा एतस्य ब्रह्मणो नाम सत्य.मिति।। 8.3.4।।

• तानि ह वा एतानि त्री.ण्यक्षराणि- स.ती.य.मिति, तद्य.त्स-त्तदमृत,मथ य.त्ति-तन्मर्त्य,मथ य.द्य-न्तेनोभे यच्छति, यदनेनोभे यच्छति- तस्मा.द्य,महरह.र्वा एवँवि.त्स्वर्गँ लोक.मेति।। 8.3.5।। (सत्यम् -स,ति,यम्)

चतुर्थ॰ खण्डः।।

• 卐 8.4 अथ य आत्मा स सेतु-र्विधृति.रेषाँ लोकाना.मसम्भेदाय, नैत॰ सेतु.महोरात्रे तरतो- न जरा न मृत्यु र्न शोको न सुकृत.न्न दुष्कृत॰, सर्वे पाप्मानोऽतो निवर्तन्ते,ऽपहत.पाप्मा ह्येष ब्रह्मलोकः।। 8.4.1।।

• तस्माद्वा एत॰ सेतु.न्तीर्त्वा-ऽन्ध स्स.न्ननन्धो भवति, विद्ध.स्स.न्नविद्धो भव,त्युपतापी स.न्ननुपतापी भवति, तस्माद्वा एत॰ सेतु.न्तीर्त्वाऽपि नक्त.मह.रेवाभिनिष्पद्यते, सकृ.द्विभातो ह्येवैष ब्रह्मलोकः।। 8.4.2।।

• तद्य एवैतं ब्रह्मलोकं ब्रह्मचर्येणानु.विन्दन्ति- तेषा.मेवैष ब्रह्मलोक-स्तेषाꣳ सर्वेषु लोकेषु कामचारो भवति।। 8.4.3।।

पञ्चमः खण्डः।।

• 卐 8.5 अथ य.द्यज्ञ इत्याचक्षते- ब्रह्मचर्यमेव त,द्ब्रह्मचर्येण ह्येव यो ज्ञाता- तँ विन्दते,ऽथ यदिष्ट.मित्याचक्षते- ब्रह्मचर्यमेव त,द्ब्रह्मचर्येण ह्येवेष्ट्वाऽऽत्मान.मनुविन्दते।। 8.5.1।।

• अथ यत्सत्त्रायण मि.त्याचक्षते- ब्रह्मचर्यमेव त,द्ब्रह्मचर्येण ह्येव सत आत्मन.स्त्राणँ विन्दते,ऽथ यन्मौन.मित्याचक्षते- ब्रह्मचर्य.मेव त,द्ब्रह्मचर्येण ह्येवाऽऽत्मान.मनुविद्य मनुते।। 8.5.2।।

• अथ य.दनाशकायन मित्याचक्षते- ब्रह्मचर्य.मेव त,देष ह्यात्मा न नश्यति- यं ब्रह्मचर्येणानु.विन्दते,ऽथ य.दरण्यायन मित्याचक्षते- ब्रह्मचर्यमेव त,दरश्च ह वै ण्य.श्चार्णवौ ब्रह्मलोके तृतीयस्या.मितो दिवि, तदैरंमदीयꣳ सर-स्तदश्वत्थ स्सोमसवन-स्तदपराजिता पू.र्ब्रह्मणः- प्रभु.विमितꣳ हिरण्मयम्।। 8.5.3।।

• तद्य एवैता.वरञ्च ण्य.ञ्चार्णवौ ब्रह्मलोके ब्रह्मचर्येणानु.विन्दन्ति- तेषा.मेवैष ब्रह्मलोक-स्तेषाꣳ सर्वेषु लोकेषु कामचारो भवति।। 8.5.4।।

षष्ठः खण्डः।।

• 卐 8.6 अथ या एता हृदयस्य नाड्य-स्ताः पिङ्गलस्याऽणिम्न.स्तिष्ठन्ति- शुक्लस्य नीलस्य पीतस्य लोहितस्ये,त्यसौ वा आदित्यः पिङ्गल- एष शुक्ल- एष नील- एष पीत- एष लोहितः।। 8.6.1।।

• तद्यथा महापथ आतत- उभौ ग्रामौ गच्छ.तीम.ञ्चामु-ञ्चैव.मेवैता आदित्यस्य रश्मय उभौ लोकौ गच्छन्तीम.ञ्चामु,ञ्चामुष्मा.दादित्या.त्प्रतायन्ते, ता आसु नाडीषु सृप्ता आभ्यो नाडीभ्यः प्रतायन्ते, तेऽमुष्मि.न्नादित्ये सृप्ताः।। 8.6.2।।

• तद्यत्रैत.त्सुप्त स्समस्त स्संप्रसन्न स्स्वप्न.न्न विजाना-त्यासु तदा नाडीषु सृप्तो भवति, तन्न कश्चन पाप्मा स्पृशति- तेजसा हि तदा सम्पन्नो भवति।। 8.6.3।।

• अथ यत्रैत.दबलिमान.न्नीतो भवति- तमभित आसीना आहु-र्जानासि मा.ञ्जानासि मामिति, स याव.दस्मा.च्छरीरा.दनुत्क्रान्तो भवति- ताव.ज्जानाति।। 8.6.4।।

• अथ यत्रैत.दस्मा.च्छरीरा.दुत्क्राम-त्यथैतै.रेव रश्मिभि रूर्ध्व.माक्रमते, स ओमिति वा होद्वा मीयते, स यावत्क्षिप्ये-न्मन.स्ताव.दादित्य.ङ्गच्छ,त्येतद्वै खलु लोकद्वारँ विदुषां प्रपदन-न्निरोधोऽविदुषाम्।। 8.6.5।।

• तदेष श्लोकः। शत.ञ्चैका च हृदयस्य नाड्य-स्तासां मूर्धान.मभिनिस्सृतैका। तयोर्ध्व.माय.न्नमृतत्व.मेति- विष्व.ङ्ङन्या उत्क्रमणे भव-न्त्युत्क्रमणे भवन्ति।। 8.6.6।।

सप्तमꣳ खण्डः।।

• 卐 8.7 य आत्माऽपहतपाप्मा विजरो विमृत्यु र्विशोको विजिघत्सोऽपिपास स्सत्यकाम स्सत्यसङ्कल्प- स्सोऽन्वेष्टव्य- स्स विजिज्ञासितव्य,स्स सर्वाꣳश्च लोका.नाप्नोति- सर्वाꣳश्च कामान्- यस्त.मात्मान मनुविद्य विजानातीति ह प्रजापति.रुवाच।। 8.7.1।।

• तद्धोभये देवासुरा अनु बुबुधिरे, ते होचु- र्हन्त त.मात्मान.मन्विच्छामो- य.मात्मान. मन्विष्य- सर्वाꣳश्च लोका नाप्नोति- सर्वाꣳश्च कामा.नि,तीन्द्रो हैव देवाना मभि प्रवव्राज-विरोचनोऽसुराणा,न्तौ हाऽसँविदाना.वेव समित्पाणी प्रजापतिसकाश.माजग्मतुः।। 8.7.2।।

• तौ ह द्वात्रिꣳशतँ वर्षाणि ब्रह्मचर्य.मूषतु,स्तौ ह प्रजापति रुवाच- किमिच्छन्ता.ववास्त.मिति, तौ होचतु- र्य आत्माऽपहत.पाप्मा विजरो विमृत्यु र्विशोको विजिघत्सोऽपिपास- स्सत्यकाम स्सत्यसङ्कल्प- स्सोऽन्वेष्टव्य- स्स विजिज्ञासितव्य,स्स सर्वाꣳश्च लोका.नाप्नोति सर्वाꣳश्च कामान्- यस्त.मात्मान मनुविद्य विजानातीति भगवतो वचो वेदयन्ते, तमिच्छन्ता.ववास्त.मिति।। 8.7.3।।

• तौ ह प्रजापति रुवाच, य एषोऽक्षिणि पुरुषो दृश्यत- एष आत्मेति होवा,चैत.दमृत.मभय-मेत.द्ब्रह्मे,त्यथ योऽयं भगवोऽप्सु परिख्यायते- यश्चाय.मादर्शे- कतम एष इ,त्येष उ एवैषु सर्वे.ष्वन्तेषु परिख्यायत इति होवाच।। 8.7.4।।

अष्टमꣳ खण्डः।।

• 卐 8.8 उद.शराव आत्मान.मवेक्ष्य- य.दात्मनो न विजानीथ-स्तन्मे प्रब्रूत.मिति, तौ होद.शरावेऽवेक्षा.ञ्चक्राते, तौ ह प्रजापति.रुवाच- किं पश्यथ इति, तौ होचतु- स्सर्व.मेवेद.मावां भगव आत्मानं पश्याव- आ लोमभ्य आ नखेभ्यꣳ प्रतिरूप.मिति।। 8.8.1।।

- तौ ह प्रजापति रुवाच, साध्वलङ्कृतौ सुवसनौ परिष्कृतौ भू.त्वोदशरावेऽवेक्षेथा.मिति, तौ ह साध्वलङ्कृतौ सुवसनौ परिष्कृतौ भू.त्वोदशरावेऽवेक्षा.ञ्चक्राते, तौ ह प्रजापति रुवाच- किं पश्यथ इति।। 8.8.2।।
- तौ होचतु,र्यथैवेद.मावां भगव स्साध्वलङ्कृतौ सुवसनौ परिष्कृतौ स्व- एव.मेवेमौ भगव स्साध्वलङ्कृतौ सुवसनौ परिष्कृता.वि,त्येष आत्मेति होवा-चैत.दमृत.मभय- मेत.द्ब्रह्मेति, तौ ह शान्त.हृदयौ प्रवव्रजतुः।। 8.8.3।।
- तौ हान्वीक्ष्य प्रजापति रुवाचा,ऽनुपलभ्याऽऽत्मान मननुविद्य व्रजतो, यतर एत.दुपनिषदो भविष्यन्ति- देवा वाऽसुरा वा- ते परा भविष्यन्तीति, स ह शान्तहृदय एव विरोचनोऽसुरा.न्जगाम, तेभ्यो हैता.मुपनिषदं प्रोवाचा-ऽऽत्मैवेह महय्य- आत्मा परिचर्य, - आत्मान मेवेह महय.न्नात्मानं परिचर.न्नुभौ लोका.ववाऽऽप्नोतीम.ञ्चामु.ञ्चेति।। 8.8.4।।
- तस्मा.दप्य.द्येहाऽऽददान मश्रद्दधान मयजमान माहु-रासुरो बते,त्यसुराणा॰ ह्येषोपनिष- त्प्रेतस्य शरीरं भिक्षया वसनेनाऽलङ्कारेणेति स॰स्कुर्व,न्त्येतेन ह्यमुँ लोक.ञ्जेष्यन्तो मन्यन्ते।। 8.8.5।।

नवम॰ खण्डः।।

- अथ हेन्द्रोऽप्राप्यैव देवा-नेत.द्भय न्ददर्श, यथैव खल्वय.मस्मि.न्छरीरे साध्वलङ्कृते साध्वलङ्कृतो भवति- सुवसने सुवसन॰- परिष्कृते परिष्कृत- एव.मेवाय.मस्मि.न्नन्धेऽन्धो भवति- स्रामे स्राम॰- परिवृक्णे परिवृक्णो,ऽस्यैव शरीरस्य नाश.मन्वेष नश्यति, नाह.मत्र भोग्यं पश्यामीति।। 8.9.1।।
- स समि.त्पाणि॰ पुन.रेयाय, त॰ ह प्रजापति रुवाच- मघवन् यच्छान्तहृदय॰ प्राव्राजी स्साधँ विरोचनेन, किमिच्छ.न्पुन.राऽगम इति, स होवाच- यथैव खल्वयं भगवोऽस्मि न्छरीरे साध्वलङ्कृते साध्वलङ्कृतो भवति- सुवसने सुवसन॰- परिष्कृते परिष्कृत- एव.मेवाय.मस्मि.न्नन्धेऽन्धो भवति- स्रामे स्राम॰- परिवृक्णे परिवृक्णो,ऽस्यैव शरीरस्य नाश.मन्वेष नश्यति, नाह.मत्र भोग्यं पश्यामीति।। 8.9.2।।
- एव.मेवैष मघव.न्निति होवा,चैत.न्त्वेव ते भूयोऽनु व्याख्यास्यामि- वसापराणि द्वात्रि॰शतँ वर्षाणीति, स हापराणि द्वात्रि॰शतँ वर्षा.ण्युवास- तस्मै होवाच।। 8.9.3।।

## दशमः खण्डः।।

- 卐 8.10 य एष स्वप्ने महीयमान.श्चर-त्येष आत्मेति होवा-चैत.दमृत.मभय मेतद्ब्रह्मेति, स ह शान्तहृदयः प्रवव्राज, स हाप्रा ऽप्यैव देवा-नेत.द्भय न्ददर्श, तद्य.द्यपीदं शरीर.मन्धं भव-त्यनन्ध स्स भवति- यदि स्राम.मस्रामो, नैवैषोऽस्य दोषेण दुष्यति।। 8.10.1।।
- न वधेनास्य हन्यते- नास्य स्राम्येण स्रामो, घ्नन्ति त्वेवैनँ विच्छादयन्तीवा,ऽप्रियवेत्तेव भव-त्यपि रोदितीव, नाह.मत्र भोग्यं पश्यामीति।। 8.10.2।।
- स समित्पाणिः पुन.रेयाय, तं ह प्रजापति रुवाच- मघवन् यच्छान्त.हृदयः प्राव्राजीः- किमिच्छ.न्पुन.राऽगम इति, स होवाच- तद्य.द्यपीदं भगव-श्शरीर.मन्धं भव-त्यनन्ध स्स भवति- यदि स्राम.मस्रामो, नैवैषोऽस्य दोषेण दुष्यति।। 8.10.3।।
- न वधेनास्य हन्यते- नास्य स्राम्येण स्रामो, घ्नन्ति त्वेवैनँ विच्छादयन्तीवाऽप्रियवेत्तेव भव-त्यपि रोदितीव, नाह.मत्र भोग्यं पश्यामी,त्येव.मेवैष मघव.न्निति होवा-चैत.न्त्वेव ते भूयोऽनु व्याख्यास्यामि- वसापराणि द्वात्रिंशतँ वर्षाणीति, स हापराणि द्वात्रिंशतँ वर्षा.ण्युवास, तस्मै होवाच।। 8.10.4।।

## एकादशः खण्डः।।

- 卐 8.11 तद्यत्रैत.त्सुप्त स्समस्त स्संप्रसन्न स्स्वप्न.न्न विजाना-त्येष आत्मेति होवा,चैत.दमृत.मभय मेत.द्ब्रह्मेति, स ह शान्तहृदयः प्रवव्राज, स हाप्रा ऽप्यैव देवा.नेत.द्भय न्ददर्श, नाह खल्वय.मेवं संप्र.त्यात्मान ञ्जाना-त्यय.मह.मस्मीति- नो एवेमानि भूतानि, विनाश.मेवापीतो भवति, नाह.मत्र भोग्यं पश्यामीति।। 8.11.1।।
- स समित्पाणिः पुन.रेयाय, तं ह प्रजापति रुवाच, मघवन् यच्छान्तहृदयः प्राव्राजीः- किमिच्छ.न्पुन.राऽगम इति, स होवाच- नाह खल्वयं भगव- एवं सम्प्र.त्यात्मान ञ्जाना-त्यय.मह.मस्मीति- नो एवेमानि भूतानि- विनाश.मेवापीतो भवति, नाह.मत्र भोग्यं पश्यामीति।। 8.11.2।।
- एव.मेवैष मघव.न्निति होवा,चैत.न्त्वेव ते भूयोऽनु व्याख्यास्यामि, नो एवान्यत्रैतस्मा.-द्वसापराणि पञ्च वर्षाणीति, स हापराणि पञ्च वर्षा.ण्युवास, तान्येकशतं संपेदु,रेत.त्त-द्यदाहु-रेकशतं ह वै वर्षाणि मघवा.न्प्रजापतौ ब्रह्मचर्य.मुवास, तस्मै होवाच।। 8.11.3।।

द्वादशः खण्डः।।

- 卐 8.12 मघव.न्मर्त्यँ वा इदꣳ शरीर.मात्तं मृत्युना, तदस्यामृतस्याऽशरीरस्या ऽऽत्मनोऽधिष्ठान,मात्तो वै सशरीरः प्रियाप्रियाभ्या,न्न वै सशरीरस्य सतः प्रियाप्रिययो रपहति.र,स्त्यशरीरँ वाव सन्त-न्न प्रियाप्रिये स्पृशतः।। 8.12.1।।

- अशरीरो वायु.रभ्रँ विद्यु.त्स्तनयित्नु.रशरीरा.ण्येतानि, तद्यथैता.न्यमुष्मा.दाकाशा त्समुत्थाय- परञ्ज्योति रुपसंपद्य- स्वेन रूपेणाभि.निष्पद्यन्ते।। 8.12.2।।

- एव.मेवैष सम्प्रसादो-ऽस्मा.च्छरीरा त्समुत्थाय- परञ्ज्योति रुपसंपद्य- स्वेन रूपेणाभि निष्पद्यते- स उत्तम.पुरुष,स्स तत्र पर्यैति- जक्ष.त्क्रीड.न्रममाण स्त्रीभि र्वा यानै र्वा ज्ञातिभि र्वा- नोपजनꣳ स्मर.न्निदꣳ शरीरꣳ, स यथा प्रयोग्य आचरणे युक्त- एव.मेवाय. मस्मि.न्छरीरे प्राणो युक्तः।। 8.12.3।।

- अथ यत्रैत.दाकाश.मनुविषण्ण.ञ्चक्षु- स्स चाक्षुषः पुरुषो- दर्शनाय चक्षु,रथ यो वेदेद.- ञ्जिघ्राणीति- स आत्मा गन्धाय घ्राण,मथ यो वेदेद.मभि.व्याहराणीति- स आत्मा ऽभिव्याहाराय वा,गथ यो वेदेदꣳ श्रृणवानीति- स आत्मा श्रवणाय श्रोत्रम्।। 8.12.4।।

- अथ यो वेदेदं मन्वानीति- स आत्मा मनो-ऽस्य दैव.ञ्चक्षु,स्स वा एष एतेन दैवेन चक्षुषा मनसैता.न्कामा न्पश्य.न्रमते- य एते ब्रह्मलोके।। 8.12.5।।

- तँ वा एत.न्देवा आत्मान मुपाऽऽसते, तस्मा.त्तेषाꣳ सर्वे च लोका आत्ता-स्सर्वे च कामा,स्स सर्वाꣳश्च लोका.नाप्नोति- सर्वाꣳश्च कामान्- यस्त.मात्मान मनुविद्य विजानातीति ह प्रजापति रुवाच- प्रजापति रुवाच।। 8.12.6।।

त्रयोदशः खण्डः।।

- 卐 8.13 श्यामा.च्छबलं प्रपद्ये- शबला.च्छ्यामं प्रपद्ये,ऽश्व इव रोमाणि विधूय पाप-ञ्चन्द्र इव राहो.र्मुखा त्प्रमुच्य- धूत्वा शरीर-मकृत.ङ्कृताऽऽत्मा- ब्रह्मलोक मभि.संभवामी- त्यभि संभवामीति।। 8.13.1।।

चतुर्दशः खण्डः।।

- 卐 8.14 आकाशो वै नाम- नाम.रूपयो र्निर्वहिता, ते य.दन्तरा- तद्ब्रह्म, त.दमृतꣳ- स आत्मा, प्रजापते स्सभाँ वेश्म प्रपद्ये- यशोऽहं भवामि- ब्राह्मणानाँ यशो- राज्ञाँ यशो- विशाँ यशो-

ऽह.मनु प्रापत्सि, स हाहँ यशसाँ यश,श्श्येत.मदत्क-मदत्क९ श्येतँ- लिन्दु माऽभिगाँ- लिन्दु माऽभिगाम्।। 8.14.1।। (लिन्दु - शरीरदोषसूचको वर्णः)

**पञ्चदशः खण्डः।।**

- तद्धैत.द्ब्रह्मा प्रजापतय उवाच- प्रजापति र्मनवे- मनुः प्रजाभ्य, आचार्यकुला.द्वेद.मधीत्य यथाविधान.ङ्गुरोः- कर्मातिशेषेणाऽभिसमावृत्य, कुटुम्बे शुचौ देशे स्वाध्याय.मधीयानो- धार्मिकान् विदध-दात्मनि सर्वेन्द्रियाणि संप्रतिष्ठाप्या-ऽहिँ९स.न्त्सर्व.भूता.न्यन्यत्र तीर्थेभ्य, -स्स खल्वेवँ वर्तयन्- याव.दायुषं ब्रह्मलोक.मभि संपद्यते, न च पुन.रावर्तते- न च पुन.रावर्तते।। 8.15.1।। इति अष्टमोऽध्यायः।।
- ॐ आप्यायन्तु ममाङ्गानि- वाक्प्राण श्चक्षु श्श्रोत्र- मथो बल मिन्द्रियाणि च सर्वाणि- सर्वं ब्रह्मौपनिषदं, माऽहं ब्रह्म निराकुर्यां- मा मा ब्रह्म निराकरो- दनिराकरण मस्त्वनिराकरणं मेऽस्तु, तदात्मनिरते य उपनिषत्सु धर्मा- स्ते मयि सन्तु- ते मयि सन्तु।
- ॐ शान्ति श्शान्ति श्शान्तिः।। इति सामवेदीय छान्दोग्यपनिषत्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore • SGS

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

# अथ संहितोपनिषद्ब्राह्मणम्

### प्रथमः खण्डः

- ❀;1.1 अथात.स्संहितोपनिषदो व्याख्यास्यामः।। 1।।
- सर्व.परोऽक्षा देव.संहिता भवति।। 2।।
- सर्व.प्रत्यक्षाऽसुर.संहिता भवति।। 3।।
- परोऽक्ष.प्रत्यक्षर्षि.संहिता भवति।। 4।। (परोक्षप्रत्यक्षा, ऋषिसंहिता)
- यथाँ अधीमहे।। 5।।
- स्वर्ग्या देव.संहिता भवति, स्वर्गँ लोक.ङ्गच्छति- य.स्तथाऽधीते।। 6।।
- पशव्याऽसुर.संहिता भवति, पशुमा.न्भवति- य.स्तथाऽधीते।। 7।।
- ब्रह्मवर्चस्यर्षिसंहिता भवति, ब्रह्मवर्चसी भवति- य.स्तथाऽधीते।। 8।।
- अथैता.स्तिस्र.स्संहिता भवन्ति, देवह्व.रेका वा-क्छबह्व.रेका-ऽमित्रह्व.रेका।। 9।। (शबं - अत्यन्तशुभम्, तं ह्वयतीति शब.ह्वः)
- सा या मन्द्र.स्वर.वती- सा देवह्व,रा हास्य देवा हव.ङ्गच्छन्ति- य.स्तथाऽधीते।। 10।।
- अथ यत्क्लबित.मिव निरुदित.मिव सा वाक्छबह्वः,~ क्षिप्रं मरिष्यतीति विद्या- द्य.स्तथाऽधीते।। 11।। (क्लबितं-बल्बलाकारवर्णैः अस्पष्टाक्षरैः ग्रस्तव्यस्ताक्षरैः, निरुदितम्- निकृष्टं रुदितमिव)
- अथ य.दाक्रन्दित.मिव निक्रन्दित.मिव- साऽमित्रह्व,स्सर्वज्यानि.ञ्ज्यास्यतीति विद्या- द्य.स्तथाऽधीते।। 12।।
- तद्वै खलु समृद्धि.मेव ध्याय.न्नुपाऽऽसीत।। 13।।
- सा याऽदीनतमा संपूर्णा संसृष्टा सँयता वा-क्सा पुत्र्य.पशव्या, त.द्यथा वाते वाति- प्रजा निर्मुच्यन्त- एव.मेतया।। 14।।
- अथ या मध्यायिनी संपूर्णा संसृष्टा सँयता वा-क्सा पुत्र्य.पशव्या, तद्यथा वातेऽप्सु शनैर्वा.न्त्सुखी भव-त्येव.मेतया।। 15।। (मध्यायिनी- मध्यमस्वरवती)
- अथ योत्सृष्टा गुल्मीभूताऽसंपूर्णाऽसंसृष्टाऽसँयता वा.क्साऽपुत्र्य.पशव्या,त.द्यथा वातेनातिशीघ्रँ वाता- बहु.विभग्नं प्रभग्नं शेत- एव.मेतया।। 16।।
- अथैता.स्तिस्र.स्संहिता भवन्ति- शुद्धाऽदुस्पृष्टाऽनिर्भुजेति।। 17।।

- अथैषा शुद्धा संहिता भवति सर्वेभ्यः कामेभ्य,स्त.द्यथा समञ्जनवता रथेन- य.ङ्काम.ङ्कामयते तमभ्यश्नुत- एव.मेतया।। 18।। (समञ्जनम्- पालिश, ग्रीज)
- अथैषाऽदुस्पृष्टा संहिता भवति सर्वेभ्यः कामेभ्य,स्त.द्यथा समञ्जनवता पूर्णखेन रथेन- य.ङ्काम.ङ्कामयते तमभ्यश्नुत- एव.मेतया।। 19।। (पूर्णखम्- अलङ्कारैः खानि रिक्तानि पूर्णानि यस्मिन्)
- अथैषाऽनिर्भुजा संहिता भवति सर्वेभ्य एव कामेभ्य,स्तद्यथा समञ्जनवता पूर्णखेन समाहितेन रथेन- यँ य.ङ्काम.ङ्कामयते तन्त.मभ्यश्नुत- एव.मेतया।। 20।। (समाहिताः - भक्ष्यायुधानि)
- अथैता.स्तिस्र.स्संहिता भवन्ति- वायो.रिन्द्र.स्याग्ने,सर्वाऽवृद्धा वायो- स्सर्व.वृद्धेन्द्र-स्योत्सेध.परोऽक्ष.वृद्धाऽग्नेः।। 21।।---

## द्वितीयः खण्डः

- ❀;1.2 अथैषा समावर्तनीयेति वेदितव्या संहिता भवति।। 1।।
- लोपातिहार परोऽक्ष.समापाद्याः।। 2।।
- सर्वत्र गता.स्स्तोभा-स्सर्वत्र निवृत्ता-स्सर्वत्र प्रवृत्ताः।। 3।।
- सर्वत्र प्राच्य.पाञ्चालीषु मुक्तं- सर्वत्रामुक्तम्।। 4।।
- सर्वत्र सौष्टव्यम्।
- लुप्तेषु रेफ.सन्धय.स्सर्वत्र।। 5।।
- सर्वत्र ह रोहपूर्वे.ष्वरोह.पूर्वाणि।। 6।।
- सर्वत्रोदात्ते.ष्वनुदात्तानि।। 7।।
- अभिगीते.ष्वनभिगीतानि सर्वत्र।। 8।।
- विनामित.प्रणामिते-ष्ववि.नामिता.न्यप्र.णामितानि।। 9।।
- सर्वत्र विसर्गोपग्रहे-ष्वविसृष्टा.न्यनुपगृहीतानि।। 10।।
- सर्वत्र ह्रस्व.कर्षणेषु दीर्घ.कर्षणानि- दीर्घ.कर्षणेषु मन्द्र.कर्षणानि- मन्द्र.कर्षणे.ष्वात्त.कर्षणानि।। 11।।
- सर्वत्र तीधेनावा.मर्तयो.र्विप्रवाकः।। 12।। (तीधेनावा - मर्ता इत्युच्चारणं यत्र तत्, विप्रवाकः- प्रयोगः)
- तीधेनावा.न्वृष्टिकामाय कुर्या-न्मर्ता.मन्नाद्य.कामाय।। 13।।

- सर्वत्र चतुर्थस्वरा- मन्द्रस्वराश्च प्रस्तावाः।। 14।।
- चतुर्थ.मन्द्रातिस्वार्य.स्वराश्च भवन्ति।। 15।।
- प्रथम.स्वराश्च- द्वितीय.स्वराश्च- प्रथम.द्वितीय.तृतीय.स्वराश्च भवन्ति।। 16।।
- रथन्तरेऽन्वक्षरं भकारान्।। 17।।
- स्वरवन्ति व्यञ्जनानि- यथाऽक्षर.न्दर्शयेत्।। 18।।
- तद्यथा स्वरेण सर्वाणि व्यञ्जननि व्याप्ता,न्येवं सर्वा.न्कामा.नवाऽऽप्नोति- यश्चैवँ वेद।। 19।।
- यस्यैते स्वरवन्तꣳ प्रयुज्यन्ते- यश्चैवँ.विद्वा.न्प्रयुङ्क्ते- यथा चाग्नि.चन्द्र.सूर्या भास्वन्तोऽपहत.तमस्का- स्तद्व.दुद्गातृ.यजमानौ भवतः।। 20।।
- एवं ह्याह, भात्यग्नि-र्भाति चन्द्रमा- भाति सूर्यो- भान्ति ज्योतींषि- भाति रथन्तर.मिति, भकाराणा.मेव दीप्ति.न्दर्शयति स्वरवताम्।। 21।।
- रथन्तरस्य स्तोभा स्स्वरवन्तꣳ प्रयोक्तव्याः।। 22।।
- यत्र तु व्यञ्जनवन्तꣳ प्रयुज्येर-न्क्षोधुका.ववध्यायिना.वप्रजसा. वुद्गातृ.यजमानौ स्याता,-न्तस्मा.दन्वक्षरं प्रयुञ्जान- स्स्वरवन्ति व्यञ्जनानि- यथाऽक्षर न्दर्शयेत्।। 23।।---

तृतीयः खण्डः

- ❀;1.3 अथैते आनुदेशिक्यौ संहिते यज्ञेन कर्मणा चरिते भवतो,ऽन्ततो.निधन.सामान्या-दन्त.स्सामिकानि निधनानि संप्रसारयन्ति।। 1।।
- चतुर्थोदात्ततमा. न्त्स्वरा.न्घ्यन्तरा.नुदूहन्ति- प्रागुपाया,न्न चे.त्समानपुरुष.वचने।। 2।।
- तृतीय.प्रभृतीना मुदात्ततमꣳ कश्चि.त्स्वरो भवति, तमुदूह इत्याचक्षते।। 3।।
- तथा च यज्ञे क्रियते।। 4।।
- अरण्ये.गेय.ञ्चाधीमहे।। 5।।
- ग्रामे.गेयञ्च लाङ्गलाना.मेवैके बहुलम्।। 6।।
- अनुदात्त.मुदात्त मुदात्त.ञ्चानुदात्त- मवृद्धँ वृद्धँ वृद्ध.ञ्चावृद्ध- मकृष्ट.ङ्कृष्ट. ङ्कृष्ट.ञ्चाकृष्ट.मि,त्येवं स्तोत्रीयतमं भवति।। 7।।
- अथापि याज्ञिका यज्ञे युक्ता अनु.दिश-न्त्युदात्तानुदात्तयो रुदात्तं सेवेत- वृद्धावृद्धयो.रवृद्ध-ङ्कृष्टाकृष्टयो.रकृष्ट,-मित्येवं स्तोत्रीयतमं भवति।। 8।।

- विद्या ह वै ब्राह्मण.माजगाम- तवाह.मस्मि- त्वं मा पालयस्वा,ऽनर्हते मानिने नैव मा दा-गोपाय मा- श्रेयसे तेऽह.मस्मि।। 9।।
- विद्यया सार्धं म्रियेत- न विद्या.मूषरे वपेत्।। 10।।
- ब्रह्मचारी- धनदायी- मेधावी- श्रोत्रियः- प्रियो- विद्यया वा विद्याँ यः प्राह- तानि तीर्थानि ष.ण्ममेति।। 11।।
- अथैष आर्चिको निगदो भवति।। 12।।
- य आतृणो.त्यवितथेन कर्णा-वतृप्त.ङ्कुर्व.न्नमृतं संप्रयच्छन्। तं मन्येत पितरं मातरञ्च- तस्मै न द्रह्ये.त्कतम.च्चनाह।। 13।।
- अग्नि.रिव कक्ष.न्दहति- ब्रह्मपृष्ठ.मनादृतम्।। 14।।
- तस्मै ब्रह्म न प्रब्रूयात्।। 15।।
- शक्यमान मकुर्वते।। 16।।
- अतिसंसिद्ध.मपि गच्छेत विद्यया सह।। 17।।
- ज्ञानवा.न्न त्वेना.मसते दद्यात्।। 18।।
- सतश्च न विमानयेत्।। 19।।
- अथैता वेदस्याष्टा.वुपनिषदो भवन्ति। वित्ति-श्चोपस्तवश्च- दमश्च- श्रद्धा च- संप्रश्नश्चा-ऽनाकाशीकरणञ्च- योगश्चा-ऽऽचार्य.शुश्रूषा चेति।। 20।। (अनाकाशीकरणम् - असच्छिष्याय अप्रकाशः)
- तदेत.त्कौकुरुण्डे.र्वचनँ वेदयन्ते- त्रिभिः पर्यायै.र्य स्संपूर्णं पश्यति- च्छन्दस्तो देवतातो निगमत इति- स मन्त्रदर्शी भवति।। 21।।
- अथ य एतै.रसंपूर्णं पश्यति- स गाथादर्शी भवति।। 22।।
- ते खल्विम एव पूर्वै.राचार्यैः प्रोक्ता धर्माः- प्रोक्ता धर्माः।। 23।।

**चतुर्थः खण्डः**

- ❄;1.4 दानेन सर्वा.न्कामा.नवाऽऽप्नोति- चिरजीवित्वञ्च।। 1।।
- ब्रह्मचारी- रूपवा.नहिंस्र उप पद्यते।। 2।।
- स्वर्ग्यं- पर्णाशनात्।। 3।।
- दिविचरः- पयोभक्षः।। 4।।
- स्थान.वीराऽऽसना-द्वित्तवान्। 5।।

- पितृ-मातृ-गुरु-शुश्रूषा-ध्यानवा-न्त्स्वर्गी।। 6।।
- यꣳ काञ्चन.दाता- यावानु वै रस-स्तावा.नात्मा सः।। 7।।
- एष इम एव लोकाः।
- अयं स लोक- स्स प्रतिष्ठित एव भवति।। 8।।
- प्रतिष्ठित इव ह्ययँ लोकः।। 9।।
- अथ य.दुत्तरं- सा द्यौ,र्मूर्तिमत्सु गृहे.ष्वभि जायते।। 10।।
- त्रीण्याहु.रतिदानानि- गावꣳ पृथ्वी सरस्वती।। 11।।
- नरका.दुद्धर.न्त्येते- जप-वापन- दोहना- दुपस्पर्शनात्।। 12।।
- षड्भाग.ङ्करकँ यꣳ प्रयच्छ- त्यपिपासितश्च म्रियते- सोमप.श्चाभि जायते- सोमप.श्चाभि जायते।। 13।।--- (करकं - करकलक्षणं धनम् स्वार्जितस्य षष्ठमंशं गुरवे दद्यात्)

पञ्चमः खण्डः

- ❁;1.5 अथ हिरण्य.मेवाऽपꣳ कनको भवति- सहस्रँ लभते।। 1।।
- अथैषा यजनीयेऽहनि सप्तच्छन्दाः।। 2।। (सप्तच्छन्दाः विद्या)
- अथैषा-ऽग्नि.रुप.समाहितो भवति।। 3।। (एषा विद्या)
- ब्रह्मचारी भैक्ष.ञ्चरति- निवेद्यँ लभते।। 4।।
- तिष्ठ-त्यह.श्शेषो भवति।। 5।। (अध.श्शयितः)
- व्रत.मिति सारस्वतम्।। 6।।
- अन्नं प्रजापति मपृच्छ-त्पृच्छामि त्वा.मिति- वामेति वा।। 7।।
- सर्वत्र दान.प्रतिग्रह.स्सोमया.ज्यपीतो भवति।। 8।। (सोमयाजी, अपीतः- अपि इतः आधिक्यन प्राप्तः)
- स खलुत एतं- प्रजापति.र्वा इद.मेकम्।। 9।।
- अह्नः~ क्षितयः।। 10।।
- पुरुषो वाऽय.मीश्वरोऽभिजायते।। 11।।
- अनाकाशीकरणञ्च।। 12।।
- चतुर्ऋचो भवति- य एवँ वेद- य एवँ वेद।। 13।। इति संहितोपनिषद्ब्राह्मणं संपूर्णम्।।---

# अथ वंशब्राह्मणम्

## प्रथमः खण्डः

- ❃..1 नमो ब्रह्मणे- नमो ब्राह्मणेभ्यो- नम आचार्येभ्यो- नम ऋषिभ्यो- नमो देवेभ्यो- नमो वेदेभ्यो- नमो वायवे च- मृत्यवे च- विष्णवे च- नमो वैश्रवणाय च।
- उपजायत- शर्वदत्ता-द्गार्ग्यात्।
- शर्वदत्तो गार्ग्यो- रुद्रभूते.र्द्राह्यायणात्।
- रुद्रभूति.र्द्राह्यायण-स्त्राता.दैषुमात्।
- त्रात ऐषुमतो- निगडा.त्पार्णवल्केः।
- निगडᳶ पार्णवल्कि-र्गिरिशर्मणᳵ काण्ठेविद्धेः।
- गिरिशर्मा काण्ठेविद्धि-र्ब्रह्मवृद्धे.श्छन्दोगमाहकेः।
- ब्रह्मवृद्धि.श्छन्दोगमाहकि- र्मित्रवर्चस. स्स्थैरकायनात्।
- मित्रवर्चा.स्स्थैरकायन-स्सुप्रतीता.दौलुन्द्यात्।
- सुप्रतीत औलुन्द्यो- बृहस्पतिगुप्ता.च्छायस्थेः।
- बृहस्पति.गुप्त.श्शायस्थि-र्भवत्राता.च्छायस्थेः।
- भवत्रात.श्शायस्थिᳵ- कुस्तुका.च्छार्कराक्षात्।
- कुस्तुक श्शार्कराक्ष- श्श्रवणदत्ता.त्कौहलात्।
- श्रवणदत्तᳵ कौहल- स्सुशारदा.च्छालङ्कायनात्।
- सुशारद श्शालङ्कायन- ऊर्जयत औपमन्यवात्।
- ऊर्जय.न्नौपमन्यवो- भानुमत औपमन्यवात्।
- भानुमा.नौपमन्यव- आनन्दजा.च्चान्धनायनात्।
- आनन्दज.श्चाऽन्धनायन- श्शाम्बा.च्छार्कराक्ष्या-त्काम्बोजा.च्चौपमन्यवात्।
- शाम्ब श्शार्कराक्ष्यᳵ- काम्बोज.श्चौपमन्यवो- मद्रगारा.च्छौङ्गायनेः।
- मद्रगार श्शौङ्गायनि- स्स्वाते.रौष्ट्राक्षेः।
- स्वाति.रौष्ट्राक्षि- स्सुश्रवसो वार्षगण्यात्।
- सुश्रवा वार्षगण्यᳶ- प्रात.रह्णा.त्कौहलात्।
- प्रातरह्णᳵ कौहलᳵ- केतो.र्वाद्यात्।

- केतु.र्वाद्यो- मित्रविन्दा.त्कौहलात्।
- मित्रविन्दः कौहल- स्सुनीथा.त्कापटवात्।
- सुनीथः कापटव- स्सुतेमनस. श्शाण्डिलायनात्।
- सुतेमना श्शाण्डिल्यायनो-ऽंशो.र्द्धानञ्जय्यात्।। 1।। ---

द्वितीय खण्डः

- ✻..2 अंशु.र्धानञ्जय्यो-ऽमावास्या.च्छाण्डिल्यायना-द्राधाच्च गौतमात्।
- राधो गौतमो- गातु.र्गौतमा.त्पितुः।
- गाता गौतम- स्सँवर्गजितो लामकायनात्।
- सँवर्गजि.ल्लामकायन- श्शाकदासा.द्भाडितायनात्।
- शाकदासो भाडितायनो- विचक्षणा.त्ताण्ड्यात्।
- विचक्षण.स्ताण्ड्यो- गर्द्दभीमुखा.च्छाण्डिल्यायनात्।
- गर्द्दभीमुख.श्शाण्डिल्यायन- उदरशाण्डिल्या.त्पितुः।
- उदर.शाण्डिल्यो-ऽतिधन्वनश्च शौनका-न्मशकाच्च गार्ग्यात्।
- मशको गार्ग्य- स्स्थिरका.द्गार्ग्या.त्पितुः।
- स्थिरको गर्ग्यो- वासिष्ठा.च्चैकितानेयात्।
- वासिष्ठ.श्चैकितानेयो- वासिष्ठा.दारेहण्या.द्राजन्यात्।
- वासिष्ठ आरेहण्यो राजन्य- स्सुमन्ता.द्बाभ्रवा.द्गौतमात्।
- सुमन्तो बाभ्रवो गौतम- श्शूषा.द्वाह्नेया.द्भारद्वाजात्।
- शूषो वाह्नेयो भारद्वाजो-ऽराला.द्दार्त्तेया.च्छौनकात्।
- अरालो दार्त्तेय श्शौनको- दृते.रैन्द्रोता.च्छौनका.त्पितुः।
- दृति.रैन्द्रोत.श्शौनक- इन्द्रोता.च्छौनका.त्पितु.रेव।
- इन्द्रोत श्शौनको- वृषशुष्णा.द्वातावतात्।
- वृषशुष्णो वातावतो- निकोथका.द्भायजात्यात्।
- निकोथको भायजात्यः- प्रतिथे.र्देवतरथात्।
- प्रतिथि.र्देवतरथो- देव.तरस.श्शावसायना.त्पितुः।
- देव.तरा श्शावसायन- श्शवसः पितु.रेव।
- शवा- अग्निभुवः काश्यपात्।

- अग्निभूः काश्यप- इन्द्रभुवः काश्यपात्।
- इन्द्रभूः काश्यपो- मित्रभुवः काश्यपात्।
- मित्रभूः काश्यपो- विभण्डका.त्काश्यपा.त्पितुः।
- विभण्डकः काश्यप- ऋष्यश्रृङ्गा.त्काश्यपा.त्पितुः।
- ऋष्यश्रृङ्गः काश्यपः- कश्यपा.त्पितु.रेव।
- कश्यपो-ऽग्नेः।
- अग्नि-रिन्द्रात्।
- इन्द्रो- वायोः।
- वायु-र्मृत्योः।
- मृत्युः- प्रजापतेः।
- प्रजापति-र्ब्रह्मणः।
- ब्रह्मा स्वयम्भूः।
- तस्मै नम-स्तस्मै नमः।। 2।। (तस्मै नम-स्तेभ्यो नमः)---

तृतीय खण्डः

- ❉..3 आचार्येभ्यो नमस्कृत्वा-ऽथ वंशस्य कीर्तयेत्। स्वधा पूर्वेषां भवति- नेताऽऽयु.दीर्घ.मश्नुते।- इत्युक्त्वाऽनुक्रामे-द्वंश.मा ब्रह्मणः।
- नय-न्नर्यम.भूतेः कालबवात्।
- अर्यमभूतिः कालबवो- भद्र.शर्मणः कौशिकात्।
- भद्रशर्मा कौशिकः- पुष्य.यशस औदव्रजेः।
- पुष्ययशा औदव्रजि- स्सङ्करा.द्गौतमात्।
- सङ्करो गौतमो-ऽर्यम.राधाच्च गोभिला-त्पूषमित्राच्च गोभिलात्।
- पूषमित्रो गोभिलो-ऽश्वमित्रा.द्गोभिलात्।
- अश्वमित्रो गोभिलो- वरुणमित्रा.द्गोभिलात्।
- वरुणमित्रो गोभिलो- मूलमित्रा.द्गोभिलात्।
- मूलमित्रो गोभिलो- वत्समित्रा.द्गोभिलात्।
- वत्समित्रो गोभिलो- गौल्गुलवी.पुत्रा.द्गोभिलात्।
- गौल्गुलवी.पुत्रो गोभिलो- बृहद्वसोः पितुः।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

- बृहद्वसु.र्गोभिलो- गोभिला.देव।
- गोभिलो- राधाच्च गौतमात्।
- समानं परं- समानं परम्।। 3।। ।। समाप्तमिदं वंश ब्राह्मणम्।।----

# तर्पणविधानम्

देवान् यथापूर्व न्तर्पयिष्यामः।अग्निस्तृप्यतु - ब्रह्मा- शोम- श्शिवः- प्रजापति- स्सवितेन्द्रो- बृहस्पति-स्त्वष्टा- विष्णु-र्यमो- वायु- रादित्य-श्चन्द्रमा- नक्षत्राणि सहदेवताभि- र्वसवो- रुद्रा- आदित्या- भृगवोऽङ्गिरस- स्साध्या- मरुतो- विश्वे देवा- स्सर्वे देवा- वाक्क- साध्या-श्चाऽऽप- श्चौषधय- श्चेन्द्राग्नी- धाता-ऽर्यमा- सार्धमासर्तवो- र्दिति- रदिति-रिन्द्राण्युमा- श्री- स्सर्वाश्च देवपत्न्यो- रुद्र- स्स्कन्द.विशाखौ- विश्वकर्मा- दर्शश्च- पौर्णमासश्च- चातुर्वैद्य- श्चातुर्होत्रैं- र्वैहारिकाः- पाकयज्ञा- स्स्थावरजङ्गमे- पर्वता- अशेषा भव्या- नद्य- स्समुद्रो-ऽपां पति- र्यजमाना- ये देवास्त्वेकादशका.स्त्रयश्च- त्रिंशच्च त्रयश्च- त्रीणि च शता.स्त्रयश्च- त्रीणि च सहस्राः। द्विपवित्र्या देवा.स्तृप्यन्ताम्। एकपवित्र्या देवा मनुष्यप्रभृतय.स्तृप्यन्ताम्। सङ्कर्षण.वासुदेवौ- धन्वन्तरि- स्साधुकार- उदर.वैश्रवण.पूर्णभद्र.मणिभद्रा- यातुधाना- रक्षांसीतरुगुणा- स्त्रैगुण्य- न्नामाऽऽख्यातोपसर्ग.निपाता- देवऋषयो- महाव्याहृतय- स्सावित्री-ऋचो- यजूंषि- सामानि- काण्डान्येषा.न्दैवतानि- प्रायश्चित्तानि- शुक्रियोपनिषद- श्शौकी- शुक- श्शाकल्यः- पाञ्चाल ऋषि- र्ऋचाभि- र्व्यासः पाराशर्य- स्तण्डी- कुकी- कौशिकी- वडवा- प्रातिथेयी- मैत्रायणी- दाक्षायणी- सर्वाऽऽचार्याः- कुलाऽऽचार्या गुरुकुल.वासिनः- कन्या- ब्रह्मचारी- आत्मार्थी- याज्ञवल्क्यः। पितृणां- पितामहानां- प्रपितामहानां- मातृणां- मातामहानां- प्रमातामहाना- माचार्याणां- प्राचार्याणां- संहिताकार- पदकार- सूत्रकार- ब्राह्मणकाराणां- ब्राह्मणाना.मनपत्यानां- ब्राह्मणीना.मेकपत्नीना.मनपत्यानां- सर्वेषाञ्च ब्रह्मचारिणां- सर्वेषाञ्च ब्रह्मचारिणाम्।

राणायन- सात्यमुग्रि- व्यासा- भागुरि- रौलुण्डी- गौल्गुलवि- र्भानुमा.नौपमन्यवः, दारालो गार्ग्य- स्सावर्णि- र्वार्षगण्यश्च ते दश। कुथुमिश्च- शालिहोत्रश्च- जैमिनिश्च- त्रयोदश। इत्येते सामगाऽऽचार्या - स्स्वस्ति कुर्वन्तु तर्पिता- स्स्वस्ति कुर्वन्तु तर्पिताः। शटि- बाल्लवि- कालववि-

ताण्ड्याश्च- वृषाणकश्च- रुरुकिश्च- शमबाहु- रगस्त्यो- बष्कशिराश्च- हूहूश्च दश। इत्येते प्रवचनकर्तार- स्स्वस्ति कुर्वन्तु तर्पिता- स्स्वस्ति कुर्वन्तु तर्पिताः।

अग्नि.स्तृप्यतु। ब्रह्मा- देवा- वेदा- ओङ्कार- स्सावित्री- यज्ञा- द्यावापृथिव्यहोरात्राणि- सङ्ख्या- स्समुद्राः~ क्षेत्रौषधि-वनस्पतयो- गन्धर्वाप्सरसो- नागा- यक्षा- रक्षांसि- भूताश्चैवानु मन्यन्ताम्। सुमन्तु- जैमिनि- विश्वामित्र- वसिष्ठ- पराशर- जालन्तु- बाहव- गौतम- शाकल्य- बाभ्रव्य- माण्डव्य- वडवा- प्रातिथेयी- चान्य आचार्या- स्तेभ्यश्च स्वधेति- तेभ्यश्च स्वधेति।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore